प्रज्ञापनाटीका हे पुस्तक ता॰ २३ अगष्ट सं॰ १८६७
रोजीं रा॰ उत्तमराम जोशी अमदाबादकर यांज
पासून खरेदी घेतलें असे॰

Another Copy
134

No 93

MEMORIAL

स०टी॥ ॥र्द०॥ ॐ नमः सर्वज्ञाय ॥ जयति नमदमरमुकुटप्रतिबिम्बच्छद्मविहितबहुरूपः । उद्धर्तुमिव समस्तं विश्वं भवपंकतो वीरः ॥ जिनवचना-
मृतजलधिं वंदे यद्बिंदुमात्रमादाय अभवन्नूनं सत्त्वा जन्मजराव्याधिपरिहीनाः ॥ प्रणमत गुरुपदपंकजमधरीकृतकामधेनुकल्पलतं यदुपास्ति-
वशान्निरुपममश्नुवते ब्रह्म तनुभाजः ॥ जडमतिरपि गुरुचरणोपास्तिसमुद्भूतविपुलमतिविभवः ॥ समयानुसारतोऽहं विदधे प्रज्ञापनाविवृतिं ॥ अथ प्रज्ञा-
पनेति कः शब्दार्थः उच्यते प्रकर्षेण निःशेषकुतीर्थितीर्थकरासाध्येन यथावस्थितस्वरूपनिरूपणलक्षणेन ज्ञाप्यंते शिष्यबुद्धावारोप्यंते जीवाजीवाद-
यः पदार्था अनयेति प्रज्ञापना इयं च समवायाख्यस्य चतुर्थांगस्योपांगं तदुक्तार्थप्रतिपादनात् उक्तप्रतिपादनमनर्थकमिति चेत् न अज्ञानामपि विस्त-
रेणाभिधानस्य मंदमतिविनेयजनानुग्रहार्थतया सार्थकत्वात् इदं चोपांगम । भिप्रायः सकलजीवाजीवादिपदार्थशासनात् शास्त्रं शास्त्रस्य चादौ प्रेक्षा-
वतां प्रवृत्त्यर्थं प्रयोजनादित्रितयं मंगलं च वक्तव्यमुक्तं च प्रेक्षावतां प्रवृत्त्यर्थं फलादित्रितयं स्फुटं मंगलं चैव शास्त्रादौ वाच्यमिष्टार्थसिद्ध-
य इति तत्र प्रयोजनं द्विधा परमपरं च पुनरेकैकं द्विधा कर्तृगतं श्रो- तृगतं च तत्र द्रव्यास्तिकनयमतपर्यालोचनायामागमस्य नित्यत्वा-
त् कर्तुरभाव एव तथा चोक्तमेषा द्वादशांगी न कदाचिन्नासीन्न कदाचिन्न भवति न कदाचिन्न भविष्यति ध्रुवा नित्या शाश्वतीत्यादि पर्यायास्तिक-
नयमतपर्यालोचनायां त्वनित्यत्वादवश्यंभावी तत्सद्भाव एव पर्यालोचना। यां तु सूत्रार्थोभयरूपत्वादागमस्यार्थापेक्षया नित्यत्वात् सूत्रापेक्षया चा-
नित्यत्वात् कथंचित्कर्तृसिद्धिः तत्र सूत्रकर्तुरनंतरं प्रयोजनं सत्त्वानुग्रहः परंपरं त्वपवर्गप्राप्तिः उक्तं च सर्वज्ञोक्तोपदेशेन यः सत्त्वानामनुग्रहं करोति दुःखत-
प्तानां स प्राप्नोत्यचिराच्छिवं तदर्थप्रतिपादकस्यार्हतः किं प्रयोजनमिति चेत् न किंचित् कृतकृत्यत्वात् प्रयोजनमंतरेणार्थप्रतिपादनप्रयासो निरर्थ-
क इति चेत् न तस्य तीर्थकरनामकर्मविपाकोदयप्रभवत्वात् उक्तं च तं च कहं वेइज्जइ अगिलाए धम्मदेसणाएउ इति श्रोतॄणामनंतरं प्रयोजनं
विवक्षिताध्ययनार्थपरिज्ञानं परंपरं पुनः श्रेयसावाप्तिः तथाहि विवक्षितमध्ययनमर्थतः सम्यगवगम्य संसाराद्विरज्यंते विरक्ताश्च संतः संसाराच्छिन्निर्जिगमिष-
वः संयमाध्वनि यथागमं सम्यक् प्रवर्तंते प्रवृत्तानां च संयमप्रकर्षवशात् उपजायते सकलकर्मक्षयात् श्रेयःसमवाप्तिरिति उक्तं च सम्यगवपरिज्ञा- १

नाद्विरक्ता भवतो जनाः क्रियासक्ता ह्यविघ्नेन गच्छंति परमां गतिमिति अभिधेयं जीवाजीवस्वरूपं तच्च प्राक्प्रदर्शितं न संबंधस्तु सामर्थ्यादवगतं संबं-
धो द्विधा उपायोपेयभावलक्षणो गुरुपर्वक्रमलक्षणश्च तत्राद्यस्तर्कानुसारिणः प्रति तद्यथा वचनरूपापन्नं प्रकरणमुपायस्तस्य परिज्ञानं चोपेयं गुरुपर्वक्रम-
लक्षणः केवलश्रद्धानुसारिणः प्रति तं चाग्रे सूत्रमेव स्वयं वक्ष्यति इदं च प्रज्ञापनाख्यमुपांगं सम्यग्ज्ञानहेतुत्वात् परंपरया मुक्तिपदप्रापकत्वा-
त् श्रेयोभूतमतो मा भूदत्र विघ्न इति विघ्नविनायकोपशांतये शिष्याणां मंगलबुद्धिपरिग्रहाय शास्त्रमंगलं तस्यादिमध्यावसानेषु मंगलमभिधीय-
ते आदिमंगलं ह्यविघ्नेन शास्त्रपारगमनार्थं मध्यमंगलमवगृहीतशास्त्रार्थस्थिरीकरणार्थमंतमंगलं शिष्यप्रशिष्यपरंपरया शास्त्रस्याव्यवच्छेदार्थं उक्तं
च तं मंगलमाईए मज्झे पज्जंतए य सत्थस्स पढमं सत्थाविग्घपारगमणा ए निद्दिट्ठं तस्सेव य थेज्जत्थं मज्झिमयं अंतिमं पि तस्सेव अव्वोच्छि-
त्ति निमित्तं सिस्सपसिस्साइवंसस्स तत्र प्रथमपदगतं ववगयजरम रणभए इत्यादिनायं ग्रंथेनादिमंगलमिष्टदेवतास्तवरूपं परममंगल-
त्वात् उपयोगपदगतं कइविहे णं भंते उवओगे पन्नत्ते इ त्यादिना मध्यमंगलमुपयोगस्य ज्ञानरूपत्वात् ज्ञानस्य च कर्म-
क्षयं प्रति प्रधानकारणत्वात् तस्य च सिद्धत्वसाक्षादनागमेऽभिधाना त् तथा चागमः जं अन्नाणी कम्मं खवेइ बहुयाइं वासकोडी-
हिं तं नाणी तिहिं गुत्तो खवेइ ऊसासमेत्तेणं तथा समुद्घातपदगतं। ना केवलिसमुद्घातपरिसमाप्त्युत्तरकालभाविना सिद्धाधिकारप्रतिबद्धे-
न छिन्नसव्वदुक्खा जाइजरामरणबंधणविमुक्का सासयमव्वाबाहं चिट्ठंति सुही सुहं पत्ता इत्यादिनावसानमंगलं तत्रादिमंगलसूत्रं व्याख्यायते ववगया-
त्यादि सितं बद्धमष्टप्रकारं कर्मेंधनं ध्मातं दग्धं जाज्वल्यमानशुक्लध्यानानलेन यैस्ते निरुक्तविधिना सिद्धाः अथवा षिधु गतौ सेधंति स्म अपुनरावृ-
त्त्या निर्वृतिपुरीमगमन् यदि वा षिधु संराद्धौ सिध्यंति स्म निष्ठितार्था भवंति स्म यद्वा षिधू शास्त्रे मांगल्ये च सेधंति स्म शासितारोऽभवन् मंगल्यरूप-
तां चानुभवंति स्मेति सिद्धाः अथवा सिद्धाः नित्या अपर्यवसानस्थितिकत्वात् प्रख्याता वा भव्यैरुपलब्धगुणसंदोहत्वात् उक्तं च ध्मातं सितं येन पुराणक-
र्म यो वा गतो निर्वृतिसौधमूर्ध्नि ख्यातोऽनुशास्ता परिनिष्ठितार्थो यः सोऽस्तु सिद्धः कृतमंगलो मे सिद्धत्वमामादिसदवताः तत्कक्षेततायामा

Digitized with financial assistance from the
Government of Maharashtra
on 11 June, 2017

प्रज्ञापनवृत्तिः। रूपमिद्धप्रतिपत्त्यर्थं विशेषणमाह व्यपगतजरामरणभयान् जरा वयोहानिलक्षणा मरणं प्राणत्यागरूपं भयमिहलोकादि सप्तप्रकारं तत्रै-
च इहपरलोगादाणमकम्हा आजीवमरणमसिलोए इति विशेषणतोऽनन्तवत्त्वतयाऽपगतानि परिभ्रष्टानि जरामरणभयानि येभ्यस्ते तथा तान्
त्रिविधेन मनसा वाचा कायेन च तेन योगत्रयव्यापारविकलं इत्थं वंदनमित्याह अभिमुख्येन वंदित्वा प्रणम्येत्यर्थः अनेन समानकर्तृकतया पूर्वकाले
क्त्वाप्रत्ययविधानात् नित्यानित्यैकांतपक्षव्यवच्छेदमाह एकांतनित्यानित्यपक्षे क्त्वाप्रत्ययस्यासंभवात् तथा ह्येकांतनित्यत्वे स्थिरैकस्वभावतया नित्यं तस्य
कथं भिन्नकालक्रियाद्वयकर्तृत्वोपपत्तिः कालभेदेन स्वभावभेदे नैकस्वभावस्यास्य क्रियायाः सदाभावप्रसंगात् अनित्यमपि प्रतिक्षणस्थितधर्म-
कं ततस्तस्यापि भिन्नकालक्रियाद्वयकर्तृत्वायोगात् अवस्थानाभावादिति । विनाशेनान्वयस्याविवर्तितत्वात् क्त्वाप्रत्ययस्योत्तरक्रियासापेक्षत्वादुत्तरक्रि-
यासापेक्षत्वादुत्तरक्रियामाह वंदे जिनवरेंद्रमित्यादि शूरवीर विक्रां। वीरयति स्म कषायादिशत्रून् प्रति विक्रामति स्मेति वीरः म-
हांश्चासौ वीरश्च महावीरः इदं च महावीर इति नाम मनयाह द्विकं। किं च यथावस्थितमनन्तसामर्थ्यं परीषहोपसर्गादिविषयवीर्य-
मपश्चाद्भागरूरकृतं उक्तं च अयले भयभेरवाणं खंतिखमे परीसहोवसग्गाणं देवेहिं कए महावीरे इति अनेनापायापगमातिशयो-
क्तात् तं कथंभूतमित्याह जिनवरेंद्रं जयंति रागादिशत्रूनिति जिनाः ते च चतुर्विधाः श्रुतजिना अवधिजिना मनःपर्यायजिनाः केव-
लिजिनाश्च तत्र केवलिजिनास्तत्र केवलिजिनत्वप्रतिपत्त्यर्थं वरग्रहणं जिनानां वराः प्रधानाः तत्त्वज्ञानावरणाभावतः केवलज्ञानकलितत्वात् जिनान-
वरास्तेषां तीर्थंकरा अपि मतः सामान्यकेवलिनामेवं तितत्तीर्थंकरत्वप्रतिपत्त्यर्थमिंद्रग्रहणं जिनवराणामिंद्रो जिनवरेंद्रः प्रकृष्टपुण्यस्कंधरूपतीर्थंकरनामक-
र्मोदयात्तीर्थंकर इत्यर्थः अनेन ज्ञानातिशयं पूजातिशयं वाह ज्ञानातिशयमंतरेण जिनेषु मध्ये जनमत्वं पूजातिशयमंतरेण जिनवराणामपि मध्ये इंद्र-
स्यायोगात् पुनः किंभूतमित्याह त्रैलोक्यगुरुं गृणाति यथावस्थितं प्रवचनार्थमिति गुरुः त्रैलोक्यस्य गुरुः त्रैलोक्यगुरुः स भगवान् अधोलोकनिवासि-
भवनपतिदेवस्य तिर्यग्लोकनिवासिव्यंतरनरपशुविद्याधरज्योतिष्कस्य ऊर्ध्वलोकनिकायदेवस्य धर्मदेशकत्वात् अनेन वचनातिशयमाह एवं चापायापग- २

मातिशयादयश्चत्वारोऽप्यतिशयाद्वृत्तेगंधादीनामतिशयानामुपलक्षणं तदंतरेणैव दोषाभावसंभवात् ततः अर्हद्भिरादतिशयोपेतं भगवंतं महा-
वीरं वंदे इत्यक्षरार्थः आह ननु कृतार्थत्वादीनत्वदस्य किमर्थं भगवतो महावीरस्य वंदनं उच्यते वर्धमानतीर्थाधिपतित्वेनासन्नोपकारित्वान्नन्दवासन्नो-
पकारित्वं दर्शयति च स्तुतेर्यपत्यादिखे उपानित विशेष्यविशेषणसामानाधिकरण्ये न वैयधिकरण्येन च विशेषणं जिनवरेंद्रमिति जिनाः सामा-
न्यकेवलिनस्तेषामपि वरः प्रधानस्तीर्थकृत्वात् जिनवरस्तेन सामर्थ्यादिमहावीरेणान्यस्य वर्धमानतीर्थाधिपतित्वाभावात् इंद्र इव उच्चैःस्थितिगणसोऽहं जिना-
पेक्षया सामान्यकेवलिनोऽपि जिनवराश्च्यातितत्सक्तेपसंज्ञामाहिनयन्न इति तीर्थकृत्वप्रतिपत्त्यर्थमिंद्रविशेषणांतरमाह भगवतो भगः समग्रै-
श्वर्यादिरूपः उक्तं च ऐश्वर्यस्य समग्रस्य रूपस्य यशसः श्रियः धर्म- स्याथ प्रयत्नस्य षण्णां भग इतीगना सोऽस्यास्तीति भगवान् अतिशाय-
ने वंप्रत्ययः अतिशायी च भगवान् वर्धमानस्वामिनः शासनप्राणि- णापेक्षया त्रैलोक्याधिश्वितत्वात् तेन भगवता परमार्हंत्यमहिमो-
पेतेनेत्यर्थः पुनः कथंभूतेनेत्याह भव्यजननिर्वृतिकरेण भव्या विधिनादिपारिणामिकभावात् सिद्धिगमनयोग्याः स-
चासौ जनश्च भव्यजनः निर्वृतिर्निर्वाणं सकलकर्ममलापगमः तेन सुखरूपस्वरूपलाभतः परमस्वास्थ्यं तदिह सम्यग्दर्शनाद्यपि
कारणे कार्योपचारात् निर्वृतिस्तत्करणशीलो निर्वृतिकरः भव्यजना- स्य निर्वृतिकरो भव्यजननिर्वृतिकरस्तेन आह भव्यग्रहणमनर्थकं सद-
र्थमन्यथा तस्यानेकार्थत्वप्रसंगात् ततः इदमापतितं भव्यानामेव सम्यग्दर्शनादिकं करोति नाभव्यानामिति तत उपपन्नं भगवतो वीतरागद्वेषपक्षपा-
तासंभवात् नैतत्सारं सम्यक्तत्त्वस्तत्त्वापरिज्ञानात् भगवान् हि सवितृप्रकाशमविशेषेण प्रवचनार्थमाचष्टे केवलमभव्यानां तथास्वाभाव्याद-
वतामसरवेगकलानामतिवेश्यार्थप्रकाशानप्रवचनार्थोऽपि दिशपमानोऽपि न उपकाराय प्रभवति तथा चाह वादिमुख्यः सद्धर्मबीजवपनानघकौश-
लस्य यल्लोकबांधव तवापि खिलान्यभूवन् तन्नाद्भुतं खगकुलेष्विह तामसेषु सूर्यांशवो मधुकरीचरणावदाताः तत्ताभव्यानामे-
व भगवद्वचनानुपकारोऽजायत इति भव्यजननिर्वृतिकारेणेत्युक्तं किमित्याह उवदंसिया इति उपसामीप्येन यथावस्थापनाकृति यथावस्थित-

सूत्रनावबोधो भवति तथा स्फुटं वचनं तेत्यर्थः दर्शिता श्रवणगोचरं नीता उपदिष्टा इत्यर्थः कासौ प्रज्ञापना प्रज्ञाप्यंते प्ररूप्यंते जीवादयो भावा अन
याशब्दं समस्त्या इति प्रज्ञापना किं विशिष्टेत्यत आह श्रुतरत्ननिधानं इह रत्नानि द्विविधानि भवंति तद्यथा द्रव्यरत्नानि भावरत्नानि च द्रव्यरत्नानि इंद्रनीलादीनि भावरत्नानि श्रुतज्ञानादीनि तत्र द्रव्यरत्नानि नगादिकानीति भावरत्नैरिहाधिकारः श्रुतमेव समासः श्रुतान्यत्र रत्नानि श्रुतानि रत्नानि च तानि
श्रुतानि रत्नानीवेति कृत्वा इतिवन्नचयात्थ्र समपाद श्रुतरत्नानि निक्षेपोऽईत्यरत्नैरिहाधिकारात् द्वितीयपक्षे श्रुतानां नामेवता विकरत्नत्वात् तत्परत्नेन
पमायाश्रयोगात्त्रिधानमिव निधानं श्रुतरत्ननिधानं किं रूपा प्रज्ञापनेत्यत आह सर्वभावानां सर्वभावानामिवं सर्वभावः जीवाजीवाश्रवबंधसंवरनिर्जरामो
क्षाः तथाह्यस्यां प्रज्ञापनायां षट्त्रिंशत्पदानि तत्र प्रज्ञापनाबहुवक्तव्य विशेषवस्त्रमपश्चिमसमुद्घातपदेषु जीवाजीवानां प्रज्ञापना प्रयो
गपदक्रियापदयोरास्रवस्य कायवाङ्मनःकर्मयोगाश्रव इति वचन ात् कर्मप्रकृतिपदे बंधस्य समुद्घातपदे केवलिसमुद्घातस्वरूप
णायां संवरनिर्जरामोक्षाणां एवमाद्युक्तमात्रादिषु पदे
शकविशेषवदिति अथवा सर्वभावानामिति इह ध्युक्त्वा
लभावानामनत्वमतिरेकेण नास्य प्रज्ञापनीयस्याभावात् तत्र प्र
ज्ञापनाख्ये न पदे जीवाजीवानां स्वरूपज्ञापनात् शेषपदेषु जीवाजीवद्व्याणां प्र
ज्ञापनाख्यानपदे जीवास्यासंख्येयस्थितिपदे नारकादि स्थितिनिरूप ण
ताकालस्यावायदेषु संख्याज्ञानादिपर्यायविषु क्रारुष्टक्वासादीनां भावा
नामिति अस्या अपि गाथायाः अक्षरगमनिका यदिवि चेत्यनयागाथया मंगलाभिसंबंधक वक्तव्ये च मंगलादीपं दर्शनात् द्वितीयगाथा
शिवादस्याद्यक्षनीत्तमस्य काराई इति तत्र मक्कारविषयमिदं मणितपालवाच्यक्रतंकं गाथाद्वयं वायगवरवंसाउ इत्यादि वाचकाः पूर्वविदः वाचकाः पूर्व
विदः वाचकास्तेषां वराः प्रधानाः तेषां वंशः प्रवाहो वाचकवरवंशस्तस्मिन् वा पंचमी निर्देशः प्राकृतत्वात् प्राकृते हि सर्वासु विभक्तिषु स्थाने सर्वा अ
पि विभक्तयो यथायोग्यं प्रवर्तंते तथा चाह पाणिनिः स्वप्राकृतव्याकरणे व्यत्ययोप्यासामिति व्यावितिर्थिति नाम त्रयोविंशतितमः श्रीवर्धमानस्वामिन आरभ्य भगव
तार्यश्यामः स एव विशेषयति सर्वक किंभूतं तद्धीरपुरुषाणामी क्षं शिष्टया राजते इति धीरः धीरश्चासौ पुरुषश्च श्रीदान्तया द्वितीय पदानि प्राणातिपातादिनिवृ

त्तिलक्षणानि पंचमहाव्रतानि धारयतीति इह च समासः ततस्तान्पूर्णतः तत्राशुद्धिकालान् संपूर्णानि तिष्ठतीति विशिष्टं संवित्तम ईत्यर्थः ततः कथं भूत
मेतावता पूर्वश्रुतसमृद्धबुद्धिनां पूर्वाणि चतुर्दशश्रुतं सर्वश्रुतं तैः समृद्धा प्रवृद्धा बुद्धिर्यस्य पूर्वश्रुतसमृद्धबुद्धिस्तेन आर्यश्यामेन वाचकवरवंशात्र
तः सर्वश्रुतसमृद्धबुद्धिरित्यवभवति ततः किं प्रवचन विशेषणेन सत्यमेतत् किंतु पूर्वविदोपि षट्स्थानकपतिताः भवंति तथा च वक्ष्यमाणपूर्वविदामपि
मति गविकल्पाः षट्स्थानकं वक्ष्यति ततः अधिकार इह सर्वार्थमिदं विशेषणमित्यदोषः समित्येव श्रीणि तानि एव गणानि प्रसरं स्वबुद्धिः शब्दस्य दीर्घतादाय
वात् यथा श्रुतसमृद्धिः कारणं व श्रुतलाभितस्व श्रुतसागरमागरइव श्रुतसागरः श्रात्रादिलिंगोपेतः स्वगुणानुस्क्षाविति समासः तस्मात् विगृह्णाति
देशोवच्च तस्मिन्तस्मात् श्रुतकालीन श्रुतसमुद्रात् योगं पीत इत्यर्थः येनेदं प्र ज्ञापनाख्यं श्रुतरत्नमुत्तमं प्रधानं भवभवत्येवं श्रुतरत्नापेक्षया
किंभूतमुत्पत्तः दत्तं शिष्यगणाय तस्मै भगवते आर्याय धर्मं दिशत आ राज्यसर्वत्रिदश्यापसत्योक्तः प्राग्गुणोपेतस्वार्थः सवासो श्यामा
श्च आर्यश्यामस्तस्मै नमस्कारोस्तु सर्वसवत्र प्रवर्तनात् इत्ययं तु विनयाय त्रत्र इत्युत्तमीति वचनात् अधिकारस्य संबंधस्य गाथा
अध्ययनमित्यादि अध्ययनमिदं प्रज्ञापनाख्यं तस्यादीनि अध्ययनं किमि। तस्मादावत्र्यो योगस्यापन्यासो न क्रियते उच्यते नायमि
या माया दवप्रमध्ययनादा स्वाक्यप्रमाहस्पन्यासः क्रियत इति आदाविकृतः। अवसीयते इति वचनात्ततं प्रध्ययनादिषु दर्शनात् तथा चित्रार्थं
धिया प्रयुक्तम् आश्रित्य श्रुतमेव रत्नं श्रुतरत्नं दृष्टिवाद स्याद दृष्टिवादस्य निष्पंद इव दृष्टिवाद निष्पंदः सात्र नपुंसकता निर्देशः प्राकृतत्वात् यथा वर्णितं
तथा वक्ष्यामः भगवान्वीरवर्धमान स्वामिना इह इति प्रवृत्ति नाम अध्ययनार्थस्य समर्पितत्वात् अध्ययनं च मितमित्यक्षं अहमपि तथा वर्णयिष्यामि आह कथम
स्य श्रुतस्य तथा वर्णयितुं शक्तिरिति दोषः सामान्यतो निर्धारितपदार्थवर्णना मात्रमपेक्ष्य सितत्वात् निष्पन्नाः तथा च अहमपि तथा वर्णयिष्यामीति किमुक्तं
भवति तदनुसारेण वर्णयिष्यामि नत्वमनीषिकयेति अस्यां च प्रज्ञापनायां षट्त्रिंशत् पदानि भवंति पदं प्रकरणमर्थाधिकार इति पर्यायाः तानि च पदान्यभि
ति उ पणवणा ठाणाइ गाथा चतुष्टयं तत्र प्रथमं पदं प्रज्ञापनाविषयं प्रथमपद्यैरुक्तं प्ररूपणमात्रा प्रज्ञापना १ पदं द्वितीयं स्थानानि २ तृतीयं बहुवक्तव्यं ३ च

उर्थस्थितिः ४ पंचमं विशेषः ५ षष्ठं व्युत्क्रान्तिलक्षणार्थाधिकारयुक्तत्वात् ६ सप्तममुच्छ्वासः ७ अष्टमं संज्ञा ८ नवमं योनिः ९ दशमं चरमा(णि)
चरमाणीति प्रश्नरूपप्रवृत्तत्वात् १० एकादशं भाषा ११ द्वादशं शरीरं १२ त्रयोदशं परिणाम १३ चतुर्दशं कषायः १४ पंचदशमिन्द्रियं १५ षोडश-
प्रयोगः १६ सप्तदशं लेश्या १७ अष्टादशं कायस्थितिः १८ एकोनविंशतितमं सम्यक्त्वं १९ विंशतितममंतक्रिया २० एकविंशतितममव-
गाहनासंस्थानं २१ द्वाविंशतितमं क्रिया २२ त्रयोविंशतितमं कर्म २३ चतुर्विंशतितमं कर्मणो बंधकः कस्मिन् हि यथा जीवः कर्मणो बंध-
को भवति तथा प्ररूप्यत इति तन्नामा नाम २४ पंचविंशतितमं कर्मवेदकः २५ षड्विंशतितमं वेदस्य बंधक इति वेदयते अनुभवतीति वेद-
स्य बंधो वेदबंधकः किं प्रकृतीर्भवतीति कति प्रकृतीर्वेदमानस्य कति प्रकृती। तावंत्य भवतीति तत्र निरूप्यते तस्य वेदस्य बंध इति नाम २६
एवं कां प्रकृतिं वेदयमानः कति प्रकृतीर्वेदयति इत्यर्थप्रतिपादकं वेद वेदकं नाम सप्तविंशतितमं २७ अष्टाविंशतितममाहारप्रति-
पादकत्वादाहारः २८ एकोनत्रिंशत्तममुपयोगः २९ त्रिंश त्तमं पासणय त्ति दर्शनता ३० एकत्रिंशत्तमं संज्ञा ३१ द्वात्रिं-
शत्तमं संयमः ३२ त्रयस्त्रिंशत्तममवधिः ३३ चतुस्त्रिंशत्तमं प्रविचारण ३४ पंचत्रिंशत्तमं वेदना ३५ षट्त्रिंशत्तमं समुद्घातः ३६ तान्(द)
वस्तूपन्यस्तानि पदानि संप्रति यथाक्रमं पदगतानि सूत्राणि व्याख्यानयितव्यानि तत्र प्रथमपदगतमादिसूत्रं से किं तं पण्णवणा इति अस्य सूत्रस्य कः
प्रस्तावः उच्यते प्रश्नसूत्रमिदमनन्तरमादावुपन्यस्तमिदं ज्ञापयति प्रेक्षितामध्यस्थस्य बुद्धिमतां शिष्याणां भगवदर्हदुपदिष्टतत्त्वप्ररूपणा कार्या नान्यथा
स्य तस्मात् वाक्यं मध्यस्थो बुद्धिमानर्थी श्रोता पात्रमिति स्मृतः तत्र मध्यस्थो ह्यमार्गधर्मदेशाभिनिवेशितया तत्त्वज्ञात्युर्यं प्रश्नवाक्यापन्यासादिः किमिति
परप्रश्नं तिलावदिति द्रष्टव्यं तथा क्रमोपायाततत्त्वज्ञस्य संप्रदायार्थः तिष्ठत्रुत्थानादीनि पृष्टव्यानि वाचः क्रमविभिज्ञान् प्रज्ञापनानं तत्र चातस्मात्तुपन्य-
स्तत्वात् तत्र तेनावदेवतान् प्रश्नाभिः किं प्रज्ञापनेति अथवा प्राकृतशैल्या अभिधेयवल्लिंगवचनानि योजनीयानीति न्यायाद्वेदं द्रष्टव्यं तत्र कानाम
प्रज्ञापनेति एवं सामान्येन केनचित्प्रश्ने कृते समतिरगावान् गुरुः शिष्यवचनानुरोधेनादरात् किं विशिष्यातिप्रतिक्रियते एवमेव दुर्विज्ञाय ४

प्यज्ञा इति अनेन चापृष्टोत्तरव्याख्यानिषेधेन निर्वचनसूत्रेणैतदावेदितं सर्वमेव सूत्रं गणधरनिर्वचनरूपं किंतु किंचिदन्यथापि वा जल्पनस्तुतया
रूपं यतस्तु क्तं अत्थं भासइ अरहा सुत्तं गंथंति गणहरा निउणं इत्यादि तत्र प्रज्ञापनेति पूर्ववत् द्विविधा द्विप्रकारा प्रज्ञप्ता प्ररूपिता यदा तीर्थकरा
एवमिति भगवान् सूरिरायमर्थः वा स्वयोः तेषां पीठकतेयदा पुनस्त्वः कश्चिदाचार्यस्तन्मतानुसारी तदा तीर्थकरगणधरैरिति द्वैविध्यमेवाह
चियति तं जहा जीवपण्णवणा य अजीवपण्णवणा य तत्र तिष्ठन्ति वक्ष्यमाणेन सदकचनप्रकाशनार्थः जीवंति प्राणान् धारयंतीति जीवाः प्राणाश्च द्वि-
धा द्रव्यप्राणाश्च द्विधा द्रव्याणि भावप्राणाश्च तत्र द्रव्यप्राणा ज्ञानादीनि द्रव्यप्राणैरपि प्राणिनः संसारसमापन्ना नारकादयः केवलभावप्राणैः प्रा-
णिनो व्यपगतसमस्तकर्मसंगाः सिद्धाः जीवानां प्रज्ञा जीवप्रज्ञापना न जीवा अजीवा जीवविपरीतरूपा धर्माधर्मास्तिकायपुद्गला-
स्तिकायाः ह्रासमयरूपा तेषां प्रज्ञापना अजीवप्रज्ञापना चकारो द्वयोरपि प्रधान्यख्यापनार्थौ नचैव स्त्रिवान्यतरस्याः प्रज्ञापनाया
गुणभावः एवं सर्वत्रापि चकारगमनिका कार्या तदेवं सामान्येन प्रज्ञापनाद्वयमुपन्यस्य संप्रति विशेषत्रुरूपावगमार्थमादाव-
ल्पवक्तव्यत्वादजीवप्रज्ञापनाप्रतिपादयिषुः शिष्यं प्रश्नसूत्रमाह से किं तं अजीवपण्णवणा अथ किं तदजीवप्रज्ञापनेति
अथवा का सा अजीवप्रज्ञापना सूरिराह अजीवपन्नवणा दुविहा पन्नत्ता तंजहा इत्यादि अजीवप्रज्ञापना द्विविधा प्रज्ञप्ता तद्यथा रूप्यजी-
वप्रज्ञापना च अरूप्यजीवप्रज्ञापना च रूपमेषामस्तीति रूपिणः रूपग्रहणं गंधादीनामुपलक्षणं तद्व्यतिरेकेण तस्यासंभवात् तथा हि प्रतिपरमाणुरूपर-
सगंधस्पर्शाः उक्तं च कारणमेव तदंत्यं सूक्ष्मो नित्यश्च भवति परमाणुः एकरसगंधवर्णो द्विस्पर्शः कार्यलिंगश्च तस्माद्व्यतिरेकः परस्परं रूपादीना-
मिति अथवा रूपं नाम स्पर्शरूपादिसंमूर्छनात्मिका मूर्त्तिः सदेषामस्तीति रूपिणः रूपिणश्च ते अजीवाश्च रूप्यजीवास्तेषां प्रज्ञापना रूप्यजीवप्रज्ञापना
पुद्गलस्वरूपा जीवप्रज्ञापनेति यावत् पुद्गलानामेव रूपादिमत्वात् रूपिव्यतिरेकेणारूपिव्यतिरेकेण रूपिणां धर्मास्तिकायादयस्ते च ते अजीवाश्च
अरूप्यजीवास्तेषां प्रज्ञापना अरूप्यजीवप्रज्ञापना च शब्दौ प्राग्वत् तत्राल्पवक्तव्यत्वात्प्रथमतोऽरूप्यजीवप्रज्ञापनाविकीर्षुरिदमाह से किं तमित्यादि

प्रज्ञा०वृत्तिः॥

सेआहारः सूत्राक्षरार्थः अथ का सा अरूप्यजीवप्रज्ञापनेति सूरिराह अरूप्यजीवप्रज्ञापना दशविधा दशाकारा प्रज्ञप्ता अरूप्यजीवानां दशविधत्वात् तत्प्ररूपणापि द-
शविधोक्ता तद्दशविधत्वं दर्शयति तंयथेत्यादि तद्यथेति वक्ष्यमाणालापकसूचनार्थः तत् दशविधत्वं यदि वा तदित्यव्ययं सर्वलिंगवाचकमेत
सा दशविधा अरूप्यजीवप्रज्ञापना यथा भवति तथा दर्शयति धर्मास्तिकाय इति जीवानां पुद्गलानां च स्वाभाविकगतिपरिणामपरिणतानां तत्स्वभावधरणात् धर्म-
स्तथा परिणामधर्मः अस्तय इह प्रदेशास्तेषां कायः संघातः गणकायनिकायस्कन्धवर्गराशय इति वचनात् अस्तिकायः प्रदेशसंघात इत्यर्थः धर्मश्चासौ
अस्तिकायश्च धर्मास्तिकायः अनेन च सकलमेव धर्मास्तिकायरूपमवयविद्रव्यमाह अवयवी च नाम अवयवानां तथारूपः संघातपरिणामविशेषप
वन्न पुनरवयवद्रव्येभ्यः पृथगर्थान्तरं द्रव्यं तथानुपलम्भात् तत्तथैव च वृद्धाः। आतानवितानरूपसंघातपरिणामविशेषमापन्नास्तन्तव एव पटव्यपदेशभा-
जउपलभ्यन्ते न तदतिरिक्तः पटाख्यो नाम उक्तं चान्यैरपि तन्त्वादिव्यति रेकेण न पटाख्यो नाम उक्तं चान्यैरपि तन्त्वादिव्यतिरेकेण न पटाद्युप-
लम्भनं तन्त्वादयो विशिष्टा हि पटादिव्यपदेशिनः कृतं प्रसंगे नात्र चिन्तितं वादे तद्वादस्य तथा धर्मास्तिकायादेशा इति तस्यैव
धर्मास्तिकायस्य बुद्धिकल्पिता द्व्यादिप्रदेशात्मका विभागा धर्मा- स्तिकायस्य प्रदेशा इति धर्मास्तिकायस्य प्रदेशा इति प्रकृष्टा देशाः प्र-
देशा निर्विभागा भागा इति भावस्ते चासंख्येया लोकाकाशप्रदेशप्र- माणत्वात् अत एव बहुवचनं धर्मास्तिकायप्रतिपक्षभूतोऽधर्मास्तिका-
यः किमुक्तं भवति जीवपुद्गलानां स्थितिपरिणामपरिणतानां तत्परिणामोपष्टम्भकोऽमूर्त्तः असंख्यातप्रदेशसंघातात्मकोऽधर्मास्तिकायः अधर्मास्ति-
कायस्य देशा इत्यादि पूर्ववत् तथा आ इति मर्यादया स्वस्वभावापरित्यागरूपया काशते स्वरूपेणेति भासते स्वनुव्यवस्थितपदार्था इत्याकाशं
यदा वाभिविधावाङ् तदा आ इति सर्वभावाभिव्याप्त्या काशत इत्याकाशं अस्तयः प्रदेशास्तेषां कायोऽस्तिकायः आकाशं च तत् अस्तिकायश्च आकाशा-
स्तिकायः आकाशास्तिकायस्य देशा इत्यादि प्राग्वत् नवरं प्रदेशा अनन्ता द्रष्टव्याः आलोकस्यानन्तत्वात् अद्धा इति कालस्याख्या अद्धा चा-
सौ समयश्च अद्धासमयः अथवा अद्धायाः समया निर्विभागा भागाः अयं चैक एव वर्त्तमानः परमार्थतः सन् नातीतानागताः समयास्तेषां यथाक्रमं विनष्टानुत्पन्न- ५

त्वेनासत्त्वात् ततः कायत्वाभावादिति देशप्रदेशकल्पनाविरहः आवलिकादयस्तु पूर्वसमयनिरोधेनोत्तरसमयसद्भाव इति ततः समुदयसमित्याद्यसं-
भवेनाव्यवहारार्थमेव कल्पिता इति द्रष्टव्यं अथामीषामिह कस्मोपन्यासः किं प्रयोजनमुच्यते इह धर्मास्तिकाय इति पदं मंगलभूतमादौ धर्मशब्दो-
च्चितत्वात् पदार्थप्ररूपणा च संप्रति प्रथमतश्च क्रियावर्त्तते ततो मंगलार्थमादौ धर्मास्तिकायस्योपादानं धर्मास्तिकायप्रतिपक्षभूतश्चाधर्मास्ति-
काय इति तदनन्तरमधर्मास्तिकायस्य द्वयोरपि चानयोराधारभूतमाकाशमिति तदनन्तरमाकाशास्तिकायस्य ततः पुनरजीवसाधर्म्यादद्धासमय-
स्य अथवा इह धर्माधर्मास्तिकायौ विश्लव्यवस्थापकौ तत्सिद्धिरुक्तमामस्य तो जीवपुद्गलानामस्खलितप्रचारप्रवृत्तो लोकालोकव्यवस्थानुपपत्तेरस्ति
च लोकालोकव्यवस्था तत्र प्रदेशव्यवस्थाऽऽकाशविशेषाभावात् तथा यावति क्षेत्रे धर्माधर्मावगाढो लोकः शेषस्त्वलोक इति सिद्धं उक्तं
च धर्माधर्मविरहितः सर्वत्रजीवपुद्गलविचारात् नालोकः कश्चित्। स्यान्नवसत्त्वमेतदार्याणां तस्माद् धर्माधर्मावगाढो व्या-
प्यलोकस्य सर्वत्रैवं हि परिक्षिप्तः सिद्धमिति लोकस्तद्विभुत्वात्। ततः एवं लोकालोकव्यवस्थाहेतू धर्माधर्मास्तिकायाविति
त्वनयोरादावुपादानं तत्रापि मंगलत्वादादौ धर्मास्तिकायस्य ॥तत्प्रतिपक्षत्वात् ततोऽधर्मास्तिकायस्य ततो लोकालोक-
व्यापित्वादाकाशास्तिकायस्य तदनन्तरं लोके समयासमयक्षेत्रव्यवस्था कारित्वादद्धासमयस्य एवमागमानुसारेणान्यदपि युक्तमुत्प्रेक्ष्य-
व्यमित्यलं प्रसंगेन प्रकृतमुपसंहरन्नाह सेत्तं अरूविअजीवपन्नवणा सेयमरूप्यजीवप्रज्ञापना उक्ता इदानीं रूपिअजीवप्रज्ञापनामाह से किं तमित्यादि अथ का
सा रूप्यजीवप्रज्ञापना सूरिराह रूप्यजीवप्रज्ञापना चतुर्विधा प्रज्ञप्ता तद्यथा स्कन्धाः स्कन्दन्ति शुष्यन्ति धीयन्ते च पुद्गलानां विघटनेन चटनेन चेति स्कन्धाः
पृषोदरादय इति रूपनिष्पत्तिः अत्र बहुवचनं पुद्गलस्कन्धानामनन्तत्वख्यापनार्थं तथा चानन्ताः स्कन्धा उपपन्ना आगमे निर्दिष्टा नानन्तत्वाभावबहूनाति दव्वओ णं पोग्गलत्थिका-
ए इत्यादि स्कन्धदेशाः स्कन्धानामेव स्कन्धत्वपरिणाममजहतां बुद्धिकल्पिता द्व्यादिप्रदेशात्मका विभागाः अत्रापि बहुवचनमनन्तप्रदेशिके स्कन्धे तथाविधै-
कस्कन्धेषु प्रदेशानामनन्तत्वसंभावनार्थं स्कन्धानां स्कन्धत्वपरिणामपरिणतानां बुद्धिपरिकल्पिताः प्रकृष्टा देशा निर्विभागा भागाः परमाणव इत्यर्थः स्कन्धप्रदेशाः

अत्रापि बहुवचनं प्रदेशानां तत्संख्याबहुत्वार्थं परमाणुपुद्गला इति परमाणवश्च ते पुद्गलाश्च परमाणुपुद्गलाः स्कंधपरिणामरहिताः केवलाः परमाण
व इत्यर्थः तत्समासमाताइत्यादि तत्र कदाचिद्यथासंभवं समासतः संक्षेपेण पंचविधाः प्रज्ञप्तास्तद्यथा वर्णपरिणताः वर्णेन परिणता वर्णपरिणामभा
ज इत्यर्थः एवं गंधपरिणता रसपरिणताः स्पर्शपरिणताः संस्थानपरिणताः परिणता इति अतीतकालविवक्षया वर्तमानानागतकालोपलक्षणं वर्त
मानानागतयोरप्यतीतत्वस्य संभवात् तथाहि योवर्तमानत्वमतिक्रांतः सोऽतीतो भवति वर्तमानत्वं चास्तिक्त्वनवति योऽनागतत्वमतिक्रांतवान् उ
क्तं च भवति सता माना तीतायः प्राप्तो नामवर्तमानत्वं प्राप्तश्चनाम स भवति यः प्राप्स्यति वर्तमानत्वं ततो वर्णपरिणता इति वर्णरूपतया परिणताः परिण
मंति परिणंस्यंतीति द्रष्टव्यं एवं गंधपरिणता इत्याद्यपि परिभावनीयं । वर्णपरिणता इत्यादि ये वर्णपरिणतास्ते पंचविधाः प्रज्ञप्तास्तद्यथा का
लवर्णपरिणताः कज्जलादिवत् नीलवर्णपरिणता नील्यादिवत् । लोहितवर्णपरिणताः हिंगुलादिवत् हारिद्रवर्णपरिणता हरिद्रा
दिवत् शुक्लवर्णपरिणताः शंखादिवत् ये गंधपरिणतास्ते द्विवि धाः प्रज्ञप्तास्तद्यथा सुरभिगंधपरिणता दुरभिगंधपरिणता
श्च वशाच्छेपरिणामभवनं प्रति विशेषाभावख्यापनार्थोतिमाहियथा। कथंचिदवच्छिन्नाः सामग्रीवशात् सुरभिगंधपरिणामभजंति त
थाकथंचिदवच्छिन्नाएवसामग्रीवशात् दुरभिगंधपरिणाममपीति सुरभि। गंधपरिणताश्चयथाश्रीखंडादयः दुरभिगंधपरिणता लसुनादिवत्
ये रसपरिणतास्ते पंचविधाः प्रज्ञप्तास्तद्यथा तिक्तरसपरिणताः कोशातक्यादिवत् कटुकरसपरिणताः शुंठ्यादिवत् कषायरसपरिणता अपक्वकपि
त्थादिवत् अम्लरसपरिणता अम्लवेतसादिवत् मधुररसपरिणताः शर्करादिवत् ये स्पर्शपरिणतास्ते अष्टविधाः प्रज्ञप्तास्तद्यथा कर्कशस्पर्शपरिणताः
पाषाणादिवत् मृदुस्पर्शपरिणता हंसरुतादिवत् गुरुकस्पर्शपरिणता वज्रादिवत् लघुकस्पर्शपरिणता अर्कतूलादिवत् शीतस्पर्शपरिणता मृणाला
दिवत् उष्णस्पर्शपरिणता वह्न्यादिवत् स्निग्धस्पर्शपरिणता घृतादिवत् रूक्षस्पर्शपरिणता भस्मादिवत् ये संस्थानपरिणतास्ते पंचविधाः प्रज्ञप्तास्तद्यथा परि
मंडलसंस्थानपरिणता वलयवत् वृत्तसंस्थानपरिणताः कुलालचक्रादिवत् त्र्यस्रसंस्थानपरिणताः शृंगाटकादिवत् चतुरस्रसंस्थानपरिणताः कुंभि ६

कादिवत् आयतसंस्थानपरिणता दंडादिवत् एतानि च परिमंडलादीनि संस्थानानि घनप्रतरभेदेन द्विविधानि भवंति पुनः परिमंडलमपहाय शेषा
णि युक्तः प्रदेशजनितानि युग्मप्रदेशजनितानि चेति द्विधा तत्राद्यं परिमंडलादि सर्वमनंताणुनिष्पन्नमसंख्येयप्रदेशावगाढं च प्रतीतमेव केवलं य
त्प्रतिनियतसंख्यपरमाण्वात्मकमतोनानि दिष्टं शास्त्रे तदशक्यतइति विनेयजनानुग्रहाय तदुपदर्श्यते तत्रोक्तः प्रदेशप्रतरवृत्तं पंचपरमाणुनि
ष्पन्नं पंचाकाशप्रदेशावगाढं च तद्यथा एकः परमाणुर्मध्ये व्यवस्थाप्यते चत्वारः क्रमेण पूर्वादिषु चतसृषु दिक्षु स्थाप्यंते ॥ युग्मप्रदेशप्रतर
वृत्तं द्वादशपरमाण्वात्मकं द्वादशप्रदेशावगाढं च तत्र चत्वारः परमाणवः चतुष्काकाशेरुचकाकारेण व्यवस्थाप्यंते ततस्तत्परि ः ः ः ः तत्परितोऽष्टावा
ष्टौ उक्तः प्रदेशघनवृत्तं सप्तप्रदेशावगाढं च तच्चैवं तत्रैव पंचप्रदेशप्रतरवृत्ते मध्यस्थितस्य परमाणोरुपरिष्टादधस्ताच्चैकैकोणुर्व्यवस्थाप्यते।
ततएवं सप्तप्रदेशं भवति युग्मप्रदेशघनवृत्तं द्वात्रिंश त्परमाणुमद्वात्रिंशत्प्रदेशावगाढं च तच्चैवं प्रागुक्तं द्वादशप्रदेशा
त्मकस्य प्रतरवृत्तस्योपरिष्टाद्द्वादशान्ये तदुपरिष्टादधश्च । त्वारः परमाणव इति उक्तः प्रदेशप्रतरत्र्यस्रं त्रिप्रदे
शं त्रिप्रदेशावगाढं च तच्चैवं द्वौ तिर्यगणू एकोन्यस्यात ततआद्यस्याध एकोऽणुः स्थापना युग्मप्रदेशप्रतरत्र्यस्रं षट्परमाणुनिष्पन्नं
षट्प्रदेशावगाढं च तत्र तिर्यग् निरंतरं त्रयः परमाणवः स्थाप्यंते ततआद्यस्याधः अणु र्युग्मत्वा परमाणुद्वयं द्वितीयस्याध एकोऽणुः स्थापना उक्त
प्रदेशघनत्र्यस्रं पंचत्रिंशत्परमाणुनिष्पन्नं पंचत्रिंशत्प्रदेशावगाढं च तच्चैवं तिर्यग् निरंतराः पंचपरमाणवः स्थाप्यंते तेषां चाधोधः क्रमेण तिर्यगे
कैकहान्या चत्वारस्त्रयो द्वावेक इति पंचदशात्मकः प्रतरो जातः स्थापना अस्यैव च प्रतरस्योपरि सर्वपंक्तिषु अंत्यांत्यपरित्या
गेन दश १ तस्यैव तदुपर्युपरि षट् त्रय एकाः स्थापना  ॥ एतः मीलिताः पंचत्रिंशद्भवंति युग्मप्रदेशघनत्र्यस्रं चतुःपरमाण्वा
त्मकं चतुःप्रदेशावगाढं च तत्र त्र्यस्रस्यैव त्रिप्रदेशा त्मकस्य संबंधिन एकस्याणोरुपरि एकोऽणुः स्थाप्यते ततस्ते मीलिताश्चत्वारो भवंति । ० । उ
क्तः प्रदेशप्रतरचतुरस्रं नवपरमाण्वात्मकं नवप्रदेशावगाढं च तिर्यग् निरंतरं त्रिप्रदेशास्तिस्रः पंक्तयः स्थाप्यंते स्थापना ॥ युग्मप्रदेशप्रतरचतुर।

प्रज्ञापनावृत्ति

सुंवृत्तः परमाण्वात्मकं वृत्तं प्रदेशावगाढं च तत्र तिर्यक् द्विप्रदेशायां पंक्तौ स्थाप्यते स्थापना ओजःप्रदेशं घनवृत्तं सप्तविंशतिपरमाण्वात्मकं स
प्तविंशतिप्रदेशावगाढं च तत्र नवप्रदेशात्मकस्यैव पूर्वोक्तस्य प्रतरस्याधस्तादुपरि च नव नव दत्वा स्थाप्यंते नवः सप्तविंशतिपरमाण्वात्मकमोजः
प्रदेशं घनवृत्तं रचितं वर्तितं स्थापना स्यैव युग्मप्रदेशं घनवृत्तं द्वात्रिंशत्परमाण्वात्मकं द्वात्रिंशत्प्रदेशावगाढं च तत्र ये चतुःप्रदेशात्मकस्य पूर्वोक्तस्य प्रतर
स्योपरि द्वादशान्यान् परिमाणवः स्थाप्यंते इति ओजःप्रदेशं श्रेण्यायतं त्रिपरमाणुत्रिप्रदेशावगाढं च तत्र तिर्यग्निरंतरं त्रयः स्थाप्यंते युग्मप्र
देशं श्रेण्यायतं द्विपरमाणुद्विप्रदेशावगाढं च तत्र तिर्यग्निरंतरं द्वौ स्थाप्यंते ओजःप्रदेशं प्रतरायतं पंचदशपरमाण्वात्मकं पंचदशप्रदेशाव
गाढं च तत्र पंचप्रदेशात्मिकास्तिस्रः पंक्तयस्तिर्यक् स्थाप्यंते  युग्मप्रदेशं प्रतरायतं षट्परमाण्वात्मकं षट्प्रदेशावगाढं च तत्र त्रिप्रदे
शा पंक्तिर्द्वयं स्थाप्यंते स्थापना ओजःप्रदेशं घनायतं पंचचत्वारिंशत्परमाण्वात्मकं पंचचत्वारिंशत्प्रदेशावगाढं च तत्र
पूर्वोक्तस्यैव प्रतरायतस्य पंचदशप्रदेशात्मकस्याधस्तादुपरि च पंचदश पंचदश परमाणवः स्थाप्यंते युग्मप्रदेशं घना
यतं द्वादशपरमाण्वात्मकं द्वादशप्रदेशावगाढं च तत्र प्रागुक्तस्य षट्प्रदेशस्य प्रतरायतस्योपरि तथैव तावंतः परमाणवः स्थाप्यंते
प्रतरपरिमंडलं विंशतिपरमाण्वात्मकं विंशतिप्रदेशावगाढं च तत्र चतुर्षु दिक्षु प्रत्येकं चत्वारश्चत्वारः परमाणवः स्थाप्यंते विदि
क्षु च एकैकः स्थाप्यते घनपरिमंडलं चत्वारिंशत्प्रदेशावगाढं चत्वारिंशत्परमाण्वात्मकं च तत्र तस्यैव विंशतिरूपस्योपरि तथैवान्यो विं
शतिः स्थाप्यते इह विशेषप्ररूपणमितो विस्तरतः प्रदेशतोऽवगाहनातश्च संस्थानानां वर्णितत्वात् एतदर्थसंग्राहिकाश्चैताः संग्रहणिगाथाः परिमंडलेय
वट्टे तंसे चउरंस आयए चेव घणपयरपढमवज्जं उजुपए सियदुजुम्मेय पंच बारसयसत्तग बत्तीसगं च वट्टं मि तियछक्कं पणतीसा चत्तारि य
होति तंसंमि नव य चउ वत्तीसा चउरंसे सत्तावीसाय अट्ठ चउरंसे तिगदुगपन्नरसेवय छव्व य आयए होति पणयाला बारसगं तह चेव य आयम्मि संग
ण वीसा परिमंडलए य संगाणं इति संप्रत्येतेषामेव वर्णादीनां परस्परं संवेधमाह जे वन्नतो इत्यादि यो वर्णतो वर्णमाश्रित्य का

लवर्णपरिणतास्ते गंधतो गंधमाश्रित्य सुरभिगंधपरिणता अपि भवंति दुरभिगंधपरिणता अपि किमुक्तं भवति गंधमधिकृत्य तेषां भजनाः केचि
त्सुरभिगंधपरिणता भवंति केचिद्दुरभिगंधपरिणता न तु प्रतिनियतैकगंधपरिणामपरिणता एवेति एवं रसतः स्पर्शतः संस्थानतश्च भावना
तत्र द्वौ गंधौ पंच रसा अष्टौ स्पर्शाः पंच संस्थानानि एते मीलिता विंशतिरिति कृष्णवर्णपरिणता एतावंतो भंगा लभ्यंते २० एवं नीलवर्ण
परिणता अपि २० लोहितवर्णपरिणता अपि २० शुक्लवर्णपरिणता अपि २० एवं वर्णे सर्वे लभ्यंते १०० गंधमधिकृत्याह जे गंधतो इ
त्यादि ये गंधतो गंधमधिकृत्य सुरभिगंधपरिणतास्ते वर्णतः कालवर्णपरिणता अपि नीलवर्णपरिण
ता अपि लोहितवर्णपरिणता अपि हारिद्रवर्णपरिणता अपि शुक्लवर्णपरिणता अपि एवं रसतः ५ स्पर्शतः ८ संस्थानतः ५ एते सर्वे मीलि
ताः त्रयोविंशतिरिति सुरभिगंधपरिणतानां त्रयोविंशतिर्भंगा लभ्यंते एवं दुरभिगंधपरिणता अपि २३ तदेवं गंधपदे लब्धा भंग
कानां षट्चत्वारिंशत् ४६ रसमधिकृत्याह ये रसतो रसमधिकृत्य तिक्तरसपरिणतास्ते वर्णतः ५ गंधतः २ स्पर्शतः
८ संस्थानतः ५ एते सर्वेऽप्येकत्र मीलिताः विंशतिरिति तिक्तरसपरिणता विंशतिर्भंगा लभ्यंते २० कषायरसपरिणताः २०
मधुररसपरिणता अपि २० एवं रसपंचकमीलने भंगकानां शतं १०० स्पर्शमधिकृत्याह जे फासतो कक्खडफासपरिणयाइत्या
दि ये स्पर्शतः कर्कशस्पर्शपरिणतास्ते वर्णतः ५ गंधतः २ रसतः ५ स्पर्शतः ६ प्रतिपक्षस्पर्शयोगाभावात् संस्थानतः ५ एते सर्वे एकत्र मीलिता
स्त्रयोविंशतिः एतावंतो भंगाः कर्कशस्पर्शपरिणता लभ्यंते २३ एतावंत एव मृदुस्पर्शपरिणताः २३ लघुस्पर्शपरिणताः २३ शीतस्पर्शपरिणताः
२३ उष्णस्पर्शपरिणताः २३ स्निग्धस्पर्शपरिणताः २३ रूक्षस्पर्शपरिणताः २३ एतेषामेकत्र मीलने जातं भंगकानां चतुरशीत्यधिकं शतं १८४
संस्थानमधिकृत्याह जे संठाणतो परिमंडलसंठाणपरिणयाइत्यादि ये संस्थानतः परिमंडलसंस्थानपरिणतास्ते वर्णतः ५ गंधतः २ रसतः ५
स्पर्शतः ८ एते सर्वेऽप्येकत्र मीलिताः विंशतिः २० एतावंतो भंगाः परिमंडलसंस्थानपरिणता लभ्यंते एवं वृत्तसंस्थानपरिणताः २० त्र्यस्रसंस्थान

परिणताः २० चतुरस्रसंस्थानपरिणताः २० आयतसंस्थानपरिणताः २० अमीषां चैकत्र मीलने लब्धं रूपिकानां शतं १०० एते पंच वर्णगंधरसस्पर्श
संस्थानानां सकलानां सकलानि जातानि पंचशतानि त्रिंशदधिकानि ५३० इदं च यद्यपि बादरस्कंधमधिकृत्य पंचापि वर्णा द्वावपि गंधौ पंचापि रसाः प्राप्यंते
ततः स्थूलीकृतवर्णादिव्यतिरेकेणान्येऽपि वर्णादिभिर्विकल्पाः संभवंति तथापि तत्र बादरस्कंधमधिकृत्य व्यवहारतः केवलकृष्णवर्णाद्यपेक्षया अ
पांतरालस्कंधमपि चाणुकादिस्कंधपर्यंता चानंतस्कंधः कृष्णप्रदेशगतपंचकस्थितास्थितास्तथा प्रदेशगतपंचकस्थितादिं त्यादितद्वद्विवक्ष्यंते तेषां चा
न्यत्र वर्णांतरादि न संभवति स्पर्शविभागोऽपि चावधीकृत्य त्रिप्रतिप्रतिपक्षतिरस्करणान्यस्पर्शालोकप्रसिद्धिविनाभिनात् दृश्यंते ततो यथा किंचन
ग्संख्यासाधिकपरिशिष्टमस्याय भंगीकृत्वा निर्दिष्टा यथाप्रत्यक्षमप्यपि तारतम्यनानात्वात् अनंताभेदाः संभवंति एतच्चात्र वर्णादिपरिणा
मानां जघन्यतोऽवस्थानमेकं समयमुत्कर्षतोऽसंख्येयं कालं सम्प्र न्तरूपसंहारमाह सेत्तं रूवि अजीवपन्नवणा सेत्तं अजीवपन्नवणा से
षा प्रज्ञप्तजीवप्रज्ञापना सेयं जीवप्रज्ञापना साम्प्रतं जीवप्रज्ञा पनाप्रतिपिपादयिषुः प्रश्नसूत्रमाह से किं तमित्यादि
अथ का सा जीवप्रज्ञापना सूरिराह जीवप्रज्ञापना द्विविधा प्रज्ञप्ता तद्यथा संसारसमापन्नजीवप्रज्ञापना च असंसारसमापन्नजीव
प्रज्ञापना च तत्र संसरणं संसारो नारकतिर्यङ्नरामरभवानुभवलक्षणः तं सम्यगापन्नाः संसारसमापन्नाः संसारवर्तिन इत्यर्थः ते च ते जीवाश्च तेषां
प्रज्ञापना संसारसमापन्नजीवप्रज्ञापना न संसारोऽसंसारो मोक्षस्तं समापन्ना असंसारसमापन्नाः सिद्धा इत्यर्थः ते च ते जीवाश्च तेषां प्रज्ञापना अ
संसारसमापन्नजीवप्रज्ञापना चशब्दौ प्राग्वत् तत्राल्पवक्तव्यत्वादसंसारसमापन्नजीवप्रज्ञापनाप्रतिपिपादयिषुः प्रश्नसूत्रमाह ॥
से किं तमित्यादि अथ का सा असंसारसमापन्नजीवप्रज्ञापना सूरिराह असंसारसमापन्नजीवप्रज्ञापना द्विविधा प्रज्ञप्ता तद्यथा अनंतरसिद्धासंसा
रसमापन्नजीवप्रज्ञापना च परंपरसिद्धासंसारसमापन्नजीवप्रज्ञापना च तत्र न विद्यते अंतरं व्यवधानं समया
त्मकं येषां ते अनंतराः ते च ते सिद्धाश्च अनंतरसिद्धाः सिद्धत्वप्रथमसमये वर्तमाना इत्यर्थः ते च ते असंसारसमापन्नजीवाश्च अनंतरसिद्धासंसारसमा

पन्नजीवास्तेषां प्रज्ञापना अनंतरसिद्धासंसारसमापन्नजीवप्रज्ञापना चशब्दः स्वगतानेकभेदसूचकः तथा विवक्षितप्रथमसमयेन सिद्धस्य
यो द्वितीयसमये सिद्धः स परः तस्यापि यस्तृतीयसमये सिद्धः स परः एवमन्येऽपि वाच्याः परश्च परश्च परंपरा वीप्सायां द्वित्वं आदरादयश्च इति परंपराः सिद्धत्व
यति परंपराश्च ते सिद्धाश्च परंपरसिद्धाः विवक्षितसिद्धत्वप्रथमसमयात्प्राक् द्वितीयादिषु समयेष्वनंतामतीताद्धां यावद्वर्तमाना इत्यर्थः ते च
ते असंसारसमापन्नाश्च परंपरसिद्धासंसारसमापन्नाश्च ते च ते जीवाश्च तेषां प्रज्ञापना परंपरसिद्धासंसारसमापन्नजीवप्रज्ञापना अत्रापि चशब्दः
स्वगतानेकभेदसूचकः ॥ से किं तमित्यादि अथ का सा अनंतरसिद्धासंसारसमापन्नजीवप्रज्ञापना सूरिराह अनंतरसिद्धासंसारसमाप
न्नजीवप्रज्ञापना पंचदशविधा प्रज्ञप्ता अनंतरसिद्धानामुपाधिभेदतः पंचदशविधत्वात् तानेव पंचदशविधत्वं तेषामाह तं जहा इत्यादि तद्य
देति पंचदशानामप्युपरिष्टात् सब्बत्थ तीर्थसिद्धाः तीर्थं येन संसारसागरा त्तर्यतेऽनेनेति तीर्थं यथावस्थितसकलजीवाजीवादिपदा
र्थसार्थप्ररूपकं परमगुरुप्रणीतं प्रवचनं तच्च निराधारं न भवतीति संघः प्रथमगणधरो वा द्रष्टव्यः उक्तं च तित्थं भंते तित्थं ति
त्थकरे तित्थं गोयमा अरिहा ताव तित्थकरे तित्थं पुण चाउवण्णो समणसंघो पढमगणहरो वा इति तस्मिन्नुत्पन्ने ये सिद्धास्ते तीर्थ
सिद्धाः तथा तीर्थस्याभावोऽतीर्थं तीर्थस्यानुत्पादः अपांतराले व्यव च्छेदो वा तस्मिन् ये सिद्धास्ते अतीर्थसिद्धाः तत्र तीर्थस्यानुत्पादे
सिद्धा मरुदेवीप्रभृतयः न हि मरुदेव्यादिसिद्धिगमनकाले तीर्थमुत्पन्नमासीत् तथा तीर्थस्य व्यवच्छेदः सुविधिस्वाम्याद्यपांतराले अत्रांतरे जा
तिस्मरणादिना अपवर्गमार्गमवाप्य सिद्धास्ते तीर्थव्यवच्छेदसिद्धाः तथा तीर्थकराः संतो ये सिद्धास्ते तीर्थकरसिद्धाः सामान्यकेवलिनः संतो
ये सिद्धास्तेऽतीर्थकरसिद्धाः तथा स्वयंबुद्धाः संतो ये सिद्धास्ते स्वयंबुद्धसिद्धाः प्रत्येकबुद्धाः संतो ये सिद्धास्ते प्रत्येकबुद्धसिद्धाः अथ स्वयं
बुद्धप्रत्येकबुद्धानां कः प्रतिविशेषः उच्यते बोध्युपधिश्रुतलिंगकृतो विशेषः तथाहि स्वयंबुद्धा बाह्यप्रत्ययमंतरेणैव बुध्यंते स्वयमेव
बाह्यप्रत्ययमंतरेणैव निजजातिस्मरणादिना बुद्धाः स्वयंबुद्धा इति व्युत्पत्तेः ते च द्विधा तीर्थकरास्तीर्थकरव्यतिरिक्ताश्च इह तीर्थकरव्यतिरिक्तैरधि

कारः आह च नंद्यध्ययनचूर्णिकृत् तेउ विहा सयंबुद्धा तित्थयरा तित्थयरवइरित्ता य इह वइरित्तेहिं अहिगारो इति प्रत्येकबुद्धास्तु बाह्यं प्रत्यय
मपेक्ष्य प्रत्येकं बाह्यं वृषभादिकं कारणमभिसमीक्ष्य बुद्धाः प्रत्येकबुद्धा इति व्युत्पत्तेः तथा श्रूयते बाह्यप्रत्ययसापेक्षा करकंड्वादीनां बोधिः बहिः प्र
त्ययमपेक्ष्य च ते बुद्धाः संतो नियमतः प्रत्येकमेव विहरंति न गच्छवासिन इव संहताः आह च नंद्यध्ययनचूर्णिकृत् पत्तेयं बाह्यं वृषभादिकं कारण
मभिसमीक्ष्य बुद्धाः बहिः प्रत्ययं प्रतिबुद्धानां च पत्तेयं नियमा विहारो जम्हा तम्हा पत्तेयबुद्धा इति तथा स्वयंबुद्धानामुपधिर्द्वादशविधः पात्रादिकः
प्रत्येकबुद्धानां तु द्विविधो जघन्यतः तथा उत्कर्षतश्च जघन्यतो द्विविधः उत्कर्षतो नवविधः प्रावरणवर्जः उक्तं च पत्तेयबुद्धाणं जहण्णेणं दुविहो उक्को
सेणं नवविहो नियमा पाउरणवज्जो भवइ इति तथा स्वयंबुद्धानां पूर्वाधी तं श्रुतं भवति वा न वा यदि भवति ततो लिंगं देवता प्रयच्छति गुरु
सन्निधौ वा गत्वा प्रतिपद्यते यदि चैकाकी विहरणसमर्थ इच्छा च तस्य तत। इच्छा जायते ततः एकाकी विहरति अन्यथा गच्छवास एव
तिष्ठति अथ पूर्वाधीतं श्रुतं तस्य न भवति ततो नियमाद् गुरुसंनिधौ गत्वा लिंगं प्रतिपद्यते गच्छं चावश्यं न मुंचति तथा चोक्तं पु
व्वाहीयसुयं से हवइ वा न वा जइ से नत्थि तो लिंगं नियमा गुरुसन्निहे। पडिवज्जइ गच्छे य विहरइ इति अह पुव्वाहीयसुयसंभवो अत्थि
तो से लिंगं देवया पयच्छइ गुरुसन्निहे वा पडिवज्जइ एगविहारविहर। णसमत्थो इच्छा वा से तो एक्को चेव विहरइ अन्नया गच्छे विहरइ इति
प्रत्येकबुद्धानां तु पूर्वाधीतं श्रुतं नियमतो भवति तच्च जघन्यत एकादशांगानि उत्कर्षतः किंचिन्न्यूनानि दश पूर्वाणि तथा लिंगं तस्य देवता प्रय
च्छति लिंगरहिता वा कदाचिद् भवंति तथा चोक्तं पत्तेयबुद्धाणं पुव्वाहीयं सुयं नियमा हवइ जहन्नेणं एक्कारस अंगा उक्कोसेणं भिन्नदसपुव्वा लिंगं च
से देवया पयच्छइ लिंगवज्जिओ वा भवति जओ भणियं रूवं पत्तेयबुद्धा इति तथा बुद्धा आचार्यास्तैर्बोधिताः संतो ये सिद्धास्ते बुद्धबोधितसिद्धा
: एते सर्वेऽपि केचित् स्त्रीलिंगसिद्धाः स्त्रिया लिंगं स्त्रीलिंगं स्त्रीत्वस्योपलक्षणमित्यर्थः तच्च त्रिधा तद्यथा वेदः शरीरनिर्वृत्तिः नेपथ्यं च तदिह शरीरनिर्वृत्त्या प्र
योजनं न वेदेन नेपथ्येन वा यतो वेदे सति सिद्धत्वाभावान्नेपथ्यस्य चाप्रमाणत्वात् आह च नंद्यध्ययनचूर्णिकृत् इत्थीए लिंगं इत्थिलिंगं उवलक्खणं ति वुत्तं भ ५

वइ तं च तिविहं वेदो सरीरनिव्वत्ती नेवत्थं च इह सरीरनिव्वत्तीए अहिगारो न वेयनेवत्थेहिं इति तस्मिन् स्त्रीलिंगे वर्त्तमाना ये संतो ये सिद्धास्ते स्त्रीलिंगसि
द्धाः एतेन यदाहुर्दिगंबरा न स्त्रीणां निर्वाणमिति तदपास्तं द्रष्टव्यं स्त्रीनिर्वाणस्य साक्षादनेन सूत्रेणाभिधानात् तन्निषेधस्य युक्त्यनुपपन्नत्वात् तथाहि
मुक्तिप्राप्त्युपायः सम्यग्दर्शनज्ञानचारित्राणि सम्यग्दर्शनज्ञानचारित्राणि मोक्षमार्ग इति वचनात् न च सम्यग्दर्शनादीनि च पुरुषाणामिव स्त्रीणामप्यविकला
नि तथाहि दृश्यंते स्त्रियोऽपि सकलमपि प्रवचनार्थमभिरोचयमाना जानाना निर्व्याजं च षडावश्यककालिकोत्कालिकादिभेदभिन्नं श्रुतं परिपालयंति सप्तद
शप्रकारमकलंकं संयमं धारयंति देवासुराणामपि दुर्द्धरं ब्रह्मचर्यं तपांसि च तपस्यंति मासक्षपणादीनि ततः कथमिव न तासां मोक्षसंभवः स्यादेतद
स्ति स्त्रीणां सम्यग्दर्शनं ज्ञानं च न तु चारित्रं संयमरूपा वा न तु तथाहि स्त्रीणां। सवस्त्रं वस्त्रपरिभोगेन न भवितव्यमन्यथा विवृतांगतया तिर्यक्स्त्रिय
इव पुरुषाणामभिलषणीया न भवेयुः लोके च गर्हणीया भवेयुः ततश्च। अवश्यं तासां वस्त्रपरिभोगः वस्त्रपरिभोगे च सपरिग्रहता सप
रिग्रहत्वे च संयमाभाव इति तदसमीचीनं सम्यक्सिद्धांतापरिज्ञा नात् न परिग्रहो हि परमार्थतो मूर्छाभिधीयते मूर्छा परिग्र
हो वुत्तो इति वचनात् तथाहि मूर्छारहितोऽलंकृतचक्रवर्त्ती सांतःपुरो। ऽप्यादर्शकगृहे वर्त्तमानो निष्परिग्रहो गीयते अन्यथा
केवलालोकासंभवात् अपि च यदि मूर्छाभावेऽपि वस्त्रसंसर्गमात्रेण परिग्र। हो भवेत् तथा जिनकल्पप्रतिपन्नस्य कस्यचित् शिशिरसमये तुषारक
णानुपाति प्रपतति शिरसि केनापि विक्षेपेण विप्रतिपन्नमतेः शीतमिति विलोक्य धर्मार्थिना शिरसि वस्त्रे प्रक्षिप्ते तस्य सपरिग्रहता भवेत् न चैतदिष्टं त
स्मान्न संसर्गमात्रेण परिग्रहः किंतु मूर्छा सा च स्त्रीणां वस्त्रादिषु न विद्यते धर्मोपकरणमात्रतया तस्योपादानात् न च स्त्रीणां वस्त्रमंतरेणात्मानं रक्षि
तुमशक्या ततो न प्रतिशीतकालादिषु वा स्वाध्यायादिकं कुर्वंति ततो दीर्घं च संयममुपपालयंति ततो वस्त्रपरिभुज्यमानं न ततः परिग्र
हवत्यः अथ मा भूत् संभवति तासामपि स्त्रीणामपि सम्यग्दर्शनादिकं रत्नत्रयं परं न तत्प्रकर्षमात्रेण मुक्तिपदप्रापकं भवति किंतु प्रकर्षप्राप्तमन्यथा
दीक्षानंतरमेव सर्वेषामपि चारित्रेण मुक्तिपदप्राप्तिप्रसक्तिः सम्यग्दर्शनादिरत्नत्रयप्रकर्षश्च स्त्रीणामसंभवी ततो न निर्वाणमिति तद

प्रमा०वृत्ति

यदुक्तं स्त्रीषु रत्नत्रयप्रकर्षसंभवी कर्षसंपर्यहेतुप्रमाणस्याभावात् न खलु सकलदेशकालव्याप्त्या स्त्रीषु रत्नत्रयप्रकर्षसंभवग्राहकं प्रमाणं किंचित्
सतत देशकालविप्रकृष्टस्य प्रत्यक्षस्याप्रवृत्तेः प्रवृत्तेर्नावगमात्(?) अनुमानस्याप्यसंभवात् नापि स्त्रीषु रत्नत्रयप्रकर्षसंभवप्रतिपादकः कोप्यागमो विद्यते प्र
त्युत तत्संभवप्रतिपादकः स्त्रीणां स्त्रीत्वे विप्रयावादसंभवोक्तत्वात् तत्ता स्त्रीरत्नत्रयप्रकर्षसिद्धेर्वाधकप्रमाणस्याः सत्वात् पंचमतत्वानात्स्याज्ञाया विरुध्यते
स्त्रीत्वेन सह रत्नत्रयप्रकर्षस्य सहानवस्थानलक्षणो विरोधः सिद्धः दृष्टत्वात् तस्मात् रत्नत्रयप्रकर्षस्य स्त्रीत्वेन सहानवस्थानं तद्युक्तियुक्तमेव प्राप्तिः सवा
योगवद्भावरसमसमन्वयनाभीष्ट्यात्यवस्थाववस्थादेशासमवत्वात् ततः कथं विरोधगतिः मनुष्यत्रयदृष्टेन सह विरोधः प्रतिपत्तुं शक्यते मोक्षप्रा
प्तं पुरुषसम्बन्धिसंगः न तु ज्ञानस्य सर्वोत्कृष्टेनाध्यवसायेनात्मप्राप्ति। तद्वानस्य योग्यतावत्तया गमप्रामाण्यबलतः सिद्धं सर्वोत्कृष्ट
वत्पदं सर्वोत्कृष्टदुःखस्थानं सर्वोत्कृष्टसुखस्थानं च तत्र सर्वोत्कृष्ट दुःखस्थानं सप्तमनरकपृथ्वी अत्र तः परमसुखस्थानं
स्यादात् सर्वोत्कृष्टसुखस्थानं तु निःश्रेयसं तत्र स्त्रीणां सप्तमनर कपृथ्वीगमनस्यागमनिषिद्धं निःश्रेयसस्य कारणं
हि सप्तमपृथ्वीगमनहेतुः सर्वोत्कृष्टमनोवीर्यपरिणत्यभावः ततः सप्तम पृथ्वीगमनवदभावात् सम्मूर्छिमादिवत् अपि च यासां वा
दलब्ध्यो विकुर्वणत्वादिलब्धयः पूर्वगतश्रुताधिगतावधिज्ञानसामर्थ्यमपि तासां स्पष्टागमनसामर्थ्यमित्यतिदुःख्यं तादृतदुक्तं या तायदि
नाम स्त्रीणां सप्तमनरकपृथ्वीगमनप्रतिमर्वोत्कृष्टमनोवीर्यपरिणत्यभावः ततस्तावता कथमवसीयते निःश्रेयसमपि प्रति तासां सर्वोत्कृष्टमनो
वीर्यपरिणत्यभावोऽनन्तर्हि वो न मिकर्षणादिकं कर्मकर्तुं न शक्नोति मशक्नोत्यपि ध्रुवमाढुं न शक्नोति निश्चयेन शक्य प्रत्यक्षविरोधात् अथ संमू
र्छिमादिषु नरक्रपि सर्वोत्कृष्टमनोवीर्यपरिणत्यभावो दृष्टः तत्तोऽप्यवसीयते न तु यदि तत्र दृष्टः सप्तमहीं कथमनुमानवसीयते न खलु भवितव्यं मिथ्यात्वम
त्त्वर्गमिति कोऽनवति किं च तद्व्याप्त्या श्रुतव्याप्तिस्ते प्रतिवन्धं दिनयाप्रतिबन्धो विद्यते न खलु सप्तमपृथ्वीगमनं निर्वाणगमनस्य कारणं नाभि
पि सप्तमपृथ्वीगमनाविनाभावि निर्वाणगमनं चरमशरीरिणां सप्तमपृथ्वीगमनसंततस्यैव निर्वाणगमनभावानुत्तवप्रतिबंधमंतरेणक

स्याभावे तस्याभावे ज्ञानानुपलब्धिप्राप्तेः यस्य तस्याभावे कस्यचित् भावे सर्वस्याभावप्रसंगः २ यद्यपि तर्हि कथं संमूर्छिमादिषु निर्वाणगमना
भावः इति वेत् तथाज्ञानाभावात् तथा हि तत्र संमूर्छिमादयो नवस्था नापि वत्सम्यग्दर्शनादिकं यथावत्प्रतिपत्तुं शक्नुवन्ति तातो न तेषां नि
र्वाणसंभवः स्त्रियस्तु प्रागुक्तप्रकारेण यथावत् सम्यग्दर्शनादिरत्नत्रयसम्यक्परिपालनसामर्थ्यासां न निर्वाणाभावः अपि च भुजपरिसर्पा द्वितीयाम
वपृथ्वीयावन्मागति तदपरतः परपृथ्वीगमनात् हेतुतथारूपमनोवीर्यपरिणत्यभावात् तृतीयां यावत्पक्षिणश्चतुर्थीं उरगाः पञ्चमीं सिंहाः
अष्टमसहस्रारं यावत्तु गच्छन्ति तत्परतोऽपि गतिविषयमनोवीर्यपरिणतिः अथ वा सम्यग्दर्शनाद्यंगतावपि तद्वेष्यं अथ च विषमग
तायाः पृथिवीद्वितीयावल्यभावास्त्र सहस्रारं गच्छति वन्निर्यंचसदाभावगमनात् तत्र हेतुः तथा सति सिद्धं स्त्रीपुंसानामधोगतिविषमाप्यपि निर्वाणंसं
भ यदप्युक्तं स्त्रीप्रियसामानादतश्चाविद्यादितदप्यसौ वादविरुक्तं वणवादिलब्धिविरहपि विशिष्टपूर्वगतश्रुताभावेऽपि माषतुषा
दीनां निःश्रेयसपदाधिगमश्रवणात् आह च वादविरुक्तं वणवादिलब्धिविरहश्रुतकेवलीयमिवडिनकल्पमतः
पर्यविशुद्धिनमितिविरहापि अपिच यदिवादादिलब्धि सावत् निःश्रेयसादा विप्राणामसविप्राणतसंभवसिद्धान्ते
प्रतिपादयिष्यते यथा डक्कुटुम्बादरात्मा केवलज्ञानाभावात्न प्रति पाद्यते तस्मादुपपद्यते स्त्रीणां निर्वाणमिति द्रव्यतः प्रसंगात् तथा ऽ
लिंगशरीरनिर्वृतिप्रपन्नावस्थिताः संतानापि सिद्धाः स्त्रीपुंलिंगसिद्धाः एवं नपुंसकलिंगसिद्धाः तथा स्वलिंग रजोहरणादिरूपमुपावस्थिताः
संतानापि सिद्धाः स्वलिंगसिद्धाः तथान्यलिंगपरिव्राजकादिसंबंधिनावल्कलकषायादिरूपद्रव्यलिंगव्यवस्थितापि सिद्धाः सिद्धा अन्यलिं
गसिद्धाः गृहलिंगसिद्धाः मरुदेवीप्रभृतयः तथा एकसिद्धा एकस्मिन् समये एकक एव संतः सिद्धा एकसिद्धाः अनेकसिद्धा इति एकस्मिन्
समयेऽनेके सिद्धाः अनेकसिद्धाः अनेके च एकस्मिन् समये सिद्ध्यन्तः उत्कर्षतोऽष्टोत्तरशतसंख्या वेदितव्याः तस्मादुक्तं बत्तीसा अडयाला
ला सट्ठी बावत्तरी य बोधव्वा चुलसीई छन्नउई दुरहियमट्ठुत्तरसयं च अस्यार्थः यदनागतं यावत् अष्ट समयान् यावन्निरन्तरं समकादायेन

त्रिंशत्पर्यंताः सिध्यंतः प्राप्यंते किमुक्तं भवति प्रथमसमये जघन्यत एको द्वौ वा उत्कर्षतो द्वात्रिंशत् सिध्यंतः प्राप्यंते द्वितीयेपि समये जघन्यत एको
द्वौ वा उत्कर्षतो द्वात्रिंशदेवं यावदष्टमेपि समये जघन्यत एको द्वौ वा उत्कर्षतो द्वात्रिंशत् ततः परमवश्यमंतरं तथा त्रयस्त्रिंशदादयोष्टचत्वा
रिंशत्पर्यंता निरंतरं सिध्यंतः सप्तसमयान् यावत् प्राप्यंते परतो नियमादंतरं तथा एकोनपंचाशदादयः षष्टिपर्यंता निरंतरं सिध्यंत उत्कर्षतः षट्
समयान् यावदवाप्यंते परतोवश्यमंतरं तथा एकषष्ट्यादयो द्विसप्ततिपर्यंता निरंतरं सिध्यंत उत्कर्षतः पंच समयान् यावदवाप्यंते ततः परमंत
रं त्रिसप्तत्यादयश्चतुरशीतिपर्यंता निरंतरं सिध्यंत उत्कर्षतश्चतुरः समयान् यावत् तत ऊर्ध्वमंतरं तथा पंचाशीत्यादयः षण्णवतिपर्यंता निरं
तरं सिध्यंत उत्कर्षतस्त्रीन् समयान् यावत् परतो नियमादंतरं तथा स। प्तनवत्यादयो द्व्युत्तरशतपर्यंता निरंतरं सिध्यंत उत्कर्षतो द्वौ समा
यौ परतोवश्यमंतरं तथा त्र्युत्तरशतादयोष्टोत्तरशतपर्यंताः सिध्यंतो नियमादेकमेव समयं यावदवाप्यंते न द्वित्र्यादिसमया
न् तदेवमेकस्मिन् समये उत्कर्षतोष्टोत्तरशतसंख्याः सि। ध्यंतः प्राप्यंते इत्यनेकसिद्धा उत्कर्षतोष्टोत्तरशतप्रमाणा
वेदितव्याः आह तीर्थसिद्धातीर्थसिद्धरूपभेदद्वय एव शेषभे। दा अंतर्भवंति तत्किमर्थं शेषभेदोपादानं उच्यते सत्यमंतर्भव
ति परं तीर्थसिद्धातीर्थसिद्धभेदद्वयोपादानमात्राच्छेषभेदपरिज्ञानं भवति विशेषपरिज्ञानार्थं च प्रशास्त्रारंभप्रयास इति शेषभेदोपादा
नं उपसंहारमाह से त्तमित्यादि सेयं अनंतरसिद्धासंसारसमापन्नजीवप्रज्ञापना से किं तमित्यादि अथ का सा परंपरसिद्धासंसारसमाप
न्नजीवप्रज्ञापना सूरिराह परंपरसिद्धासंसारसमापन्नजीवप्रज्ञापना अनेकविधा प्रज्ञप्ता परंपरसिद्धानामनेकविधत्वादनेकविधत्वमा
ह तं जहेत्यादि तत्राथानेकविधत्वोपदर्शने अप्रथमसमयसिद्धा इति न प्रथमसमयसिद्धा अप्रथमसमयसिद्धाः परंपरसिद्धविशेषणप्रथमस
मयवर्त्तिनः सिद्धत्वसमयात् द्वितीयसमयवर्त्तिन इत्यर्थः आदिशब्दोपादाने समये द्वितीयसमयसिद्धादय उच्यंते यदा सामान्यतः प्रथमप्रथमसमयसि
द्धा इत्युक्तं तत एतद्विशेषतो व्याचष्टे द्विसमयसिद्धास्त्रिसमयसिद्धाश्चतुःसमयसिद्धा इत्यादियावच्छब्दकरणादसंख्येयसमयसिद्धादयः परिगृह्यंते से ११

त्तमित्यादि निगमनद्वयं सुगमं तदेवमुक्ता असंसारसमापन्नजीवप्रज्ञापना संसारसमापन्नजीवप्रज्ञापनामभिधित्सुस्तद्विषयप्रश्नसूत्रमाह
से किं तमित्यादि अथ का सा संसारसमापन्नजीवप्रज्ञापना पंचविधा प्रज्ञप्ता तद्यथा एकेंद्रियसंसारसमापन्नजीवप्रज्ञापनेत्यादि त
त्र एकं स्पर्शनलक्षणमिंद्रियं येषां ते एकेंद्रियाः पृथिव्यप्तेजोवायुवनस्पतयस्तद्रूपा ये संसारसमापन्नजीवास्तेषां प्रज्ञा
पना एकेंद्रियसंसारसमापन्नजीवप्रज्ञापना एवं सर्वत्र पदघटना कार्या नवरं द्वे स्पर्शनरसनालक्षणे इंद्रिये येषां ते द्वींद्रियाः
शंखशुक्तिकादयः त्रीणि स्पर्शनरसनाघ्राणलक्षणानि इंद्रियाणि येषां ते त्रींद्रियाः कुंथुमत्कुणादयः चत्वारि स्पर्शनरसनाघ्राणचक्षुर्लक्ष
णानि इंद्रियाणि येषां ते चतुरिंद्रियाः दंशमशकादयः पंच स्पर्शनर सघ्राणचक्षुःश्रोत्रलक्षणानि इंद्रियाणि येषां ते पंचेंद्रिया मत्स्य
मकरमनुजादयः अमीषां च एकादिसंख्यानामिंद्रियाणां स्पर्शना दीनामसंव्यवहारराशिगतस्य प्राणिनो नैव क्रमेण लाभ
इति संप्रत्ययार्थमित्थं क्रमेणोपन्यासः इंद्रिया। णि च द्विधा तद्यथा द्रव्येंद्रियाणि भावेंद्रियाणि च तत्र द्र
व्योपकरणरूपाणि तानि च सविस्तरं नंद्यध्ययनटीकायां व्याख्या। तानीति न भूयो व्याख्यायंते भावेंद्रियाणि क्षयोपशमोप
योगरूपाणि तानि च भावानि पंचेंद्रियाणामपि क्षायोपशमिकोपयोग। रूपलब्धींद्रियपंचकसंभवात् केषांचिदव्यक्तफलदर्शनात् तथाहि व
कुलादयो पंचकामिनीगीतध्वनिश्रवणसविलासकटाक्षनिरीक्षणसुरभिप्रसूनगंधघ्राणरसास्वादननालिंगनस्पर्शनतः प्रमोद
मावेदयंतः कालक्षेपमुपलभ्यंते पुष्पफलादिप्रदायकत्वात् उक्तं च ऊंकिरवउलाईणं दीसइ समिंदियावलंभोवि तेन वि तदावरणक्खयो
वसमसंभवातेसिं तालनलावि इंद्रियाणि लौकिकव्यवहारपथावतीर्णैकेंद्रियादिव्यपदेशनिबंधनं किंतु द्रव्येंद्रियाणि तथाहि
येषामेकं द्रव्येंद्रियं स्पर्शनलक्षणमस्ति ते एकेंद्रिया एवं यावत् येषां ते पंचेंद्रियाः आह च पंचेंदिउव्व वउलो नरोव्व सव्वविस
उवलंभाउ तहवि न भन्नइ पंचेंदिउत्ति बज्झिंदियाभावा से किं तमित्यादि अथ का सा एकेंद्रियसंसारसमापन्नजीवप्र

ज्ञापनासूरिराह एकेंद्रियसंसारसमापन्नजीवप्रज्ञापना पंचविधा प्रज्ञप्ता एकेंद्रियाणां पंचविधत्वात् तदेव पंचविधत्वमाह तंजहेत्यादि पृथि
वीकाठिन्यादिलक्षणा प्रतीता सैव कायः शरीरं येषां ते पृथिवीकायाः एव पृथिवीकायिकाः स्वार्थे इकप्रत्ययः आपो द्रवाः प्रसिद्धा प्रतीता एव
ताः कायः शरीरं येषां ते अप्कायाः अप्काया एवाप्कायिकाः तेजो वह्निः स एव कायः शरीरं येषां ते तेजस्कायाः तेजस्काया एव तेजस्का
यिकाः वायुः पवनः स एव कायो येषां ते वायुकायाः २ एव वायुकायिकाः वनस्पतिर्लतादिरूपः स एव कायः शरीरं येषां ते वनस्पति
काया वनस्पतिकाया एव वनस्पतिकाः इह सर्वभूताधारत्वात्पृथिव्याः प्रथमं पृथिवीकायिकानामुपादानं तदनंतरं तत्प्रतिष्ठितत्वादप्कायि
कानामप्कायिकास्तु तेजःप्रतिपक्षभूतास्तदनंतरं तेजस्कायिकाना। मुपादानं तेजश्च वायुसंपर्कतः प्रवृद्धिमुपयातीति तत एतदनंतरं
वायुकायिकग्रहणं वायुश्च दूरस्थितोऽपि शाखादिकंपनात् लक्ष्य ते ततस्तदनंतरं वनस्पतिकायिकोपादानं स प्रतिष्ठीका।
यिकः स च बहुमानस्पृष्टः अपृथक् करोतीति से किंतमित्या दि अथ के ते पृथिवीकायिकाः सूरिराह पृथिविका
यिका द्विविधाः प्रज्ञप्तास्तद्यथा सूक्ष्मपृथिवीकाश्च बादरपृथिवीका यिकाश्च सूक्ष्मनामकर्मोदयात् सूक्ष्मा बादरनामकर्मोद
याद्बादराः कर्मोदयजनितत्वात्तु सूक्ष्मबादरत्वं नापेक्षिकं बदर मलकयोरिव सूक्ष्माश्च ते पृथिवीकायिकाः चशब्दः स्वगतप
र्याप्तापर्याप्तभेदसंसूचकः बादराश्च ते पृथिवीकायिकाश्च बादरपृथिवीकायिकाः अत्रापि चशब्दः स्वगतशर्करावालुकादिभेदसंसूचकः त
त्र सूक्ष्मपृथिवीकायिकाः समुद्गकप्रक्षिप्तगंधावयववत् सकललोकव्यापिनो बादराः प्रतिनियतदेशचारिणस्तथा प्रतिनियतदेशा
चारित्वं द्वितीयपदे प्रकटयिष्यति तत्र सूक्ष्मपृथिवीकायिकानां स्वरूपं जिज्ञासुरिदमाह सेकिंतमित्यादि अथ के ते सूक्ष्मपृथिवीकायिकाः
सूरिराह सूक्ष्मपृथिवीकायिका द्विविधाः प्रज्ञप्तास्तद्यथा पर्याप्तसूक्ष्मपृथिवीकायिकाश्च अपर्याप्तसूक्ष्मपृथिवीकायिकाश्च तत्र पर्याप्तिर्नाम।
आहारादिपुद्गलग्रहणपरिणमनहेतुरात्मनः शक्तिविशेषः स च पुद्गलोपचयादुपजायते किमुक्तं भवति उत्पत्तिदेशमागतेन प्रथमं ये गृही १२

ताः पुद्गलास्तेषां तथान्येषामपि प्रतिसमयं गृह्यमाणानां तत्संपर्कतस्तद्रूपतया जातानां यः शक्तिविशेष आहारादिपुद्गलखलरसरूपता
दानहेतुर्यथोदरांतर्गतानां पुद्गलविशेषाणामाहारपुद्गलखलरसरूपतापरिणमनहेतुः सा च पर्याप्तिः षोढा आहारपर्याप्तिः शरीरपर्याप्तिः प्राणा
पानपर्याप्तिर्भाषापर्याप्तिर्मनःपर्याप्तिश्च तत्र यया बाह्यमाहारमादाय खलरसरूपतया परिणमयति सा आहारपर्याप्तिः यया रसीभूतमाहारं
रसासृग्मांसमेदोस्थिमज्जाशुक्रलक्षणसप्तधातुरूपतया परिणमयति सा शरीरपर्याप्तिः यया धातुरूपतया परिणमितमाहारमिंद्रियरूपतया
परिणमयति सा इंद्रियपर्याप्तिः तथा चायमेवार्थस्तत्त्वार्थटीकायामुक्तः पंचानामपि इंद्रियाणां प्रायोग्यान् पुद्गलान् गृहीत्वा अनाभोगनिर्वर्तित
वीर्येण तद्भावनयनशक्तिरिंद्रियपर्याप्तिरिति यया पुनरुच्छ्वासप्रायोग्यान् पुद्गलानादायोच्छ्वासरूपतया परिणमय्यालंब्य मुंचति सा उ
च्छ्वासपर्याप्तिः यया तु भाषाप्रायोग्यान् पुद्गलानादाय भाषात्वेन परिणमय्या लंब्य मुंचति सा भाषापर्याप्तिः यया पुनर्मनःप्रायोग्यान् पुद्ग
लानादाय मनस्त्वेन परिणमय्यालंब्य मुंचति सा मनःपर्याप्तिः एताश्च यथाक्रममेकेंद्रियाणां संज्ञिवर्जानां द्वींद्रियादी
नां संज्ञिनां च चतुःपंचषट्संख्या भवंति उक्तं च प्रज्ञापनामूलटीकायां ताः एकेंद्रियाणां चतस्रो विकलेंद्रियाणां पंच संज्ञिनां षडिति
एता अपि प्रथमसमय एव युगपत् सर्वा अपि निष्पादयितुमारभ्यं ते क्रमेण च निष्ठामुपयांति तत्र प्रथममाहारपर्याप्तिस्तत
इंद्रियपर्याप्तिरित्यादि आहारपर्याप्तिश्च प्रथमसमय एव निष्पद्यते शेषास्तु प्रत्येकमंतर्मुहूर्तेन कालेन अथ आहारपर्याप्तिः प्रथमस
मय एव निष्पद्यत इति कथमवसीयते उच्यते यतः आहारपदे द्वितीयोद्देशके सूत्रमिदं आहारपज्जत्तीए अपज्जत्तए णं भंते किं आहारए अणा
हारए गोयमा नो आहारए इति यत आहारपर्याप्त्या अपर्याप्तो विग्रहगतावेवोपपद्यते नोपपातक्षेत्रमागतोऽपि उपपातक्षेत्रमागतस्य प्रथ
मसमय एवाहारकत्वात् ततः प्रथमसमयादिकी आहारपर्याप्तिनिर्वृत्तिः यदि पुनरुपपातक्षेत्रमागतोऽपि आहारपर्याप्त्या अपर्याप्तः स्यात्तत एवं।
मपि व्याकरणसूत्रमभविष्यत् सिय आहारए सिय अणाहारए यथा शरीरादिपर्याप्तिष्वसिय आहारए सिय अणाहारए इति सर्वासामपि पर्या।

यप्तीनां परिसमाप्तिकालात् अंतर्मुहूर्त्तप्रमाणः पर्याप्तिर्या विद्यते येषां ते पर्याप्ताः अभ्रादित्वात् इति मत्वर्थीयोऽप्रत्ययः पर्याप्ताश्च ते सूक्ष्मपृथिवीका-
यिकाश्च पर्याप्तसूक्ष्मपृथिवीकायिकाः [illegible] पर्याप्तकरणपर्याप्तसूक्ष्मगतं लिंगद्वयसूचकः एवं तु स्वयोग्यपर्याप्तिपरिसमाप्तिविकला अप-
र्याप्ताः अपर्याप्ताश्च ते सूक्ष्मपृथिवीकायिकाश्च अपर्याप्तसूक्ष्मपृथिवीकायिकाश्च शब्दः करणात् स्वगतानेकभेदसूचकः तथा हि द्वि-
धाः सूक्ष्मपृथिवीकायिका अपर्याप्ताः तद्यथा लब्ध्या करणेन च तत्र ये अपर्याप्तका एव संतो म्रियंते ते लब्ध्यपर्याप्तकाः ये पुनः करणानि शरी-
रेंद्रियादीनि न तावन्निर्वर्त्तयंति अथ चावश्यं निर्वर्त्तयिष्यंति ते करणापर्याप्ताः उपसंहारमाह से त्तं इत्यादि एते सूक्ष्मपृथिवीकायिकाः तदेवं
सूक्ष्मपृथिवीकायिकाः तदेवं सूक्ष्मपृथिवीकायिकान् निरूपयन् प्रतिवाद पृथिवीकायिकान् निरूपयितुं प्रश्नसूत्रमाह से किं तमि-
त्यादि अथ के ते बादरपृथिवीकायिकाः सूरिराह बादरपृथिवीकायिका द्वि- धाः प्रज्ञप्ताः तद्यथा श्लक्ष्णबादरपृथिवीकायिकाः खरबादर-
पृथिवीकायिकाश्च तत्र श्लक्ष्णा नाम चूर्णितलोष्टकल्पा मृदुः पृथ्वी तदात्मका जीवा अपि उपचारतः श्लक्ष्णास्ते च ते बादरपृ-
थिवीकायिकाश्च श्लक्ष्णबादरपृथिवीकायिका अथवा श्लक्ष्णा च सा बादर- पृथिवी च सा कायः शरीरं येषां ते श्लक्ष्णबादरपृथिवीकायाः त
एव स्वार्थिककप्रत्ययविधानात् श्लक्ष्णबादरपृथिवीकायिकाश्च शब्दो वक्ष्य- माणस्वगतानेकभेदसूचकः खरा नाम पृथिवी संघातविशेषं [illegible]
त्मका जीवा अपि खरास्ते च ते बादरपृथिवीकायिकाश्च खरबादरपृथिवीकायिका अथवा पूर्ववत् प्रकारांतरेण समासः च शब्दः स्वगतवक्ष्य-
माणबहुविधभेदसूचकः से किं तमित्यादि अथ के ते श्लक्ष्णबादरपृथिवीकायिकाः सूरिराह श्लक्ष्णबादरपृथिवीकायिकाः सप्तविधाः प्रज्ञप्ताः तद-
व सप्तविधत्वं तद्यथेत्यादिना दर्शयति कृष्णमृत्तिका एवं नीलमृत्तिका लोहितमृत्तिका हारिद्रमृत्तिका इत्थं वर्णभेदेन पंचविधत्वमुक्तं पांडुमृत्तिका ना-
म देशविशेषे या धूली पांडुमती पांडुरिति प्रसिद्धा तदात्मका जीवा अप्युपचारात् पांडुमृत्तिका उक्ताः पणगमट्टियत्ति नद्यादिपूरप्लाविते देशे नद्या-
दिपूरे अपगते यो भूमौ श्लक्ष्णमृदुरूपो जलमलापरपर्यायः पंकः स पनकमृत्तिका तदात्मका जीवा अप्युपचारात् पनकमृत्तिका निगमनमाह

से त्तं सण्हबायरपुढविकाइया उपसंहारमाह से किं तमित्यादि अथ के ते खरबादरपृथिवीकायिकाः सूरिराह खरबादरपृथिवीकायिका अनेक-
विधाः प्रज्ञप्ताः अनेकविधत्वमाह [illegible] तानेव चत्वारिंशद्भेदानाह पुढवी य इत्यादि गाथाचतुष्टयं पृथिवीति नाम सामान्या
भावेऽत्र पृथिवी नदीतटभित्त्यादिरूपा च शब्दः उत्तरत्र [illegible] समुच्चये शर्करा लघूपलशकलरूपा वालुका सिकताः उपलः टंका-
द्युपकरणपरिकर्मणायोग्यः पाषाणः शिला घटनयोग्या महान् पाषाणविशेषः लवणं सामुद्रादि ऊषो [illegible]
शात् ऊषरं क्षेत्रं अयः ताम्र त्रपु सीसक रूप्य सुवर्णानि प्रतीतानि १५ वज्रं हीरकः १६ हरितालहिंगुलकमनःशिलाः प्रतीताः १९ सीसकं पारदः
२० अंजनं सौवीरांजनादि २१ प्रवालं विद्रुमः २२ अभ्रपटलं प्रसिद्धं २३ अभ्रवालुका २४ बादरकाये इति बादरपृथिवीकाये अमी भेदा इति
शेषः मणिविधानानि इति वक्ष्यमाणानि गोमेज्जकादिमणिविधानानि च मणिलक्षणा बादरपृथिवीकायलक्षणा ज्ञातव्याः तान्येव मणि-
विधानानि निदर्शयति गोमेज्जए त्यादि गोमेज्जकः २५ रुचकः २४ अंकः २५ स्फटिकः २६ च पूर्ववत्
लोहिताक्षः २७ मरकतः २८ मसारगल्लः २९ भुजमोचकः ३० इंद्रनीलश्च ३१ चंदनो ३२ गैरिकः ३३ हंसगर्भः ३४ पुलकः
३५ सौगंधिकश्च ३६ चंद्रप्रभो ३७ वैडूर्यो ३८ जलकांतः ३९ सूर्यकांतश्च ४० तदेवमाद्यगाथया चतुर्दश पृथिव्यादयश्चतुर्दश भेदा उक्ता द्वि-
तीयगाथया अष्टौ हरितालादयः तृतीयगाथया गोमेज्जकादयो नव चतुर्थगाथया नव इति सर्वसंख्यया चत्वारिंशत् ये यावंतस्तथाप्रकारा इ-
ति ये यथाविधाः तथाप्रकारा मणिभेदाः पद्मरागादयः तेऽपि खरबादरपृथिवीकायत्वेन वक्तव्याः तेषां समासेन इत्यादि सामान्यतो बादरपृथि-
वीकायिकाः समासतः संक्षेपेण द्विविधाः प्रज्ञप्ताः तद्यथा पर्याप्तकाः अपर्याप्तकाश्च तत्र ये अपर्याप्तकास्ते स्वयोग्याः पर्याप्तीः सा-
कल्येनासंप्राप्ताः अथवा असंप्राप्ता इति विशिष्टान् वर्णादीन् अनुपगतास्तथाहि वर्णादिभेदविवक्षायां न शक्यते कृष्णादिना वर्ण-
भेदेन व्यपदेष्टुं किं कारणमिति चेत् उच्यते इह शरीरादिपर्याप्तिपरिसमाप्तौ सत्यां बादराणां वर्णादिविभागः प्रकटो भवति नापरि-

प्रज्ञाप०वृत्ति॥ पर्याप्तित्वपर्याप्ता अपर्याप्ता एव म्रियंते ततोऽस्पष्टो वर्णादिविभाग इत्यसंप्राप्ता इत्युक्तं न तु कस्मादुच्छ्वासपर्याप्त्यैवापर्याप्ता म्रियंते नार्वाक्
शरीरेंद्रियपर्याप्तिभ्यां पर्याप्ता अपि उच्यते यस्मादागामिभवायुर्बद्ध्वा म्रियंते तच्च एवं बद्धो नावश्यं शरीरेंद्रियपर्याप्तानां बध्नंतीति
नायाति नान्यथा इति अस्पष्टत्वाच्च सामान्यतो वर्णादीन् असंप्राप्ता इति तत्र नत्त्वुक्तं यतः शरीरमात्रेण विना वर्णादयः शरीरं च शरी
रपर्याप्त्या संजातमिति तेषां च शरीरपर्याप्ता इत्यादि तत्र ये ते पर्याप्तकाः परिसमाप्तयो यथा सम्यक् पर्याप्तयः एतेषां वर्णादेशेन वर्णतश्च विवक्ष्य
या गंधादेशेन रसादेशेन स्पर्शादेशेन सहस्राग्रशः सहस्रसंख्यया विधानानि भेदाः प्रह्वय वर्णाः कृष्णादिभेदात् पंच गंधौ सुरभीतरभेदात्
द्वौ रसा तिक्तादयः पंच स्पर्शा मृदुकर्कशादयोऽष्टौ एकैकस्मिंश्च वर्णे तारतम्यभेदेनानेकेऽवांतरभेदास्तथाहि भ्रमराङ्गारकोकिलकज्ज
लादिषु तारतम्येन कृष्णः कृष्णतरः इत्यादि कृष्णतया अनेके। कृष्णभेदा एवं नीलादिषु वर्णेषु प्रत्येकमनेकभेदाः सुरभिगंधः समस्तोऽपि त
था परस्परं वर्णानां संयोगतो धूसरकर्बुरत्वादयोऽनेके। एवं गंधादीनामपि परस्परं गंधादिभिः समायोगादनंतो
नं तिर्विवर्णाद्यादेशैः सहस्राग्रशो भेदाः संख्येयादेशैः सहस्र। स्राग्रशो भेदाः संख्येयाइं जोणिप्पमुहसयसहस्साइं इति सं
ख्येयानि योनिप्रमुखानि योनिद्वाराणि शतसहस्राणि तथाहि एकैकस्मिन्वर्णे गंधे रसे स्पर्शे च संवृता योनिः पृथिवीकायिका
नां सा च त्रिधा सचित्ता अचित्ता मिश्रा च पुनरेकैका त्रिधा शीता उष्णा शीतोष्णा शीतादीनामपि प्रत्येकं तारतम्यभेदादनेकभेदत्वं केवलं
मेव विशिष्टवर्णादियुक्ताः संख्यातीता अपि स्वस्थाने व्यक्तिभेदेन योनयो नायो जातिमधिकृत्य एकैकयोनिर्गण्यते ततः संख्येयानि पृथि
वीकायिकानां योनिशतसहस्राणि भवंति मानि च सूक्ष्मबादरगतसर्वसंख्यया सप्त पज्जत्तगनिस्साए इत्यादि पर्याप्तकनिश्रया अपर्याप्त
का व्युत्क्रामंति उत्पद्यंते कियंत इत्याह यत्रैकः पर्याप्तकस्तत्र तन्निश्रया असंख्येयाः संख्यातीता अपर्याप्तकाः उपसंहारमाह से त्तमित्या
दि निगमनत्रयं सुगमं तदेवमुक्ताः पृथिवीकायिकाः संप्रत्यप्कायिकप्रतिपादनार्थमाह से किं तमित्यादि सुगमं उस्सा इत्यवश्यायः त्रेहः १४

हिमं स्त्यानोदकं महिका गर्भमासेषु सूक्ष्मवर्षं करकाः घनोपलाः हरतनुर्यो भुवमुद्भिद्य गोधूमांकुरतृणाग्रादिषु बद्धो बिंदुरूपजाय
ते शुद्धोदकमंतरिक्षसमुद्भवं नद्यादिगतं वा तच्च स्पर्शरसादिभेदादनेकभेदं तदेवानेकभेदत्वं दर्शयति शीतोदकं नदीतडागादिषु वटवा
पीपुष्करिण्यादिषु शीतपरिणामं उष्णोदकं स्वभावत एव क्वचिन्निर्झरादावुष्णपरिणामं क्षारोदकमीषल्लवणं स्वभावं यथा लाटदेशादौ के
षुचिदवटेषु खट्टोदकमीषदम्लपरिणामं अम्लोदकमतीवाम्लस्वभावमम्लपरिणामं कांजिकवत् लवणोदकं लवणसमुद्रे वारुण
समुद्रे क्षीरोदकं क्षीरसमुद्रे घृतोदकं घृतोदे इक्षुरसोदकं इक्षुरसमुद्रे आदिशब्दादन्यथाप्रकारा रसस्पर्शादिभेदभिन्नाः सद्रोदका
दयो बादराप्कायिकास्ते सर्वे बादराप्कायिकतया प्रतिपत्तव्याः। समासतो इत्यादि। प्राग्वत् नवरं संख्येयानि योनिप्रमुखानि
शतसहस्राणीत्यत्रापि सप्त वेदितव्यानि उक्ता अप्कायिकाः संप्रति तेजस्कायिकान् प्रतिपादयिषुराह से किं तमित्या
दि सुगमं नवरं अंगारो विगतधूमज्वालो जाज्वल्यमानः खा दिरादि ज्वाला अनलसंबद्धा दीपशिखा मुर्मुरः
कुंभकारादीनां भस्ममिश्रिताग्निकणरूपः अर्चिरनलाप्रतिबद्धा ज्वाला। अलातमुल्मुकं शुद्धाग्निरयः पिंडादौ उल्का उडली वि
द्युता अशनिराकाशात्पतन् अग्निमयः कणः निर्घातो वैक्रिया शनिप्रपातः संघर्षसमुत्थितो अरण्यादिकाष्ठनिर्मथनसमुद्भूतः सू
र्यकांतमणिनिःसृतः सूर्यखरकिरणसंपर्के सूर्यकांतमणेर्यः समुपजायतेऽनलः इत्यादि आदिशब्दादन्यथाप्रकारा एवं प्रका
रा ये तेजस्कायिकास्ते बादरतेजस्कायिकतयावसातव्याः समासतो इत्यादि प्राग्वत् नवरमत्रापि संख्येयानि योनिप्रमुखाणि शतसह
स्राणि सप्त वेदितव्यानि उक्तास्तेजस्कायिका वायुकायिकप्रतिपादनार्थमाह से किं तमित्यादि प्रतीतं नवरं पाईणवाए इत्यादि प्राच्या दिशा
समागच्छति वातः स प्राचीनवातः एवमपाचीनवातः दक्षिणवात उदीचीनवातश्च वक्तव्यः ऊर्ध्वमुद्गच्छन् यो वाति वातः स ऊर्ध्ववातः एवमधोवातः
तिर्यग्वातीव विपरिवातानीयो विदिग्वातो यो विदिग्भ्यो वाति वातोद्भ्रामः अनवस्थितो वातः वातोत्कलिकाः समुद्र इव वातोत्कलिकावातः

मंडलीवातोत्कलिकावातः उत्कलिकाभिः प्रचुरतराभिः संमिश्रो यो वातो मंडलिकावातो मंडलिकाभिर्मिश्रितस्त्वारभ्य प्र-
चुरतराभिः संमिश्रो यो वातः गुंजावातो यो गुंजन् शब्दं कुर्वन् वाति झंझावातः सवृष्टिः अशुभनिष्ठुर इत्यन्ये संवर्तकवातः तृणादिसंवर्तनस्व-
भावः घनवातो घनपरिणामो रत्नप्रभाद्यधोव्यवस्थितो वाततनुवातो विरलपरिणामो घनवातस्याधःस्थायी शुद्धवातो बस्त्यादिगत इत्यन्ये
ते समासतो इत्यादि पूर्ववत् अत्रापि सप्त योनिप्रमुखशतसहस्राणि समवसेयानि उक्ता वायुकायिकाः संप्रति वनस्पतिकायि-
कप्रतिपादनार्थमाह से किं तमित्यादि सुगमं यावत् सेत्तं सुहुमवणस्सइकाइया से किं तमित्यादि अथ के ते बादरवनस्पतिकायि-
का द्विविधाः प्रज्ञप्तास्तद्यथा प्रत्येकशरीरबादरवनस्पतिकायिका साधारणशरीरबादरवनस्पतिकायिकाश्च तत्र एकमेकं
जीवं प्रति गतं प्रत्येकं शरीरं येषां ते प्रत्येकशरीराः ते च ते बादर वनस्पतिकायिकाश्च प्रत्येकशरीरबादरवनस्पतिकायि-
काश्च आह च पुगतानेकसलदेश्वकः समानं तुल्यप्राणापा नाद्युपलोगं यथा भवति एवं अनंतानामेकीभाव-
नाऽनंतानां जंतूनां साधारणं संग्रहणं येन तत् साधारणं शरीरं येषां ते स साधारणशरीराः ते च ते बादरवनस्पतिकायिकाश्च साधार-
णबादरवनस्पतिकायिकाश्च साधारणबादरवनस्पतिकायिकाः वा शब्दः अपि पुगतानेकसलदेश्वकः से किं तमित्यादि अथ के
ते प्रत्येकशरीरबादरवनस्पतिकायिकाः सूरिराह प्रत्येकशरीरबादरवनस्पतिकायिकाः द्वादशविधाः प्रज्ञप्तास्तद्यथा रुक्खेत्यादि वृ-
क्षाश्चूतादयः गुच्छा वृंताकीप्रभृतयः गुल्मानि नवमालिकाप्रभृतीनि लता चंपकलतादयः इह येषां स्कंधप्रदेशे विवक्षितोर्ध्वगतैकशाखा-
व्यतिरेकेण नान्यशाखा तथाविधा परिस्थूला न निर्गच्छति ते लता विज्ञेयाः ते च चंपकादय इति वल्ल्यः कूष्मांडीप्रभृतयः पर्वगा इक्ष्वादयः तृणा-
नि दर्भकुशार्जुनादीनि वलयानि केतकीकदल्यादीनि तेषां हि त्वग्वलयाकारेण व्यवस्थितेति हरितानि तंदुलीयकवस्तुलप्रभृतीनि
ओषध्यः फलपाकांताः शाल्यादयः जलरुहा इति जलरुहा उदकावकपनकादयः कुहणा भूमिस्फोटाभिधाना आयकायप्रभृतयः त-

स्यासां द्वादशानां निर्देशात् इति न्यायात् प्रथमतो वृक्षप्रतिपादनार्थमाह से किं तमित्यादि अथ के ते वृक्षाः सूरिराह वृक्षा द्विविधाः प्रज्ञप्तास्तद्य-
था एकास्थिकाश्च बहुबीजकाश्च तत्र फलं फलं प्रति एकमस्थि येषां ते एकास्थिकाः अपि शब्दो वक्ष्यमाणं पुगतानेकसलदेश्वकः तथा प्रायोऽस्थिब-
धमंतरेण एव समस्तफलान्तर्वर्तीनि बहूनि बीजानि येषां ते बहुबीजकाः शेषाः सैतिकप्रत्ययः अवापि च शब्दो वक्ष्यमाणं पुगतानेकसलदेश्व-
कः तत्र एकास्थिकप्रतिपादनार्थमाह च से किं तमित्यादि अथ के ते एकास्थिका अनेकविधाः प्रज्ञप्तास्तद्यथा निंबेत्यादि गाथात्रयं तत्र
यं निंबाम्रजंबूकोशांबाः प्रतीताः शालः सर्जः अंकोल्लः तिल्लकोऽः पाडुनसबवृक्षः उम्बरकाः स्पलादेशाः आकारोल्लः इति वचनात् पीलुः प्र-
तीतः शेलुः श्लेष्मातकः सल्लकी मालुकोऽदेशप्रतीतो वकुलः क सरः पलाशः किंशुकः करंजो नक्तमालः पुत्रंजीवकोदेशवि-
शेषप्रसिद्धः अरिष्टः पिचुमंदः विभीतकोऽक्षः हरीतकः कोऽक गादेशप्रसिद्धः कषायबकुलः तल्लातकोऽप्यथ भल्लात-
का विधाना नि फलानि लोकप्रसिद्धानि उंबरिका क्षीरणी धातकी प्रियालश्चतिकरंजाश्चल्ला शिंशपाः सनप्रत्र-
गानाग्नशीपर्णीशाका लोकप्रतीताः ज्ञेयाश्च तद्विशेषा एकास्थि पि चान्ये तथा प्रकारा एवं प्रकारा सत्र देशविशेषतो विज्ञे-
याः एतेषां एकास्थिकानां वृक्षाणां मूलान्यपि संख्येयजी वकानि असंख्येयप्रत्येकशरीरजीवात्मकानि एवं कंदा अपि
स्कंधा अपि त्वचोऽपि शाखा अपि प्रवाला अपि प्रत्येकशरीरजीवकाः तत्र मूलानि प्रतीतानि कंदस्याधस्तात् स्कंधः प्रसरंति तेषामुपरि कंदाः त्व-
लोकप्रतीताः स्कंधाः त्वचः छल्ल्यः शालाः शाखाः प्रवालाः पल्लवांकुराः पत्राण्यसंख्येयजीवात्मकानि पत्राणि प्रत्येकजीवकानि एकैकपत्रमे-
कैकपत्रमेकैकपत्रमेकैकेन जीवेनाधिष्ठितमिति भावः पुष्पाण्यनेकजीवानि प्रायः प्रतिपुष्पमनेकजीवभावात् फलान्येकास्थिकानि उप-
संहारमाह सेत्तं एगट्ठिया सुगमं बहुबीजकप्रतिपादनार्थमाह च से किं तमित्यादि अथ के ते बहुबीजकाः सूरिराह बहुबीजकाः अनेकवि-
धाः प्रज्ञप्तास्तद्यथा अस्थिकेत्यादि गाथात्रयं एते च अस्थिकतिंदुककपित्थ अंबाडकमाउलिंगबिल्लआमलकपनसदाडिम अश्वत्थउंबरवटन्यग्रोध नंदि-

प्रज्ञा०वृत्ति॥

कपिच्छलीशतकीमह्रकाउम्बरिकुम्बं निदवदालितिलकालवकवृत्तो घत्तारीरघसमन्नपर्णलासव इष्वबदंतानी एकट्क कदम्बानां मध्ये
केचिदतिप्रसिद्धाः केचिद्देशविशेषतोऽवसेयाः नवरमिहामलकादयो नालोकप्रसिद्धाः प्रतिपत्तव्याः तेषामेकास्थिकत्वात् किंतु देशविशेषप्र
सिद्धा बहुबीजका एव केचन तथा याचत्रतहयगारत्रियेवात्यतथा एवंप्रकारा एवंप्रकारा ये चान्ये बहुबीजका मंतव्याः एतेषामपि मूलकंदस्कंधत्वक्
शाखाप्रवालाः प्रत्येकमसंख्येयप्रत्येकशरीरजीवकाः पत्राण्यपि प्रत्येकजीवकानि पुष्पाण्यनेकजीवकानि फलानि बहुबीजकानि उपसं
हारमाह सेत्तमित्यादि निगमनवाक्यं सुगमं संप्रति गुच्छप्रतिपादनार्थमाह से किं तमित्यादि एतउल्मादिभेदाः प्रायः स्वरूपत एव प्रतीताः केचि
द्देशविशेषादवगंतव्याः अत्र इक्का विशुद्धस्यैकस्य नामशब्दीनां परत्रापि तत्राम शब्दानंतरत्रान्यो निजजातीयः सदृशनामप्रतिपत्तव्याः अथ
वा एकास्थिक इति तेनैकजातीयका न भवति यथा नालिकेरी तद्रूपा। कास्थिकत्वादेकास्थिक इत्यावलयाकारत्वाद्वलयस्ततोऽनेका
जातीयत्वादनेकत्रापि तत्रामेति दृश्यमानं न विरुध्यते सांप्रतं तु कोऽत्र कार्यसंग्रहार्थमिदमाह नाणाविहेत्यादि नानाविधानि
नाप्रकाराणि संस्थानान्याकृतिर्येषां तानि नानाविधसंस्थानानि तेऽनानाचमि तिहकं ग्रहणमुपलक्षणं तेन उल्मादीनामपि द्रष्टव्यं पत्राणि
एकजीवकानि एकजीवाधिष्ठितानि तद्देहितव्यानि स्कंधोऽपि एकजीवः। कजीवाधिष्ठिता किं सर्वत्राप्यपि नेत्याह तालसरलनालिकेरी
णां ग्रहणमुपलक्षणमिति नान्येषामपि पत्राणि भागमनेकजीवाधिष्ठितं स्कंधस्य प्रतिपत्तं अन्येषां तु स्कंधः प्रत्येकमनेकप्रत्येकशरीरजीवात्म
कः इति सामर्थ्यादवसेयं स्वधातिशुद्धा एगजीवियाइत्येवं मनसि धृतात् अथ यदि प्रत्येकमनेकप्रत्येकशरीरजीवाधिष्ठितास्ततः कथमेकस्वरूप
शरीराकारेणोपलभ्यंत इति तदवष्टानस्वरूपमाह जह सगलेत्यादि यथा सकलसर्षपाणां श्लेषमिश्राणां श्लेषद्रव्यमिश्रितानां वर्तिता वर्तिरेक
रूपा भवति अथ च ते सकलसर्षपाः पृथक्पृथक्शरीराः संतः पृथक्पृथगवगाहनया व्यवतिष्ठंते तथा प्रत्येकशरीराणां प्रत्येकशरीरिणां जीवानां शरीर
संघाताः पृथक्पृथग्वगाहना भवंति इह श्लेषद्रव्यस्थानीया रागद्वेषोपचितं तथाविधकर्मसकलसर्षपस्थानीयाः प्रत्येकशरीरः सा १६

कलसर्षपग्रहणं सर्षपानेवविवक्षुः प्रतिपत्त्या पृथकपृथगवगाहनाः प्रत्येकशरीरा एव विवक्षुः प्रतिपत्त्यर्थं अथैवार्थदृष्टांतांतरमाह जह वेत्यादि वा शब्दो दृष्टांतांतर
समुच्चयार्थे तिलशष्कुलिका तिलप्रधाना पिष्टमयी अपूपिका बहुभिस्तिलैर्मिश्रिता सती यथा पृथकपृथगवगाहतिलात्मिका भवति एवं विदेकरूपा
तथा अनयोः वापमया प्रत्येकशरीराणां जीवानां शरीरसंघाता कथंचिदेकरूपाः पृथकपृथगवगाहनाश्च भवंति उपसंहारमाह से त्तमित्यादि सु
गमं संप्रति साधारणवनस्पतिकायिकप्रतिपादनार्थमाह से किं तमित्यादि अथ के ते साधारणशरीरबादरवनस्पतिकायिकाः साधारण
शरीरबादरवनस्पतिकायिका अनेकविधाः प्रज्ञप्तास्तद्यथा अवए इत्यादि एते च केचिदतिप्रसिद्धत्वात् केचिद्देशविशेषतः स्वयमवगंतव्याः ज्ञेया
व तत्र या विरालिति ये चिद्रान्यर्थमतिरिक्ता स्तथाप्रकारास्तद्रूपकाराः। ते विज्ञेया अनंतजीवा ज्ञातव्याः तणमत्यादि तृणमूलं एतेषामात्मके विज्ञाति
ने दर्शनादशालदानां संख्याता नाः क्वचिदनंताश्च ज्ञातव्याः सिंघाडगस्सेत्यादि शृंगाटकस्यायं गुच्छः सोऽनेकजीवात्मक इति ज्ञातव्यः
। एकस्यात्ववादीनामनेकजीवात्मकत्वात् केवलं तत्रापि यानि। पत्राणि तानि प्रत्येकजीवानि फले पुनः प्रत्येकमेकैकस्मि
न् द्वौ द्वौ जीवौ भणितौ जस्स मूलस्सेत्यादि यस्य मूलस्य भग्न। स्य सतः समः एकांतरूपश्चक्राकारो भंगः प्रकर्षेण दृश्यते तन्मूल
मनंतजीवमवसेयं ज्ञेयाश्चान्येऽपि तथाविधा इति यान्यपि तान्यपि विरसा। नितथाप्रकाराणि तेऽपि अधिकृतसमभंगमूलप्रकारणि तान्यनंतजीवानि
ज्ञातव्यानि एवं कंदस्कंधत्वक्शाखाप्रवालपत्रपुष्पफलबीजविषया अपि नव गाथा व्याख्येयाः संप्रति प्रत्येकशरीरलक्षणाभिधानार्थं गाथाद्वयक
माह जस्सेत्यादि यस्य मूलस्य भग्नस्य सतो भंगो ग्रंथिमन्तरादौ विषमस्त्वेदवृद्धत्वं ततः प्रदृश्यते प्रकर्षेण दृश्यते तथा लक्ष्यते तन्मूलं प्रत्येकजी
व प्रत्येकशरीरजीवात्मकं ज्ञातव्यं ज्ञेयाश्चान्येऽपि तथाविधा इति यान्यपि तान्यपि विरसानि तथाप्रकाराणि तेऽपि अधिकृतसदृशमूलसदृशानि मूलानि
तान्यपि प्रत्येकशरीरजीवात्मकानि एवं कंदादिविषया अपि नव गाथा भावनीयाः यत्र च लाइलिंगत्वव्यत्ययः सप्राकृतलक्षणादवसेयः अधुना मू
लादिगतानां वल्कक्षणां बहुलानामनंतजीवत्वपरिज्ञानार्थं लक्षणमाह जस्स मूलस्सेत्यादि गाथाचतुष्टयं यस्य मूलस्य काष्ठात् मध्यसारात् छल्लिवल्कं

प्रज्ञाप० वृत्ति

पावहलतरा भवति सा अनंतजीवा ज्ञातव्याः कीदृशी भंगः भज्यमानस्य तरो विहन्नियापि त्वचा अधिकृतया अनंतजीवत्वेन निश्चितया समानरूपा बह्वी सापि तथाविधअ
नंतजीवात्मिका ज्ञातव्या एवं कंदस्कंधशाखाविषया अपि तिस्रो गाथाः परिभावनीयाः अथ नानासामेव बह्वीनां प्रत्येकजीवपरिज्ञानाय लक्षणमा
ह जस्समूलस्सेत्यादि गाथा चतुष्टयं यस्य मूलस्य काष्ठात् मध्यसारात् बहलतरा छल्ली भवति सा परित्तजीवा प्रत्येकशरीरजीवात्मिका इष्टव्या ज्ञाया
वन्नातना विहन्नियापि त्वचा अधिकृतया प्रत्येकशरीरजीवात्मकत्वेन विनिश्चितया बह्वी समानरूपा बह्वी सापि तथा विध प्रत्येकशरीरजीवात्मिकावगंतव्या।
एवं कंदादिविषया अपि तिस्रो गाथा भावनीयाः यदुक्तं जस्स मूलस्स भग्गस्स समो भंगो पदीसई इत्यादि तादवलक्षणमनंतजीवप्रतिपादयिषुरिदमाह चक्कागमि
त्यादि चक्राकं चक्राकारं समं भज्यमानस्य मूलकंदः स्कंधत्वक् शाखा पत्रपुष्पादि भवति तन्मूलादिकमनंतजीवं विजानीहि
तिसंधः तथा गांठौ भंगे घाप्यो भवति ग्रंथिः एवं मामान्या तानंगस्थानं। वा समयस्य भज्यमानस्य चूर्णेन रजसा घनेन व्याप्तं भवति अथवा पस्य
पत्रादेर्भज्यमानस्य चक्राकारं भंगं रजसा ये स्थितं तत्रापि विविनाप थिवीसदृशेन भेदेन भंगस्थानं भवति सर्यकर एतस्मात्केदारतरि के
२ अतत्सवं ड स्य वसमानां गोलवतीति भावः समनंतः कायं विजानीहि ॥ उन रपिलक्षणांतरमाह गूढछिरागमित्यादि यत्पत्रं सक्षीरं निःक्षीरं वा गूढ
सिराकं मल्लक्ष्यमाणशिरावद्धाषंयदपि च पत्रं नष्टं संधिबंधातु पलक्ष्यमाण पत्रार्द्धद्वयसंधि तदनंतजीवं विजानीहि संप्रति पुष्पादिगतं विशेषमभिधेष
मभिधित्सुराह पुष्पाजलयेत्यादि पुष्पाणि च वृंतबद्धानि तथा थाजलजानि सहस्रपत्रादीनि स्थलजानि कोरंटकादीनि एतान्यपि च प्रत्येकं द्विधा तद्यथा कानि
निचि द्वृंतबद्धानि अतिमुक्तकप्रवृत्तीनि कानिचित् नालबद्धानि जातिपुष्पप्रवृत्तीनि तत्र पत्रतामध्ये कानिचित् पत्रादिगतजीवापेक्षया संख्येयजीवानि कानि
चिद संख्येयजीवानि चिद नंतजीवानि यथागममवबोद्धव्यानि अत्रैवकंचिद्विशेषमाह ॥ जे केई इत्यादि यानि कानिचिन्नालिकाबद्धानि पुष्पाणि जात्या
दिगतानि तानि सर्वाण्यपि संख्यातजीवकानि भणितानि तीर्थकरगणधरैः स्निहूस्निहूपुष्पं तु यत्र अनंतजीवं यान्यपि चान्यानि स्निहूपुष्पकल्पानि तान्यपि तथावि
धानि अनंतजीवात्मकानि ज्ञातव्यानि ॥ पउमुप्पलिनीकंदे इत्यादि पद्मिनीकंदः अंतरकंदो जलजवनस्पतिविशेषकंदस्तथा झिल्लिका वनस्पतिविशेषरूपा १७

एतेसर्वेप्यनंतजीवा नवरं पद्मिन्यादीनां बिसमृणालेषु एकएवजीवः एकजीवात्मकौ बिसमृणालाविति भावः ॥ पलंडु इत्यादि पलांडुकं
दो लसुनकंदः कंदलीवनस्पतिविशेषः कुस्तुंबको प्येवमेवएते सर्वेपि परित्तजीवाः प्रत्येकशरीरजीवात्मकाः इति पत्रत्वप्यपि चान्ये एवं
प्रकारा अनंतजीवात्मकलक्षणविरहिता स्तेपि तथाविधाः प्रत्येकशरीरजीवात्मका वेदितव्याः ॥ पउमुप्पलनलिनाइत्यादि गाथाद्वयं पद्मानामु
त्पलानां नलिनानां सुभगानां सौगंधिकानां अरविंदानां कोकनदानां शतपत्राणां सहस्रपत्राणां प्रत्येकं यत् वृंतं समवंधनं यानि च बाह्यपत्रा
णि प्रत्येकं हरिद्वर्णानि यावत्कर्णिका पत्राधारस्तानि एतानि सर्वाण्येकजीवात्मकानि यानि पुनरभ्यंतराणि पत्राणि ये च किंजल्ककेसराणि या च
मिंजाः फलानि प्रत्येकमेकैकजीवाधिष्ठितानि वेदितव्यानि इत्यर्थः ॥ गाथाद्वयं वेणुर्वंशो नडस्तृणविशेषः इक्षुवाडिया दयो लो
कतः प्रत्येतव्याः तृणानि सर्वाण्यपि तेषां पर्वाणि पर्वाण्येतानि एतेषां यदक्षि यच्च पर्व यच्च परिमोड तदेकपर्वपरिवेष्टनं च
रमेतानि एकजीवस्य संबंधीनि भवंति एकजीवात्मकानि भवंति। नीति भावः पत्राणि पुनरेतेषां प्रत्येकमेकजीवाधिष्ठिता
नि पुष्पाणि अनेकजीवात्मकानि ॥ पूसफलमित्यादि पुष्पफलं फलं एवं कालिंगं तुंबं त्रपुसं एलवालुकानि विशेषरूपं वालुकं
घोषातकं पटोलं तिंदुकं तिंदूसं चयत् फलं एतेषु प्रत्येकं वृंतं तस्य समंसकटाहं तिस मां समगिरं तथा कटाह एतानि त्रीण्येकस्य
जीवस्य भवंति एकजीवात्मकान्येतानि त्रीणि भवंतीत्यर्थः तथा एतेषामेव पुष्पफलादीनां तेंदुकपर्यंतानां पत्राणि प्रत्येकं प्रत्येकशरीराधि
ष्ठिता न्येकैकजीवाधिष्ठितानीत्यर्थः तथा सकेसराः अकेसरा वा मिंजा वीजानि प्रत्येकमेकैकजीवाधिष्ठितानि ॥ सप्फाए इत्यादि एते
जलरुहादिवनस्पतिविशेषा लोकतः प्रत्येतव्याः एते चानंतजीवा अनंतजीवात्मका नवरं कंडुक्केत्यादिना साहारणाः कोपि देशविशेषभावा
त्। नंतजीवा भवति कोप्यसंख्येयजीवात्मक इति आह किं बीजजीव एव मूलादिजीवो भवति उतान्यस्मिन्नपक्षे तत्रापि तथापि इति परसु
श्रमाशंक्याह ॥ बीएजोणिब्भूए इत्यादि बीजयोनिभूते तस्यां अवस्थायां प्राप्ते योनिपरिणाममपरित्यजतीति भावः बीजस्य हि द्विविधावस्था योनि अयोन्य

यावस्थावस्थावनत्यया बीजं योन्यवस्थां न जहाति अथवा विध्वस्तं तु तन्नात्तदा तत्र योनिरिति न मित्यभिधीयते तद्विध्वस्तं तु ज्ञानातिशयतो नावगं-
तुं शक्यते तत्र यावदतिशयिना संप्रति सामान्यतः प्रत्यवबोधो अविध्वस्तयोनिर्विध्वस्तयोनिरिति व्यवह्रियते विध्वस्तयोनित्वे नियमादायतनमव्यवहार्यो विध्व-
स्तत्वे अविध्वस्तयोनिरिति किमपि स्थिवीयते तद्व्यवहारिता रूपविध्वस्तानमविध्वस्तशक्तिकं तत्तत्त्वं बीजजीवपरिणामनशक्तिसंपन्नमिति भावः तस्मिन् बीजे यो-
निभूते जीवो व्युत्क्रामति उत्पद्यते स एव पूर्वको बीजजीवो अन्यो वा आगत्योत्पद्यते किमुक्तं भवति यदा बीजजीवो निर्वर्तितनिजायुःक-
यात् बीजजीवपरित्यागः कृतो भवति तस्य बीजस्य पुनरपि कालान्तरे भूमिजलादिसामग्रीसद्भावादा कदाचित्स एव प्राक्तनो बीजजीवो मूलनाम
गोत्रं उपनिबध्य तत्रागत्य परिणमते कदाचिदन्यः पृथिवीकायिकादि। जीवः योऽपि च मूलजीवः इति यश्च मूलतया परिणतो जीवः सोऽपि
च प्रथमपत्रतया परिणमते एवं प्रथमपत्रतयापि च परिणमते इत्येकजीव कर्तृकं मूलं प्रथमपत्रं चेति आह यद्येवं सर्वोऽपि किसलयः प्रथमम-
नन्तो गच्छति इत्याद्युक्तं आगमे एकपत्रविरुध्यते उच्यते। तेऽपि बीजजीवो बीजे त्यक्ते बीजं मूलत्वेनोत्पद्यतेऽनन्ता-
वस्थाकलितानितरमदनंतरमाविनी किसलयावस्था नियमतोऽनन्त रजीवाः ऊर्ध्वतिष्ठन्तस्तस्थितिक्षयात् परिणतस्तत्र मूलाव-
स्थूलजीवाः अनन्तजीवतनुशरीरतया परिणमयन्ताः वृद्धि ततः यावत्सा। प्रथमपत्रमितिन विरोधः अन्ये त्वाचक्षते प्रथमपत्रमिह या सा बी-
जस्य समुच्छूननावस्था तेन एकजीव कर्तृकं मूलं प्रथमपत्रं इति किमुक्तं भवति मूलं शूनावस्था एकजीवकर्तृकं एतत्र नियमप्रदर्शनार्थं तु कं मू-
लं समुच्छूनावस्था एकजीवपरिणामितं एवासौ शेषं तु किशलयादि नावश्यं मूलजीवपरिणामादि विनिवेशितः सव्वो वि किसलओ खलु उग्गममा-
णो अणंतओ भणिओ तद्व्याख्यानविरोधः यदिदं मूलसमुच्छूनावस्था निर्वर्तनानंतरकाले किसलयरूपावस्थादिति आह प्रत्येकशरीरवनस्प-
तिकायिकानां सर्वकालं शरीरावस्थामधिकृत्य किं प्रत्येकशरीरत्वमुत कस्मिंश्चिदवस्थाविशेषे अनन्तजीवत्वमपि संभवति तथा साधारणवनस्प-
तिकायिकानामपि किं सर्वकालमनन्तजीवत्वमुत कदाचित् प्रत्येकशरीरत्वमपि भवति तत आह सव्वो वि किसलओ इत्यादि इह सर्वशब्दो ए- १८

वकारार्थः परिशेषवाची सर्वोऽपि वनस्पतिकायः प्रत्येकशरीरः साधारणो वा किसलयावस्थामुपगतः सन् अनन्तकायः तीर्थकरगणधरैर्भ-
णितः स एव किसलयरूपोऽनन्तकायिकः प्रवर्धमानः अनन्तो वा भवति परीत्तो वा कथं उच्यते यदि साधारणशरीरं निर्वर्त्यते तदा साधारण
एव तिष्ठति अथ प्रत्येकशरीरं ततः प्रत्येक इति क्रियतः कालाद् ऊर्ध्वं प्रत्येको भवतीति वेदुच्यते अन्तर्मुहूर्तेन मा इह निगोदानामुत्कर्षतोऽप्यन्त-
र्मुहूर्तकालं यावत्स्थितिरुक्ता ततोऽन्तर्मुहूर्तात्परतो विवर्धमानः प्रत्येको भवतीति संप्रति साधारणलक्षणमाह समयमित्यादि गाथाद्वय
समयं उगमपमुक्तानां तु प्रत्यग्रामाणतीतेषां साधारणजीवानां समकमेककालं शरीरनिर्वृत्तिर्भवति समकं च प्राणापानग्रहणं प्राणापान-
योग्यपुद्गलोपादानं ततः समकमेककालं तदनन्तरकालभाविना। तद्वा समनिश्वासोच्छ्वासौ एकस्य यत् आहारादिपुद्गलानां ग्रहणं तदेव
बहूनामपि साधारणजीवानामत्र सर्वं किमुक्तं भवति यत् आ- हारादिकमेकोऽभ्यवहरति तदेवापि तदवगृह्णन्तीति तथा यद्ग्र-
हणं ग्रहणं तत्संक्षेपादेकशरीरसमाचनसानुपेक्षया। णिग्रहणं संप्रत्युक्तार्थोपसंहारमाह ब साहारणमाहा-
सार्वणमप्येके शरीरास्थितानां जीवानामुक्तप्रकारेण यत्र। धारणः सूत्रे नपुंसकतानिर्देशः प्राकृतत्वादाहारः आहारग्रहणा-
ग्योग्यपुद्गलोपादानं तदुपलक्षणमेतत् तथा साधारणानुग्राहसनिश्वासौ। यावत्साधारणशरीरनिर्वृत्तिरेतत्साधारणजीवानां लक्षणं संप्रति
यथैकस्मिन् निगोदशरीरे अनन्ता जीवाः परिणताः प्रतीतिपथमवतरंति तथा प्रतिपादयन्नाह ब जह अयगोलो इत्यादि यथा अयोगो-
लो ध्मातः सन् तप्ततपनीयसंकाशः सर्वोऽग्निपरिणतो भवति तथा निगोदजीवान् जानीहि निगोदरूपे एकस्मिन् शरीरे तत्परिणाम-
कतया अनन्ता जीवाः परिणता जानीहि एवं स तिष्ठ एगस्सेत्यादि एकस्य द्वयोस्त्रयाणां यावत् संख्येयानां वा असंख्येयानां वा नि-
गोदजीवानां शरीराणि द्रष्टुं न शक्यानि कुत इति चेदुच्यते अभावात् न च केवलादिजीवपरिकीर्तितानि अनन्तवनस्पतिशरीराणि संति अनन्तजीव-
पिंडात्मकत्वात् कथंचित् तत्केवलज्ञानिनां आह दीसंती इत्यादि इह यानि शरीराणि निगोदजीवानां बादरनिगोदजीवानां तु सूक्ष्मनिगोद

जीवानां तेषां शरीरं पुनः अनंतजीवसंघातात्मकं वेद्यं तु प्रत्येकस्य भावात् तथा च परिणामपरिणतत्वात् अथ कथमेतदवसीयते निगोदस्
य शरीरं नियमात् अनंतजीवपरिणामाविर्भावितं भवतीति उच्यते जिनवचनात् उक्तं च गोलाय असंखेज्जा होंति निगोया असंखया गोल
ए इक्किको य निगोओ अणंतजीवो मुणेयव्वो संप्रत्येतदेव निगोदजीवानां प्रमाणमभिधित्सुराह लोगागासमित्यादि एकैकस्मिन्
लोकाकाशप्रदेशे एकैकं निगोदजीवं स्थापय एवमेकैकस्मिन् आकाशप्रदेशे एकैकं जीवं स्थापयता मीयमाना अनंता लोका अ
नंतलोकाकाशप्रदेशप्रमाणा निगोदजीवा भवंति संप्रति प्रत्येकवनस्पतिजीवप्रमाणमाह उ लोगागासपएसे इत्यादि एकैक
स्मिन् लोकाकाशप्रदेशे एकैकं प्रत्येकवनस्पतिजीवं स्थापय एवंरूपप्रकारेण मीयमानाः प्रत्येकतरुजीवा असंख्येयलोका
काशप्रदेशप्रमाणा भवंति संप्रति पर्याप्तापर्याप्तभेदेन प्रत्येक साधारणवनस्पतिजीवानां प्रमाणमाह पत्तेया पज्जत्ता इत्यादि
पर्याप्ताः प्रत्येकवनस्पतिजीवा घनीकृतस्य लोकस्य संबं धिनः प्रतरस्य असंख्येयतमभागमात्रा असंख्येयलोगेया
वंत आकाशप्रदेशास्तावत्प्रमाणा भवंति अपर्याप्ता नोऽनंताः अ त्येकतरुजीवा असंख्येयलोकाः परिमाणं पर्याप्तानां च
साधारणजीवानामनंता लोकाः किमुक्तं भवति असंख्येयलो काकाशप्रदेशप्रदेशप्रमाणा अपर्याप्ताः प्रत्येकतरवो अनंतलो
काकाशप्रदेशप्रमाणाः पर्याप्ता अपर्याप्ताश्च साधारणजीवा इति जे यावण्णे तहप्पगारा इति ये चान्ये एवंप्रकाराः अनुक्तरूपा एवंप्रकाराः
प्रत्येकतरुरूपास्तेऽपि वनस्पतिकाया भवंति प्रतिपत्तव्याः ते समासओ दुविहा पन्नत्ता तं जहा पज्जत्तगा य अपज्जत्तगा य अपर्याप्ताः का
दाचिदसंख्येयाः कदाचिदनंताः प्रत्येकतरवः संख्येया असंख्येया वा साधारणास्तु नियमादनंता इति तत्थ णं जे ते पज्जत्तगा इत्यादि एतेषां साध
रणप्रत्येकतरुरूपाणां वनस्पतिविशेषाणां वक्ष्यमाणनामभिर्विशेषप्रतिपत्तिः कावक्ष्यमाणमाश्रित्य असंख्येयाः प्रतिपत्तव्याः एवं तं
कहा कंदाये इत्यादि गाथाद्वयं कंदाः सूरणकंदादयः कंदमूला निदर्शनमूल्यनि वसाधारणवनस्पतिविशेषाः सुग्राह्याः लघुप्रतीताश्च

कावंशास्तुणानवजीवनादीनि पर्याप्तातुलशृंगाटकानि प्रतीतानि रडाकुलकवनस्पतिविशेषाः सेवालः प्रसिद्धः हृतककावकपनकवनाणीकं
डकाः साधारणवनस्पतिविशेषास्तेषामेकैकानविशालिसंख्यानां नागादिषु मध्ये कस्यापि कापि ख्यातिः किमुक्तं भवति कस्यापि क्वचित् ख्यातिः
कस्यापि क्वचिद्यावत् कस्यापि मूलकस्यापि अग्रकस्यापि मध्यकस्यापि बीजमिति सेत्तमित्यादि निगमनवाक्यं उक्तं एगमणत्तं च इंद्रिया एकेंद्रियाः संप्र
ति द्वींद्रियप्रतिपादनार्थमाह सेकिंतमित्यादि अथ के ते द्वींद्रियाः सूरिराह द्वींद्रिया अनेकविधाः प्रज्ञप्ताः पुलाकिमियाइत्यादि पुलाकि
मिया नामपायुप्रदेशोत्पन्नाः कुक्षिकृमयः कुक्षिप्रदेशोत्पन्नाः गंडोलाः समुद्रादिवाः प्रतीताः शंखनकाः शंखा एव लघवः चुल्लाचुल्लिकाः खुल्लाध
वः शंखाः सामुद्रशंखाकारा वराटाः कपर्दकाः सिप्पिसंपुडत्ति पुटरूपाश्च सक्तयः चंदनका अक्षाः शेषास्तु यथासंप्रदायं वाच्याः जे
यावण्णे तहप्पगारा इति ये चान्ये तथाप्रकारा एवंप्रकाराश्च तनकाडवरसंवर्तकस्यादयस्ते सर्वे द्वींद्रिया ज्ञातव्याः ते सम्मूर्छिम
वाः सम्मूर्छिमत्वादेव च नपुंसकाः सम्मूर्छिमा नाम वर्णनतरस कत्वात् नारकसम्मूर्छिमा नपुंसका इति वचनात् ते समासतो
इत्यादि ते द्वींद्रियाः समासतः संक्षेपेण द्विविधाः प्रज्ञप्ताः तद्यथा पर्याप्तकाश्च अपर्याप्तकाश्च शब्दो योनिकुलादिन
अवगतानेकलिदमुक्तं एतेषां द्वींद्रियाणामेव सप्ताहीनां विततक स्यादीनां द्वींद्रियाणां पर्याप्तानां सर्वसंख्यया सर्वजातिकुलकोटी
नां योनिप्रमुखशतसहस्राणि भवंतीति समाख्यातं जातिकुलकोटिकुलकानां भवंतीति नावः इत्यस्यां ततीर्थकृद्भिर्मकारोः लाक्ष
णिकइयमत्र भावनाः इह जातिकुलयोनीनां परिज्ञानार्थमिदं प्रसिद्धमुदाहरणं पूर्वाचार्यैरुपदर्शितं तद्यथा जातिरिति किल तिर्यग्जातिः
तस्याः कुलानि कृमिकीटवृश्चिकादीनि इमानि च कुलानि योनिप्रमुखानि भवंति तथाहि एकस्यामेव योनौ अनेकानि कुलानि भवंति यथा छ
गणयोनौ कृमिकुलं वृश्चिककुलमित्यादि अथवा जातिकुलयोन्योः परस्परं विशेष एकस्यामपि योनौ अनेकजातिकुलसंभवात्
यथा एकस्यामेव योनौ कृमिजातिकुलं कीटजातिकुलं वृश्चिकजातिकुलमित्यादि एवं च एकस्यामेव योनाववांतरजातिभेदभावाद

नावादरतेजस्कायिकानिप्रवक्तानि
सेत्तमित्यादि स्येषाद्वीन्द्रियसंसा
त्रीन्द्रियसंसारसमापन्नजीवप्रज्ञा
र्शयति एतच्च प्रतीकप्रवृत्तत्वाद्
वान्यत्सर्वाप्रकारा एवंप्रकारास्तेसर्वेपि
णास्त्वमादिकानामौपयिकप्रश्ना
तसहस्राणि नवंति अष्टौ कोटि
य संसारसमापन्नजीवप्रज्ञापनां सं
यालोकतः प्रत्येतव्याः एतेषां चे
उपसंहारमाह सेत्तमित्यादि उक्तं
वप्रज्ञापनाधुनाह पंचेंद्रियसंसा
या नरकावासास्तेषु भवा नैरयिका र
तिरोऽञ्चंति तिर्यंचस्तिरस्तिर्यंतीति
जीवास्तेषां प्रज्ञापना तिर्यग्योनि
मनोरपत्यानि मनुष्याः मनोर्याति
प्र

पंचेंद्रियसंसारसमापन्नजीवास्तेषां प्र द
यापन्नपंचेंद्रियसंसारसमापन्नजी स
वानाह सेकिंतमित्यादि सप्तविधाः तो
पदर्शयति रत्नानिवज्रवैडूर्यादि
सा वा सोष्टविधीवतस्मान्नैरयिका अ
श्रुना ह शर्कराप्रभामाप्याद्भुसरणत का
रसारिराह पंचेंद्रियतिर्यग्योनिक टि
प्रत्ययः तत्र पंचेंद्रियतिर्यग्यो वृ
नंतीति स्वखरा प्राकृतत्वादाषच्चात्व म
किंतमित्यादि अथ कातरुनलवरपं वि
चवंतद्यायेत्यादिनापदर्शयति म वः
मत्स्यादीनां विशेषत्लोकतो वि ग
षेमांसकच्छपाः तसमासतारत्या णं
तिकासु उदाहरसम्बुपत्याः अस ई
तिनावस्मेनतिर्यषाः संसार्भेमानावा वि दि

वागर्भात्गर्भावासात्व्युत्क्रांतिर्निःक्रमणं येषां ते गर्भव्युत्क्रांतिकाः आर्षत्वादेतिकत्तु समासांतः चशब्दौ प्रत्येकं स्वगतानेकभेदसूचकौ तत्र ये
संमूर्छिमास्ते सर्वे नपुंसकाः संमूर्छिमत्वादेव नपुंसकत्वाविनाभावित्वात् ये तु गर्भव्युत्क्रांतिकास्ते त्रिविधाः तद्यथा स्त्रियः पुरुषा नपुंसकाः
एतेषां चामीषामपि शरीरावगाहनादिभेदात् चिंतनं यत्र गर्भव्युत्क्रांतिकानां स्त्रीपुंनपुंसकानां परस्परमल्पबहुत्वं चिंतनं तच्च जीवाभिगमटीका
यां कृतमिति ततोऽवधार्यं एएसिणमित्यादि एतेषामेवमादिकानां एवं प्रकारादीनां जलचरपंचेंद्रियतिर्यग्योनिकानां पर्याप्तापर्याप्तानां
सर्वसंख्यया अर्द्धत्रयोदश जातिकुलकोटीनां योनिप्रमुखाणि योनिप्रवहाणि शतसहस्राणि भवंतीत्याख्यातं अथावशिष्टसीकरैः उपसंहा
रमाह सेत्तमित्यादि तदेवमुक्ता जलचरपंचेंद्रियतिर्यग्योनिकाः संप्रति स्थलचरपंचेंद्रियतिर्यग्योनिकान्प्रतिपिपादयिषुरिदमाह से किंतं
मित्यादि चत्वारि पदानि येषां ते चतुष्पदा अश्वादयः ते च ते स्थलचराश्च पंचेंद्रियतिर्यग्योनिकाश्च चतुष्पदस्थलचरपंचेंद्रियतिर्यग्यो
निकाः उरसा बाहुभ्यां वा परिसर्पंतीति परिसर्पाः अहिनकुलप्रभृतयः ते च ते स्थलचरपंचेंद्रियतिर्यग्योनिकाश्च पदेन स
ह विशेषणसमासः चशब्दौ प्रत्येकं स्वगतानेकभेदसूचकौ तदेवानुक्रमेण प्रतिपिपादयिषुरिदमाह से किंतमित्यादि
अथ के ते चतुष्पदस्थलचरपंचेंद्रियतिर्यग्योनिकाः सूरिराह चतुष्पदस्थलचरपंचेंद्रियतिर्यग्योनिकाश्चतुर्विधाः प्रज्ञप्तास्तद्यथा एकखु
रा इत्यादि तत्र एकः प्रतिपदमेकः खुरः शफो येषां ते एकखुराः अश्वादयः द्वौ खुरौ प्रतिपदं येषां ते द्विखुराः उष्ट्रादयस्तथा स्वाभाव्यात् तेषामेकैक
स्मिन् पदे द्वौ द्वौ शफौ भवत इति गंडीव पद्मकर्णिकाधिकरणिस्थानमिव पदं येषां ते गंडीपदा हस्त्यादयः नखाः सनखानि दीर्घनखपरिकल्पितानि पा
दानि येषां ते सनखपदाः श्वादयः प्राकृतत्वाच्च सणप्फया इति सूत्रे निर्देशः अधुना एतानेव एकखुरादीन् भेदतः क्रमेण प्रतिपिपादयिषुरिद
माह से किंतमित्यादि सुगमं नवरं ये केचिज्जीवभेदाः अप्रतीतास्ते लोकतोऽवसेयाः तस्मात्ताऽविदापन्नताइत्यादि सूत्रं यावद्भवंती
यं नवरमत्र जातिकुलकोटीनां योनिप्रमुखाणि शतसहस्राणि दश भवंतीति वक्तव्यमत्रापि संमूर्छिमानां गर्भव्युत्क्रांतिकानां च प्रत्येकं यतू

शरीरादिभेदात् अत्र चिंतनं यत्र स्त्रीपुंनपुंसकानां परस्परमल्पबहुत्वं तच्च जीवाभिगमटीकातोऽवसेयं सेत्तं चउप्पएत्यादि से किंतमित्यादि
अथ के ते परिसर्पस्थलचरपंचेंद्रियतिर्यग्योनिकाः सूरिराह परिसर्पस्थलचरपंचेंद्रियतिर्यग्योनिका द्विविधा द्विप्रकाराः प्रज्ञप्तास्तद्यथा
उरपरिसप्पेत्यादि उरसा परिसर्पंतीत्युरःपरिसर्पास्ते च ते स्थलचरपंचेंद्रियतिर्यग्योनिकाश्च उरःपरिसर्पस्थलचरपंचेंद्रियतिर्यग्योनिकाश्च उरःपरिसर्प
स्थलचरपंचेंद्रियतिर्यग्योनिकास्तु भुजाभ्यां परिसर्पंतीति भुजपरिसर्पास्ते च ते स्थलचरपंचेंद्रियतिर्यग्योनिकाश्च भुजपरिसर्पस्थलचरपं
चेंद्रियतिर्यग्योनिकाः चशब्दौ प्रत्येकं स्वगतानेकभेदसूचकौ तत्र उरःपरिसर्पस्थलचरपंचेंद्रियतिर्यग्योनिकान् भेदतः प्रतिपिपादयिषुरिदमाह
से किंतं उरपरिसप्पेत्यादि अथ के ते उरःपरिसर्पस्थलचरपंचेंद्रियतिर्यग्योनिकाः सूरिराह उरःपरिसर्पस्थलचरपंचेंद्रियतिर्य
ग्योनिकाश्चतुर्विधाः प्रज्ञप्तास्तद्यथा अहयोऽजगराः आसालिका महोरगाः एतेषामेव भेदानामवगमाय प्रश्ननिर्वच
नसूत्राण्याह से किंतमित्यादि अथ के ते अहयः सूरिराह अहयो द्विविधाः प्रज्ञप्तास्तद्यथा दर्वीकरा मुकु
लिनश्च तत्र दर्वी दर्वीव फणा तत्करणशीला दर्वीकराः मुकुलं फणाविरहयोग्यशरीरावयवविशेषाकृतिः सा विद्यते
येषां ते मुकुलिनः फणाकरणशक्तिविकला इत्यर्थः अत्रापि चशब्दौ स्वगतानेकभेदसूचकौ तत्र दर्वीकरान् भेदतः प्रतिपिपादयिषु
राह से किंतमित्यादि आस्यादंष्ट्रास्तु विषं येषां ते आसीविषाः उक्तं च आसी दाढा तग्गयविसा आसीविसा मुणेयव्वा इति दृष्टौ
विषं येषां ते दृष्टिविषाः उग्रं विषं येषां ते उग्रविषाः भोगः शरीरं तत्र विषं येषां ते भोगविषाः त्वचि विषं येषां ते त्वग्विषाः प्राकृतत्वाच्च तयावि
सा इति पाठः लाला मुखस्रावः तत्र विषं येषां ते लालाविषाः निःश्वासे विषं येषां ते निःश्वासविषाः कृष्णसर्पादयो जातिभेदा लो
कतः प्रतिपत्तव्याः उपसंहारमाह सेत्तं दर्वीकराः मुकुलिनः प्रतिपिपादयिषुरिदमाह से किंतमित्यादि एतेऽपि लोकतोऽवसेयाः अज
गराणामवांतरजातिभेदा न विद्यंते तत एकप्रकारा अजगराः प्रज्ञप्ताः आसालिगामभिधित्सुराह से किंतं आसालिगा एवं विप्पणए

प्रज्ञापनावृत्ति॥

श्रेष्ठ इति भगवान् आर्यश्यामोऽपि इदं वस्तुं तत्र आसालिकाप्रतिपादकं गौतमप्रश्नभगवन्निर्वचनरूपं सूत्रमस्मिंस्तदेवागमबहुमानतः पठति
कहिणं भंते इत्यादि कणमिति वाक्यालंकारे भदन्त परमकल्याणयोगिन् आसालिका संमूर्छति एषा हि गर्भजा न भवति किंतु संमूर्छिमेव ततस्त
त्संमूर्छति भगवानाह गोयमा इत्यादि गौतम अन्तर्मनुष्यक्षेत्रे मनुष्यक्षेत्रस्य मध्ये न बहिस्तावतामनुष्यक्षेत्रोऽबहिः स्यात्तु स्यादे
न भवतीति प्रतिपादितं तत्रापि मनुष्यक्षेत्रे सर्वत्र न भवति किं तर्हि अर्द्धतृतीयेषु द्वीपेषु अर्द्धं तृतीयं येषां ते अर्द्धतृतीयास्तेष्वयं विग्रहः समुदायः
समासार्थः स्त्वं पतावतालवणसमुद्रकालोदसमुद्रव्यवच्छेदः कृतो भवति निर्व्याघातेन व्याघातस्याभावो निर्व्याघातं तेन यदि पञ्चदशसु कर्मभूमिषु तदा न
व्याघातो भवति यदि पुनः पञ्चसु भरतेषु पञ्चस्वैरावतेषु सुषमसुषमादिरूपः कालो व्याघातहेतुस्तत्र व्या- घातो भवति तदा पञ्चदशसु कर्मभूमिषु संमूर्छतीति व्याघातं प्रतीत्य
किं पञ्चसु कर्मभूमिषु भवति यदि पञ्चसु भरतेषु पञ्चस्वैरावतेषु व्याघात उक्तो। व्याघातो भवति ततः पञ्चसु महाविदेहेषु संमूर्छति प
ञ्चदशसु त्रिंशत्सु कर्मभूमिषु अपर्याप्तके इति प्रतिपादिते पञ्चदशसु कर्मभूमिषु पञ्चसु महाविदेहेषु तत्र सर्वत्र संमूर्छ
ति किं तु चक्रवर्तिस्कन्धावारेषु वासुदेवस्कन्धावारेषु सर्वत्रापि विकल्पास्ति द्रष्टव्यः बलदेवस्कन्धावारेषु माण्डलिकः सामान्यराजा अल्पर्द्धि
को महामाण्डलिकः स एव अनेकदेशाधिपतिः तत्स्कन्धावारेषु ग्राम निवेशेषु इत्यादि ग्रसति बुद्ध्यादीन् गुणानिति यदि वा गम्यः शास्त्र
प्रसिद्धानामष्टादशानां कराणामिति ग्रामः प्रकृततरवणिग्ग्रामः पांशुप्राकारनिबद्धं खेटं क्षुल्लप्राकारवेष्टितं कर्बटं अर्द्धतृतीय
गव्यूतान्तर्ग्रामान्तररहितं मडम्बं पत्तनं जलपथस्थलपथयोरन्यतरेण युक्तं द्रोणमुखं जलस्थलनिर्गमप्रवेशं शकटैर्यो
टकैर्नौभिर्वा गम्यं तत्पत्तनं तत्रात्र रत्नानामाकर आकरः पत्तनं शकटैर्यो टकैर्नौभिर्वा नौभिरेव यत्प्रवेश्यं तत्पट्टनं जलस्थलपथोपेतं द्रोणमुखं खर्बाङ्ग
ल्पं तत्तुल्यं निर्गमप्रवेशं आकाराः हिरण्याकरादिः आश्रमस्तापसावसथोऽपलक्षितआश्रयः संवाहः यात्रासमागतप्रभूतजननिवेशः राज
धानी राजाधिष्ठानं नगरं यत्र निगमनादि राजधानीचक्रवर्तिस्कन्धावारादीनामेव विनाशो विनाशकाले एतच्चक्रवर्तिस्कन्धावारादीनामेव विनाशो २२

एषु पर्यटितेषु एतेषु विनाशेषु चक्रवर्तिस्कन्धावारादीनामेव विनाशो एतेषु एतेषु चक्रवर्तिस्कन्धावारादिषु स्थानेषु आसालिका संमूर्छति साव
जघन्यतः अङ्गुलस्यासंख्येयभागमात्रया अवगाहनया समुत्पद्यत इति योगः एतदुक्तं भवति यदा अयमसंख्येयं तं चक्रवर्तिस्कन्धावारादयो विनाशमुपयान्ति
तदा तेषां अधस्तात् जघन्येन अङ्गुलासंख्येयभागप्रमाणदेहत्वेन विष्कम्भबाहल्यतो विष्कम्भबाहल्याभ्यां समानत्वेन विस्तारबाहल्य
मूलतः भूमिं दालयित्वा निर्गच्छति चक्रवर्तिस्कन्धावारादीनामधस्तात् उत्पद्यत इति भावः सा च संमूर्छिमा असंज्ञी अत एव मिथ्यादृष्टिः सा समुत्पन्ना सती भूमिं दालयित्वा
ततो मिथ्यादृष्टिः सा सा च तस्मात् स्थानात् तत एव अज्ञानी असंज्ञी चेत्वमुहूर्तमात्रायुः कालं करोति तदेवं पर्यन्तं
पतिष्ठा सूत्रकृत संग्रहमाह सेत्तं आसालिया संमूर्छिमा इत्यादि स किं तं इत्यादि अङ्गमनन्तरं यदुक्तं यदा
अङ्गुलप्रमाणा एतद्गतिः कञ्चिद्विशेषमाह धनुः प्रमाणं धनुःसहस्रप्रमाणा अङ्गुलसंख्येयभागादीनि तद्वितस्ति
प्रमाणरूपाः स्युः ततः शरीरप्रमाणम् अपरिमितप्रमाणत्वात् ततः परिमितमिति तेषां अङ्गुलं भिन्नार्थं प्रतिपन्नं पर्यन्ते
ते तस्यायमर्थः सा च कीदृशी न महती रमणीय अङ्गुलप्रमाणशरीरा एवावगाहनया भवतीति तस्मात् एककत्वेनानुप्रविष्टा अङ्गुलं प्रविश्य
अल्पप्रमाणा अङ्गुलकं प्रमाणं शकटादिषु ये पारावतादिमात्रा शरीरा अवगाहनया भवति अङ्गुलप्रमाणशरीरावगाह
नया अपि भवतीति भावः एवं प्रमाणा अपि भवतीयापि तन्महति तस्य प्रमाणमहाविस्तारविशेषप्रसङ्गात् अल्पे सा अल्पे यत्र
तत्र तावत् तल्पे महती अवगाहनया वर्तते तस्मिन् अस्मिन् तेन तस्याः शेषावयवविशेषणानन्तरं वचनत्वं तथा आकाशमाह तेन
तदिव सिद्धा यदि तत्प्रमाणरूपा अवगाहनया तदा तत्र सिद्धित्वं तत्र किं तु वायुपञ्चद्वीपसमुद्रेषु भवन्ति तेषु उत्पद्यते तदेव नाकादिषु
अल्पेषु अल्पे बहुतरेषु न तत्र अङ्गुलं प्रति ये यावत्प्रमाणा अवगाहनया तिर्यक् विचारतो अङ्गुलदशकादि विचारावगाहनया नाना प्रकाराः सन्तीति
मतिरागज्ञानमाहा संग्रहमाह सेत्तं सित्यादि समासतो व्याख्याता दिशादिनावगन्तव्यं एतावन्मात्रा निर्दिष्टा कुलकोटीनां योनिप्रमुखाणि

॥प्रज्ञा०वृत्ति॥

शतसहस्राणि भवंतीत्याख्यातं शरीरादिषु चिंतनं यथा द्वींद्रियाणां संख्यानामल्पबहुत्वं जीवाभिगमटीकातो भावनीयं उरःपरिसर्पवक्त-
व्यतोपसंहारमाह सेत्तं उरःपरिसर्पा भुजपरिसर्पानभिधित्सुराह से किं तमित्यादि भुजगमनवत्त्वं भुजपरिसर्पा विज्ञेया अप्रती-
तास्ते लोकतोऽवसेयाः अमीषां च नव जातिकुलकोटीयोनिप्रमुखशतसहस्राणि भवंति यत्पुनः शरीरादिषु चिंतनं
द्वींद्रियसंख्यानामल्पबहुत्वं जीवाभिगमटीकातो वेदितव्यं सेत्तमित्यादि संप्रति खचरपंचेंद्रियतिर्यग्योनिकानभिधित्सुराह
से किं तमित्यादि अथ के ते खचरपंचेंद्रियतिर्यग्योनिकाः सूरिराह खचरपंचेंद्रियतिर्यग्योनिकाश्चतुर्विधाः प्रज्ञप्ताः तद्यथा चम्म-
पक्खीत्यादि चर्ममयौ पक्षौ चर्मपक्षौ तौ विद्येते येषां ते चर्मपक्षिणः लोममयौ पक्षौ लोमपक्षौ तद्वंतो लोमप-
क्षिणः समुद्गकवत् स्थितौ पक्षौ समुद्गपक्षौ तद्वंतः समुद्गपक्षिणः विततौ नित्यमसंकुचितौ पक्षौ विततप-
क्षौ तद्वंतो विततपक्षिणः से किं तमित्यादि अथ के ते चर्मपक्षिणः चर्मपक्षिणोऽनेकविधाः प्रज्ञप्ताः तद्यथा वल्गु-
लीत्यादि ते वल्गुलीलोकतोऽवसेयाः जे यावन्ने तहप्पगारा इति ये चान्ये तथाप्रकारा एवंरूपास्ते चर्मपक्षिणो ज्ञात-
व्याः उपसंहारमाह सेत्तं चम्मपक्खी लोमपक्षिप्रतिपादनार्थमाह से किं तमित्यादि एते लोमपक्षिणस्तद्वा लोकतोऽवसेयाः
समुद्गपक्षिप्रतिपादनार्थमाह से किं तमित्यादि एवमिति विततपक्षिणः एवमपि समासतोऽवसेया इत्यादि प्राग्वद्भावनीयं एतेषां द्वाद-
शजातिकुलकोटीयोनिप्रमुखाणि शतसहस्राणि अमीषामपि शरीरादिषु चिंतनं द्वींद्रियसंख्यानामल्पबहुत्वं जीवाभिगम-
टीकातः प्रतिपत्तव्यमिह तु ग्रंथगौरवभयान्न लिख्यते अथ नाविनेयजनानुग्रहाय द्वींद्रियप्रभृतिजातिकुलकोटिशतस-
हस्रसंख्यासंग्रहणिगाथामाह सत्तट्ठजाइकुलकोडिलक्खनव अद्धतेरसाइं च दस दस य होंति नवगा तह बारस चेव बोधव्वा अत्र द्वीं-
द्रियस्यावसरस्य यथासंख्यापदयोजना सा चैवं द्वींद्रियाणां सप्त जातिकुलकोटिलक्षाणि त्रींद्रियाणामष्टौ चतुरिंद्रियाणां नव जलचर- २३

पंचेंद्रियाणामर्द्धत्रयोदश जातिकुलकोटिलक्षाणि चतुष्पदस्थलचरपंचेंद्रियाणां दश उरःपरिसर्पस्थलचरपंचेंद्रियाणां दश भुजपरिसर्पस्थलचरपंचेंद्रिया-
णां नव खचरपंचेंद्रियाणां द्वादशेति उपसंहारमाह सेत्तमित्यादि तदेवमुक्ताः पंचेंद्रियतिर्यग्योनिकाः संप्रति मनुष्यानभिधित्सुराह
से किं तमित्यादि अत्रापि संमूर्च्छिममनुष्यविषयप्रवचनवक्ष्यमाणतः शिष्याणामपि च साक्षाद्भगवतः सूत्रमिति बहुमानोत्पादार्थं भगवतो गौ-
तमालापकं पठति कहि णं भंते इत्यादि सुगमं नवरं सव्वेसु चेव असुइट्ठाणेसु त्ति अन्यान्यपि यानि कानिचित् मनुष्यसंसर्गवशादशुचि-
स्थानानि तेषु सर्वेषु संमूर्च्छिमा उक्ताः संमूर्च्छिममनुष्याः अथ गर्भव्युत्क्रांतिकमनुष्यप्रतिपादनार्थमाह से किं तमित्यादि कम्मभूमगा इति
कर्म कृषिवाणिज्यादि मोक्षानुष्ठानं वा कर्मप्रधाना भूमिर्येषां ते कर्मभूम मा आर्षत्वात्समासांतः प्रत्ययः कर्म्मभूमा एव कर्म्मभूमकाः
एवमकर्म्मभूमयो भोगभूमिकर्म्मविकला भूमिर्येषां ते अकर्म्मभूमकाः अंतर शब्दो मध्यवाची अंतरे लवणसमुद्रस्य मध्ये द्वीपाः तद्गता अं-
तरद्वीपगाः अपि पश्चानुपूर्वीतिन्यायख्यापनार्थं प्रथममंतरद्वीपान् प्रतिपादयति सुगमं नवरमष्टाविंशतिविधा इतिया-
इह हिमवत एव यवत्प्रमाणा यावदंतरालाश्च नामतो हिमवत्पर्वतस्य पूर्वा परदिशमवस्थिता अष्टाविंशतिविधा अंतरद्वीपास्तादृशाः एतावा
त्प्रमाणास्तावदंतरालाः सन्नामान एव शिखरिपर्वतस्य पूर्वापरदिशमवस्थिता अपि ततोऽत्यंतसदृशतया व्यक्तिभेदमनपेक्ष्यांतरद्वीपा अष्टा-
विंशतिविधा उक्ताः तानेव नामग्राहमुपदर्शयति तं जहा एगोरुया इत्यादि एतत्समस्तं उच्यते अष्टाविंशतिसंख्या एते एव प्रत्येकं हिमवति शि-
खरिणि च तत्र हिमवद्भवतत्यार्तावशात् इह जंबूद्वीपे भरतस्य हिमवतस्य च वर्षधरस्य सीमाकारी पूर्वापरतो लवणसमुद्रावगाढः पंचविंशतियोजनशतोच्छ्रय
परिमाणो भरतक्षेत्रव्यपेक्षया द्विगुणविष्कंभो हेममयश्चीनपट्टवर्णो नानावर्णविशिष्टकांतिमणिनिकरपरिमंडितोभयपार्श्वः सर्वत्र तुल्य
विस्तारो गगनमंडलोल्लेखिरत्नमयैकादशकूटोपशोभितो वज्रमयतलविविधमणिकनकमंडिततटदशयोजनावगाढपूर्वपश्चिम
योजनसहस्रायामदक्षिणोत्तरपंचयोजनशतविस्तारपद्मह्रदोपशोभितमध्यभागः सर्वतः कल्पपादपश्रेणिरमणीयः पूर्वापरपर्यंतावाल

प्रज्ञापणवृत्ति॥

वणोदधिजलसंस्पर्शी हिमवन्नाम पर्वतस्तस्य लवणोदधिजलसंस्पर्शादारभ्य पूर्वस्यां पश्चिमायां च दिशि प्रत्येकं द्वे द्वे गजदंताकारे दं
ष्ट्रे विनिर्गते तत्रैशान्यां दिशि या विनिर्गता दंष्ट्रा तस्यां हिमवतः पर्यंतादारभ्य त्रीणि योजनशतानि लवणसमुद्रमवगाह्यात्रांतरे योजनशतत्र
यायामविष्कंभः किंचिन्न्यूनैकोनपंचाशदधिकनवयोजनशतपरिरयः एकोरुकनामा द्वीपो वर्त्तते अयं च पंचधनुःशतप्रमाणविष्कंभया द्वि
गव्यूतोच्छ्रितया पद्मवरवेदिकया सर्वतः परिमंडितस्तस्याश्च पद्मवरवेदिकाया वर्णको जीवाभिगमटीकाया मिव वेदितव्यः सापि च पद्म
वरवेदिका सर्वतः सामस्त्येन वनखंडपरिक्षिप्ता वनखंडस्य विशेषः। छायावृक्षनामसमानजातीयानां महीरुहाणां समुदायो वनं यथा।
अशोकवनं चंपकवनमिति अनेकजातीयानामुत्तमानां महीरुहाणां समूहो वनखंडः एतच्च जीवाभिगममूलटीकायां पगाढाइण्णहिंरकेहिंवा
अणगाढाइण्णहिंवाम हिंवणसंडे इति तस्य वनखंडस्य चक्रवालतया विष्कंभो देशोने द्वे योजने परिक्षेपः पद्मवरवेदिकाप्रमा
णः अस्य वनखंडस्य वर्णकः प्रतिपादितो जीवाभिगमवृत्तावतिगरीयानिति नो प्रदर्शितः केवलं जीवाभिगमटीकातोऽवसेयः तस्यैव
हिमवतः पर्वतस्य पर्यंतादारभ्य दक्षिणपूर्वस्यां दिशि त्रीणि योजनशतानि लवणसमुद्रमवगाह्य द्वितीयदंष्ट्राया उपरि एकोरुकद्वीप
प्रमाण आभासिकनामा द्वीपो वर्त्तते तथा तस्यैव हिमवतः पश्चिमायां दिशि पर्यंतादारभ्य दक्षिणपश्चिमायां नैऋतकोण इत्यर्थः त्रीणि
योजनशतानि लवणसमुद्रमवगाह्य दंष्ट्राया उपरि तथोक्तप्रमाणो वैषाणिकनामा द्वीपः तथा तस्यैव हिमवतः पश्चिमायां दिशि पर्यंतादारभ्य
पश्चिमोत्तरस्यां दिशि वायव्यकोण इत्यर्थः त्रीणि योजनशतानि लवणसमुद्रमध्ये दंष्ट्रामतिक्रम्यात्रांतरे पूर्वोक्तप्रमाणो नांगोलिकनामा
द्वीपः एवमेते चत्वारो द्वीपा हिमवतश्चतसृषु विदिक्षु तुल्यप्रमाणा अवतिष्ठंते एकं च चुल्लहिमवंतपुव्वावरेण विदिसासु सागरं तिसए गंतूणं
तरदीवा तिन्नि सए होंति विच्छिन्ना अउणापन्ननवसए किंचूणं परिहि तेसिमे नामा॥ एगोरुय आभासिय वेसाणी य लंगुली तत एषाम् एकोरुकादीनां च
तुर्णां द्वीपानां परतो यथाक्रमं पूर्वोत्तरादिविदिक्षु प्रत्येकं चत्वारि योजनशतान्यतिक्रम्य चतुर्योजनशतायामविष्कंभाः किंचिन्न्यूनपंचषष्टिसहि २४

ताष्टादशयोजनशतपरिक्षेपाः पद्मवरवेदिकावनखंडमंडितपरिसराः जंबूद्वीपवेदिकातश्चतुर्योजनशतप्रमाणांतरा हयकर्ण
गजकर्णगोकर्णशष्कुलीकर्णनामानश्चत्वारो द्वीपाः तद्यथा एकोरुकस्य परतः हयकर्णः आभासिकस्य परतो गजकर्णः वैषाणिकस्य परतो गो
कर्णः नांगोलिकस्य परतः शष्कुलीकर्ण इति तत एतेषामपि हयकर्णादीनां चतुर्णां द्वीपानां परतः पुनरपि यथाक्रमं पूर्वोत्तरादिविदिक्षु प्रत्येकं पंच
पंचयोजनशतान्यतिक्रम्य पंचयोजनशतायामविष्कंभाः एकाशीत्यधिकपंचदशयोजनशतपरिक्षेपाः पूर्वोक्तप्रमाणपद्मवरवेदिकावनखं
डमंडितबाह्यप्रदेशा जंबूद्वीपवेदिकातः पंचयोजनशतप्रमाणांतराः आदर्शमुखमेंढमुखायोमुखगोमुखनामानश्चत्वारो द्वीपास्तद्यथा हय
कर्णस्य परत आदर्शमुखो गजकर्णस्य परतो मेंढमुखः गोकर्णस्य परतोऽयोमुखः शष्कुलीकर्णस्य
परतो गोमुखः इत्येवमेतेषामपि आदर्शमुखादीनां चतुर्णां द्वीपानां परतो भूयोऽपि यथाक्रमं पूर्वोत्तरादिविदिक्षु
प्रत्येकं षट् षट् योजनशतान्यतिक्रम्य षट्योजनशतायामविष्कंभाः सप्तनवत्यधिकाष्टादशयोजनशतपरिक्षेपाः पूर्वोक्तप्रमाणपद्मवरवेदिकावन
खंडमंडितपरिसरा जंबूद्वीपवेदिकातः षट्योजनशतप्रमाणांतराः अश्वमुखहस्तिमुखसिंहमुखव्याघ्रमुखनामानश्चत्वारो द्वीपाः ४
एतेषामप्यश्वमुखादीनां परतो यथाक्रमं पूर्वोत्तरादिविदिक्षु प्रत्येकं सप्त सप्त योजनशतान्यतिक्रम्य सप्तसप्तयोजनशतायामविष्कंभा
श्चत्वारिंशदधिकद्वाविंशतियोजनशतपरिरयाः पूर्वोक्तप्रमाणपद्मवरवेदिकावनखंडसमवगूढा जंबूद्वीपवेदिकातः सप्तयोजनशतप्रमाणांतरा
अश्वकर्णहस्तिकर्णसिंहकर्णव्याघ्रकर्णनामानश्चत्वारो द्वीपास्तत एतेषामश्वकर्णादीनां चतुर्णां द्वीपानां परतो यथाक्रमं पूर्वोत्तरादिविदिक्षु प्रत्येकमष्टावष्टौ
योजनशतान्यतिक्रम्याष्टयोजनशतायामविष्कंभा एकोनत्रिंशदधिकपंचविंशतियोजनशतपरिक्षेपा यथोक्तप्रमाणपद्मवरवेदिकाः अष्टयोजनशतप्रमाणां
तरा उल्कामुखमेघमुखविद्युन्मुखविद्युद्दंतनामानश्चत्वारो द्वीपाः ततोऽप्यमीषामुल्कामुखादीनां चतुर्णां द्वीपानां परतो यथाक्रमं पूर्वोत्तरादिविदि
क्षु प्रत्येकं नव नव योजनशतान्यतिक्रम्य नवनवयोजनशतायामविष्कंभाः पंचचत्वारिंशदधिकाष्टाविंशतियोजनशतपरिक्षेपा यथोक्तप्रमाणप
द्मवरवेदिकावनखंडसमवगूढा जंबूद्वीपवेदिकातो नवयोजनशतप्रमाणांतरा घनदंतलष्टदंतगूढदंतशुद्धदंतनामानश्चत्वारो द्वीपाः एवमेते हिमवति पर्व

ल्हदता।

तेव तसृषु विदिक्षु व्यवस्थिताः सर्वसंख्यया अष्टाविंशतिः एवं हि मवत्वल्पवर्षप्रमाणेण प्रमाणदण्डप्रमाणायामविष्कंभावगाहपुंडरीकद्रहाद्यशोभिते शि
खरिण्यपि पर्वते तत्र वर्णनादयोऽपि वज्रमूलस्य शैलादारभ्य यावत्कल्पप्रमाणान्तराः वनखंडेषु विदिक्षु व्यवस्थितास्ते कोणकादि नामानो इक्षुणपंतरपल्यायामविष्कंभाश्च
शाविंशतिसंख्या हि पुष्करद्वीपाः सर्वसंख्यया षट्पंचाशत् द्वीपपतयस्तासां मनुष्या आख्यातनामानस्तु पंचाशत् नव तिनमस्कार स्वपादप्रायश्चापंचाशलदग
तिवासिनः पुरुषाः पंचालादयस्तेन वज्रऋषभनाराचसंहननिनः कंककुक्षिप्रपरिणामाः अनुलोमवायुवेगाः समचतुरस्रसंस्थानाः सुप्रतिष्ठ
तिष्ठितकूर्मचारुचरणाः सुजातलक्ष्णप्रविरलतासुकुनविंदहनजंघायुगलाः निमग्नगूढजानुसंधिप्रदेशाः कनिकरसमसद्दारुजाः कंठीरव
समसद्दत्तकटिप्रदेशाः शंखाद्युसमसमध्यभागाः प्रदक्षिणावर्त्तनाभिमंडलाः श्रीवत्सलांछितविशालमांसलवक्षस्थलाः पुरपरिघायतभुजाः दीर्घबा
हवः सुश्लिष्टमणिबंधा रक्तोत्पलपत्रानुकारिशोणितपाणिपादतलाः चतुर — तुलप्रमाणसमवृत्तकंबुग्रीवाः शारदशशांकसौम्यवदनाः छत्रा
कारशिरसः स्फुटितस्निग्धकांतिश्लक्ष्णमूर्द्धजाः कमंडलुकलशयूपवा — पीध्वजपताकासौवस्तिकयवमत्स्यमकरकूर्मरथवरस्थालांकु
शाष्टापदांकुशासुप्रतिष्ठकमयूरश्रीदाममालिकतोरणमेदिनीजल — धिवरनागवरपर्वतगजवृषभसिंहचामरप्रशस्तोत्तमल
क्षणधराः स्त्रियोऽपि सुजातसर्वांगसुंदर्यः समस्तमहिलागुणसम — न्विताः संहतांगुलिदलपद्मवरसुकुमारकूर्मसंस्थानमनोहर
चरणाः रोमरहितप्रशस्तलक्षणोपेतजंघायुगलाः निगूढमांसलजानुप्रदे — शाः कदलीस्तंभनिभसंहतसुकुमारपीवरोरुकाः वदनायामप्रमाण
त्रिगुणमांसलविशालजघनधारिण्यः स्निग्धकांतिसुविभक्तश्लक्ष्णरोमराजयः प्रदक्षिणावर्त्ततरंगभंगुरनाभिमंडलाः प्रशस्तलक्षणोपेतकुक्षयः सं
गतपार्श्वाः कनककलशोपमसंहितात्युन्नतरक्तमृदुपीवरपयोधराः सुकुमारबाहुलतिकाः सौवस्तिकशंखचक्राद्याकृतिरेखालंकृतपाणि
पादतलाः वदनत्रिभागोच्छ्रितमांसलकंबुग्रीवाः प्रशस्तलक्षणोपेतमांसलहनुविभागाः दाडिमपुष्पानुकारिशोणिमाधरोष्ठा रक्तोत्पलताल्व
जिह्वाः विकसितकुवलयपत्रायतकोमललोचनाः आरोपितचापपृष्ठाकृतिसुसंगतभ्रूलताकः प्रमाणोपपन्नललाटफलकाः सुस्निग्धकांतश्लक्ष्णशि
रोरुहाः पुरुषेभ्यः किंचिन्न्यूनोच्छ्रायाः स्वभावतः उदारशृंगारचारुवेषाः प्रकृत्यैव हसितभणितविलासविषयपरमनैपुण्योपेताः सर्वानुलोमपुष्ट्यास्ता

वपरवस्त्ररलिवदनाः प्रतनुक्रोधमानमायालोभाः संतोषिणाः संतोषिणस्ते स्तुक्यामार्दवार्जवसंपन्नाः मन्यप्रमणोशारिणिमणिकन
कमौक्तिकादो ममत्वकारणिममवाभिनिवेशरहिताः सर्वथापगतवैरानुबंधाः हस्त्यश्वकरभगोमहिषादिसद्भावेऽपि तत्परिभोगपराङ्मुखाः पा
दविहारिणो ज्वरादिरोगयक्षभूतपिशाचादिग्रहमारिव्यसनोपनिपातविकलाः परस्परं प्रेष्यप्रेष्यकभावरहितत्वादहमिंद्राः तेषां पृष्ठकरंडका
नि चतुःषष्टिसंख्याकानि चतुर्थभक्तेनाहारग्रहणं आहारश्च पृथिव्याः पुष्पफलानां च तत्र किं पृथिवी मृत्तिका कल्पद्रुमाणां पुष्पफलानि
च तथा हि शर्करातोऽनंतगुणाधिका स्वादेन पृथिवी मधुरतया प्रसिद्धा चक्रवर्त्तिभोजनादप्यधिका सा पृथिवी माधुर्येणानंतगुण
माधुर्या। उक्तं कल्पद्रुमपुष्पफलानामास्वादः चक्रवर्त्तिभोजनादप्यधिक — गुणः तथा चोक्तं तेसिं णं तेसिं पुप्फफलाणं केरिसए आसाए पन्न
त्ते गोयमा से जहानामए रन्नो चाउरंतस्स चक्कवहिस्स कल्लाणे लोयणे — णं ठाणे मयसहस्स निष्फन्ने वण्णेणं उववेए गंधेणं उववेए फासे
णं उववेए आसायणिज्जे मयणिज्जे विसयणिज्जे दप्पणिज्जे बिंहणिज्जे सव्विंदियगायपल्हायणिज्जे — भवे एत्तो इट्ठतराए चेव पन्नत्ते तत्र पृथिव्या क
ल्पद्रुमफलानि च तेषामाहारः तथा ते वाहारमाहार्य प्रासादादिसंस्था — नाषु गृहाकारा कल्पद्रुमास्तेषु यथासुखमवतिष्ठंते न च तत्र दें
शे दंशमशकयूकामत्कुणमक्षिकादयः शरीरोपद्रवकारिणो जंतवः समुत्पद्यंते ये — ऽपि व्यालादयस्ते तु सिंहादयः तेऽपि मनुष्याणां न बाधायै प्र
भवंति नापि परस्परं हिंसकभावं वर्त्तंते रौद्रानुभावरहितत्वात् मनुष्ययुगलानि च पर्यंते समये युगलं प्रसुवते तच्च युगलमप
कोनाशीतिदिनानि पालयंति तेषां शरीरोच्छ्रायश्च त्रीणि गव्यूतानि पल्योपमासंख्येयभागप्रमाणमायुरुक्तं च अंतरदीवेसु नरा धणुसय अट्ठूसिया स
या मुइया पालिंति मिहुणधम्मं पल्लस्स असंखभागो आऊ सेसं च अट्ठाणउइसया ओ णं तेसिं आहारो तेसिं वत्थं पि विसेसपयं गुणसीइं दिणाणि
पालयंति प्रायः तथा चारित्रस्य अल्पकषायतया अल्पप्रेमानुबंधतया च तेषां मृत्वा देवगतिं समर्प्यति मरणं च तेषां इह न काकास्वाद्यतादिमात्रं व्यापारः संरक्षति न श
रीरपीडारहितमुरसा संभवति तत्त्वदेवलोके इत्यत्र अंतरद्वीपगाः सांप्रतमकर्मभूमिकप्रतिपादनार्थमाह जे ते किंतमित्यादि अथाकर्मभूमिकाः स

प्रज्ञाप० वृत्तिः॥ तिराह अकर्मभूमिका त्रिंशद्विधाः प्रज्ञप्ताः सर्वत्र त्रिंशद्विधत्वं क्षेत्रभेदात् तथा चाह तंजहा पंचहिं हेमवएहिं इत्यादि पंचभिर्हैमवतैः पंचभि
र्हैरण्यवतैः पंचभिर्हरिवर्षैः पंचभी रम्यकवर्षैः पंचभिर्देवकुरुभिः पंचभिरुत्तरकुरुभिर्विभज्यमाना त्रिंशद्विधा भवंति एषां पंचानां त्रिंशत्संख्याम
कर्मभूमकानां तत्र पंचसु हेमवतेषु पंचसु हेरण्यवतेषु मनुष्या गव्यूतप्रमाणशरीरोच्छ्रयाः पल्योपमायुषो वज्रर्षभनाराचसंहननाः समचतुरस्रसंस्था
नाः चतुःषष्टिपृष्ठकरंडकाश्चतुर्थातिक्रमाहारिणः एकोनाशीतिदिनान्यपत्यपालकाः तथा च गाउयमुच्चा पलिओवमाउणो वज्जरिसहसंघ
यणा हेमवएरन्नवए अहमिंदनरा मिहुणवासी चउसट्ठी पिट्ठकरंडयाणमणुयाण तेसिमाहारो भत्तस्स चउत्थस्स उगुणासियदिणवच्चपाल
णया पंचसु हरिवर्षेषु पंचसु रम्यकेषु द्विपल्योपमायुषो द्विगव्यूतप्रमाणशरीरोच्छ्रयाः वज्रर्षभनाराचसंहननाः समचतुरस्रसंस्थानाः ष
ष्ठभक्तातिक्रमाहारग्राहिणः अष्टाविंशत्यधिकशतसंख्यपृष्ठकरंडकाश्चतुःषष्टिदिनान्यपत्यपालकाः आह च हरिवासरम्मएसु आउपमाणं
सरीरमुस्सेहो पलिओवमाणि दोन्नि उ दोन्नि उ कोसुस्सिया भणिया छट्ठस्स य आहारो चउसट्ठिदिणाणुपालणा तेसिं पिट्ठकरंडाण
सयं अट्ठावीसं मुणेयव्वं पंचसु देवकुरुषु त्रिपल्योपमायुषो गव्यूतत्रयप्रमाणशरीरोच्छ्रयाः समचतुरस्रसंस्थाना वज्रर्षभसंहनिनः षट्पंचा
शदधिकशतद्वयप्रमाणपृष्ठकरंडकाः अष्टमभक्तातिक्रमाहारिण एकोनपंचाशद्दिनान्यपत्यपालकाः प्रमाणोक्तं दोसु वि कुरासु मणुया तिपल्लप
रमाउणो तिकोसुच्चा पिट्ठकरंडसयाइं दो छप्पन्नाइं मणुयाणं सुसमसुसमाणुभावं अणुहवमाणाण अवच्चगोवणया अउणापन्नदिणाइं अट्ठम
भत्तस्स आहारो एतेषु च सर्वेष्वपि क्षेत्रेषु अंतरद्वीपेष्विव मनुष्याणां युगलाः कल्पद्रुमसंपादिता नवरमंतरद्वीपापेक्षया पंचसु हैमवतेषु पंचसु हैर
ण्यवतेषु मनुष्याणामुत्थानबलवीर्यादिकं कल्पपादपफलानामास्वादो भूमेर्माधुर्यमित्येवमादिका भावाः पर्याया अपि वृद्ध्या अनंतगुणा द्रष्टव्याः
तेभ्योऽपि पंचसु हरिवर्षेषु पंचसु रम्यकवर्षेषु अनंतगुणास्तेभ्योऽपि पंचसु देवकुरुषु पंचसूत्तरकुरुष्वनंतगुणाः तदेवमुक्ता अकर्मभूमकाः संप्रति क
र्मभूमकप्रतिपादनार्थमाह से किं तमित्यादि अथ के ते कर्मभूमकाः सूरिराह कर्मभूमकाः पंचदशविधाः प्रज्ञप्ताः सर्वत्र पंचदशविधत्वं क्षेत्र २६

भेदात् तथा चाह पंचहिं भरहेहिं इत्यादि पंचभिर्भरतैः पंचभिरैरवतैः पंचभिर्महाविदेहैर्विभज्यमानाः पंचदशविधा भवंति ते च पंचदशविधा अपि
समासतो द्विविधाः प्रज्ञप्ताः तद्यथा आर्या म्लेच्छाश्च तत्रारात् हेयधर्मेभ्यो याताः प्राप्ता उपादेयधर्मैरित्यार्याः प्राकृतत्वात् सूत्रे निर्देशः मिलक्खू म्लेच्छा अव्य
क्तभाषासमाचाराः अव्यक्ता यो वा चिद्भाषा ... शिष्टासंमतसकलव्यवहारा म्लेच्छा इति प्रतिपत्तव्यं तत्राल्पवक्तव्यत्वा
न्म्लेच्छानाह से किं तमित्यादि अथ के ते म्लेच्छाः मिलक्खू इति निर्देशः प्राकृतत्वात् सूरिराह म्लेच्छा अनेकविधाः प्रज्ञप्ताः अनेकविधत्वं शकयवना
दिदेशभेदात् तथा चाह तंजहा सगा जवणा इत्यादि शकदेशनिवासिनः शकाः यवनदेशनिवासिनो यवनाः एवं सर्वत्र नवरममी नानादेशा लोकतो विज्ञे
याः आर्यप्रतिपादनार्थमाह से किं तमित्यादि सुगमं नवरं रायगिह मगह इत्यादि राजगृहं नगरं मगधा जनपदः एवं सर्वत्रापि अक्षरसंस्कारो विधेयः भावा
र्थश्चायं मगधेषु जनपदेषु राजगृहं नगरं १ अंगेषु चंपा २ वंगेषु ताम्रलिप्ती ३ कलिंगेषु कांचनपुरं ४ काशीषु वाणारसी ५ कोशलायां साकेतं ६
कुरुषु गजपुरं ७ कुशार्तेषु सौरिकं ८ पांचालेषु कांपिल्यं ९ जंगलेषु अहिच्छत्रा १० सुराष्ट्रेषु द्वारावती ११ विदेहेषु मिथिला १२ व
त्सेषु कौशाम्बी १३ शांडिल्येषु नंदिपुरं १४ मलयेषु भद्दिलपुरं १५ वत्सेषु वैराटं १६ वरणेषु अच्छा १७ दशार्णेषु मृत्तिकावती १८ चेदिषु शौ
क्तिकावती १९ वीतभयं सिंधुसौवीरेषु २० मथुरा शूरसेनेषु २१ पापा भंगेषु २२ मासपुरी वर्तेषु २३ कुणालेषु श्रावस्ती २४ लाटेषु कोटीवर्षं
श्वेतांबिका नगरी केकयजनपदस्यार्धं एतावदर्धषड्विंशतिजनपदस्यार्धं एतावदर्धषड्विंशतिजनपदात्मकं क्षेत्रमार्यं निर्वर्तितं इत्याह इह उपनि
त्यादि यस्मादत्र एतेषु अर्धषड्विंशतिसंख्येषु जनपदेषु उत्पत्तिर्जिनानां तीर्थकराणां चक्रिणां बलदेवानां कृष्णानां वासुदेवानां तत आर्यं एतेन क्षेत्रस्या
र्यानार्यव्यवस्था दर्शिता यत्र तीर्थकरादीनामुत्पत्तिस्तदार्यमन्यदनार्यमिति शेषाः क्षेत्रार्याः संप्रतिपादनार्थमाह से किं तमित्यादि सुगमं नवरं अंब
पिता ब्राह्मणो ... एता एव अंबष्ठकलंदवेदेहवेदगहरितचुंचुणाख्याः जातयः इभ्यजातयोऽभिधीयंते जातयः प्र
सिद्धमेता जिजाति निरूपिता जात्यार्याः ... उग्गा भोगा इत्यादि ... तद्वायाः कुविंदाः पट्टकाराः पट्ट

प्रज्ञापनावृत्तिः॥

कुलकविंदाः दयहादतिकाराः स्वस्तिकाः पिढिकाखविकाकटादिकाराः कटपातयारा काष्टपाडुकाकाराः एवंतुंडपातयारा अवकाराः एवं शेषाण्य
पि यथासंभवं नेयानि ब बनाङुवपादियाऽत्यादि ज्ञायीयवनानीत्यादयो लिपिलदाः प्रसंप्रदायादवसेयाः ब उक्ता नाषार्याः संप्रति ज्ञानार्या
नाह से किं तमित्यादि अथ दर्शनार्याननाह से किं तमित्यादि अथ दर्शनार्याननाह से किं तमित्यादि अथ चारित्रदर्शनार्याः सरागद दर्शना
र्या द्विविधाः प्रज्ञप्ताः तद्यथा सरागदर्शनार्याश्च तत्र सरागसकषायदर्शनार्याः सरागदर्शनार्याः वीतरागदर्शनार्याः वीतरागउपशांतक
षायं क्षीणकषायं वायद्दर्शनार्याः वीतरागदर्शनार्याः तत्र सरागदर्शनार्यप्रतिपादनार्थमाह से किं तमित्यादि अथ क्रम सरागदर्शनार्याः सरिरा
सरागदर्शनार्या दशविधाः प्रज्ञप्ताः तद्यथा निसग्गरुइ उवएसरुइत्यादि अत्र रुचिश ह प्रत्यक्षमभिसंबध्यते ततो निसर्गरुचिरिति इष्टव्यं तत्र निसर्गः
स्वभावस्तेन रुचिर्जिनप्रणीततत्त्वाभिलाषरूपा यस्य स निसर्गरुचिः उपदेशो गुर्वादिना वस्तुतत्त्वकथनं तेन रुचिर्यस्य स उपदेशरुचिः
आज्ञा सर्वज्ञवचनात्मिका तस्या रुचिरभिलाषो यस्य स आज्ञारुचिः॥ जिनाज्ञैव मम तत्त्वं न त्वेष वस्तु किंचिज्ज्ञातमिति यो लिमत्यात स
आज्ञारुचिरिति भावार्थः सूत्रं वीयरुइ एमेव त्ति अत्रापि रुचिशब्दः प्रत्यक्ष मभिसंबध्यते सूत्रमाचारांगाद्यंगप्रविष्टमंगबाह्यं वा आवश्यक
दशवैकालिकं तेन रुचिर्यस्य सूत्रमाचारादिकमंगप्रविष्टमंगबाह्यं वा आवश्यकादिकमधीयानो यः सम्यक्त्वमवगाहते प्रसन्नप्रसन्नतराध्यव
सायश्च भवति स सूत्ररुचिरिति भावार्थः बीजमिव बीजं यदेकमप्यनेकार्थप्रबोधोत्पादकं वचस्तेन रुचिर्यस्य स बीजरुचिः अनयोस्तु पदयोः समा
हारो द्वंद्वः ततो नपुंसकनिर्देशः इति समुच्चये अहिगम वित्थाररुचित्ति अत्रापि रुचिशब्दः प्रत्यक्षमभिसंबध्यते अभिगमरुचिर्विस्ताररुचिश्च तत्राभिग
मो विशिष्टं परिज्ञानं तेन रुचिर्यस्यासावभिगमरुचिः विस्तारो व्यासः सकलद्वादशांगस्य नयैः पर्यालोचनमिति भावः तेनोपबृंहिता रुचिर्यस्य स
विस्ताररुचिः किरियासंखेवधम्मरुचित्ति रुचिशब्दः प्रत्यक्षमभिसंबध्यते क्रियारुचिः संक्षेपरुचिर्धर्मरुचिरिति इष्टव्यं तत्र क्रिया सम्यक्संयमानुष्ठा
नं तत्र रुचिर्यस्य स क्रियारुचिः संक्षेपः संग्रहस्तत्र रुचिर्यस्य विस्तरार्थापरिज्ञानात् स संक्षेपरुचिः धर्मे अस्तिकायधर्मे श्रुतधर्मादौ वा रुचिर्यस्य 27

सधर्मरुचिरिति गाथासंक्षेपार्थः व्यासार्थं तु सूत्रकृदेव सूत्रं आह भूयत्थेणाहिगया जीवाजीवा य पुण्णपावं चेत्यादि निर्देशात्ततायमर्थः भूतार्थत्वेन सद्भूता अमी पदार्था इत्येवं
रूपेण यस्याधिगताः परिज्ञाता जीवा अजीवाः पुण्यपापमाश्रवः संवरश्च आह कथमधिगता इत्याह सहसमुइयाइ इति आर्षत्वाद्विभक्तिलोप
श्च सह सम्मत्या सह आत्मना या संगता मतिः सा सहसम्मतिस्तया तिस्रः केवलं परोपदेशनिरपेक्षया जातिस्मरणादिरूपया मत्या न केवलमधिगताः किं तु न
न्जीवादीन् पदार्थान् श्रद्दधाति तथारूपतया आत्मसात्परिणमयति च तिष्ठ भावः एष निसर्गरुचिरिति भावः अमुमेवार्थं स्पष्ट
तरमभिधित्सुराह जो जिणदिठे भावे इत्यादि यो जिनदृष्टान् भावान् द्रव्यक्षेत्रकालभावभेदभिन्नान् चतुर्विधान् स्वयमेव परोपदेशनिर
पेक्षः श्रद्दधाति तत्तथेवेति नान्यथेति आह एवमेवैतत् जीवादि यथा जिनैर्दृष्टं नान्यथेति चः समुच्चये एष निसर्गरुचिरिति ज्ञातव्यः
उपदेशरुचिमाह एए चेव उ इत्यादि एतानेव जीवादीन् भावान् यः परेण परस्मात् जिनेन वा उपदिष्टान् श्रद्दधाति एष उपदेशरुचि
रिति ज्ञातव्यः आज्ञारुचिमाह जो हेउमयाणंतो इत्यादि यो हेतुं विवक्षितार्थगमकमजानानः प्रवचनमाज्ञयैव श्रद्दधात्येवका
रार्थः केवलयाज्ञयैव कथमित्याह एवमेतत् प्रवचनोक्तमर्थजातं ना
न्यथेति एष आज्ञारुचिर्नाम सूत्ररुचिमाह जो सुत्तमित्यादि यः
सूत्रमंगप्रविष्टमंगबाह्यं वा अधीयानः सूत्रेण तेनांगप्रविष्टेनांगबाह्येन वा सम्यक्त्वमवगाहते स सूत्ररुचिरिति ज्ञातव्यः बीजरुचिमाह ए
गपएणेगाइं इत्यादि एकेन पदेन अनेकानि पदानि जीवादीनि अनेकानि पदानि प्रसृतानि भवन्ति कथं यस्यात्मनः स एकेन पदेन जीवादिकः सम्यक्त्वमिति धर्म
धर्मिणोरभेदोपचारात् सम्यक्त्ववान् आत्मा प्रसरति उत्तरोत्तरत्वावधारणार्थः प्रसरत्येव कथमित्याह उदक इव तैलबिंदुः किमुक्तं भवति यथा उ
दकैकदेशगतोऽपि तैलबिंदुः समस्तमुदकमाक्रामति तथैकदेशोत्पन्नरुचिरप्यात्मा तथाविधक्षयोपशमभावात् शेषेषु तत्त्वेषु रुचिमान् भ
वति स एवंविधो बीजरुचिरिति ज्ञातव्यः अधिगमरुचिमाह सो होइ इत्यादि यस्य श्रुतज्ञानमर्थतो दृष्टमेकादशांगानि प्रकीर्णकमित्यत्र ज्ञा
ताधिकवचनं तत्तातयमर्थः प्रकीर्णकानि उत्तराध्ययनादीनि दृष्टिवादश्च उपांगानि स भवत्यधिगमरुचिः विस्ताररुचिमाह दव्वाण सव्वभावा इत्यादि

प्रज्ञा० वृत्ति॥

याणं धर्मास्तिकायादीनामशेषाणामपि सर्वे भावाः पर्याया यथावस्थिता यां सर्वप्रमाणैः प्रत्यक्षादिभिः सर्वैश्च नयविधिभिर्नैगमादिनयप्रकारैरुपलब्धा
:स विस्ताररुचिरिति ज्ञातव्यः सर्ववस्तुपर्यायप्रपंचावगमेन तस्यात्युत्तरतिविमलरूपतया भावात् क्रियारुचिमाह दंसणनाणे इत्यादि दर्शनं च ज्ञानं च चा
रित्रं च दर्शनज्ञानचारित्रं समाहारो द्वंद्वः सम्यग्भूतस्य तपसि विनये च तथा सर्वासु समितिषु ईर्यासमित्यादिषु सर्वासु च गुप्तिषु गुप्तिषु यः क्रियाभावरुचिः
क्रियारुचिर्भवति यस्य भावतो दर्शनाद्याचारानुष्ठाने रुचिरस्ति स खलु क्रियारुचिर्नाम संक्षेपरुचिमाह अ अणभिग्गहिए इत्यादि न अभिगृहीता कुत्सिता
दृष्टिर्येनासावनभिगृहीतकुदृष्टिरविशारदः प्रवचने जिनप्रणीते अनभिज्ञश्चेत्यर्थः कपिलादिप्रणीतेषु प्रवचनेषु अनभिगृहीताना विद्यते आभिमुख्येन
ग्रहणं यस्य तथा गृहीतं ग्रहणमस्येत्यनभिगृहीतकुदृष्टिरित्यनेन परदर्श नांतरपरिग्रहः प्रतिषिद्धः अनेन परदर्शनपरिज्ञानमात्रमपि निषिद्धमि
ति विशेषः संक्षेपरुचिरिति ज्ञातव्यः धर्मरुचिमाह जो अ त्थिकायधम्मं इत्यादि यः खलु जीवोऽस्तिकायानां धर्मास्तिकायादीनां धर्मं
गत्युपष्टंभकत्वादिरूपं स्वभावं श्रुतधर्मं चारित्रधर्मं च जिनाभिहितं श्रद्दधाति स धर्मरुचिरिति ज्ञातव्यः तदेवं निसर्गाद्युपाधिभेदात्
दशधा रुचिरूपं दर्शनमुक्तं संप्रति येर्लिंगैरिदमुत्पन्नमस्तीति निश्चीयते तानि लिंगान्युपदर्शयन्नाह परमत्थसंथवो इत्यादि परमाश्च ते
अर्थाश्च परमार्था जीवादयस्तेषु संस्तवः परिचयः तात्पर्येण बहुमानपुरःसा रं जीवादिपदार्थावगमाभ्यास इति यावत् वाशब्दः समुच्चये सुष्टु सम्यग्
दृष्टाः परमार्था जीवादयो यैस्ते सुदृष्टपरमार्थास्तेषां सेवनं पर्युपास्तिः सुदृष्टपरमार्थसेवनं चशब्दो वाशब्दो उक्तसमुच्चये यथाशक्ति तद्वैया
वृत्त्यप्रवृत्तिश्चेति समुच्चये तथा वावन्नकुदंसणवज्जणा वापन्नदर्शनाः प्रत्येकमपि संबध्यते व्यापन्नदर्शना निह्नवादयः तथा कुत्सितं दर्शनं येषां ते कु
त्सितदर्शनिनो येषां वर्जनं व्यापन्नकुदर्शनवर्जनं अत्रापि स्त्रीत्वं प्राकृतत्वात् सम्मत्तसद्दहणा इति सम्यक्श्रद्धानं यैः परमार्थसंस्तवादिभिः सम्यक्त्वमस्तीति
श्रद्धीयत इत्यर्थः अस्य च दर्शनस्याभिचाराश्च त्याज्याः परिपालनीयाः मदतिक्रमे दर्शनस्य व्यतिक्रमभावात् अतस्तानुपदर्शयन्नाह निस्संकि
य इत्यादि शंकनं शंकितं देशशंका सर्वशंका चेत्यर्थः निर्गतं शंकितं यस्मादसौ निःशंकितो देशसर्वशंकारहित इति भावार्थः तत्र देशशंका समा २८

नजीवत्वे कथमेको भव्योऽपरस्त्वभव्य इति सर्वशंका प्राकृतनिबंधनत्वात् सकलमेवेदं प्रवचनं परिकल्पितं न भविष्यतीति न त्वयं देशशंका सर्व
कावा युक्ता यतो द्विविधा भावा हेतुग्राह्या अहेतुग्राह्याश्च तत्र हेतुग्राह्या जीवास्तित्वादयस्तत्साधकप्रमाण
सद्भावात् अहेतुग्राह्या भव्यत्वादयः अस्मदाद्यपेक्षया तत्साधकहेतूनामसंभवात् प्रकृष्टज्ञानगोचरत्वात् छद्मस्थानामिति प्राकृतोपि च निबंधः प्र
वचनस्य बालाद्यनुग्रहार्थं उक्तं च बालस्त्रीमूढमूर्खाणां नृणां चारित्रकांक्षिणां अनुग्रहार्थं तत्त्वज्ञैः सिद्धांतः प्राकृतः कृतः अपि च प्राकृतोपि निबं
धः प्रवचनस्य दृष्टेष्टाविरोधी ततः कथमेवात्र परिकल्पनाशंका सर्वज्ञमंतरेणान्यस्य दृष्टेष्टाविरोधिवचनासंभवात् निःशंकित इति जीव एवा
र्हत्शासनप्रतिपन्नो दर्शनावरणात् ततः शाक्यादिदर्शनारंभणात्। एतेन दर्शनदर्शनिनोः कथंचिदभेदमाह एकांतभेदे दर्शनि
नश्च तत्फलायोगतो मोक्षाभावप्रसंगः एवमुत्तरत्रापि द्रष्टव्यं। भावना कार्या तथा निःकांक्षितं यस्मादसौ निःकांक्षितो
देशसर्वकांक्षारहित इत्यर्थः तत्र देशकांक्षा एकं दिगंबरादिदर्श नमभिकांक्षति सर्वकांक्षा सर्वाण्येव दर्शनानि शोभनानी
ति इत्येवमनुचिंतनं इयं च द्विधाप्ययुक्ता षट्दर्शनेषु षड्जीव कायपीडाया असत्यरूपणायाश्च भावात् तथा विचिकित्सा म
तिविभ्रमः फलं प्रति संशय इति यावत् निर्गता विचिकित्सा यस्मादसौ। निर्विचिकित्सः साध्वेव जिनशासनं किंतु प्रवृत्तस्य सतो ममास्मा
त्फलं भविष्यति न वा क्रियायाः कृषिबलादिषु उभयथाप्युपलब्धेरिति विकल्परहितः नह्यविकलस्योपायस्योपेयवस्तुप्रापकत्वेन भवतीति संजा
तनिश्चयो निर्विचिकित्स इति भावः एतावता ज्ञानं निःशंकितादिः यद्वा निर्विद्गुंछो इति निर्विद्गुंछः साधुजुगुप्सारहित इत्यर्थः उ
दाहरणं च विद्वज्जुगुप्सायां श्रावकदुहिता तथा अमूढदिट्ठीय त्ति बालतपस्वितपोविद्यातिशयदर्शनेन मूढा स्वभावाचलिता दृष्टिः सम्यग्दर्शन
रूपा यस्यासावमूढदृष्टिः अत्रोदाहरणं सुलसाश्राविका साह्यंबडपरिव्राजकसमृद्धीरुपलभ्यापि न सम्मोहं गता तदेवं गुणिप्रधानश्चा
यं दर्शनाचारनिर्देशः संप्रति गुणप्रधानमाह उववूह इत्यादि उपबृंहणं च स्थिरीकरणं च उपबृंहणस्थिरीकरणं तत्रोपकरणोपबृंहणं नाम समानधार्मिका

प्रज्ञाप०वृत्तिः॥ णां सद्गुणप्रशंसनेन तद्वृद्धिकरणं धर्माद्विषीदतां तत्रैव स्थापनं वात्सल्यं च प्रभावना च वात्सल्यप्रभावने तत्र वात्सल्यं समानधार्मिकाणां प्रीत्या
उपकारकरणं प्रभावना धर्मकथादिभिस्तीर्थप्रख्यापना अयं चाष्टगुणप्रकारो निर्देशो गुणगुणिनोः कथंचिद्भेदख्यापनार्थः अन्यथा ह्येकान्ताभेदे गुण
निवृत्तौ गुणिनोऽपि निवृत्तेः शून्यतापत्तिः एतेऽष्टौ दर्शनाचाराः तदेवमुक्ताः सरागदर्शनिनस्तदभिधानाच्चाभिहिताः सरागदर्शनार्या इदानीं वीतरागदर्श
नाह से किं तमित्यादि सुगमं यावत् अहवा चारित्रारिया पंचविहा पन्नत्ता तं जहा सामाइयचरित्तारिया इत्यादि नवरं पढमसमय इति ये तेषा
मेवोपशान्तकषायवीतरागादीनां विशेषाणां प्रथमसमये वर्त्तन्ते ते प्रथमसमया ये तु द्वितीयादिषु समयेषु वर्त्तमाना अप्रथमसमयाः तथा चरमसमय अचर
मसमय इति ये तेषामेवोपशान्तकषायवीतरागादीनां विशेषाणामन्तसमये वर्त्तन्ते चरमसमयाः ये तेषामेवाद्यचरमसमयादिषु समये
ष्ववर्त्तन्ते ते अचरमाः सामायिकादीनां चारित्राणां स्वरूपमिदं समस्तारागद्वेषरहितत्वाद्यो गमनं समायः एवमन्यासामपि साधुक्रिया
णामुपलक्षणं सर्वासामपि साधुक्रियाणां रागद्वेषरहितत्वात् सम यनं निर्दिष्टं समाये भवं वा सामायिकं यद्वा समानां ज्ञानद
र्शनचारित्राणामायो लाभः समायः समाय एव सामायिकं विनयादि सकृतिगणतया विनयादिभ्य इत्यनेन स्वार्थिक इकण् तच्च स
र्वसावद्यविरतिरूपत्वाद्यद्यपि सर्वमपि चारित्रमविशेषतः सामायिकं तथापि छेदादिविशेषैर्विशिष्यमाणमर्थतः शब्दान्तरतश्च नानात्वं भज
ते प्रथमं पुनरविशेषणात् सामान्यशब्द एवावतिष्ठते सामायिकमिति तच्च द्विधा इत्वरं यावत्कथिकं च तत्रेत्वरं भरतैरावतेषु प्रथमपश्चिमतीर्थकरतीर्थ
योरनारोपितमहाव्रतस्य शैक्षकस्य विज्ञेयं यावत्कथिकं प्रव्रज्याप्रतिपत्तिकालादारभ्याप्राणोपरमात् तच्च भरतैरावतभाविमध्यमद्वाविंशतितीर्थकर
तीर्थान्तर्गतानां विदेहतीर्थकरतीर्थान्तर्गतानां च साधूनामवसेयं तेषामुपस्थापनाया अभावात् उक्तं च सव्वमिणं सामाइयं छेयाइविसेसियं पुण
विभिन्नं अविसेसियं सामन्नसन्नमवचिट्ठइ पढमं सामाइयं इत्तरमावकहं ति पढमं पढमंतिमजिणाणं तित्थेसु अणारोवियवय
स्स सेहस्स थोवकालीयं सेसाणमावकहियं तित्थेसु विदेहयाणं च नन्वित्वरमपि सामायिकं कृतामिदं तत्सामायिकं यावज्जीवमित्येवं यावदायु २९

रागृहीतं ततश्चोपस्थापनाकाले तत्परित्यजतः कथं न प्रतिज्ञालोपः उच्यते न भागो वा सर्वमपि चेदं चारित्रमविशेषतः सामायिकं सर्वत्रापि सर्वसावद्य
योगविरतियोगसद्भावात् केवलं छेदादिविशुद्धिविशेषैर्विशेष्यमाणमर्थतः शब्दान्तरतश्च नानात्वं भजते ततो यथा यावत्कथिकं सामायिकं
छेदोपस्थापनेन वा परिहारविशुद्धिविशेषरूपसूक्ष्मसंपरायादिचारित्रावाप्तौ न भंगमाप्नोति तथेत्वरमपि सामायिकं विशुद्धिविशेषरूपछेदोपस्था
पनामात्रोपयादिह प्रव्रज्यां परित्यजति ततस्तद्भंगमापद्यते न तु तस्यैव विशुद्धिविशेषावाप्तौ उक्तं च उन्निक्खमतो भंगो जाउ गुणंतवियकरामि
सुद्धयरं सन्नामित्तविसेसं सुज्झमपि वित्तस्साको न भंगो तथा छेदः पूर्वपर्यायस्य उपस्थापना च महाव्रतेषु यस्मिन् चारित्रे तच्छेदोपस्थापनं तच्च द्विधा
सातिचारं निरतिचारं च तत्र निरतिचारं यदित्वरसामायिकवतः शैक्षकस्यारोप्यते तीर्थान्तरसंक्रान्तौ वा यथा पार्श्वनाथतीर्थाद्वर्द्धमान
तीर्थं संक्रामतः पंचयामप्रतिपत्तौ सातिचारं यन्मूलगुणघातिनः पुनर्व्रतोच्चारणं उक्तं च सेहस्स निरइयारं तित्थंतरसंकमे व तं हो
ज्जा मूलगुणघाइणो साइयारमुभयं च ठियकप्पे उभयं चेति सातिचारं निरतिचारं च स्थितकल्प इति प्रथमपश्चिमतीर्थकर
तीर्थकाले तथा परिहरणं परिहारस्तपोविशेषः तेन विशुद्धिर्यस्मिन् चारित्रे तत्परिहारविशुद्धिकं तच्च द्विधा निर्विशमानकं निर्विष्टकायि
कं च तत्र निर्विशमानका विवक्षितचारित्रसेवकाः निर्विष्टकायिका आसेवितविवक्षितचारित्रकायाः तदव्यतिरेकाच्चारित्रमप्येवमुच्यते
इह नवको गणश्चत्वारो निर्विशमानकाश्चत्वारश्चानुचारिणः एकः कल्पस्थितो वाचनाचार्यः यद्यपि च सर्वेऽपि श्रुतातिशयसम्पन्नास्तथापि
कल्पत्वात्तेषामेकः कश्चित्कल्पस्थितो वाचनाचार्यः स्थाप्यते निर्विशमानकानां चायं परिहारः परिहारियाण उ जो जहन्नमज्झिमो उक्कोसो सीयकालम्मि
वासकाले य णे धीरा हि पत्तेयं तवो जहन्नो गिम्हे चउत्थ छट्ठट्ठमाइ सिसिरे अट्ठममिह उक्कोसो एत्तो सिसिरे पवरकाले सिसिरे छट्ठाइ अ
ट्ठाई दसमचरिमगा होइ वासासु अट्ठमाई बारसपज्जंतगो नेओ पारणगे आयामं पंचसु गहो दोसऽभिग्गहो भिक्खे कप्पट्ठियावि पइदिणं क
रिंति एमेव आयामं एवं छम्मासतवं चरिउं परिहारगा अणुचरंति अणुचरगे परिहारियपयट्ठिए जाव छम्मासा कप्पट्ठिओवि एवं छम्मासतवं करेइ स

सात्तु अणुपरिहारगत्ताए वेयंतिकप्पट्ठिगत्तं च एवं सो अट्ठारसमासपमाणो तु वण्णिओ कप्पो संखेवओ विसेसो विसेससुत्ताओ नायव्वो कप्पसमत्ती
ए तयं जिणकप्पं वा उवेंति गच्छं वा पडिवज्जमाणगा उ जिणस्स गासे पवज्जंति तित्थयरसमीवासेवगस्स पासे व नो उ अन्नस्स एएसिं जं चरणं परिहार
विसुद्धियं तं तु अथैते परिहारविशुद्धिकाः कस्मिन् क्षेत्रे काले वा भवंति उच्यते इह क्षेत्रादीनि स्वरूपाणि विंशतिद्वाराणि तद्यथा क्षेत्रद्वारं १ कालद्वारं २
चारित्रद्वारं ३ तीर्थद्वारं ४ पर्यायद्वारं ५ आगमद्वारं ६ वेदद्वारं ७ कल्पद्वारं ८ लिंगद्वारं ९ लेश्याद्वारं १० ध्यानद्वारं ११ गणनाद्वारं १२ अभिग्रहद्वारं १३ प्रव्राजना
द्वारं १४ मुंडापनाद्वारं १५ प्रायश्चित्तविधिद्वारं १६ कारणद्वारं १७ निःप्रतिकर्मताद्वारं १८ भिक्षाद्वारं १९ पंथद्वारं २० तत्र क्षेत्रे द्विधा मार्गणा जन्मतः सद्भावतश्च
तत्र क्षेत्रे जातस्य जन्मतो मार्गणा यत्र च कल्पस्थिता वर्तते तत्र सद्भावतः उक्तं च खेत्ते दुहमग्गणा जम्मणओ संतिभावओ य जम्मणओ जा
हिं जाओ संतीभावो य जहिं कप्पो तत्र जन्मतः सद्भावतश्च पंचसु भरतेषु पंचस्वैरवतेषु न तु महाविदेहेषु न चैतेषां संहरणमस्ति येन जि
नकल्पिकादिवत् संहरणतः सर्वासु कर्मभूमिष्वकर्मभूमिषु वा प्राप्येरन् उक्तं च । भरहेरवएसु होंति संहरणवज्जिया नियमा काल
द्वारे अवसर्पिण्यां तृतीये चतुर्थे वारके जन्म सद्भावः पंचमेपि उस्सप्पिण्यां द्वितीये तृतीये चतुर्थे वा जन्म सद्भावः पुनस्तृतीये चतुर्थे
वा उक्तं च ओसप्पिणीए दोसुं जम्मणओ तीसु संतिभावेण उस्सप्पिणि विवरीओ जम्मणओ संतिभावेण नोउस्सप्पिणीउस्सप्पिणीरूपे चतुर्थारकप्रतिभागकाले
न संभवंति महाविदेहक्षेत्रे तेषामसंभवात् चारित्रद्वारे संयमस्थानद्वारेण मार्गणा तत्र सामायिकस्य छेदोपस्थापनीयस्य च चारित्रस्य यानि जघन्यानि संय
मस्थानानि परस्परं तुल्यानि समानपरिणामत्वात् ततोऽसंख्येयलोकाकाशप्रदेशप्रमाणानि संयमस्थानान्यतिक्रम्योर्ध्वं यानि संयमस्थानानि तानि परिहा
रविशुद्धिकयोग्यानि तान्यपि चाकेवलिप्रज्ञया परिभाव्यमानानि असंख्येयलोकाकाशप्रमाणानि तानि च प्रथमद्वितीयचारित्राविरोधीनि तेष्वपि संभवात्
तत ऊर्ध्वं यानि संख्यातीतानि संयमस्थानानि तानि सूक्ष्मसंपराययथाख्यातचारित्रयोग्यानि उक्तं च तुल्लाजहन्नगाणं संजमठाणाण पढमबिइयाणं तत्तो असं
खलोए ठाणे परिहारियाणं तु ते वि असंखा लोगा अविरुद्धा चेव पढमबिइयाणं उवरिं पि तओ संखा संजमठाणा उ दोण्हं पि तत्र परिहारविशुद्धिककल्पप्रति ३०

पत्तिः स्वकीये यथासंयमस्थाने तु वर्तमानस्य भवति नान्यत्र पूर्वप्रतिपन्नस्तु संभवति एष पूर्वप्रतिपन्नो विवक्षितात् तदा अन्यस्मिन्नपि संयमस्थाने तु भवति परिहार
विशुद्धिकल्पसमाप्त्यनंतरमन्यस्मिन्नपि चारित्रे संक्रमतः स्थिरपि वर्तमानस्यातीतनयमपेक्ष्य सर्वे प्रतिपन्ना भवितामात् उक्तं च सट्ठाणे पडिवत्ती अन्नेसु
वि होज्ज पुव्वपडिवन्नो तेसु वि वट्टंतो सो तीतनयं पप्प वुच्चइ उ तीर्थद्वारे परिहारविशुद्धिको नियमतस्तीर्थे प्रवर्तमाने एव भवति न तदुच्छे
दे नानुत्पन्ने वा तदभावे जातिस्मरणादिना उक्तं च तित्थे नियमा भावो वियाहिओ समतित्थे वि जिणवुच्छेदे वा जाईसरणाइएहिं तु प
र्यायद्वारे पर्यायो द्विधा गृहस्थपर्यायो यतिपर्यायश्च एकैकोपि द्विभेदः जघन्य उत्कृष्टश्च तत्र गृहस्थपर्यायो जघन्यतः एकोनत्रिंशद्वर्षाणि यतिपर्यायो वि
शतिः द्वावपि चोत्कर्षतो देशोनपूर्वकोटिप्रमाणौ उक्तं च एयस्स एस नेओ गिहिपरियाओ जहन्न गुणतीसा जइपरियाओ वीसा दोसु वि उक्कोस
देसूणा आगमद्वारे अपूर्वमागमं स नाधीते यस्मात्तत्कल्पमधिकृत्य उचितप्रतो चितायोगारंभस्तेनैव स कृतार्थो भवति पूर्वाधीतं तु विस्रो
तसिकाक्षयति नित्यमेवैकाग्रमनाः सम्यगनुस्मरति । आह च अप्पुव्वं नाहिज्जइ आगम तेणावि उत्तं कप्पं जमुचि
यपगहियज्झाणाराहणाउ चेव कयकिच्चो पुव्वाहीयं तु तयं पायं अणुसरइ निच्चमेवेस एगग्गमणो सम्मं विस्सोत्तियरहिएणं चायाह
इ वेदद्वारे प्रवृत्तिकाले वेदतः पुरुषवेदो वा भवेत् नपुंसकवेदो वा सवेद नपुंसकवेदो वा न स्त्रीवेदः स्त्रियाः परिहारविशुद्धिकल्प
प्रतिपत्त्यसंभवात् अतीतनयमधिकृत्य पुनः पूर्वप्रतिपन्नश्चिन्त्यमानः सवेदो वा स्यादवेदो वा तत्र सवेदः श्रेणिप्राप्त्यभावात् अवेद उपशमश्रे
णिप्रतिपत्तौ क्षपकश्रेणिप्रतिपत्तौ वा भवेदिति उक्तं च वेए पवित्तिकाले इत्थीवज्जो उ होइ एगयरो पुव्वपडिवन्नगो पुण होज्ज सवेदो अ
वेदो वा कल्पद्वारे स्थितकल्प एवायं नास्थितकल्पे ठियकप्पंमि य नियमा इति वचनात् तत्र आचेलक्यादिषु दशस्वपि स्थानेषु ये स्थिताः साधवस्तत्
कल्पः स्थितकल्पस्तदुच्यते ये पुनः चतुर्षु शय्यातरपिंडादिषु अवस्थितश्च कल्पेषु स्थिताः शेषेषु आचेलक्यादिषु षट्सु अस्थिताः स कल्पोऽस्थित
कल्पः उक्तं च ठियअट्ठियकप्पस्स आचेलक्काइ दसठाणेसु ठिया पढमो उ अट्ठिया बीओ आचेलक्यादीनि च दशस्थानान्यमू

पंकप्पवृत्ति॥

ति आचेलक्कुद्देसियसेज्जायरसयपिंडकिइकम्मे वयजेट्ठपडिक्कमणेमासपज्जोसवणकप्पा चत्वारश्चावस्थिताः कल्पाः इमे सेज्जायरपिं
डश्चातुर्यामव्रतज्येष्ठ कृतिकर्मस्य कारणचत्तारि अवट्ठियाकप्पा लिंगद्वारे नियमात्ता द्विविधेपि लिंगे भवति तद्यथा द्रव्यलिंगेन वा
लिंगेन वा केनापि विना विवक्षितकल्पास्थितसामाचार्यायां नात्मलब्धाहारस्तेऽतः प्रवृत्तिका भवन्ति विशुद्धविशुद्धात्मलब्धाशुद्धपरिशुद्धिकंक
ल्पं प्रतिपद्यन्ते सर्वप्रतिपन्नः पुनः सर्वाप्रतिकर्मविहरणं तत्रापि तरोऽपि विशुद्धात्मलब्धाशुद्धतां संक्लिश्यमानं ततस्ताभ्यामवान्तरातीतानागतं काल
मवतिष्ठते किंतु साकंतु साकं यतः स्ववीर्यवशात् कदाचित् वर्तमाना वर्तते अथ प्रथमतश्चरमस्तात् प्रवर्तते अथातः कर्मविशात् उक्तं च लेसासु
विसुद्धासु पडिवज्जइ तीसु नवरं अण्णासु उवयोगे तदुपडिवज्जउपडिवन्नो वाण्णलेसासु सव्वासु विकहंचि ण अच्चंत संकिलिट्ठासु त्तावं कालं वट्टइ यञ्चा
सु विसाकम्माणगईतत्ता विचित्रं यफलं देइ ध्यानद्वारं धर्म्यध्यानेन प्रवर्द्ध मानेन परिहारविशुद्धिकं कल्पं प्रतिपन्नः पुनर्वार्त्तरौद्रयो
रपि नवति केवलं प्रायेण निरनुबंधः आह च झाणंमि वि तियमेणं प हवइ इमो पवट्टमाणेणं इयरे सु विझाणेसुं पुवपवा
वो नपडिसिद्धो एवं च कम्मपरिणामा लोकवंदनाद्विधेः वंकमपरिणामो होइ देशा विरतावा अस्मात्प्रथमतरणप्रतिपन्नगणनाद्वारे जघन्यतः
स्त्रयो गणाः प्रतिपद्यंते उत्कर्षतः शतसंख्याः पूर्वप्रतिपन्नास्तु जघन्यतस्त्रय उत्कर्षतो वा शतशः पुरुषगणनया जघन्यतः प्रतिपद्यमानाः सप्तविंशा
तिरुत्कर्षतः सहस्रं पूर्वप्रतिपन्नकाः पुनर्जघन्यतः शतशः उत्कर्षतः सहस्रशः आह च गणातिन्निवसगराजहन्नपडिवन्नसयमुक्कोसा उक्कोसजह
न्नेणं सयमो सियपुव्वपडिवन्ना सत्तावीसजहन्ना सहस्समुक्कोसओयपडिवन्नो सयसो सहस्ससो वा पडिवन्नजहन्नउक्कोसा अन्यच्च यदा पूर्वप्रतिपन्नक
ल्पमध्यात् कोपि निर्गच्छति अन्यः प्रविशति तदा न्यूनक्षेपः प्रतिपत्तौ कदाचिदेकोपि भवति यदा पूर्वप्रतिपत्तेषु सवनेऽनयाकदाचिदेकः पा
य्यतेऽन्यक्रमोवा उक्तं च पक्खेवगपाणेनयाणे एगाइपेकाविकाणपरककवउपडिवन्नयाविअयनइयापक्के उहवेवा अतिन्नरहाणेसुं उपि सप्रयगाइवा
नियहाः काला निग्रहा नाना वानिग्रहाश्च एतेनान्ये वर्जिताः इतिनञ्चयश्च अर्थानतरपरि हारविशुद्धिकस्यैते निग्रहा न भवंति यस्मादेतस्य कल्प एवयथादि ३१

तद्दशतापालियहा वर्त्तते उक्तं च दवाईय अभिग्गहविचित्तरूवा न हुंति उ एएकई पए इत्तकप्पो वियलियहा जेण एयंमिगोयरगई नियमेणं नि
रववादाय तप्पालणं वियपरं एयस्स विसुद्धिट्ठाणेउ प्रव्रज्याद्वारे नासावन्यंप्रव्राजयति कल्पस्थितिरिति कृत्वा आह च पव्वावेइ न एसो निययाअन्नं
कप्पट्ठिइ तिकाऊण उपदेशं पुनर्यथाशक्ति प्रयच्छति मुंडापनाद्वारे पिना सावन्यं मुंडयति अथ प्रव्रज्यानंतरं नियमतो मुंडनमिति
प्रव्रज्याग्रहणेनैव तद्गृहीतमिति किमर्थं पृथग्द्वारं तदयुक्तं प्रव्रज्याद्वारे नियमतो मुंडनस्याभावात् अयोग्यस्य कथंचिद्दत्तायामपि प्रव्रज्यायां पुनरयोग्य
ताप रिज्ञाने मुंडनायोगात् ततः पृथगिदं द्वारमिति प्रायश्चित्तविधिद्वारे मनसापि सूक्ष्ममप्यतिचारमापन्नस्य नियमतश्चतुर्गुरुकं प्रायश्चित्तमस्य यतएषक
ल्पएकाग्रताप्रधान स्ततस्तद्भंगो गुरुतरदोषइति कारणद्वारे तथा कारणं नामशा लंबनं तत्पुनः सुपरिशुद्धज्ञानादिकं तत्रास्य न विद्यते येन तदा
श्रित्यापवादपदं सेवितास्यात् एष हि सर्वत्र निरपेक्षः क्लिष्टकर्मक्षयनिमि त्तं प्रारब्धमेवशुद्धं कल्पं यथोक्तविधिना समाचरन् महात्मा वर्त्त
ते उक्तं च कारणमालंबणमिह तं पुणनाणाइयं सुपरिसुद्धं एयस्स तं न विज्जइ उवियंत पसाहणा एयं सव्वत्थ निरवयक्खो आ
ढत्तं चिय दढंसमाणेंतो वट्टइ एस महप्पा किलिट्ठकम्मक्खयनिमित्तं निमित्तं निः प्रतिकर्मता द्वारे एष महात्मा निः प्रतिकर्मशरीरतः अ
मलादिकमपि कदाचिदपनयति न च प्राणांतिकेपि समापतिते व्यसने द्वितीयप दं सेवेत उक्तं च निप्पडिकम्मसरीरो अच्छिमलाइ विनाव
णेइ सया पाणंतिए वि यमहावसणं मि न वट्टए वीए अप्पवगुण्णालोयण विसई तइयाए पोरिसीइ अह वा सेहा वा उवकुंगं एयं वियइ मस्स भिक्खा
द्वारे तथा पथद्वारे भिक्षाविहारक्रमश्चास्य तृतीयस्यां पौरुष्यां भवति शेषासु च पौरुषीषु कायोत्सर्गो निद्रापि चास्याल्पा द्रष्टव्या यदि पुन
: कथमपि जंघाबलमस्यापरिक्षीणं भवति तथाप्यसावविहरन्नपि महात्मा नापवादं द्वितीयपदमापद्यते किंतु तत्रैव यथाकल्पमात्मीयं योगं विदधाती
ति उक्तं च तइयाए पोरिसीए भिक्खाकालो व सेसासु उ वस्सग्गो पायं अप्पा य निद्दत्ति जंघाबलंमि खीणे अविहरमाणो वि नवरमावज्ज तत्थेव अ
हाकप्पं कुणइ उ जोगं महाभागा एते च परिहारविशुद्धिकास्त्रिविधाः तद्यथा इत्वरा यावत्कथिकश्च तत्र ये कल्पसमाप्त्यनंतरं तमेव कल्पं गच्छं वा समुपया

प्रज्ञाप० वृत्तिः॥

म्पंति तदूर्ध्वं ये पुनः कल्पसमाप्त्यनंतरमव्यवधानेन जिनकल्पं प्रतिपत्स्यंते ते यावत्कथिकाः उक्तं च इत्तरिय थेरकप्पे जिणकप्पे आवकहिय त्ति अत्र
इत्वरकल्पपरिहारिकाणां कल्पप्रभावादेव देवमनुष्यतिर्यक्कृता उपसर्गाः सद्योघातिनः आतंका अतीवा
विपुलाश्च वेदना न प्रादुःष्यंति यावत्कथिकानां संभवेयुरपि ते हि जिनकल्पं प्रतिपत्स्यमाना जिनकल्पभावमनुभवंति जिनकल्पिकानां चोपस-
र्गादयः संभवंतीति उक्तं च इत्तरियाण उवसग्गा आतंका वेयणा य न हवंति आवकहियाण भइया ॥ तथा सूक्ष्मा लोभांशावशेषाः संपरायः
कषायो यत्र तत्सूक्ष्मसंपरायं तद्द्विधा विशुद्ध्यमानकं संक्लिश्यमानकं च तत्र विशुद्ध्यमानकं क्षपकश्रेणिमुपशमश्रेणिं वा समारोहतः संक्लि-
श्यमानकमुपशमश्रेणितः प्रच्यवमानस्य अथाख्यातमिति अथशब्दो याथातथ्ये आङभिविधौ यथावस्थितमभिविधिना ख्यातं कथितमकषा-
यतया चारित्रमिति तदथाख्यातं उक्तं च अह सद्दो जाहत्थे आङो अभिविहीए कहियमक्खायं चरणमकसायमक्खायं तह अहक्खायं
यथाख्यातमिति द्वितीयं नाम तस्यायमर्थः यथा सर्वस्मिन् जीवलोके ख्यातं प्रसिद्धमकषायं भवति चारित्रमिति तथैव यत्तत्
यथाख्यातं तद्द्विधा छाद्मस्थिकं कैवलिकं च तत्र छाद्मस्थिकमुपशांतमोहस्य क्षीणमोहस्य वा कैवलिकं सयोगिके-
वलिनोऽयोगिकेवलिनश्च सेत्तमित्याद्युपसंहारकद्वयं सुगमं तदेवं कर्मभूमका मनुष्याः संप्रति देवप्रतिपादनार्थमाह से किं तमित्यादि अ-
थ के ते देवाः सूरिराह देवाश्चतुर्विधाः प्रज्ञप्तास्तद्यथा भवनवासिनो व्यंतरा ज्योतिष्का वैमानिकाः तत्र भवनेषु वसंतीत्येवंशीला भवनवासिनः एतद्बा-
हुल्यात्ताना नागकुमारादयः प्रायो भवनेषु वसंति कदाचिदावासेषु असुरकुमारास्तु प्राचुर्येणावासेषु कदाचिद्भवनेषु अथ भवनानां
मावासानां च कः प्रतिविशेषश्चच्यते भवनानि बहिर्वृत्तान्यंतः समचतुरस्राणि अधः पुष्करकर्णिकासंस्थानानि आवासाः कायमानस्थानीया महामंडपा
विविधमणिरत्नप्रदीपप्रभासितसकलदिक्चक्रवालाः इति अंतरं नाम अवकाशः तच्चाश्रयरूपं इह ग्राह्यं विविधं भवननगरावासरूपं तदंतरं येषां ते व्यंतराः यद्वा
भवनानि नगराणि आवासाः प्राग्वत् तत्र भवनानि रत्नप्रभायाः प्रथमे रत्नकांडे उपरि अधश्च प्रत्येकं योजनशतमपहाय शेषे अष्टयोजनशतप्रमाणे मध्यभागे भवंति नगराणि तिर्यग्लोके व- ३२

प्यादि जंबूद्वीपद्वाराधिपतिविजयदेवस्यान्यस्मिन् जंबूद्वीपादसंख्येयोजनसहस्रप्रमाणे नगरी आवासास्त्रिष्वपि लोकेषु तत्रोर्ध्वलोके पंडकवनादा-
विति अथवा विगतमंतरं मनुष्येभ्यो येषां ते व्यंतराः तथाहि मनुष्यानपि चक्रवर्तिवासुदेवप्रभृतीन् भृत्यवदुपचरंति केचिद् व्यंतरा इति मनुष्येभ्यो व्या-
विगतांतराः यदि वा विविधमंतरं शैलांतरं कंदरांतरं वनांतरं वा आश्रयरूपं येषां ते व्यंतराः प्राकृतत्वाच्च सूत्रे वाणमंतरा इति पाठः यदि वा वनानामंतरा-
णि वनांतराणि तेषु भवा वानमंतराः पृषोदरादित्वान्मकारागमः तथा द्योतयंति प्रकाशयं-
ति जगदिति ज्योतींषि विमानानि तेषु भवा ज्योतिष्काः अध्यात्मादित्वादिकण् तत्र च वर्णविपर्यासेन इकण्
प्रत्ययाद् इकारस्य लोपः अवशिष्यमाना ज्योतिष्काः यदि वा द्योतयंति शिरो मुकुटोपगूहितैः प्रतामंडलकल्पैः सूर्यादिमंडलैः प्रकाश-
यंतीति ज्योतींषि देवाः सूर्यादयः तथाहि सूर्यस्य सूर्याकारमुकुटोपगूढ चंद्रस्य चंद्राकारं ग्रहस्य ग्रहाकारं न-
क्षत्रस्य नक्षत्राकारं तारकस्य तारकाकारं तैः प्रकाशयंतीति उक्तं च तत्त्वार्थभाष्ये द्योतयंतीति ज्योतींषि विमानानि तेषु भवा ज्योतिष्काः
ज्योतिषो वा देवा ज्योतिष्का मुकुटैः शिरोमुकुटोपगूहितैः प्रभा-
मंडलकल्पैः सूर्यादिचिह्नैः विराजमाना ज्योतिष्का इति तथा विविधं मान्यंते उपभुज्यंते पुण्यवद्भिर्जीवैरिति विमानानि तेषु भ-
वा वैमानिकाः संप्रत्येतेषामेव क्रमेण लेशतो निर्दिदिक्षुराह
से किं तं भवणवासी इत्यादि असुरा एव कुमारा असुरकुमारा एवं नागकुमारा इत्याद्यपि भावनीयं अथ कस्मादेते कुमारा इत्युच्यंते उच्यते
कुमारवदेते कांतदर्शनाः सुकुमारा मृदुमधुरललितगतयः शृंगाराभिप्रायकृतविशिष्टविशिष्टोत्तररूपक्रियाः कुमारवच्चोद्धत-
रूपवेषभाषाभरणप्रहरणावरणयानवाहनाः कुमारवच्चोल्बणरागाः क्रीडनपराश्च ततः कुमारा इव कुमाराः इति किंनरा इत्यादि किंनरा दश-
विधास्तद्यथा किंनराः किंपुरुषाः किंपुरुषोत्तमाः किंनरोत्तमाः हृदयंगमाः रूपशालिनः अनिंदिताः मनोरमाः रतिप्रियाः रतिश्रेष्ठाः
किंपुरुषा दशविधास्तद्यथा पुरुषाः १ सत्पुरुषाः २ महापुरुषाः ३ पुरुषवृषभाः ४ पुरुषोत्तमाः ५ अतिपुरुषाः ६ महादेवाः ७ मरुतः ८ मेरुप्रभाः

ए यक्षाश्चंतरए महोरगा दशविधास्तद्यथा भुजगाः भोगशालिनः २ महाकायाः ३ अतिकायाः ४ स्कंधशालिनः ५ मनोरमाः ६ महावेगाः ७ महेष्वक्षाः
८ मेरुकांताः ९ भास्वंतः १० गंधर्वा द्वादशविधास्तद्यथा हाहा १ हूहू २ तुंबरवः ३ नारदाः ४ ऋषिवादिकाः ५ भूतवादिकाः ६ कादंबाः ७ महाकादंबाः ८ रैवताः ९
विश्वावसवः १० गीतरतयः ११ गीतयशसः १२ यक्षास्त्रयोदशविधास्तद्यथा पूर्णभद्राः १ माणिभद्राः २ श्वेतभद्राः ३ हरितभद्राः ४ सुमनोभद्राः ५ व्यतिपातिकभद्राः ६ सुभद्राः
७ सर्वतोभद्राः ८ मनुष्ययक्षाः ९ वनाधिपतयः १० वनाहाराः ११ रूपयक्षाः १२ यक्षोत्तमाः १३ राक्षसाः सप्तविधास्तद्यथा भीमाः १ महाभीमाः २ विघ्नाः ३ वि
नायकाः ४ जलराक्षसाः ५ राक्षसराक्षसाः ६ ब्रह्मराक्षसाः ७ भूता नवविधास्तद्यथा सुरूपाः १ प्रतिरूपाः २ अतिरूपाः ३ भूतोत्तमाः ४ स्कंदिकाः ५ महास्कंदिकाः ६ महाव
ेगाः ७ प्रतिछन्नाः ८ आकाशगाः ९ पिशाचाः षोडशविधास्तद्यथा कूष्मांडाः १ पटकाः २ जोषाः ३ आह्निकाः ४ कालाः ५ महाकालाः ६ चोक्षाः
७ अचोक्षाः ८ तालपिशाचाः ९ मुखरपिशाचाः १० अधस्तारकाः ११ देहाः १२ विदेहाः १३ महाविदेहाः १४ तूष्णीकाः १५ वनपिशाचाः १६ इति
कप्पोवगा य कप्पातीया य कल्पशब्द आचारः स चेह इंद्रसामानिकत्रायस्त्रिंशादिव्यवहाररूपः तद्युक्ताः प्राप्ताः कल्पोपगाः सौध
र्मेशानादिदेवलोकनिवासिनः ये पुनः कल्पमतीता अतिक्रांताः कल्पातीताः अधस्तनाधस्तनग्रैवेयकादिनिवासिनस्ते हि सर्वे
प्यहमिंद्रास्ततो नैवेति कल्पातीताः कल्पोपगान्दर्शयति सोहम्मीसाणाइत्यादि सौधर्मदेवलोकनिवासिनः ईशानाः एवं सर्वत्रापि भावनीयं
नवरं ग्रैवेयकादि नामनुत्तराणि देवानां यथावालदेवानिवासिनः पंचालाइति ७ ॥ ॥इति श्रीमलयगिरिविरचितायां प्रज्ञापनाटीकायां प्रथमप्रज्ञापनाख्यं
पदं समाप्तमिति ७ ग्रंथाग्रं २००७॥७ तदेवमुक्तं प्रथमं पदं संप्रति द्वितीयमारभ्यते तस्य चायमभिसंबंधः प्रथमपदे पृथिवीकायिकादयः प्ररूपि
ताः इह तु तेषामेव स्थानानि प्ररूप्यंते तत्रेदमादिसूत्रं ७ कहिणं भंते इत्यादि कहि इति कस्मिन् णमिति वाक्यालंकारे भदंतेति परमगुरुसंबोधनं
णेवादरपृथिवीकायिकानां पर्याप्तानां स्थानानि स्वस्थानादीनि प्रज्ञप्तानि प्ररूपितानि एवं गोतमस्वामिना प्रश्ने कृते सति भगवानाह वर्द्धमानस्वामी गो
यमा सट्ठाणेणमित्यादि तत्र गोतमोपि भगवान् चतुर्दशपूर्ववित् क्षायोपशमिकलाभगणधरतीर्थकरोपदिष्टमातृकापदश्रवणमात्रावाप्तप्रकृष्टश्रुतज्ञानावरणक्षयो

पशमश्चतुर्दशपूर्ववित् सर्वाक्षरसन्निपाती विवक्षितार्थपरिज्ञानसमन्वितश्च वर्त्तते किमर्थं पृच्छति न हि चतुर्दशपूर्वविदः सर्वोत्कृष्टश्रुतलब्धि
समन्वितस्य किंचित्प्रज्ञापनीयमविदितमस्ति यत उक्तं संखाईए उ भवे साहइ जं वा परो उ पुच्छिज्जा न य णं अणाइसेसी वियाणई एस छउमत्थो
त्ति सत्यमेतत् केवलं जानन्नेव गोतमस्वामी भगवान् स्वयं विनेयस्य प्रतिपाद्यतत्प्रत्ययनिमित्तं विवक्षितमर्थं पृच्छति यदि वा प्रायः सर्वत्र
गणधरप्रश्नतीर्थकरनिर्वचनरूपं सूत्रमतो भगवानार्यश्यामोपीत्थमेव सूत्रं रचयति अथवा मन्यते तस्यापि गणधृतो गोतमस्वामिनोऽनाभोग
संभवात् उक्तं च न हि नामानाभोगश्छद्मस्थस्येह कस्यचिन्नास्ति ज्ञानावरणीयं हि ज्ञानावरणप्रकृतिकर्म ततो जातसंशयः सन्पृच्छती
ति न कश्चिद्दोषः गोयमा इति लोकप्रथितमहाविशिष्टगोत्राभिधायकामंत्रणध्वनिः हे गोतम सट्ठाणेणं
ति स्वस्थानं यत्रासते बादरपृथिवीकायिकाः पर्याप्ताः आसीना श्रवणादि विलोकनादेष्टुं शक्यंते तत्स्थानमिति भावः स्व
स्थानग्रहणमुपपातसमुद्घातस्थाननिवृत्त्यर्थं ततस्तस्मिन् स्वस्थाने स्वस्थानमंगीकृत्येति भावः अट्ठसु पुढवीसु सर्वत्र बाद
रपृथिवीकायिकानां पर्याप्तानां स्थानानीति योगः ताश्चैवाष्टौ पृथिवीर्नामग्राहमाह तं जहेत्यादि तद्यथा रत्नप्रभायां यावदष्ट
म्यामीषत्प्राग्भारायां तथा अधोलोके पातालेषु पातालकलशेषु भवनेषु भवनप्रस्तटेषु भवनानि भवनपतिनिकायावासरूपाणि भ
वनप्रस्तटेषु भवननिष्कुटेषु इह भवनग्रहणेन भवनानामेव केवलानां ग्रहणं भवनप्रस्तटग्रहणेन तु भवनानामपांतरालस्यापि
तथा नरकेषु प्रकीर्णकरूपेषु नरकावासेषु नरकावलिकासु आवलिकाप्रविष्टेषु नरकावासेषु नरकप्रस्तटेषु नरकनिष्कुटेषु
इह अत्रापि नरकनरकावलिकाग्रहणेन केवला एव नरकावासाः परिगृह्यंते नरकप्रस्तटग्रहणेन तु नरकाणामपांतरालमपि ऊर्ध्वलोके
कल्पेषु आ ईशानात् देवलोकपरिग्रहः विमानेषु ग्रैवेयकसंबंधिषु प्रकीर्णकरूपेषु विमानावलिकासु आवलिकाप्रविष्टेषु ग्रै
वेयकादिविमानेषु विमानप्रस्तटेषु विमाननिष्कुटेषु अत्रापि प्रस्तटग्रहणं विमानानामपांतरालस्यापि परिग्रहार्थं नवरं विमानेषु बादर

प्रज्ञाप०वृत्तिः॥

र्याप्तपृथिवीकायिकानांस्थानपरिमाणमर्थतआह तिर्यग्लोके टंकेषु छिन्नटंकेषु कूटेषु सिद्धायतनकूटप्रभृतिषु शैलेषु शिखरहीनपर्वतेषु शिखरि
षु शिखरवत्सु पर्वतेषु प्राग्भारेषु ईषदवनतेषु कूटेषु विजयेषु कच्छादिषु वक्षस्कारेषु विद्युत्प्रभादिषु पर्वतेषु वर्षेषु भरतादिषु वर्षधरपर्वतेषु हिमवदादि
पर्वतेषु वेलासु समुद्रवेलासु वेदिकासु जंबूद्वीपजगत्यादिसंबंधिनीषु द्वारेषु विजयादिषु तोरणेषु द्वारादिसंबंधिषु किं बहुना
सामस्त्येन सर्वेष्वपि द्वीपेषु सर्वेषु समुद्रेषु एत्थणमित्यादि एतेषु अनन्तरोदितेषु बादरपृथिवीकायिकानां पर्याप्तानां स्थानानि प्रज्ञप्तानि मया अन्यै
श्च तीर्थकृद्भिः; उववाएणमित्यादि उपपातमुपपातो बादरपृथिवीकायिकानां पर्याप्तानां यदनंतरमुक्तं स्थानं तत्प्राप्त्याभिमुख्यमिति भावस्तेनोपपा
तेन उपपातमंगीकृत्येति भावः लोकस्य चतुर्दशरज्ज्वात्मकस्य असंख्येय यतमो भागो विवक्ष्यावधार्यते कस्मादिति चेदुच्यते यतो विवक्षितात् प्रदेशात् परिस्फुर
त्कुत्स्नजनस्य दर्शनं बादरपृथिवीकायिकाः पर्याप्ताः स्थिता तत्। दायस्थानप्राप्त्या अपान्तरालगतिपर्याप्तिपरिसमाप्त्या विशिष्टविपा
कतो बादरपृथिवीकायिकायुर्वेदयंतस्तेषु तेषु स्थानेषु तेषु तत्। लगतावपि तदानीं विपाकोदयवेदनात् संख्येयात् स्थानेषु तत्
प्रभृतिप्रभादिकं सर्वं द्वितयमपि लोकस्यासंख्येयतमभागवर्तीति तत उपपातेनापि लोकस्यासंख्येयभागगता एव द्रष्टव्याः अन्ये
त्वभिदधति पर्याप्ता इति नामबादरपृथिवीकायिकाः सर्वत्रापि मता संख्ये पांतरालगतावपि परिस्फुरमाणा लोकस्यासंख्येयभागगा एवेति
कश्चिद्दोषः तथा च समुद्घातेनापि लोकस्यासंख्येयभाग एव वक्ष्यते अन्यथा समुद्घातावस्थायामपि स्थानान्तरेकेण कृतो न वर्त्तन्ते संख्येया
दसंख्येयभागवर्तितानोपपाद्यत इति तत्र पुनः केवलिनो विदंतीति विशिष्टश्रुतविदो वा तथा समुग्घाएणं लोगस्स असंखेज्जइभागे इति सम
घातेन समुद्घातमधिकृत्य लोकस्यासंख्येयभागे यस्मात्तावन्तो यदा बादरपर्याप्तपृथिवीकायिकाः स्वायुषः समुद्घातेन आगम्य
स्थाः परलोकमायुर्बध्नामारणांतिकसमुद्घातेन समवहन्यन्ते तदा ते विक्षिप्तात्मप्रदेशदंडा अपि लोकस्यासंख्येयतमभागवर्तिनो
भवन्तु बादरपृथिवीकायिकपर्याप्ता अपि यत्सूचितमिति पर्याप्तबादरपृथिवीकायिका अपि लभ्यन्ते इह यद्यपि स्वस्थानादिषु स्थानमाश्रित्य ३४

दानीं स्वस्थानेनापि क्रियते लोकस्य भागवर्तित्वमिति निरूपयति निसहाणं लोगस्स असंखेज्जइभागे इति स्वस्थानं रत्नप्रभादिकं सर्वमपि
तम पि लोकस्यासंख्येयभागवर्तितया रत्नप्रभा अशीतियोजनसहस्राधिकलक्षप्रमाणपिंडा बाहल्येनापि पृथिव्यः सर्वा घनोदधिवलय
वक्षस्याः पातालकलशा अपि योजनलक्षावगाहा भवनावासाश्च सहस्रयोजनोच्छ्रया विमानान्यपि द्वात्रिंशद्योजनशतबाहल्यानि ततः स
र्वेषामपि परिमितानामसंख्येयभागवर्तितोऽवसेयमिति बादरपर्याप्तपृथिवीकायिकस्थानं उववाएणं सव्वलोए समुग्घाएणं सव्वलोए
इति इह पर्याप्ता बादरपृथिवीकायिका अपांतरालगतावपि अपर्याप्तबादरपृथिवीकायिकायुर्विशिष्टविपाकतो वेदयंते तथा देव
नैरयिकवर्जिताः शेषसर्वकायस्थानेषु उत्पद्यन्ते अत्र अपि देवनैरयि कवर्जशेषसर्वस्थानेषु गच्छंति ततः पांतरालगता
वपि वर्तमाना असंख्येयात अतिप्रभूततया स्वस्थानापेक्षया उपपातेन सर्वलोकवर्तिन अत्ये वदंति इति स्वस्थानत एव वा सी वक्तव्य
इति उपपातेन समुद्घातेन च सर्वलोकव्यापिनः तत्रोपपातः। कथं चित्तु ऋजुगत्या वक्रगत्या वा ऋजुग
तिः सुप्रतीता वक्रगतिरेवं अत्र यदेव प्रथमं वक्रमेकं संहरति तत् द्वितीयवक्रदेशमभिसंहरति एवं द्वितीयवक्रदेशसं
हरणमिव ज्ञात्वा स्वस्थाने पुनरुत्पद्यन्ते निरंतरमापूरणं लावतीय समग्रेण लो। गस्स असंखेज्जइभागे इति यथा पर्याप्तानां स्थितं तथा अ
पर्याप्तानामपि भावनीयं तन्निश्रयात्तेषामुत्पादभावात् सूक्ष्मपृथिवीकायिकपर्याप्तापर्याप्तसूत्रे जे पज्जत्ता य पज्जत्ता ते सव्वे एगविहा अविसे
सा अणाणत्ता सव्वलोगपरियावन्ना इति सूक्ष्मपृथिवीकायिकपर्याप्तापर्याप्ताः सर्वेऽप्येकविधा एकप्रकाराः एकं स्थानादि विचारम
धिकृत्य लक्षणाभावात् अविशेषा विशेषरहिता यथा पर्याप्तापर्याप्तपृथग्भूतरूपीति भावः अनाना नानात्ववर्जिता देशभेदेन नानात्वाभाव इत्यर्थः किमु
क्तं भवति यथा बादराः प्रतिनियतदेशवर्तिनो न तथा ते किन्तु सर्वलोकपर्यापन्नाः सर्वलोकव्यापिनः उपपातसमुद्घातस्वस्थानैः प्रज्ञप्ता मया
अन्यैश्च ऋषभादिभिस्तीर्थकृद्भिः आगमाद्भगवत् अधिगम्यावधारितं इह श्रमणाः अहो भगवं आमंत्रणमिदं भगवत्युक्तं गौतमस्यैव मह्या

प्रज्ञापनावृत्ति॥

यिकस्थानान्यपि बादरसूक्ष्मविषयाणि तत्र पर्याप्तबादराप्कायिकस्थानेष्वसत्सु घनोदधिवलयेषु सप्तघनोदधिवलयानि सप्तपृथ्वीपर्यंतव
ष्टकानि वलयाकाराणि अधोलोके पातालेषु पातालकलशेषु वलयाश्चत्वारः स्थितिष्वपि ष्टितीयपिनानि सर्वाणि तानि जलभावात् सर्वान्तरेषु कल्पेषु
विमानेषु बहुलवाप्यादिषु विमानादीनि चान्तरकल्पगतानि वेदितव्यानि येषु वापिकादिषु वापीनामसंभवात् अंभसां जलानामसंभवात् अवटाः कूपास्तडागा
निप्रतीतानि नद्यो गंगासिंध्वादयस्तयोर्जलप्रवाहः दाः टयः वापीश्चतुरस्राकारा सा काराणि पुष्करिण्यः वृत्ताकाराः पुष्करिण्यः यद्वा पुष्कराणि प
द्मानि विद्यन्ते यासु ताः पुष्करिण्यः दीर्घिकाः ऋजुसारणयः वक्राः गुंजालिकाः बहूनि केवलानि केवलानि च पुष्पावकीर्णानि सरांसि
सरांसि तत्र व्यवस्थितानि तथा बहूनि सरांसि एकपंक्त्या व्यवस्थितानि सरःपंक्तिः बहव्यः सरःपंक्तयः तथा येषु सरस्सु पंक्त्या व्यवस्थितेषु कूपादकं
प्रणालिकया संचरति सा सरःसरःपंक्तिः ताश्च बह्व्यः सरःसरःपंक्तयः बिलानि बिलानि पंक्त्या व्यवस्थितानि बिलपंक्तिः
कायां बिलपंक्त्या बिलपंक्तयः उज्झरा गिरितटेभ्यः जलस्य प्रस्रवणानि सदा वहनानि निर्झराः
भ्यस्यन्ता तस्य प्रदेशाः गिरिप्रदेशाः वा पल्वलानि अरवानानि सरांसि वप्राः अवदाराः किं बहुना सर्वेष्वपि जलाशयेषु एतदेव व्या
वाष्टजलस्थानेषु प्रोक्तेषु तेनाभावात् अधुना पर्याप्ततेजस्कायिकस्थानानि पृच्छति कहि णं भंते बायरतेउक्काइयाणमित्यादि प्रश्न
सूत्रं सुगमं भगवानाह गोयमेत्यादि गौतम स्वस्थानमंगीकृत्य अंतर्मनुष्यक्षेत्रे मनुष्यक्षेत्रमध्ये इत्यर्थः अर्द्धतृतीयेषु अर्द्धतृतीया स्तृ
तं द्वीपसमुद्राः तेषु ... तथाहि द्वीपसमुद्रा अष्टौ द्वौ जम्बूद्वीपः लवणसमुद्रः धातकीखण्डः कालोदः पुष्करार्द्धं च निर्व्याघातेन व्याघातस्याभावे
निर्व्याघातं तेन निर्व्याघातेन वा प्रतीत्य यावत् पंचदशकर्मभूमिषु पञ्चभरतपञ्चैरावत
पंचमहाविदेहरूपासु व्याघातं प्रतीत्य व्याघाते सति विनाश पंचसु महाविदेहेषु इयमत्र भावना व्याघातो नाम अतिस्निग्धः अतिरूक्षो वा काल
स्तस्मिन् सत्यग्निव्यवच्छेदात्तथा पंचसु भरतेषु पंचस्वैरावतेषु सुषमसुषमादिषु समासु अवसर्पिण्यां तदाति स्निग्धः सुषमदुःषमायां चातिरूक्षः

त्यग्निव्यवच्छेदस्तस्मिन् सति पंचसु महाविदेहेषु दोषकालं पंचदशस्व पि कर्मभूमिषु एएसु णमित्यादि अत्र एतेषु स्थानेषु बादरतेजस्कायिका
नां स्थानानि प्रज्ञप्तानि उववाएणमित्यादि उपपातेन यथोक्तस्थानप्राप्त्याभिमुख्यमपांतरालगतावपीति भावः चिंत्यमाना लोकस्यासंख्येयभा
गे लोकस्यासंख्येयभागवर्तित्वात् समुद्घातेनापि चिंत्यमाना लोकस्यासंख्येयभागे मारणांतिकसमुद्घातवशाद्विक्षिप्तात्मप्रदेशदंडा नामपि लोकतया
लोकासंख्येयभागमात्रव्यापितत्वात् स्वस्थानेनापि लोकस्यासंख्येयभागे मनुष्यक्षेत्रस्य पंचचत्वारिंशद्योजनलक्षप्रमाणायामविष्कं
भतया लोकासंख्येयभागमात्रत्वात् अपर्याप्तबादरतेजस्कायिकस्थानानि पृच्छति कहि णं इत्यादि प्रश्नसूत्रं गतार्थं भगवानाह गो
तमेत्यादि गौतम यत्रैव बादरतेजस्कायिकानां पर्याप्तानामपि स्थानानि प्रज्ञप्तानि पर्याप्तनिश्रया अपर्याप्तानामवस्थानात् उववा
एणं लोगस्स दोसु उड्ढकवाडेसु तिरियलोयतट्टे य इति इहार्द्धतृतीयद्वीपसमुद्रप्रमाणबाहल्ये पूर्वापरदक्षिणोत्तरस्वयंभू
रमणपर्यंते ये कपाटे केवलिसमुद्घातकपाटवत् उड्ढमपि लोकांतं स्पृष्टे ते ऊर्ध्वकपाटे तयोः स्वयं
तिरियलोयतट्टे य इति तट्टं स्थालं तिर्यग्लोकस्तट्टमिव तिर्यग्लोकः तदंतस्मिंश्च स्वयंभूरमणसमुद्रवेदिकापर्यंतेषु अष्टादश
योजनशतबाहल्ये समस्ततिर्यग्लोके चेत्यर्थः उपपातेन वा बादरतेजस्कायिकानामपर्याप्तानां स्थानानि प्रज्ञप्तानि केचित्तिरियतट्टे
य इति पठंति एवं व्याचक्षते तयोः कपाटयोः स्थितस्तिर्यग्लोकतट्टः तयोरूर्ध्वकपाटयोः स्थितस्तिर्यग्लोकतट्टः तयोरूर्ध्वकपा
टयोरंतर्वर्ती तिर्यग्लोक इत्यर्थः तस्मिंश्च किमुक्तं भवति द्वयोरूर्ध्वकपाटयोर्यथोक्तस्वरूपयोस्तिर्यग्लोके प्रवृत्तयोरेव कपाटयोरंतर्गत
नान्यत्र शेषतिर्यग्लोकव्यवच्छेदपरमेतद्व्याख्यानं विशिष्टं परविशिष्टस्य कपाटयुग्मस्यैव सिद्धत्वात्तत्त्वतः केवलिनो विशिष्टश्रुतविदो वा गम्यं
। इयमत्र भावना इह द्विविधाः बादराः पर्याप्ततेजस्कायिकास्तद्यथा एकभविका बद्धायुष्काः अभिमुखनामगोत्राश्च तत्र ये एकस्मान्न विवक्षिताद्भवा
दनंतरं बादरपर्याप्ततेजस्कायिकाः तत्रोत्पत्स्यंते ते एकभविका ये पूर्वभवत्रिभागादिसमये बद्धबादरपर्याप्ततेजस्कायिकायुषस्ते बद्धायु

ष्वायेषु नवरं बादरापर्याप्ततेजस्कायिकास्तु नमिगोशाणि ष्वर्वलवणावनानंतरं मनुष्यक्षेत्राद्देदयंतात्तत्र निष्ठुरवनामगोप्रो: तत्र एकत्र विकावहायुष्कडव्या
ताबादरापर्याप्ततेजस्कायिकान्तानां मनुष्यक्षेत्रान्तिमगोत्रवेदनाज्जावां मतत्वान्न विरिद्धाःषकार: किंतु निष्ठुरवनामगोत्रे भिषामत्वोपपातस्थानशाश्वा
निष्ठुरवलक्षणस्य लस्यमानत्वात् तत्र यच्चपि कृत्स्न मनयदर्शितं नबादरापर्याप्ततेजस्कायिकास्तु नामवेत्रवेदनात्यत्वात्क्काकपाटद्वयतिर्यग्लो
कवाह्यव्यवस्थिता अपि बादरापर्याप्ततेजस्कायिकव्यपदेशं लभंते तत्राप्यत्र व्यवहारनयदर्शनात् अपगमात्तयोस्तु स्थानसमस्थित्वेकपाटद्वयव्य
वस्थितायत्र स्थानानुगामितिर्यग्लोके प्रतिष्ठाप्य एव बादरापर्याप्ततेजस्कायिकाव्यपदिश्यंते न शेषा: कपाटापांतरालव्यवस्थिता विषमस्थानवा
स्थितात्तेनये अव्यापि कपाटद्वयं न प्रतिनापि तिर्यग्लोकं ते किल प्रवि वावस्थापवितिन ग्रंथेते उक्तं च पणयाललक्खपिहुला उ पि
कवाडायसद्दिसिंउद्धा लोगांतं तु मिंता उद्देतरुट्ठा उद्दिसिते अवधणंति तत्त क्कं उववाएणं दोसु उड्ढकवाडेसु तिरियलोयतट्टे य
इतिस्थापना ॥ तदेवमिदं सूत्रं व्यवहारनयदर्शनेन व्याख्यातं तथा संप्रदायस्तु पुनरेवमेतत् विवित्वा सूत्रस्य गतिरिवचना
दितिसमुग्घाएणं सव्वलोए इति इयं भावना: कपाटयोर्यत्रौकस्वरूपप योग्यायर्यत्रौकस्वरूपयोगान्यपांतराले अप्रतिष्ठिता ये सूक्ष्मपृथ्वी
वीकायिकादयो बादरापर्याप्ततेजस्कायिकेषूत्पद्यमाना मारणांतिकसमुद्घातेन समवहतास्ते किं विक्खंभबाहल्याभ्यां शरीरप्रमाणमात्रा
न् आयामतस्तु जघन्यतो लोकांतं यावत् आत्मप्रदेशान्विक्षिपंति तथा चावगाहनासंस्थानपदे वक्ष्यति उद्वर्तिकायस्स णं तस्स माहयस्स त
यासरीरपमाणमेत्तं विक्खंभबाहल्लेणं आयामेणं जहन्नेणं अंगुलस्स असंखेज्जइभागं उक्कोसेणं लोगंताइति ततस्ते सूक्ष्मपृथिवीकायिकादय उ
त्पत्तिदेशं यावत् विक्षिप्तात्मप्रदेशदंडा अपांतरालगतो वर्तमाना बादरापर्याप्ततेजस्कायिकायुर्वेदनाद् बादरापर्याप्ततेजस्कायिकव्यपदे
शाः समुद्घातगता अपांतरालगतो वर्तमाना इति समुद्घातगतास्तु सकललोकमापूरयंतीति उक्तं च समुद्घातेन सर्वलोके इति अपि च सूक्ष्मा: स्वा
स्तु बादरापर्याप्ततेजस्कायिका एकैकपर्याप्तनिश्रयासंख्येयानामपर्याप्तानामुत्पादात्तत्र सूक्ष्मापि समुत्पद्यंते सूक्ष्मास्तु सर्वत्र विद्यंत इति॥ २६

ख्याताना वातायनमसाद्रितम तुत्य ते तेन तमसा नित्यं सर्वकालमंधकाराः न त्वापवरकादिष्वपि नामांधकारास्ते केवलं वहिः सूर्यप्रका
शो मंदतमोऽनुवर्तिनः केचित्तु तीर्थकरजन्मदीक्षादिकालव्यतिरेकेणान्यदा सर्वकालमपि उद्योतलेशस्याप्यभावात् जात्यंधस्येव मेघच्छन्न
कालार्धरात्र इव वातीव बहलतरा वर्तते तेन उक्तं तमसा नित्यांधकाराः तमश्च तत्र सदावस्थितमुद्योतकारणाभावात् तथा चाह ववगयग
हचंदसूरनक्खत्तजोइसियपहा व्यपगताः परिभ्रष्टो ग्रहचंद्रसूर्यनक्षत्ररूपाणामुपलक्षणमेतत् ताराद्धपाणां च ज्योतिष्काणां प्रभामार्गो
येषां ते व्यपगतग्रहचंद्रसूर्यनक्षत्रज्योतिष्कपथाः तथा मेदवसापूयरुहिरमंसचिक्खल्ललित्ताणुलेवणतला इति सूत्रावसप्तेमेदोवसा
पूतिरुधिरमांसेर्यश्चिक्खल्ल कर्दमस्तेन लिप्तमुपदिग्धं अनुलेपनेन तम नु लिप्तस्य तत: तस्य पलेपनेन तलं भूमिका येषां ते मेदोव
सापूतिरुधिरमांसचिक्खल्ललिप्तानुलेपनतला: अत एवाशुचय योः पवित्रा वीभत्सदर्शना तिस्रगंधास्त्वत: क्वथितवीसा
इतिपाठस्तत्र विस्रा आमगंधिकाः परमदुब्भिगंधा इत्यादि क उदवररत्यापनीवानिष्ट इस मत्तिगंधा: काऊअगणि
वन्नाभाइति लोहधमाना तयाग्निरिव कपोतवर्णा वज्जसमप्रभा ये वर्ण: किमुक्तं भवति यादृशी वज्रकृष्णवर्णरूपा अभिज्वाला
विनिर्गच्छति तादृशी आभा आकारो येषां ते कपोताग्निवर्णाभा: ध्मायमानलोहाभिज्वालाकल्पा इति भाव: नारकोत्पत्तिस्थान
व्यतिरेकेणान्यत्र सर्वत्राप्यवस्वरूपत्वात् एतच्च षष्ठसप्तमपृथिवीवर्जमवसेयं तथा च वक्ष्यति नवरं तेसु नमीसु ण काऊअगणिवन्नाभा न
भवंति तथा कक्खडफासा: कर्कश: स्पर्शो येषां ते कर्कशस्पर्शा: अत एव दुरहियासा इति दु:खेनाध्यास्यंते सह्यंत इति दुर
ध्यासा अशुभा दर्शनतो नरकाः सर्वाकगंधरसस्पर्शशब्दैरशुभा अशुभत्वान्नामात् यापानरके वेदना एव उणमित्यादि यावत् एत्थणं बहवे नेरइ
या परिवसंति कालाइत्यादि काला: कृष्णा: तत्र कोऽपि कृष्ण: प्रतिभातस्य यामंद: कृष्णोऽपि भवति तत: तथा कृष्णावभासप्रतिपादनार्थं विशेषणांतरमाह
कालावभासा: काला: कृष्णो अवभास: प्रतिभा विनिर्गमो येभ्यस्ते कालावभासा: कृष्णप्रभापटलोपचिता इति भाव: अतएव: अतएव

रथातानावतायत्रमस्य दिहतमत्थ्यतेतेननतमसा नित्यं सर्वकालमंधकाराः तत्रापवरकादिष्वपि तामांधकारोस्ति केवलं बहिः सूर्यप्रका
शोमंदतमोनवतिनरकेषु तु तीर्थकरजन्मदीक्षादिकालव्यतिरेकेणान्यदा सर्वकालमपि उद्योतलेशस्याप्यभावात् तांधस्यैवामेघत्र
कालार्धरात्रइववातीवबहलतराववर्त्तिततेनतमसा नित्यांधकाराः तमश्च तत्र सदावस्थितमुद्योतकारणाभावात् तथाचाह ववगयगह
चंदसूरनक्खत्तजोइसियपहा व्यपगताः परिभ्रष्टाः ग्रहचंद्रसूर्यनक्षत्ररूपाणामुपलक्षणमेतत् ताराकरूपाणां च ज्योतिष्काणां पंथाः मार्गा ये
येषामिति व्यपगतग्रहचंद्रसूर्यनक्षत्रज्योतिष्कपथाः तथा मेयवसापूयरुहिरमंसचिक्खल्ललित्ताणुलेवणतलाइ ति सूत्रावयवसंपत्ते मेदोवसा
पूतिरुधिरमांसैर्यश्चिक्खल्लः कर्दमस्तेन लिप्तमुपदिग्धमनुलेपनेन तलं कुट्टिमस्य पुनःपुनरुपलेपनेन तलं भूमिका येषां ते मेदोव
साप्रतिरुधिरमांसचिक्खल्ललिप्तानुलेपनतलाः अतएवाशुच। योऽपवित्रा वीभत्सा दर्शनेप्यतिजुगुप्सोत्पादकाः कथितवीसा
इति पाठस्तत्र विस्रा आममंधिकाः परमदुरभिगंधाः मृतगवादि कडेवरेभ्योप्यतीवानिष्टदुरभिगंधाः काउअगणि
वन्नाभा इति लोहध्मायमानवयाहक्कपोतावज्ज्ञरूपस्वर्णाये र्वर्णः किमुक्तं भवति यादृशी वज्रकृष्णवर्णरूपा अभिज्वाला
विनिर्गच्छति तादृशी आभा आकारो येषां ते कपोताग्निवर्णाभाः ध्मायमानलोहाभिज्वालाकल्पा इति भावः नारकोत्पत्तिस्थान
व्यतिरेकेणान्यत्र सर्वत्राप्यत्र संभवात् एतच्च षष्ठसप्तमपृथिवीवर्जमवसेयं तथा च वक्ष्यति नवरं तमतमासु णं काऊअगणिवन्नाभा न
भवंति तथा कक्खडफासाः कर्कशः स्पर्शो येषां ते कर्कशस्पर्शाः अतएव दुरहियासा इति दुःखेनाध्यास्यंते सह्यंते इति दुर
ध्यासाः अशुभा दर्शनतो नरकाः अशुभा गंधरसस्पर्शशब्दैरशुभा अतीवासातरूपा नरकेषु वेदना एवमेव मित्यादि यावत् एवं वेदनं नरक
याप्रविशंति कालाइत्यादि कालाः कृष्णाः तत्र काप्रभृतिः प्रतिततयामंदः कृष्णोपि भवति तत्र मदा वाकाश्यवच्छेदार्थं विशेषणांतरमाह
कालावभासाः कालाः कृष्णो वभासः प्रतिभा विनिर्गमो येभ्यस्ते कालावभासाः कृष्णप्रभापटलोपचिता इति भावः अतएवः अतएव

गंभीरलोमहर्षाः गंभीरः सातिरेको लोमहर्षो लोमोद्धर्षो येषु ते तथा यतस्ते गंभीरलोमहर्षाः किमुक्तं भवति एवं नाम भयानका भयावहा यत्
दर्शनमात्रेऽपि विशेषतो नारकाणां प्रत्यन्तं संपादयन्ति गंभीरलोमहर्षमुत्पादयंतीति अत एव भयानका भीमा भीमत्वादेवोत्त्रासनकाः उत्त्रासयंत
शेषनारकान् तत्र पतितानित्युत्त्रासनकाः किं बहुना वर्णनेन परमकृष्णा वर्णमधिकृत्य परमकृष्णा आयतनं कृष्णं किमपि कृष्णमपि सद्यानकं वा वर्ण्य कृष्णव
र्णा प्रज्ञप्ता अवभासप्रज्ञापना तीर्थकरैः इह प्रथमगमे आयुष्मन् तेणं निच्चंधयारा इत्यादि तत्र नित्यान्धकाराणि वाक्यालंकारे नित्यं सर्वक
ालं तमसा तावत् अतिमहातिविडांधकारदर्शनतो नीतानि नित्यं सर्वकालं तमसा परमाधार्मिकपरस्परोदीरितदुःसंपातनयादयापि शमस्तपोपन्नाः
तथा नित्यं सर्वकाले परमाधार्मिकैः परस्परं वा त्रासिताः संत्रासिताः सदा नित्यं सर्वकालं यथालंयथायोग्यं परमदुःसहशातोत्कावेदनातु
भवतः परमाधार्मिकपरस्परोदीरितदुःखा तु भवत उद्विग्नाः भवास्परासुखवेदिना एवं नित्यं सर्वकालं परममसुखमसकांत
ताशुभमसंबद्धमनुबद्धं तु ज्ञातुं विदुषि मनागप्यंतरालमवृच्छिन्न संतानेन नरकभयं नरकदुःखप्रत्ययभवतः प्रत्येकं वेदय
माना विहरंति भवति इति तदेवं सामान्यतो नैरयिकसंख्यावक्तव्यत मेवं रत्नप्रभादिविषयाण्यपि सूत्राणि यथायोग्यं परिभावनीया
नि प्रायः उक्तव्याख्यानानुसारेण सुगमत्वात् केवलं षष्ठसप्तम्योः पृथिव्योर्नरकावासाः कापोताग्निवर्णाभा न वक्तव्याः नारकोत्प
त्तिस्थानव्यतिरेकेणाग्निव्यतिरेकेणान्यत्र सर्वत्रापि तयोः शीतपरिणामत्वात् तथा बाहल्ये च समस्तं कारणमागमवेदिना भावनीयमिति सं
प्रति यथोक्तपृथिवीबाहल्यपरिमाणप्रतिपादिकां संग्रहणिगाथामाह आसीयं बत्तीसं अट्ठावीसमित्यादि अशीतं अशीतिसहस्राधिकं शतसह
स्रं रत्नप्रभाया बाहल्यं द्वात्रिंशत्सहस्राधिकं शर्कराप्रभायाः अष्टाविंशतिसहस्राधिकं वालुकाप्रभायाः विंशतिसहस्राधिकं पंकप्रभायाः अष्टाद
शसहस्राधिकं धूमप्रभायाः षोडशसहस्राधिकं तमःप्रभायाः अष्टोत्तरं अष्टसहस्राधिकं लक्षं छट्ठीमियाइति सर्वासु यथासंख्यं तमस्तमःप्रभाया इति
संप्रति पृथ्वीष्वेकैकं योजनसहस्रं वर्जयित्वा शेषं नरकावासयोग्यं प्रथमपृथ्वीबाहल्यं तावत् स्पष्टं ज्ञातुकामस्याह अट्ठुत्तरं च तत्यादि गाथा सुगमा

रत्नप्रभाया हि अशीतिसहस्राधिकं लक्षं बाहल्यपरिमाणं तस्या उपरितनमेकं योजन-सहस्रमेकं चाधो योजनसहस्रं वर्जयित्वा शेषेऽन्तरे नरकावासाः अर
इति मतौ रत्नप्रभाया नरकावासयोग्यं बाहल्यपरिमाणमष्टसप्ततिसहस्राधिकं लक्षं भवति एवं सर्वत्रापि भावनीयं सांप्रतं नरकावास
संख्यासंग्रहणिगाथामाह तीसा य इत्यादि गतार्था तिर्यक्स्थानेषु पृथ्वीषु नवसु द्वीपसमुद्रेषु लोकतदेकदेशे तिर्यग्लोके तस्मादयोम
दशादिवाणादिषु अधोलोकतदेकदेशे अधोलोके कग्रामादिषु समुद्घातसमुद्घातेन सर्वलोके इति केवलिसमुद्घात
मधिकृत्य संप्रति भवनपतिस्थानप्रतिपादनार्थमाह कहिणं भंते भवणवासीणं देवाणमित्यादि असीउत्तरजोयणसयसहस्सबाहल्ला
ए इति अशीतिसहस्राधिकयोजनशतसहस्रबाहल्यं यस्याः सा तथा तस्याः सत्त भवणकोडीओ बावत्तरिं भवणावाससयसहस्सा भवंतीति
मक्खायमिति असुरकुमाराणां हि चतुःषष्टिः शतसहस्राणि भवनानां ततः सर्वसंख्यया यथोक्तं भवनसंख्यानं भवति तेणं
भवणा इत्यादि तानि णमिति वाक्यालंकारे सूत्रप्राकृतत्वात् भवनानि बहिर्वृत्तानि बहिर्वृत्ताकाराणि अंतः समचतुरस्राणि
अधः पुष्करकर्णिकासंस्थानसंस्थितानि कर्णिका नाम उन्नतसमचित्रबिंदुकिनी तद्भिन्नतरविपुलगंभीरखातपरिखाफलि
हा इति उत्कीर्णमिवोत्कीर्णमतीवव्यक्तमित्यर्थः उत्कीर्णमंतरं यासां खातपरिखाणां ता उत्कीर्णान्तराः किमुक्तं भवति खातानां परिखाणां
च स्पष्टविविक्तान्यालोकनार्थमपांतरालमहती पाली समस्तीति खातानि च परिखाश्च खातपरिखा उत्कीर्णान्तरा विपुला विस्तीर्णा गंभीरा अ
लब्धमध्यभागाः खातपरिखा येषां भवनानां परितस्तानि उत्कीर्णान्तरविपुलगंभीरखातपरिखाणि वा यं प्रतिविशेषः परिखा उपरिविशा
ला अधः संकुचिता खातं तूभयत्रापि सममिति पागारट्टालककवाडतोरणपडिदुवारदेसभागा इति प्रतिभवनं प्राकाराः अट्टाल
ककपाटतोरणप्रतिद्वाराणि अट्टालककपाटतोरणप्रतिद्वाररूपा देशभागा देशविशेषा येषु तानि प्राकाराट्टालककपाटतोरणप्रति
द्वारदेशभागानि तत्र अट्टालकाः प्राकारस्योपरि भृत्याश्रयविशेषाः कपाटानि प्रतोलीद्वारसत्कानि प्रतीतान्येव सर्वत्र स्थिता अन्य वा

कपाटतामसंनयानुतोरणानिप्रमानिप्रतालीद्वारभ्रप्रतिद्वाराणिस्थूलघरापांतरालवर्तीनिमत्तभुद्वाराणि ऊंतसयगियरुसलरुसंहिपरि
याइतियंत्राणिमानाप्रकाराणिज्ञातव्याःमहायष्टयोमहाशिलावाया:पातिता:सत्य:प्रस्तवाणांत्रातानिप्रतिप्रवालानिप्रतीतानिप्रसंद
य:प्रहरणविशेषा:ते:परिवानिसमंततोवेष्टितानिअतएवायोध्यानिपरियोद्धुमशक्यानिअयोध्यात्वादेवसदाजयानिसदासर्व
कालंजयायेषुतानिसदाजयानिसर्वकालंजयवंतानीत्यर्थ: तथासदासर्वकालंगुप्तानिप्रहरणे:प्रकोष्ठायाभिः सर्वत: समंततानिरं
तरपरिवारितनयापरेषामसहमानानामगम्यानिप्रियविशालसंनवात् अट्टयालकोठरइयाइतिअष्टचत्वारिंशद्भिन्नविच्छित्तिकलिता:का
ष्ठकाअपवरकारचिता: स्वयमेवरचनाप्राप्तायेषुतानिअष्टचत्वारिं शत्काष्ठकरचितानिसुरवादिदर्शिनानि...कोष्ठकाविष्ठानस्यपरनिपा
त: तथाअष्टचत्वारिंशद्भिन्नविच्छित्तय:कृतावनमालायेषुतानि अष्टचत्वारिंशत्कृतवनमालानिअत्रत्वचारिद्भूतिअट्टयालशा
होदशीवचनत्वात्प्रशंसावाचीटलायमर्थ:प्रशस्तकोष्ठकर। चितानिप्रशस्तकृतवनमालानीति तथा...परिकृतायप
इशारिकतानि शिवानिसदामंगलायेतानितथाकिंकरा:किंकरम्। तायश्रमरा...दंडे: कृतपरिक्षितानिसर्वत:समंततारक्षितानि
किंकरामरदंडपरिक्षितानि लाउल्लोइयमहियाइतिलाइयंनामय त् भूमेर्गोमयादिनाउपलेपनंउल्लोइयंकुड्यानामालास्यवसा
टिकादिभि:समृष्टीकरणं लाइयाउल्लोइयाभ्यामहितानिपूजितानिलाइयउल्लोइयमहितानितथागोशीर्षेण गोशीर्षना
मकचंदनेनसरसरक्तचंदनेन दर्दरेणबहलेनचपटाप्रकारेणवाहता:पंचागुलयप्रवलाहस्तकायेषुतानिगोशीर्षरक्तसरसरक्तचंदनदर्दरदत्तपंचांगु
लितलानितथाउपचितानिवेशितचंदनकलशायांमांगल्याकलशायेषुतानिउपचितचंदनकलसानिचंदनघटसुकयतोरणपडिदुवारद
सभागाइतिचंदनघटैश्चंदनकलसे:सुकृतानिशोभितानीतितात्पर्यार्थ: याज्ञितोरणानिचंदनघटसुकृतानितोरणानिप्रतिद्वारदेशभागं
द्वारदेशभागायेषुतानिचंदनघटसुकृततोरणप्रतिद्वारदेशभागानि तथाआसत्तोसत्तविउलवट्टवग्घारियमल्लदामकलावाइतिआसु २७

वाइअधोभूमौसक्तआसक्तउपरिलग्नइत्यर्थ: ऊर्ध्वंसक्तउत्सक्तउल्लोकतलेउपरिसंबद्धइत्यर्थ: विपुलोविस्तीर्ण: वृत्तोवर्तुल
वग्घारियइतिप्रलंबितोमाल्यदामकलाप: पुष्पमालासमूहोयेषुतानिआसक्तोत्सक्तविपुलवृत्तप्रलंबितमाल्यदामकलापानित
थापंचवर्णसुरभिमुक्तपुष्पपुंजोपचारकलितानिकालागुरुप्रवरकुंदुरुक्कतुरुक्कधूवकालागुरुप्रवरकुंदुरुक्कतुरुक्काणितेषांधूमस्ययो
मघमघायमानोगंधउद्धूतइतस्ततोविप्रसृतस्तेनातिरामाणिरमणीयानिकालागुरुकुंदुरुक्कतुरुक्कधूममघमघायंतगंधुद्धुया
तिरामइतिकालागुरु:प्रसिद्ध:प्रधान:कुंदुरुक्क:चीडातुरुक्कसिल्हकंकालागुरुप्रवरकुंदुरुक्कतुरुक्कधूवकालागुरुप्रवरकुंदुरुक्कतु
रुक्काणितेषांधूमस्ययोमघमघायमानोगंधउद्धूतइतस्ततोविप्रसृतस्ते नातिरामाणिरमणीयानिकालागुरुकुंदुरुक्कतुरुक्कधूपमघ
घमघायमानगंधोद्धुतानिरामाणितथाशोभनोगंधोयेषांतेवरा गंधाश्चवासा:सुगंधवरगंधास्तेषांगंध: सएषास्तीतिसुगंध
वरगंधिकानिअततानाकस्मादितीकप्रत्यय: अतएवगंधवर्त्ति भूतानिसौरभ्यातिशयात्गंधद्रव्यगुटिकाकल्पानीअ
तिनाव: तथाअप्सरोगणानांसंघ:समुदाय:स्तेनसम्यक्रमणी यतयाकीर्णानिव्याप्तानिअप्सरोगणसंघविकीर्णानित
थादिव्यानांत्रुटितानामातोद्यानांवेणुवीणामृदंगादीनांयेशब्दास्ते:सं प्रणदितानिसम्यक्श्रोत्रमनोहारितयाप्रकर्षेणसर्वकालंन
दितानिशब्दवंतिसर्वरत्नमयानिसर्वात्मनारत्नमयानिनकाष्ठादिमयानिवाच्छानि आकाशस्फटिकवदतिस्वच्छानिश्लक्ष्णानिश्लक्ष्ण
पुद्गलस्कंधनिष्पन्नानिश्लक्ष्णदलनिष्पन्नपटवत् लष्टानिमसृणानिघुंटितपटवत् घट्टाइतिघृष्टानीवघृष्टानि खरशानयापाषाणप्रति
मावत् मट्ठाइतिमृष्टानिसुकुमारशानयापाषाणप्रतिमेव अतएवनीरजांसिस्वाभाविकरजोरहितत्वात्निर्मलानिआगंतुकमलाभाव
त् नि:पंकानिकलंकविकर्दमरहितानिवानिक्कंकडच्छायाइतिनिष्कंकटानिरावरणानिरुपघातानिछायादीप्तिर्येषांतानि
निष्कंकटछायानिसप्रभाणिप्रभारूपत:प्रभावंतिसमरीचीनिबहिर्विनिर्गतकिरणजालानिसोद्योतानिबहिर्व्यवस्थितवस्तुस्तोमप्रका

प्रज्ञाप०वृ०।

ज्ञानकज्ञानकानि प्रासादीयानि प्रसादाय मनःप्रसन्नताय हितानि प्रासादीयानि मनःप्रसत्तिकारणानीति भावः तथा दर्शनीयानि दर्शनयोग्या-
नि यानि पश्यतश्चक्षुषी न श्रमं गच्छत इति तात्पर्यार्थः अभिरूपाणीति अभि सर्वेषां द्रष्टॄणां मनःप्रसादानुकूलतया अभिमुखं रूपं येषां तानि
रूपाणि अत्यन्तकमनीयानीत्यर्थः अथवा पडिरूवाइ इति प्रति विशिष्टं रूपं येषां तानि प्रतिरूपाणि अथवा प्रतिक्षणं नवं नवमिव रूपं येषां तानि प्र-
तिरूपाणि एतानि भवनवासिनामित्यादि एते अनन्तरोक्ता असुरकुमारादयो भवनवासिनो यथाक्रमं चूडामणिमुकुटरत्नभूषणनियुक्तनागस्फटा-
दिचिह्नविशेषधराश्च तथाहि असुरकुमारा भवनवासिनश्चूडामणिमुकुटरत्नाः चूडामणिर्नाम मुकुटरत्नं चिह्नभूतं येषां ते तथा नागकुमारा
भूषणनियुक्तनागस्फटारूपचिह्नधराः सुवर्णकुमारा भूषणनियुक्तगरुड रूपचिह्नधराः विद्युत्कुमारा भूषणनियुक्तवज्ररूपचिह्नधरा व-
ह्निनामसंज्ञकस्याग्निकुमारा मुकुटनियुक्तपूर्णकलशरूपचि ह्नधराः द्वीपकुमारा भूषणनियुक्तसिंहरूपधराः उदधिकु-
मारा भूषणनियुक्तहयवररूपचिह्नधारिणः वायुकुमारा भूषणनि युक्तमकररूपचिह्नधराः स्तनितकुमारा भूषणनियुक्त
वरवर्द्धमानरूपचिह्नधारिणः वर्द्धमानकं शरावसंपुटं अन्ये त्वाहुर्भवनमिति। क्वचिदेवं भूषणभूता नागस्फटागरुडवज्राणि येषां भूषणनाग-
स्फटागरुडवज्राः पूर्णकलशेनाङ्कितस्तथा उत्फेसः मुकुटो येषां ते पूर्णक लशाङ्कितोत्फेसाः तथा सिंहहयवरगजाङ्काः अङ्का अर्थाद्भू-
षणेषु येषां ते सिंहहयवरगजाङ्काः तथा मकरवर्द्धमानकनियुक्तं भूषणेषु नियोजितं चित्रं आश्चर्यभूतं चिह्नं गतं स्थितं येषां ते मकरवर्द्ध-
मानकनियुक्तचिह्नगताः अत्र पूर्वपदे द्वन्द्वः समासः ततः सविशेषणतान्यत्पदं सुरूपाः शोभनं रूपं येषां ते तथा अत्यन्तकमनीयरूपा इत्यर्थः त-
था महर्द्धिका इति महती ऋद्धिर्भवनपरिवारादिका येषां ते महर्द्धिकाः तथा महती द्युतिः शरीरगता आभरणगता च येषामिति महाद्युतयः तथा
महत् बलं शारीरप्राणो येषां ते महाबलाः तथा महद्यशः ख्यातिर्येषां ते महायशसः तथा महान् अनुभागः सामर्थ्यं शापानुग्रहविषयं येषां ते
महानुभागाः तथा महेसक्खा इति महान्त ईशा ईश्वरा इत्याख्या प्रसिद्धिर्येषां ते महेशाख्याः अथवा ईशानमीशो भावे घञ्प्रत्ययः ऐश्वर्यमित्यर्थः ४०

ईश ऐश्वर्ये इति वचनात् ततः महानीशो महैश्वर्यमात्मनः ख्यातिरन्तर्भूतण्यर्थतया ख्यापयन्तीति ईशाख्याः महान्तश्च ते ईशाख्याश्च महेशाख्याः क्वचिन्म-
हासोक्खा इति पाठः तत्र महत् सौख्यं प्रभूतसद्वेद्योदयवशात् येषां ते महासौख्याः अन्ये पठन्ति महासरक्खा इति तत्रायं शब्दसंस्कारो महा-
श्वाक्षाः इयं चात्र पूर्वसूरिप्रदर्शिता व्युत्पत्तिः आशुगमनादश्वो मनः अक्षाणि इन्द्रियाणि स्वविषयव्यापकत्वात् अश्वो अक्षाणि महान्त्यश्वाक्षा-
णि येषां ते महाश्वाक्षाः हारविराइयवच्छा इति हारेण विराजितं वक्षो येषां ते हारविराजितवक्षसः कडगतुडियथंभियभुया इति कटकानि क-
लाचिकाभरणानि त्रुटितानि बाहुरक्षिकाः ताभिः स्तम्भिताविव स्तम्भितौ भुजौ येषां ते कटकत्रुटितस्तम्भितभुजाः तथा अङ्गदानि बाहुशीर्षाभरणविशेषरू-
पाणि कुण्डले कर्णाभरणविशेषरूपे तथा मृष्टो मृष्टीकृतो गण्डो कपो। लो येषां ते मृष्टगण्डाः तानि कर्णपीठानि कर्णाभरणविशेषरूपाणि तथा
मृष्टो मृष्टीकृतो गण्डो कपोलो यैस्तानि मृष्टगण्डानि कर्णपीठानि। कर्णाभरणविशेषरूपाणि धारयन्तीत्येवंशीलाः अङ्गदकुं-
डलमृष्टगण्डकर्णपीठधारिणः तथा विचित्राणि नानारूपाणि हस्ताभर णानि येषां ते विचित्रहस्ताभरणाः तथा विचित्रमालामौलि-
मौलिमस्तके विचित्रा माला कुसुमस्रक् मौलौ मस्तके मुकुटं च ये- षां ते विचित्रमालामौलिमुकुटाः तथा कल्याणकं कल्याण-
कारि प्रवरं वस्त्रं परिहितं यैस्ते कल्याणकप्रवरवस्त्रपरिहिताः सूत्रे चादद ज्ञाता निष्ठान्तस्यात्र प्राकृतिकः परिपातः तथा कल्याणकं कल्याण-
कारि प्रवरं माल्यं पुष्पदाम यच्चानुलेपनं तद्धरन्तीति कल्याणकप्रवरमाल्यानुलेपनधराः तथा भास्वरा देदीप्यमाना बोन्दिः शरीरं येषां ते
भास्वरबोन्दयः तथा प्रलम्बत इति प्रलम्बा या वनमाला तां धरन्तीति प्रलम्बवनमालाधराः दिव्वेणं संघयणेणं ति शक्तिविशेषमपेक्ष्य संहननेने-
व संहननमनुसाक्षात् संहननेन देवानां संहननासंभवात् संहननं हि अस्थिरचनात्मकं न च देवानामस्थीनि सन्ति तथा चोक्तं जीवाभिगमे देवा
असंघयणी जम्हा तेसिं नेव सिरा इत्यादि दिव्वाए इड्ढीए इति दिव्यया प्रधानया परिवारादिकया दिव्यया युक्त्या इह युक्तिः इष्टार्थसंप्रतियोगलक्षणया यु-
क्तिमानिति वचनात् दिव्यया प्रधानया भवनावासगवासगतया दिव्यया समुदायशोभनया दिव्येनाधिपाशरीरस्वरूपादिगतजालालया दिव्य

प्रज्ञा० वृत्ति सतेजसा शारीरप्रभावेन दिव्यया लेश्यया देहवर्णसुंदरतया दश दिश उद्योतयंतः प्रभासमाना इति शोभमानाः ते स्वस्वभवनवासिनो देवा णमिति वाक्या
लंकारे तत्र स्वस्वस्थाने साणं स्वेषां स्वेषामात्मीयानामित्यर्थः आहेवच्चं पोरेवच्चमित्यादि अधिपतेः कर्म आधिपत्यं रक्षा इत्यर्थः सा च रक्षा सामान्येनाप्यारक्षकेणावक्रे
यते तत आह पुरस्यपतिः पुरपतिस्तस्य कर्म पौरपत्यं सर्वेषामात्मीयानामग्रेसरत्वमिति भावः तच्चाग्रेसरत्वं नायकत्वमंतरेणापि स्वनायकनियुक्ततथाविध
गृहचिंतकस्यापि सामान्यपुरुषस्य भवति ततो नायकत्वप्रतिपत्त्यर्थमाह स्वामित्वं स्वमस्यास्तीति स्वामी तद्भावः स्वामित्वं नायकत्वमित्यर्थः तदपि च नायकत्वं कस्यचि
त्पोषकत्वमंतरेणापि भवति यथा हरिणाधिपतेर्हरिणस्य ततस्तत आह भर्तृत्वं पोषकत्वं अत एव महत्तरकत्वं तदपि महत्तरकत्वं कस्यचिदाज्ञाविकलस्यापि भवति
यथा कस्यचिद्वणिजः स्वदासीवर्गं प्रति ततस्तत आह आणाईसरसेणावच्चं आज्ञ याईश्वरः सेनायाः पतिः सेनापतिः आज्ञेश्वरश्चासौ सेनापतिश्च तस्य कर्म
आज्ञेश्वरसेनापत्यं स्वसैन्यं प्रत्यद्भुतमाज्ञाप्राधान्यमिति भावः कारयंतो ऽन्यैर्नियुक्तकैः पुरुषैः पालयंतः स्वयमेव महता रवेणेति योगः अ
हयत्ति आख्यानकप्रतिबद्धानि यदि वा अहतानि अव्याहतानि नित्या नुबंधीनि भावः ये नाट्यगीतनाट्यं नृत्तं गीतं गानं यानि च वादितानि
तंत्रीतलतालत्रुटितानि तत्र तंत्री वीणा तलौ हस्ततलौ तालाः कंसिका त्रुटितानि वादित्राणि तथा यश्च घनमृदंगः पटुना पुरुषेण प्रवादितः तत्र घ
नमृदंगो नाम घनसमानध्वनिर्यो मृदंगस्तेषां शब्दः तेषां रवेण दिव्यान् दिव्यान् भोगार्हानिति भावः भोगार्हाः भोगाः शब्दादयो भोगभोगा
स्तान् भुंजाना विहरंत्यासते च असुरकुमाराश्च कालाः कृष्णवर्णाः लोहिताक्षरत्नवद्बिंबीफलवच्चोष्ठो येषां ते लोहिताक्षबिंबोष्ठाः आरक्तोष्ठा इति भा
वः धवलाः पुष्पवत् सामर्थ्यात् कुंदकलिकावद्दंताः असिताः कृष्णाः केशा येषां ते असितकेशाः दंताः केशाश्चामीषां वैक्रिया द्रष्टव्याः न स्वाभाविकाः
वैक्रियशरीरगतात् वामैककुंडलधराः एककर्णावसक्तकुंडलधारिणः तथा आर्द्रेण सरसेन चंदनेनानुलिप्तं गात्रं येषां ते आर्द्रचंदनानुलिप्तगात्राः तथा ईष
न्मनाक् शिलिंध्रपुष्पप्रकाशानि शिलिंध्रपुष्पसदृशवर्णानि ईषद्रक्तानीत्यर्थः असंक्लिष्टानि अत्यंतसुखजनकतया मनागपि संक्लेशोत्पादकानि सू
क्ष्माणि मृदुलघूनि वस्त्राणि प्रवराणि परिहितानि येषां ते तथा वयः प्रथमं कुमारत्वलक्षणमति ४२

क्रांतास्तृतीयं च वयो वर्त्तिन इति भावः द्वितीयं च मध्यमलक्षणं वयः संप्राप्ताः तद्देवत्वकोटीकालातीत भद्रे अतिप्रशस्ये भद्रे यौवने वर्त्तमानाः तलभंग
यत्रुटितवररत्नसमनिर्मलमणिरत्नमंडितभुजाः इति तलभंगकाबाह्वाभरणविशेषास्त्रुटिता बाहुरक्षिका अन्यानि च यानि वराणि भूषणा
नि बाह्याभरणानि तेषु ये निर्मला मणयश्चंद्रकांताद्या रत्नानि वज्रेन्द्रनीलादीनि तैर्मंडितो भुजो येषां ते तथा तथा दशमुद्रामंडितो अग्रहस्तो
अग्रहस्तो येषां ते दशमुद्रामंडिताग्रहस्ताः चूडामणिचित्रचिह्नगता इति चूडामणिर्नाम मुकुटे विचित्रं चिह्नं गतं स्थितं येषां ते चूडामणिचित्रचिह्नगा
ताः सुरूपा इति सामान्यतः कालाः कृष्णवर्णाः एतदेवोपमानतः प्रतिपादयति महानीलसरिसा महानीलं यत्किमपि वस्तुजातं लोकप्रसिद्धं ते
न सदृशाः एतदेव भावयति नीलगुलिकानीलगुलिकागवलमहिषशृंगं अ तसीकुसुमं प्रतीतं तेषामिव प्रकाशः प्रतिभा येषां ते नीलगुलि
कागवलातसीकुसुमप्रकाशाः तथा विकसितशतपत्रमिव निर्मले ईष द्विशालो नमनाक् सितरक्ते ताम्रे च नयने येषां ते विक
सितशतपत्रनिर्मलईषत्सितरक्तताम्रनयनाः गरुडस्येवायता दीर्घा ऋ जी अकुटिला तुंगा उन्नता नासिका येषां ते गरुडाय
तऋजुतुंगनासाः तथा उपचितं परिकर्मितं यच्छिलाप्रवालं विद्रुमरत्नं यच्च बिं बफलं बिंबाः संनिहितफलं तत्सन्निभो लोहितः अधरोष्ठो येषां ते तथा
पांडुरं तच्च मध्यकालत्वात् शशिशकलं चंद्रखंडं तदपि च कथंभूतमि त्याह विमलं रजसा रहितं अविकलं वा तथा निर्मलो यो दधि
घनः शंखो गोक्षीरं कुंदानि कुंदकुसुमानि दकरजः पानीयकणा मृणालिका च तद्वद्धवला दंतश्रेणिर्येषां ते तथा विशेषणान्यत्र नि
पातः प्राकृतत्वात् हुतवहेनाविष्टेन निर्ध्मातं सत् यद्धौतं तप्तं निर्मलं तच्च तत्तपनीयं सुवर्णं तद्वत् रक्तानि रक्तपादतला
नि तालुजिह्वा च येषां ते तथा हुतवहनिर्ध्मातधौततप्ततपनीयरक्ततलतालुजिह्वाः तथा अंजनं सौवीरांजनं घनः श्यामः प्रावृट्कालभावी मेघस्तद्वत् कृ
ष्णाः रुचकवत् रमणीयाः स्निग्धाश्च केशा येषां ते अंजनघनकृष्णरुचकरमणीयस्निग्धकेशाः त्रिषु विलागस्त अंसं तेषु इत्यागइति
घ्नातोपपातसमुद्घातस्वस्थानैस्त्रिभिर्लोकस्यासंख्येयतमे भागे वर्त्तमाना इति वा अत्र आण मित्यादि गाथाद्वयं सामान्यतोऽसुरकुमारादी

प्रज्ञाप० वृत्तिः॥ नां भवनसंख्याप्रतिपादकं सूत्रगमं चोत्तीसा चोयाला इत्यादि गाथाद्वयं दाक्षिणात्यानामसुरकुमारादीनां भवनसंख्यानिरूपिका सुगमा व्याख्या
दाक्षिणात्यानां सुरकुमाराणां भवनानि चतुस्त्रिंशत् शतसहस्राणि नागकुमाराणां चतुश्चत्वारिंशत् वायुकुमाराणां पंचाशत् द्वीपदिग्उदधिविद्युत्स्त
नितानिकुमाराणां प्रत्येकं चत्वारिंशत् शतसहस्राणि भवनानामीसा चत्तालीसेत्यादि उत्तरस्यां दिशि असुरकुमाराणां भवनानि त्रिंशत् श
तसहस्राणि नागकुमाराणां चत्वारिंशत् सुवर्णकुमाराणां चतुस्त्रिंशत् वायुकुमाराणां षट्चत्वारिंशत् द्वीपदिग्उदधिविद्युत्स्तनितानिकुमाराणां प्रत्ये
कं षट्त्रिंशत् भवनशतसहस्राणि संप्रति सामानिकात्मरक्षकदेवसंख्याभिधानार्थमाह चउसट्ठी सट्ठी खलु इत्यादि दाक्षिणात्यस्यासुरकुमारेन्द्रस्य सामा
निकादेवाश्चतुःषष्टिशतसहस्राणि अन्येषां षष्टिसहस्राणि असुरवर्जा। नामसुरकुमारेन्द्रवर्जानां शेषाणां सर्वेषामपि दाक्षिणात्याना
सौत्तराहानां चतुःषष्टिसहस्राणि प्रत्येकं सामानिकाः एतद्विपरीतं तत्र कसंख्याकादेवाः सामानिकाज्ञातव्याः आत्मरक्षकाः पुनः स
र्वत्रापि सामानिकचतुर्गुणाः प्रतिपत्तव्याः इदानीं दाक्षिणात्यानामसौ त्तराहानां चासुरकुमारादीनां यथाक्रममिंद्रादीनाभिधि
त्सुः ४ चमरधरणइत्यादि दाक्षिणात्यानामसुरकुमाराणामधिपतिश्च। मरः नागकुमाराणां धरणः सुवर्णकुमाराणां वेणुदेवः विद्युत्कुमाराणां हरिकांतः
अग्निकुमाराणामग्निसिंहः द्वीपकुमाराणां पूर्णः उदधिकुमाराणां जलकां तः दिक्कुमाराणाममितः वायुकुमाराणां वेलंबः स्तनितकुमारा
णां घोषः वलिभूयाणंद इत्यादि उत्तरदिग्वर्तिनामसुरकुमाराणामिंद्रो बलिर्नागकुमाराणां भूतानंदः सुवर्णकुमाराणां वेणुदालिः विद्युत्कुमारा
णां हरिस्सहः अग्निकुमाराणामग्निमाणवः द्वीपकुमाराणां वशिष्ठः उदधिकुमाराणां जलप्रभः दिक्कुमाराणाममितवाहनः वायुकुमाराणां प्रभं
जनः स्तनितकुमाराणां महाघोषः संप्रति वर्णसंग्रहार्थमाह ५ कालाअसुरकुमारा इत्यादि गाथाद्वयं असुरकुमाराः सर्वेपि कालाः कृष्णवर्णाः
नागकुमारा उदधिकुमारा उदधिकुमाराश्चेतञ्च पांडुराः श्वेतवर्णाः वरकनकनिघसगौराः कषपट्टरेखावद्गौरा वर्णेन सुव
र्णकुमाराः स्तनितकुमाराश्च तथा विद्युत्कुमारा अग्निकुमारा द्वीपकुमाराश्च उत्तप्तकनकवर्णाः ईषद्रक्तवर्णा इति भावः वायुकुमाराः श्यामाः श्या ५२

स्तमेव स्पष्टयति प्रियंगुवर्णाः संप्रति वस्त्रगतवर्णप्रतिपादनार्थमाह ६ असुराणवत्था रत्ता इत्यादि गाथाद्वयं असुराः असुरकुमाराः भवन्ति वस्त्राणि र-
क्तानि नागकुमारा उदधिकुमाराश्च शिलिंध्रपुष्पप्रभाणि नीलवर्णानीत्यर्थः सुवर्णकुमारा दिक्कुमाराश्च अश्वासकवसनधराः अश्वास्यासंगतं अश्वास्य तत्र
जातायः फेनः सो अश्वास्यगतमत्यन्तधवलः तद्वत् धवलं वस्त्रं अश्वासगवसनधराः वाजिमुखफेनसदृशशुक्लवस्त्रपरिधानशीला इत्यर्थः विद्युत्कुमारा द्वीप-
कुमाराश्च नीलानुरागवसना वायुकुमाराः संध्यानुरागवसनाः ७ वाणमंतरसूत्र तिचउविलागमूर्चतावाइत्यादि तिर्यग्विशेषतस्तल्लोक
स्यामतव्यतागवकूष्यादि तथा पुण्यगवह्रणामहाकायामहोरगाः किंविशिष्टास्तइत्याह भुजगपतयः गंधर्वसमुदायाः किंविशिष्टास्तइत्या
ह निपुणगंधर्वगीतरतयः निपुणाः परमकौशलोपेता ये गंधर्वा गंधर्व कालीया देवास्तेषां यत् गीतं तत्र रतिर्येषां ते तथा पतदंतराणां
मष्टोप्यलललदइमेवान्येः वांतरललदाअष्टोअणपत्रियइत्यादि। कथं भूता पतेषां कृ आपीत्यन्तआदवंवलचलवपलचित्त
कीलणदवप्रिया चंचलाश्चलचित्तचिन्ना सुप्राचलचपलम तिशायनचपलयत् कीडनयश्चवित्ते द्रवः परिहासः
सोऽप्रियो येषां ते चलचपलचित्तकीडनद्रवप्रियाः ततश्चंचलशब्दे न विशेषणसमासः तथा गंभीरहसितप्रियगीतनृत्यरताः गंभीरे
शुद्रहसितगीतनृत्ते रतिर्येषां ते तथा वणमालामेलमउलकुंडल सच्छंद विउव्वियाभरणचारुभूसणधरा इति वनमालामया नियामि-
आमेलमुकुडकुंडलानि आमेल इति आपीड इत्यस्य प्राकृते लक्षणवशात् आपीडः शेखरकः तथा सच्छंदविकुर्वितानि आभरणानि तैर्यत्
चारुभूषणं तद्धरंतीति वनमालापीडमुकुटकुंडलसच्छंदविकुर्विताभरणचारुभूषणधराः तथा सर्वर्तुकैः सर्वर्तु भाविभिः सुरभिकुसुमैः
सुरचिता सुष्ठु निवेशिता तथा प्रलंबा लंबायमाना इति शोभमाना कांता कमनीया या विकसंती अंकुरिताष्टान पष्पमयी चित्रा नानाप्र
कारा वनमाला चित्रा वक्षसि येषां सर्वर्तुक सुरभिकुसुमसुरचितप्रलंबशोभमानकांतविकसच्चित्रवनमालारचितवनमालारचितवक्षसः
तथा कामं स्वेच्छया गमो येषां ते कामगमाः स्वरूपधारिणः क्वचित् कामकामा इति पाठः तत्र कामेन स्वेच्छया कामो येषु न सेवा येषां ते कामकामा

प्रज्ञापनावृत्तिः। अनियतकामा इत्यर्थः तथा कामं स्वेच्छया रूपं येषां ते कामरूपास्त एव तेन देहाश्च कामरूपदेहास्तान् धरंतीत्येवंशीलाः कामरूपदेहधारिणः स्वेच्छा
विकुर्वितनानारूपदेहधारिण इत्यर्थः तथा नानाविधवर्णरागाः कृता येषां तानि नानाविधवर्णरागाणि वराणि प्रधानानि चित्राणि नाना
विधानि अंशुकानि वा चिल्ललगानि दशीव वस्त्राणि दीप्यमानानि निवसणं परिधानं येषां ते नानाविधवर्णरागवरवस्त्रचित्रचिल्ललक-
निवसनाः तथा विविधदेशीनेपथ्यं गृहीतं वेषो यैस्ते विविधदेशीनेपथ्यगृहीतवेषाः तथा पमुइयकंदप्पकलहकेलिकोलाहलप्रिया इति
कंदर्पः कामोद्दीपनं वचनं चेष्टा वा कलहो राटी केलिः क्रीडा कोलाहलो बोलः कंदर्पकलहकेलिकोलाहलाः प्रिया येषां ते कंदर्प
कलहकेलिकोलाहलप्रियाः ततः प्रमुदितशब्देन सह विशेषणसमासः। हासबोलबहुला इति हासबोलौ बहुलौ येषां
ते हासबोलबहुलाः तथा असिमुद्गरशक्तिकुंता हस्ते येषां ते असि मुद्गरशक्तिकुंतहस्ताः अणेगमणिरयणविविहनिज्जुत्तचि
त्रचिंधगया इति मणयश्चंद्रकांताद्या रत्नानि कर्केतनादीनि अनेके कैर्मणिरत्नैर्विविधं नानाप्रकारं नियुक्तानि चित्राणि नाना
प्रकाराणि चिह्नानि गतानि स्थितानि येषां ते तथा वरोज्ज्वलभूषणमिति व्यक्तं। लय महाकाल इत्यादि दक्षिणोत्तराणां पिशाचानां यथाक्र
मं सिद्धौ कालमहाकालौ भूतानां सुरूपप्रतिरूपौ यक्षाणां पूर्णभद्रमाणि भद्रौ राक्षसानां भीममहाभीमौ किंनराणां किंनरकिंपुरुषौ।
किंपुरुषाणां सत्पुरुषमहापुरुषौ महोरगाणामतिकायमहाकायौ गंधर्वाणां गीतरतिगीतयशसौ। ज्योतिष्कसूत्रे अद्धकविठगसंठ
णसंठियाइ इति अर्द्धकपित्थसंस्थानसंस्थितानि अत्राक्षेपपरिहारौ चंद्रप्रज्ञप्तिटीकायामभिहिताविति नातोऽभिधीयेते सव्वफालियाम-
याइ इति सर्वात्मना स्फटिकमयानि तथा अभ्युद्गता आभिमुख्येन सर्वतो विनिर्गता उच्छ्रिता प्रबलतया सर्वासु दिक्षु प्रसृता या प्रभा दीप्तिस्तया
सितानि धवलानि अत एव हसितानीव तथा विविधानां मणिकनकरत्नानां या भक्त्या विच्छित्तिविशेषास्ताभिश्चित्राणि आश्चर्यभूतानि वि
विधमणिकनकरत्नचित्राणि वातोद्धूतविजयवैजयंतीपताकाछत्रातिछत्रकलिया वातोद्धूता वायुकंपिता विजयसूचिका वैजयंत्यः ४३

नियमनाया पताका अथवा विजय इति वैजयंतीनां पार्श्वकर्णिका उच्यंते तत्प्रधाना वैजयंत्यः पताकाः छत्रातिछत्राणि च उपर्युपरि स्थितान्यातपत्राणि तैः
कलितानि वातोद्धूतविजयवैजयंतीपताकाछत्रातिछत्रकलितानि तुंगानि उच्चानि तथा गगनतलमनुलिहंत् अभिलंघयत् शिखर
येषां तानि गगनतलानुलिखच्छिखराणि तथा जालानि जालकानि तानि च भवनभित्तिषु लोके प्रतीतानि तदंतरेषु विशिष्टशोभानिमित्तं रत्नानि
येषु तानि तथा पंजरादुन्मीलितवत् यथा हि किल किमपि वस्तु पंजराद् वंशादिमयप्रच्छादनविशेषाद् बहिः कृतमत्यंतमविनष्टच्छायत्वात् शोभते
तथा तान्यपि विमानानीति भावः तथा मणिकनकानां संबंधिनी स्तूपिका शिखरं येषां तानि मणिकनकस्तूपिकाकानि ततः पूर्वपदाभ्यां सह वि-
शेषणसमासः तथा विकसितानि यानि शतपत्राणि पौंडरीकाणि च द्वारा दौ प्रतिकृतित्वेन स्थितानि तिलकाश्च भित्यादिषु पुंड्राणि रत्नमयाश्चा
र्द्धचंद्रा द्वारादिषु तैश्चित्राणि विकसितशतपत्रपौंडरीकतिलकरत्नार्द्धचंद्र चित्राणि तथा नानामणिमयीभिर्दामभिरलंकृतानि नानामणिमय
दामालंकृतानि तथा अंतर्बहिश्च श्लक्ष्णानि तथा तपनीयस्य सुवर्णवि। शेषस्य रुचिरा या वालुकाः सिकतास्तासां प्रस्तट प्र
स्तारो येषु तानि तपनीयरुचिरवालुकाप्रस्तटानि तथा सुखस्पर्शानि शु भस्पर्शानि शुभस्पर्शानि वा ओक्षेपाय वदरसाई चंदा इत्यादि बृ
हस्पति चंद्र सूर्य शुक्र शनैश्चर राहु धूमकेतु बुध अंगारकाः कथं भूता इ। त्याह तप्ततपनीयकनकवर्णाः ईषद्रक्तवर्णाः तथा ये ग्रहा ज्यो
तिश्चक्रे चारं चरंति केतवो ये च अगतिरतिकाः ये चाष्टाविंशतिविधा नक्षत्रदेवगणाः सर्वेऽपि नाना संस्थानसंस्थि
ताश्च पंचवर्णाः तप्ततपनीयकनकवर्णाः तारकाः पंचवर्णाः एतत्सर्वमपि स्थितलेश्या अवस्थिततेजोलेश्याकाः अचारिणः अविश्राम
मंडलगतिकाः सर्वेऽपि प्रत्येकं नामांकेन प्रकटितेन चिह्नमुकुटाः किमुक्तं भवति चंद्रस्य मुकुटे चंद्रमंडलं लांछनं सूर्यनामांकं प्रकटितं सूर्य
स्य सूर्यमंडलं ग्रहस्य ग्रहमंडलं नक्षत्रस्य नक्षत्राकारं तारकस्य तारकाकारमिति। वैमानिकसूत्रे चतुरशीति विमानलक्षाणि सप्तनवतिर्विमानस
हस्राणि त्रयोविंशति विमानानीति बत्तीसअट्ठवीसा बारस अट्ठ चउरो सयसहस्सा इत्यादि संख्यामीलनेन परिभावनीयानि तेणं मिगमहिससा

प्रज्ञाप०वृ०॥ ति सौधर्मदेवा मृगरूपप्रकटितचिह्नमुकुटाः ईशानदेवा महिषरूपप्रकटितचिह्नमुकुटाः सनत्कुमारदेवा वराहरूपप्रकटितचिह्नरूपाः माहेन्द्रदे-
वाः सिंहरूपप्रकटितमुकुटचिह्नाः ब्रह्मलोकदेवाश्छगलरूपप्रकटितमुकुटचिह्नाः लान्तकदेवा दर्दुररूपमुकुटचिह्नाः शुक्रकल्पदेवा हयरूपमुकु-
टचिह्नाः सहस्रारकल्पदेवा गजपतिमुकुटचिह्नाः आनतकल्पदेवा भुजगमुकुटचिह्नाः प्राणतकल्पदेवाः खड्गमुकुटचिह्नाः खड्गश्चतुष्पदविशे-
षः आटव्यः आरणकल्पदेवा वृषभमुकुटचिह्नाः अच्युतकल्पदेवा विडिममुकुटचिह्नाः वरकुंडलुज्जोवियाणणाइति वराभ्यां कुंडलाभ्यामुद्यो-
तितं भासुरीकृतमाननं येषां ते तथा ते तथा ज्ञापिते सौधर्मकल्पस्य वत्थ अच्छिमालीनामरामिवमालेइति वरुणाणाइति वरुणाणावस्यवरुणा-
णि अच्छरादिप्रवरदासणाणुवरदेरः शायकानइति शतक्रतूनां प्रतिमानामति प्रह विशेषाणां श्रमणोपासकपंचमप्रतिमारूपाणां वा कार्त्तिकश्रे-
ष्ठिनवा पककृयायस्यासौ शतक्रतुः सहस्सक्खेइ सहस्रमक्ष्णां यस्यासौ सहस्राक्षः इंद्रस्य हि किल मंत्रिणां पंचशतानि संति तदीया-
नां चाक्ष्णामिंद्रप्रायोजनत्वात्तयाइंद्रसंबंधित्वेन विवक्षणात्सह- स्राक्षः मिंद्रस्य मघवंतइति मघा महामेघास्ते यस्य वशेस-
ति स मघवान् पापाकोनाम बलवान् रिपुः स शिष्यते निराक्रियायेन स पाकशासनः अरयंबरवत्थधरे अरजांसि रजोरहितानि पुंडंत-
या अंबरवत् अंबराणि वस्त्राणि धारयंतीति अरजोंबरवस्त्रधरः आलइ- यमालमउडइति मालावमुकुटश्च मालामुकुटं मालगितमाविद्धं
मालामुकुटं येन स आलगितमालामुकुटः नवहेमचारुचित्रचलकुंडलविलिहिज्जमाणगंडेति नवमिव अभ्यस्तकृतवर्णतयात्यंतमिवहे-
मयानि नवहेमभ्यां चारुचित्राभ्यां चलाभ्यां कुंडलाभ्यां विलिख्यमानौ गंडौ यस्य स तथा ॥ सनत्कुमारकल्पसपरकंसपडिदिसिंति समानाः
पक्षाः पूर्वापरदक्षिणोत्तरपार्श्वा यस्मिन् इतरयुत्ततत् सपक्षं समानस्य धर्मादिवृत्तिमानस्य सभावः सपडिदिसिंइति समानाः प्रतिदिशा यत्रत-
त्सप्रतिदिक्क सामानिकसहस्राणि ईशानेंद्रस्याशीतिः सनत्कुमारेंद्रस्य द्वासप्ततिः माहेंद्रदेवराजस्य सप्ततिः ब्रह्मलोकेंद्रस्य षष्टिः लांतकें-
द्रस्य पंचाशत् महाशुक्रेंद्रस्य चत्वारिंशत् सहस्रारेंद्रस्य त्रिंशत् आनतप्राणतेंद्रस्य विंशतिः आरणाच्युतेंद्रस्य दश सामानिकसहस्राणि अवतंस- ४४

काश्चातिदेशालोकाइतिइरवावाक्यसूत्रतोविनेयजनानुग्रहाय वेदितव्या मूलतआरभ्या पदर्शिते सौधर्मे पूर्वस्यां अशोकावतंसको
दक्षिणतः सप्तपर्णावतंसकः पश्चिमायां चंपकावतंसकः उत्तरतश्चूतावतंसकः मध्ये सौधर्मावतंसकः एवं पूर्वादिक्रमेण ईशाने अंकावतंस-
कः स्फटिकावतंसको रत्नावतंसको जातरूपावतंसकः मध्ये ईशानावतंसकः सनत्कुमारे अशोकसप्तपर्णचंपकचूतसनत्कुमारावतंसक-
ः माहेंद्रे अंकस्फटिकरत्नजातरूपमाहेंद्रावतंसकाः ब्रह्मलोके अशोकसप्तपर्णचंपकचूतब्रह्मलोकावतंसकाः लांतके अंकस्फ-
टिकरत्नजातरूपलांतकावतंसकाः महाशुक्रे अशोकसप्तपर्णचंपकचूतमहाशुक्रावतंसकाः सहस्रारे अंकस्फटिकरत्नजातरूपस-
हस्रारावतंसकाः प्राणते अशोकसप्तपर्णचंपकचूतप्राणताव- तंसकाः अच्युते अंकस्फटिकरत्नजातरूपाच्युतावतंसकाइ-
ति ॥ गेवेयकसूत्रं सुगमं यावाइति समाणिड्डिया सर्वे समाइंकाएवं समजुइयाइत्याद्यपि भावनीयं अणिंदाइति न विद्यते
इंद्रोऽधिपतिर्येषां ते अनिंद्राः अपेसाइति न विद्यते प्रेष्यः प्रे- ष्यत्वं येषां ते अप्रेष्याः अपुरोहियाइति न विद्यते पु-
रोहितः शांतिकर्मकारी येषां ते अशांतरस्थावान्ते अपुरोहिताः किं- रूपाः पुनस्ते इत्याह अहमिंदानाम ते देवगणाः प्रज्ञप्ताह
श्रमण हे आयुष्मन् सिद्धसूत्रे पणयालीसं जोयणसयसहस्साइं इत्यादि परिमाणं वि- ष्कंभतत्वमहहगुणत्वादिकरणवशात् स्वयमेव तत्त्वं समधिगम्या-
न्यक्षेत्रसमासटीकोवापरिभावनीयात तत्र पंचचत्वारिंशल्लक्षप्रमाणविष्कंभमनुष्यक्षेत्रपरिरयस्य एतावत्प्रमाणस्य विस्तरं तावितवान् त-
स्याश्च ईषत्प्राग्भारायाः पृथिव्या बहुमध्यदेशभागे अष्टयोजनिकमायामविष्कंभाभ्यामष्टयोजनप्रमाणं क्षेत्रं अष्टौ योजनानि
बाहल्येन तत्रोक्तं तस्माच्च क्षेत्रात्तितिभावः पृक्षमात दनंतरं सर्वासु दिक्षु विदिक्षु च मात्रया मात्रया प्रदेशप्रहान्या परिहीयमाना
सर्वेषु चरमांतेषु मक्षिकापत्रतोऽपि ततरा अंगुलासंख्येयभागबाहल्येन प्रज्ञप्ता ॥ ईसिइवाइतिपदैकदेशे पदसमुदायोपचा-
रात् ईषत्प्राग्भाराइतिवा तन्वीवा तनुपृथिव्याः पृथिव्या अतितनुत्वात् तणुतणूइतिवा लोकाग्रत्वमिहेत्यन्ववी मक्षिकापत्रतोऽपि पर्यंतप्रदेशे

प्रज्ञाणटी॥ ऽतितत्त्वात् नत्वतत्त्वां सिद्धिरितिवा सिद्धक्षेत्रस्य प्रत्यासन्नत्वात् सिद्धालय इति सिद्धक्षेत्रस्य प्रत्यासन्नत्वादुपचारतः सिद्धानामालयः सिद्धा
लयः एवं मुक्तिरितिवा मुक्तालय इति चेत्यपि परिभावनीयं तथा लोकाग्रे वर्त्तमानत्वात् लोकाग्रे वर्त्तमानत्वाल्लोकाग्रमिति लोकाग्र
स्तूपिकेव लोकाग्रस्तूपिका तथा लोकाग्रेण प्रतिबुध्यत इति लोकाग्रप्रतिवाहिनी सर्वप्राणभूतजीवसत्त्वसुखावहा इति प्राणा द्वित्रिचतुरिंद्रिया
इति भूतास्तरवो जीवाः पंचेंद्रिया इति प्राणा द्वित्रिचतुरिंद्रिया इति भूतास्तरवो जीवाः पंचेंद्रियाः शेषाः प्राणिनः सत्त्वाः उक्तं च प्राणा द्वित्रि
चतुः प्रोक्ता भूतास्तु तरवः स्मृताः जीवाः पंचेंद्रिया ज्ञेयाः शेषाः सत्त्वा उदीरिताः सर्वेषां प्राणभूतजीवसत्त्वानां सुखावहा उपद्रवकारित्वा
भावात् सर्वप्राणभूतजीवसत्त्वसुखावहा सा च ईषत्प्राग्भारा पृथिवी श्वेता श्वेता श्वेतत्वमेवोपमया प्रकटयति संखदलविमलेत्यादि
शंखदलस्य शंखखंडस्य चूर्णस्य विमलो निर्मलः स्वस्तिकः शंखदलविमलस्वस्तिकः मृणालं च दकरजश्च तुषारं च हिमं गोक्षीरं
च हारश्च तेषामिव वर्णो यस्याः सा तथा उत्तानकछत्रमुत्तानीकृतं यत् छत्रं तस्य यत् संस्थानं तेन संस्थिता उत्तानकछत्रसंस्थान
संस्थितेवं भावना प्रागुपदर्शितस्थापनातो भावनीया सर्वार्जुनसुवर्णमयी। सर्वात्मना श्वेतसुवर्णमयी इसीपब्भाराणमित्यादि ईषत्प्रा
ग्भारायाः पृथिव्या ऊर्द्धं सीयाए इति निःश्रेणिगत्या योजने लोकांतो भवति। तस्य योजनस्य यदुपरितनं गव्यूतं तस्य गव्यूतस्य यः
सर्वोपरितनः षड्भागः तत्र णमिति वाक्यालंकारे सिद्धा भगवंतः सादिकाः कर्मक्षयानंतरं सिद्धत्वभावात् न तु अनादि शुद्धपुरुषप्रवादप्रतिक्षेपः
अवस्थिता इत्यर्थः अपर्यवसिता रागाद्यभावेन प्रतिपातासंभवात् रागादयो हि सिद्धत्वात् च्यावयितुं प्रभविष्णवो न च ते भगवतां संति तेषां निर्मूल
काषंकषितत्वात् न च निर्मूलकाषंकषिता अपि भूयः प्रादुर्भवंति बीजाभावादिति तथा चाह केः जातिजरामरणैर्जन्मजरामृत्युभिर्विप्रमुक्ता तथा सुयो
निःसंसारः संसरणं तेन चयः कलंकलीभावः कदर्थमानता यस्तु दिव्यसुखमनुप्राप्तानामपि भवनेव संसारगर्भवसतिप्रपंचमतिक्रांता अत ए
व शाश्वतमनागतं कालं तिष्ठंति ॥ तत्र वियते अवेयाइत्यादि तत्रापि च सिद्धक्षेत्रे गताः संतस्ते अवेदाः पुरुषवेदादिवेदरहिता अवेदनाः ४५

सातासातवेदनाभावात् निर्ममा ममत्वरहिता असंगा बाह्याभ्यंतरसंगरहिताः कस्मादेवमत आह संसारविप्रमुक्ताहतो प्रथमसायतः संसाराद्विप्र
मुक्ताः यस्मादवेदा अवेदना निर्ममा असंगाश्च अतः कथंभूता इत्याह पएसनिव्वत्तसंठाणा प्रदेशैरात्मप्रदेशैर्न तु बाह्यपुद्गलैः शरीरपंचक
स्यापि सर्वात्मना त्यक्तत्वात् निर्वृत्तं निष्पन्नं संस्थानं येषां ते प्रदेशनिर्वृत्तसंस्थानाः अत्र शिष्यप्रश्नमाह कहिं पडिहया सिद्धा इत्यादि कहिं इत्यत्र
सप्तमी तृतीयार्थे प्राकृतत्वात् यथा तिसु तेसु अलंकिया पुहवी इत्यादि ततोयमर्थः केन प्रतिहताः केन स्खलिताः सिद्धा मुक्ताः क्व कस्मिन् स्था
ने सिद्धाः प्रतिष्ठिताः अवस्थिताः तथा क्व कस्मिन् क्षेत्रे बोंदिं तनुं शरीरमित्यनर्थांतरं त्यक्त्वा क्व गत्वा सिध्यंति निष्ठितार्था भवंति सिद्ध इत्यत्राऽनुस्वा
रलोपो द्रष्टव्यः अथवैकवचनोपन्यासोपि प्रश्नोत्थानविराधनाकृत थावान्यत्राप्येवं प्रयोगः वत्थगंधमलंकारं इत्थिओ सयणाणि य अ
च्छंदा जे न भुंजंति न से चाइत्ति वुच्चइ इति एवं शिष्येण प्रश्ने कृते सूरि ह अलोए पडिहया सिद्धा इत्यादि अत्रापि सप्तमी तृतीयार्थे
अलोकेन केवलाकाशास्तिकायरूपेण प्रतिहताः स्खलिताः सिद्धाः इह तत्र धर्मास्तिकायाभावात्तदानंतर्येण न त्वप्र
तिस्खलनं न तु संबंधे सति विघातात् प्रतिघत्वात् सप्रतिघाता हि संबंधे सति विघाता नान्येषामिति तथा लोकस्य पंचास्तिकायात्मक
स्य अग्रे मूर्ध्नि प्रतिष्ठिता अपुनरागत्या व्यवस्थिताः तथा इह मनुष्यलोके बोंदिं तनुं त्यक्त्वा तत्र लोकाग्रसमयांतरप्रदेशांतरास्पर्शनेन ग
त्वा सिध्यंति निष्ठितार्था भवंति संप्रति तत्र गतानां यत्संस्थानमानं तदभिधित्सुराह उ दीहं वा हस्सं वा इत्यादि दीर्घं वा पंचधनुःशतप्रमाणं ह्रस्वं वा ह
स्तद्वयप्रमाणं वा शब्दात् मध्यमं वा विचित्रं यच्चरमभवे भवेत् संस्थानं ततस्तस्मात् संस्थानात् त्रिभागहीना वदनोदरादिरंध्रपूरणेन तृतीयेन भागेन हीना
सिद्धानामवगाहना अवगाहंते अस्यामित्यवगाहना स्वावस्थानं भणिता तीर्थंकरगणधरैरिति अत्र गतसंस्थानप्रमाणापेक्षया त्रिभागहीनं तत्र सं
स्थानमिति भावः एतदेव स्पष्टतरमुपदर्शयति उ जं संठाणं तु इहं इत्यादि यत्संस्थानं यावत्प्रमाणं संस्थानं इह मनुष्यभवे आसीत् तदेव भवं
निःप्राणिनः कर्मवशवर्त्तिनः स्मिन्निति नवं शरीरं त्यजतः परित्यजतः काययोगं परिहरतः स्यादिति भावः चरमसमये सूक्ष्मक्रियाप्रति

पातिष्यमानवालनवदनोदरादिरंध्रपूरणात्त्रिभागेन हीनं प्रदेशघनमासीत् तं सिद्धानां तद्धिं तस्मात् दीर्घं वा प्रदेशघनं मूलप्रमाणापेक्षया त्रिभागहीन
प्रमाणं संस्थानं तत्रालोकाग्रे तस्य सिद्धस्य नान्यदिति सांप्रतमुत्कृष्टादिलक्षणत्रिधामवगाहनामभिधित्सुराह तिन्निसया तेत्तीसा इत्यादि त्रीणि श
तानि त्रयस्त्रिंशानि त्रयस्त्रिंशदधिकानि धनुषां त्रिभागश्च भवति बोद्धव्यः एषा खलु सिद्धानामुत्कृष्टावगाहना भणिता तीर्थकरगणधरैः सा च पंचध
नुःशतानि उक्तानामवसेया न तु मरुदेवीनाभिकुलकरपत्नीनाभिश्च पंचविंशत्यधिकानि पंचधनुःशतानि शरीरप्रमाणं यदेव तस्य शरीरमानं त
देव मरुदेव्या अपि संघयणे संठाणे उच्चत्ते कुलगरेहिं सममिति वचनात् मरुदेवा च भगवती सिद्धा ततस्तस्या देहमानस्य त्रिभागेपातितेसि
द्धावस्थायां सार्द्धानि त्रीणि धनुःशतान्यवगाहना प्राप्नोति कथमुक्तप्रमाणा उत्कृष्टावगाहना घटत इति नैष दोषः मरुदेव्या नाघटत इति नैष दोषः
मरुदेव्या नाभेः किंचिद्दूनप्रमाणत्वात् स्त्रियो ह्युत्तमसंस्थाना उत्तमसंस्थाना नराः उच्चत्वे स्वस्वकालापेक्षया किंचिद्दूनप्रमाणा भवं
तीति ततो मरुदेव्यपि पंचधनुःशतप्रमाणेति न कश्चिद्दोषः अपि च सिद्धिगमनकाले हस्तिस्कंधादिरूढा संकुचितांगी सिद्धा ततः शरीरसंकोचभावा
त्साधिकावगाहना अधिकावगाहनायां न कश्चिद्विरोधः आह च वृत्ताय कृत् करमरुदेवा माणं नाभीतो जेण किंचिदूणा सा ता किर पं
चसयमुच्चत्ता संकोचितो सिद्धा व चत्तारि य रयणीउ इत्यादि वृत्तसारतः। योरन्योरविरुद्धविरोधानावबोध्या एषा खलु सिद्धानामवगाह
नामभिहिता मध्यमा आह इयमुत्कृष्टावगाहना खिलानां न सर्वत्र भाविका ततः एषा ऊर्ध्वतन्या प्राप्नोति कथं मध्यमास्तद्युक्तं वस्तुतत्त्वापरिज्ञानात् ऊर्ध्वत्वाद
हि सप्तहस्तानां सिद्धिरुक्ता तीर्थकरापेक्षया सामान्यकेवलिनां तु हीनप्रमाणानामपि भवति इदमपि अवगाहनामानं स्थितं तत्सामान्यसिद्धापेक्षयात
तो न कश्चिद्दोषः ब एगाय होइ इत्यादि एकारत्निः परिपूर्णा अष्टौ चांगुलान्यधिकानि एषा भवति सिद्धानामवगाहना जघन्या सा च कूर्मीपुत्रा
दीनां द्विहस्तानामवसेया यदि वा सप्तहस्तोच्छ्रितानामपि यंत्रपीलनादिना संवर्त्तितशरीराणामाह वृत्ताय कृत् जहन्नपंचधणुसयतणुस्स मज्झाय सत्तह
त्थस्स देहतिभागहीणाऽन्ये पियाऽज्ञा व हत्थस्स सत्तूसियस्स सिद्धी ऊहऽत्ता कह सिद्धविरहं तु साकिरतित्थयरसुयस्स साणं सिझमाणाणं तत्पुणा ४६

हाथविहन्ना कुम्मीपुत्तादयो जहन्नोणं अप्पसंवट्टियसरीरस्स सिद्धस्स हीणत्ति सांप्रतमुक्तानुवादतेन संस्थानलक्षणं सिद्धानामभिधित्सुराह उगाहणा
एइत्यादि सुगमं नवरं अनित्थंस्थमिति इदं प्रकारमापन्नमित्थं इत्थं तिष्ठतीति इत्थंस्थं न इत्थंस्थमनित्थंस्थं वदनादिछिद्रपूरणेन पूर्वाकारान्यथाभावतो
ऽनियताकारमिति भावः यापि च सिद्धा द्विगुणेण उ मिहूणदीहेन हस्सेइत्यादिना दीर्घत्वादीनां प्रतिषेधः सोपि पूर्वाकारापेक्षया संस्थानस्यानित्थंस्थ
त्वप्रतिपत्त्यानवगन्तः सर्वथा संस्थानस्याभावतः आह चूर्णिकृत् उ सिरपडिसरणाउ पुव्वागारन्नहाववत्थितं संठाणमणित्थंत्थं अणियया गा
रं एतावियपकिसमत्थ सिद्धा इगुणसुदीहयाईणं ऊमणित्थं पुव्वागारावेक्खाए न लावा न वेति सिद्धाः परस्परं देशान्तरेन व्यवस्थितानुत नेति
नेति ब्रूमः कस्मादिति चेत् उच्यते यस्मात् ब ज्जुय इत्यादि यत्रैव देशा वशाद्दस्य एवकारार्थत्वात् एकः सिद्धो निहतः तत्रानंता भवक्षय
विमुक्ता अन्योन्यावगाहनेन न बाधया च नावतरणशक्तिमसिद्धाः। स्वविहितमाहात्म्यान्यसमवगाढाः सूक्ष्मा विविधविचित्रपरिणामत्वात्
धर्मास्तिकायादिवत् तथा स्पृष्टा लग्नाः सर्वेऽपि लोकांते ब। फुसइ इत्यादि स्पृशत्यनंतान् सिद्धान् सर्वप्रदेशैरात्मसं
बंधिभिर्नियमशः सिद्धः तथा तेऽपि सिद्धाः सर्वप्रदेशस्पृष्टेभ्यो सं ख्येयगुणा वर्त्तते ये प्रदेशप्रदेशैः स्पृष्टाः कथमिति चेत् उच्य
ते इह एकस्य यदवगाहनक्षेत्रं तत्रैकस्मिन्नपि परिपूर्णे अवगाढा अन्ये ऽनंताः सिद्धाः प्राप्यंते अपरे च तस्य क्षेत्रस्य एकैकप्रदेशमाक्र
म्यावगाढास्तेऽपि प्रत्येकमनंता एवं द्वित्रिचतुःपंचादिप्रदेशहान्याऽवगाढास्तेऽपि प्रत्येकमनंताः तथा तस्य मूलक्षेत्रस्य एकैकं प्रदेशं परित्यज्य
येऽवगाढास्तेऽपि प्रत्येकमनंता एवं हि त्रिचतुःपंचादिप्रदेशहान्याऽवगाढास्तेऽपि प्रत्येकमनंता एवं च मतिप्रदेशपरिहृद्धिहानितो ये समवगाढास्ते
परिपूर्णैकक्षेत्रावगाढेभ्यः संख्येयगुणा भवंति अवगाहप्रदेशानामसंख्यातत्वात् आह च एगामेत्तेणं तो पएसपरिवुड्ढिहाणीए तत्तोऽज
ति असंखेज्जगुणा असंखपएसोऽवगाहो संप्रति सिद्धानेव लक्षणतः प्रतिपादयति असरीरा इत्यादि अविद्यमानशरीरा अशरीराः औदा
रिकादिपंचविधशरीररहिता इत्यर्थः जीवाश्च ते घनाश्च वदनोदरादिसुषिरापूरणात् जीवघनाः उपयुक्ता दर्शने केवलदर्शने ज्ञाने केवला

उववा०वृ० ज्ञानं च यद्यपि सिद्धत्वप्राप्तिकाले समये केवलज्ञानमिति ज्ञानं प्रधानं तथापि सामान्यसिद्धलक्षणमेतदिति ज्ञापनार्थमादौ सामान्यालंबनं दर्शनमुक्तं
तथा च सामान्यविषयं ज्ञानमिति ततः साकारं सामान्यविशेषोपयोगस्वरूपमित्यर्थः सूत्रे मकारोऽलाक्षणिकः लक्षणं तदन्यव्यावृत्तस्वरूपमेतच्चान
तरोक्तं उद्धाश्चावक्ष्यमाणनिरुपमसुखविशेषणार्थः सिद्धानामिति छिन्नार्थानामिति संप्रति केवलज्ञानदर्शनयोरशेषविषयतामुपदर्शयति ॥ केवल
णाणुवउत्ता जाणंती इत्यादि केवलज्ञानेनोपयुक्ता न तु अंतःकरणेन तदभावादिति केवलज्ञानोपयुक्ता जानंत्यवगच्छंति सर्वभावगुणभावान् सर्वपदार्थ
गुणपर्यायान् प्रथमो भावशब्दः पदार्थवचनो द्वितीयः पर्यायवचनः गुणपर्याययोश्चायं विशेषः सहवर्तिनो गुणाः क्रमवर्तिनः पर्याया इति तथा पा
ति सर्वतः खलु खलुशब्दस्यावधारणार्थत्वात् सर्वत एव केवलदृष्टिभिरनं तैः केवलदर्शनैरित्यर्थः केवलदर्शनानामनंतता सिद्धानामनंत
त्वात् इदानीं ज्ञानदर्शनयोः प्रथमतया उपयोगस्थाः सिद्धा इति ज्ञा पनार्थं संप्रति निरुपमसुखभाक्त्वमिति दर्शयति ॥ न वि अत्थि इ
त्यादि नैवास्ति मनुष्याणां चक्रवर्त्यादीनामपि तत्सौख्यं नैव सर्व देवानामनुत्तरपर्यंतानामपि यत्सिद्धानां सौख्यमव्याबाधमुपगा
नां विविधबाधावाधतामुपसामीप्येन गतानां प्राप्तानां यथा नास्ति त थातं गाथया प्रदर्शयति ॥ सुरगणसुहमित्यादि सुरगणसुखं देवसंघा
तसुखं समस्तं संपूर्णं अतीतानागतवर्तमानकालत्रयभवमित्यर्थः पुनः सर्वा द्धापिंडितं सर्वकालसमयगुणितं तथाऽनंतगुणमिति तदेवं प्रमाणं कि
लासत्कल्पनया एकैकाकाशप्रदेशस्थापनेन इत्येवं सकललोकाकाशप्रदेशपूरणेन यद्यप्यनंतं भवति तदनंतमप्यनंतवर्गवर्गितं तथापि एवंप्रकर्षगतमपि
मुक्तिसुखं न प्राप्नोति एतदेव स्पष्टतरेण अंतरेण प्रतिपादयति ॥ सिद्धस्स सुहो रासी इत्यादि सुखानां राशिः सुखराशिः सुखसंघातः सिद्धस्य सुखरा
शिः सिद्धसुखराशिः सर्वाद्धापिंडितः सर्वया साद्यपर्यवसितया यत्सुखं सिद्धः प्रतिसमयमनुभवति तदेकत्रपिंडीकृतमिति भावः सोऽनंतवर्गभक्तः अनंतो
वर्गमूलैरपवर्तितः अनंतैर्वर्गमूलैरपवर्तितो यावत्सर्वाकाशलक्षणेन गुणनं तद्यदधिकं ज्ञातं तस्य सर्वस्याप्यपवर्तने सिद्धत्वाद्यसमयसंभवि सुख
मात्रतां प्राप्त इति भावः सर्वाकाशे न मातीति एतावन्मात्रो सर्वाकाशे न मातीति सर्वज्ञदर्शनस्य प्रसरणं वेति ज्ञापनार्थं पिंडितस्यापवर्तनं सुखराशेः इ ४७

यमत्र भावना इह किल विशिष्टाह्लादरूपं सुखं परिगृह्यते तत्र प्रथमत आरभ्य विशिष्टानां सुखशब्दप्रवृत्तिनिमित्तमाह्लादमधिकृत्य एकैकगुणवृ
द्धितारतम्येन तावदसावाह्लादो विशेष्यते यावदनंतगुणवृद्ध्या निरतिशयनिष्ठामुपगतः सोऽयमत्यंतोपमातीतैकांतौत्सुक्यविनिवृत्तिरूप
स्तिमिततमः कल्पः परमाह्लादः सदा सिद्धानां यस्मात्तारतः प्रथमाद्वाह्लादपरांतरालवर्तिनो ये गुणास्तारतम्येनाह्लादविशेषरूपास्ते सर्वाकाशप्रदे
शेभ्योऽप्यतिबहवो यतः किल लोके समस्ता गा मा नमयेत् इति अन्यथा यः सर्वाकाशे न मातीति तत्कथमेकस्मिन् सिद्धमायादिति पर्वसूरिसंप्रदा
यः सांप्रतमस्यानुपमतां प्रतिपादयति ॥ जह नाम इत्यादि यथा नाम कश्चिन्म्लेच्छो नगरगुणान् गृहदेवकुलसभाप्रपादीन् बहुविधान् अनेकप्रकारान्
विजानन्नवगच्छन् न शक्नोति परिकथयितुं का स्मात् शक्नोतीत्यत आह उपमायामसत्यां निमित्तकारणाद्धेतुभू
सर्वसां विवक्षितानां गाथाया इति न्यायात् इति सप्तमी तत्र उपमा या अभावादिति दृष्टव्यं एष गाथाक्षरार्थः भावार्थः कथानका
दवसेयस्तच्चेदं एगो महारण्णवासी मिच्छो रण्णे चिट्ठइ इतो य आसेण अवहरितो तेण विपावसितो तेण दिट्ठो सक्का
रऊण णयरं णीतो ताए रन्ना विसाणगरं पत्तो उव्वगारि त्ति गाढं उवचरि तो जहा राया तहा चिट्ठइ धवलघराइलोगेण विलासा काले
णरन्नं सरिउमारद्धो रन्ना विसज्जिउं ततो रन्ने गओ ते वन्ति केरिसं नयरंति सो वियाणंतो वि तत्थोवमाभावाओ न सक्कइ नयरगुणे परिकहेउं एस
दिट्ठंतो अयमर्थोपनयः ॥ इय सिद्धाणमित्यादि इति एवं सिद्धानां सौख्यमनुपमं वर्तते किमिति अत आह यतो नास्ति तस्यौपम्यं तथापि बा
लजनप्रतिपत्तये किंचिद्विशेषेण इतोऽपि इति आर्षत्वाद्यदस्य अर्थः साहश्यमिदं वक्ष्यमाणं शृणुत ॥ जह सव्वेत्यादि यथेत्युदाहरणोपद
र्शनार्थः सर्वे इति लोकं सर्वकामगुणितं सकलं सौदर्यं संस्कृतं कोऽपि पुरुषो भुक्त्वा क्षुत्तृड्विप्रमुक्तः सन् यथा अमृततृप्तस्तथा तिष्ठति ॥
इय इत्यादि इति एवं निर्वाणमोक्षमुपगताः सिद्धाः सर्वकालं साद्यपर्यवसितं कालं तृप्ताः सर्वथौत्सुक्यविनिवृत्तिभावतः परमसंतोषमधि
गता अतुलमनुपमं अन्यसदृशमुपमातीतत्वात् शाश्वतं प्रतिपाताभावात् अव्याबाधं लेशतोऽपि व्याबाधयाऽसंभवात् सुखं प्राप्ता अत एव सु

रवतिष्ठंति एतदेव सविशेषतरं भावयति सिद्धत्तिय इत्यादि सितं बद्धमष्टप्रकारं कर्मेंधनं ध्मातं भस्मीकृतं यैस्ते सिद्धाः पृषोदरादय इति रूपनि
ष्पत्तिर्दग्धानेकभवकर्मेंधना इत्यर्थः तथा सामान्यतः कर्मादिसिद्धा अपि भवंति यत उक्तं कम्मे सिप्पे य विज्जाए मंते जोगे य आगमे अत्थ
जत्ता अभिप्पाए तवे कम्मक्खए इय ततः कर्मादिसिद्धव्यपोहायाह बुद्धा इति अज्ञाननिद्राप्रसुप्ते जगत्यपरोपदेशेन जीवादितत्त्वं बुद्धाः स
र्वज्ञसर्वदर्शिस्वभावावबोधरूपा इति भावः एतेपि च संसारनिर्वाणोभयपरित्यागेन स्थिता ततः केचिदिच्छंति संसारनिर्वाणस्थितोवचनस्तये
अचिंत्यः सर्वलोकानां चिंतारत्नाधिको महानिति वचनात् ततस्तन्निरासार्थमाह पारगता इति पारं पर्यंतं संसारस्य प्रयोजनव्रातस्य वा गताः तथा
तथ्यवाक्षिप्तसकलप्रयोजनसमाप्ता निरवशेषकर्तव्यशक्तिविप्रमुक्त इति भावः इह केचित् यदृच्छावादिनोऽक्रमसिद्धत्वेनापि
गीयंते यथोक्तं नैकाद्यसंख्याक्रमतो चित्रप्राप्तिनियोगतः दरि द्राढ्यादिसमाप्तवन्मुक्तिः कश्चित् किं ततस्तन्मतव्यपोहायाह
परंपरागता इति परंपरया ज्ञानदर्शनचारित्ररूपया मिथ्यादृष्टिअ विरतसम्यग्दृष्टिदेशविरतिप्रमत्ताप्रमत्तनिवृत्त्यनिवृत्तिबादर
संपरायोपशांतमोहक्षीणमोहसयोगिकेवल्ययोगिकेवलि गुणस्थानलब्धक्रियया गताः परंपरागताः एतच्च केचिन्न वांछं
रुन्मुक्तकर्मकवचा अस्वतीर्थन्यक्कारदर्शनादिहागच्छंतीति वचनतः पुनः संसारावतरणात् एतन्मतापकरणार्थमा
ह उन्मुक्तकर्मकवचा उत्प्राबल्येन उन्मुक्तं त्यक्तं कर्मकवचमिव कर्मकवचं यैस्ते उन्मुक्तकर्मकवचा अत एवाजराः शरी
राभावतो जरासंभावात् अमराः अशरीरत्वादेव भावात् उक्तं च वयसो हाराणां रूपाणां बाधायमरणमादिष्टं सइदेहमितःसयंतदभावेत
न कस्यैव असंगा वाह्याभ्यंतरसंगरहितत्वात् निच्छिन्नत्यादि निस्तीर्णं लंघितं सर्वदुःखं यैस्ते निस्तीर्णसर्वदुःखाः उक्तं तदेवाह जातिजरामरणबंध
नविप्रमुक्ता जातिर्जन्म जरा वयोहानिलक्षणा मरणं बंधनं रूपाणि कर्माणि तेर्विशेषतो निःशेषापगमतया मुक्ता जातिजरामरणबंधनविप्रमुक्ता
: हिताविघ्नंप्रवमायत्ता जातिजरामरणबंधनविप्रमुक्तास्ततो निस्तीर्णसर्वदुःखाः कारणाभावात् ततो अव्याबाधं सौख्यं शाश्वतं सिद्धा अनुभवंति ४८

॥ इति श्रीमलयगिरिविरचितायां प्रज्ञापनाटीकायां द्वितीयं पदं समाप्तं ॥ २ ॥ ॥ व्याख्यातं द्वितीयपदमधुना तृतीयमारभ्यते तस्य चायमभि
संबंध इह प्रथमपदे पृथिवीकायिकादयः प्रज्ञापिता द्वितीये तेषामेव स्थानानि चिंतितानि अस्मिंस्तु तेषां दिग्विभागादिनाल्पबहुत्वादि निरूप्य
ते तत्रेदमादौ द्वारसंग्रहगाथाद्वयं ॥ दिसिगइइंदियकाए इत्यादि प्रथमं दिग्द्वारं १ तदनंतरं गतिद्वारं २ तत इंद्रियद्वारं ३ ततः कायद्वारं
४ ततो योगद्वारं ५ तदनंतरं वेदद्वारं ६ ततः कषायद्वारं ७ ततो लेश्याद्वारं ८ ततः सम्यक्त्वद्वारं ९ तदनंतरं ज्ञानद्वारं १० ततो दर्शनद्वारं ११ ततः
संयमद्वारं १२ तत उपयोगद्वारं १३ तत आहारद्वारं १४ ततो भाषकद्वारं १५ ततः परित्त इति परीताः प्रत्येकशरीरिणः शुक्लपाक्षिका
श्च तद्द्वारं १६ तदनंतरं पर्याप्तद्वारं १७ ततः सूक्ष्मद्वारं १८ तदनंतरं संज्ञिद्वारं १९ ततो भवसिद्धिकद्वारं २० ततोऽस्तीति अस्तिकायद्वारं २१
ततश्चरमद्वारं २२ तदनंतरं जीवद्वारं २३ ततः क्षेत्रद्वारं २४ ततो बंधद्वारं २५ ततः पुद्गलद्वारं २६ ततो महादंडकः २७ इति
सर्वसंख्यया सप्तविंशतिद्वाराणि तत्र प्रथमं द्वारमभिधित्सुरा ह ॥ दिसाणुवाएणं सव्वत्थोवा जीवा पच्छिम
णमित्यादि इह दिशः प्रथममाचारांगेऽनेकप्रकारा व्याव र्णितास्तास्विह क्षेत्रदिशः प्रतिपत्तव्यास्तासां नियतत्वात्
नेतरासां प्रायोऽनवस्थितत्वादनुपयोगित्वाच्च क्षेत्रदिशां च प्रभवस्तिर्यग्लोकमध्यगतादष्टप्रदेशाद्रुचकात् यत उक्तं अट्ठपए
सारुयगा तिरियलोयस्स मज्झयारम्मि एस पभवो दिसाणं एसेव भवे अणुदिसाणं इति दिशामनुपाता दिगनुपातो दिगनुसरणं
तेन दिशोऽधिकृत्येति तात्पर्यार्थः सर्वस्तोका जीवाः पश्चिमेन पश्चिमायां दिशि किमिति चेदुच्यते इदमल्पबहुत्वं बादरानधिकृत्य
द्रष्टव्यं न सूक्ष्मान् सूक्ष्माणां सर्वलोकापन्नानां प्रायः सर्वत्रापि समत्वात् बादरेष्वपि मध्ये सर्वबहवो वनस्पतिकायिका अनंतसंख्या
कतया तेषां प्रभूत्वेन ततो यत्र बहवो जीवानां यत्र चाल्पत्वं तत्राल्पत्वं वनस्पतयश्च तत्र बहवो यत्र प्रभूता आपः जले तत्र वनमिति
वचनात् तत्र वनस्पतयः पनकसेवालादीनां भावात् ते च पनकसेवालादयो बादरनामकर्मोदयवर्तिनो अपि अत्यंतसूक्ष्मावगाहनत्वा

प्रज्ञाप०वृत्तिः॥

इति सूत्रतः पिंडीनाथाः सर्वत्र संतापिनवरुचाग्राह्याः तथा वाक्यमनुयोगद्वारेषु तेणं वालग्गा उक्कसपएसा जीवस्स मरीतामाहणाक्षिंताश्च
संख्येयगुणा इति न तावत्तत्रापि ते तद्रूपं तत्रापि तसं नीति प्रतिपत्तव्याः आह च मूलटीकाकारः इह सर्वबहवो वनस्पतय इति कृत्वा यस्मात् सं
तित्रातमंतितत्र बहवो जीवा नातिषां च बहवश्च आउक्काउ तेउ नियमा वणस्सइकाइया इति पणगा सेवाल हढाई बायरा वि होंति सुहुममोआ
णगा आनंतरकुणा इति उदकं च प्रभूतं समुद्रेषु द्वीपात् द्विगुणविष्कंभत्वात् तत्रापि च समुद्रेषु प्रत्येकं प्राचीप्रतीची दिशोर्यथाक्रमं चंद्रसूर्यद्वी
पाः यावति च प्रदेशे चंद्रसूर्यद्वीपा अवगाढाः तावत् उदकाभावात् वनस्पतिकायिकाभावः केवलं प्रतीच्यां दिशि लवणसमुद्राधिपसुस्थितना
म्नो देवस्यावासभूतो गौतमद्वीपो लवणसमुद्रे गौतमद्वीपो लवणसमुद्रस्य अधिको वर्तते तत्र उदकाभावात् वनस्पतिकायिका नाम सा
वात् सर्वस्तोका जीवाः पश्चिमायां दिशि तेभ्यो विशेषाधिकाः पूर्वस्यां दिशि तत्र हि गौतमद्वीपो न विद्यते ततस्तावता विशेषा
णातिरिच्यंत इति तेभ्योऽपि दक्षिणस्यां दिशि विशेषाधिकाः यतः सूत्र चंद्रसूर्यद्वीपा न विद्यंते ततस्तावत् उदकं प्रभूतं तत्रास्ति
त्याच्च वनस्पतिकायिका अपि प्रभूता इति विशेषाधिकास्तेभ्य उदी च्यां दिशि विशेषाधिकाः किं कारणमिति चेत् उच्यते उ
दीच्यां हि दिशि संख्येययोजनेषु मध्ये कस्मिंश्चिद् द्वीपे आयामविष्कं भाभ्यां संख्येययोजनकोटीकोटीप्रमाणं मानसं नाम सरस
स्ति ततो दक्षिणदिगपेक्षया अस्यां प्रभूतमुदकं बाहुल्याच्च प्रभूता वनस्पतयः प्रभूता द्वीन्द्रियाः शंखादयः प्रभूतास्त्रटल्यमसंख्यादिक
लेवराश्रिता त्रीन्द्रियाः पिपीलिकादयः प्रभूताः पद्मादिषु चतुरिंद्रिया भ्रमरादयः प्रभूताः पंचेंद्रिया मत्स्यादय इति विशेषाधिकाः तदेवं सामा
न्यतो दिगनुपातेन जीवानामल्पबहुत्वमभिधाय संप्रति विशेषेण तदाह दिसाणुवाएणं सव्वत्थोवा पुढविकाइया दाहिणेणमित्यादि
दिगनुपातेन दिगनुसारेण दिशोऽधिकृत्येति भावः पृथिवीकायिका चिंत्यमानाः सर्वस्तोका दक्षिणस्यां दिशि कथमिति चेदुच्यते इ
ह यत्र यत्र घनं तत्र तत्र बहवः पृथिवीकायिकाः यत्र शुषिरं तत्र स्तोकाः दक्षिणस्यां दिशि बहूनि भवनपतीनां भवनानि बहवो नरकावासास्ततः शुषिर ४९

प्राचुर्यसंभवात् सर्वस्तोका दक्षिणस्यां दिशि पृथिवीकायिकास्तेभ्य उत्तरस्यां दिशि विशेषाधिका यत उत्तरस्यां दिशि दक्षिणदिगपेक्षया
स्तोकानि भवनानि स्तोका नरकावासास्ततो घनप्राचुर्यसंभवात् बहवः पृथिवीकायिका इति विशेषाधिकास्तेभ्योऽपि पूर्वस्यां दिशि विशेषाधिका
: रविशशिद्वीपानां तत्र भावात् तेभ्योऽपि पश्चिमायां दिशि विशेषाधिकाः किं कारणमिति चेदुच्यते यावंतो रविशशिद्वीपाः पूर्वस्यां दि
शि तावंतः पश्चिमायामपि ततस्तावता साम्यं परं लवणसमुद्रे गौतमनामा द्वीपः पश्चिमायामधिकः समस्ति तेन विशेषाधिकाः अत्र पर आह न
नु यथा पश्चिमायां दिशि गौतमद्वीपः अभ्यधिकः समस्ति तथा तस्यां पश्चिमायां दिशि अधोलौकिकग्रामा अपि योजनसहस्रावगाहाः संति
ततः खातपूरितन्यायेन तत्र तुल्या एव पृथिवीकायिकाः प्राप्नुवंति विशेषाधि काः नैतदेवं यतः अधोलौकिकग्रामावगाहो योजनस
हस्रं गौतमद्वीपस्य पुनः उच्चत्वाधिक्यं योजनसहस्रं सुविष्कंभं न स्यहादशयोजनसहस्राणि यत्र मेतावानेवास्याधोलौकि
कग्रामेभ्यः वा किंचिन्न च हीनतरं चेतत् पूर्वस्यामपि दिशि प्रभूतग । प्रादिसंभवात् समानं ततो यद्यधोलौकिकग्रामछि
द्रेषु गौतमद्वीपः प्रक्षिप्यते तथापि समधिक एव प्राप्यते न तुल्य इति तेन समधिकेन विशेषाधिकाः पश्चिमायां दिशि पृ
थिवीकायिकाः उक्ता दिगनुपातेन पृथिवीकायिकानामल्पबहुत्वमिदा नीमप्कायिकानामल्पबहुत्वमाह दिसाणुवाएणं सव्व
त्थोवा आउक्काइया इत्यादि सर्वस्तोका अप्कायिकाः पश्चिमायां दिशि गौतमद्वीपस्थाने तेषामभावात् तेभ्यो विशेषाधिकाः पूर्वस्यां दि
शि गौतमद्वीपाभावात् तेभ्योऽपि विशेषाधिका दक्षिणस्यां दिशि चंद्रसूर्यद्वीपाभावात् तेभ्योऽप्युत्तरस्यां दिशि विशेषाधिका मानससरः
सद्भावात् तथा दक्षिणस्यामुत्तरस्यां च दिशि सर्वस्तोकास्तेजस्कायिकाः यतो मनुष्यक्षेत्र एव बादरास्तेजस्कायिका नान्यत्र तत्रापि यत्र
बहवो मनुष्यास्तत्र ते बहवो बाहुल्येन पाकारंभसंभवात् यत्र त्वल्पे तत्र स्तोकाः ततो दक्षिणस्यां दिशि पंचसु भरतेषु उत्तरस्यां दिशि पंच
स्वैरावतेषु क्षेत्रस्याल्पत्वात् स्तोका मनुष्या इति स्तोका स्तोकत्वेन तेजस्कायिका अपि स्तोका अल्पपाकारंभसंभवात् अतः सर्वस्तोका दक्षिणो

न्नरायादिवासस्तत्कायिकाः सूक्ष्मास्तु प्रायः समानाः तेभ्यः पूर्वस्यां दिशि असंख्येयगुणाः एकत्रैव असंख्येयगुणत्वात् तेभ्योपि पश्चिमायां दिशि वि
शेषाधिकाः अधोलौकिकग्रामेषु समुद्रबाहुल्यात् उ दिसाणुवाएणं सव्वत्थोवा वाउक्काइया उवरिल्लिमणमित्यादि इह यत्र शुषिरं तत्र वायु
र्यत्र घनं तत्र वायुर्यत्र घनं तत्र वाभावाः ततः पूर्वस्यां दिशि प्रभूतं घनमित्यल्पा वायवः पश्चिमायां दिशि विशेषाधिका अधोलौकिकग्राम
सद्भावात् उत्तरस्यां दिशि विशेषाधिका भवननरकावासबाहुल्यात् शुषिरबाहुल्यात् तेभ्योपि दक्षिणस्यां दिशि विशेषाधिका उत्तरदिशापेक्ष
या दक्षिणस्यां दिशि विशेषाधिका उत्तरदिशापेक्षया दक्षिणस्यां दिशि भवनानां नरकावासानां चातिप्रभूतत्वात् तथा यत्र प्रभूता आपस्तत्र प्रभूताः पन
कादयोऽनंतकायिका वनस्पतयः प्रभूताः शंखादयो द्वीन्द्रियाः प्रभूताः पिंडीभूत सेवालाद्याश्रिताः कुंथ्वादयः त्रींद्रियाः प्रभूताः पद्माद्याश्रिता भ्रम
रादयः चतुरिंद्रिया इति वनस्पत्यादिसूत्राणि चतुरिंद्रियसूत्रपर्यंतानि अप्का यिकसूत्रवद्भावनीयानि तथा नैरयिकसूत्रे सर्वस्तोकाः पू
र्वोत्तरपश्चिमदिग्विभागभाविनो नैरयिकाः पुष्पावकीर्णनरकावास नां तत्राल्पत्वात् बहूनां प्रायः संख्येययोजनविस्तृता
त्वात् तेभ्यो दक्षिणदिग्भाविनोऽसंख्येयगुणाः पुष्पावकीर्णनरकावासानां तत्र बाहुल्यात् तेषां च प्रायोऽसंख्येययोजनविस्तृतत्वा
त् कृष्णपाक्षिकाणां तस्यां दिशि प्राचुर्येणोत्पादाच्च तथाहि द्विविधा जंतवः शु क्लपाक्षिकाः कृष्णपाक्षिकाश्च तेषां लक्षणमिदं येषां किं
चिदूनपुद्गलपरावर्त्तार्द्धमात्रः संसारस्ते शुक्लपाक्षिका अधिकतरसंसारभाजिनः कृष्णपाक्षिकाः उक्तं च जेसिमवड्ढो पुग्गलपरियट्टो सेसउ
य संसारो ते सुक्कपक्खिया खलु अहिए पुण कण्हपक्खीउ अत एव स्तोकाः शुक्लपाक्षिका अल्पसंसारिणां स्तोकत्वात् बहवः कृष्णपाक्षिकाः
प्रभूतसंसारिणामतिप्रचुरत्वात् कृष्णपाक्षिकाश्च प्राचुर्येण दक्षिणस्यां दिशि समुत्पद्यंते न शेषासु दिक्षु तथास्वाभाव्यात् तच्च स्वाभाव्यं पूर्वाचार्यैरे
वं युक्तिभिरुपबृंह्यते तद्यथा कृष्णपाक्षिका दीर्घतरसंसारभाजिनो भण्यंते दीर्घतरसंसारभाजिनश्च बहुपापोदयाद्भवंति बहुपापोदयाच्च क्रूरकर्मा
णः क्रूरकर्माणश्च प्रायस्तथास्वाभाव्यात्तद्भवसिद्धिका अपि दक्षिणस्यां दिशि समुत्पद्यंते न शेषासु दिक्षु यत उक्तं पायमिह कूरकम्मा भवसिद्धीया

वि दाहिणिल्लेसु नेरइयमणुयासुराइठाणेसु गच्छंति १ ततो दक्षिणस्यां दिशि बहूनां कृष्णपाक्षिकाणामुत्पादसंभवात् पूर्वोक्तकारण
द्वयाच्च संभवंति पूर्वोत्तरपश्चिमदिग्भाविभ्यो दाक्षिणात्या असंख्येयगुणाः यथा च सामान्यतो नैरयिकाणां दिग्विभागेनाल्पबहुत्वमुक्तमेवं
प्रतिपृथिवि वक्तव्यं युक्तेः सर्वत्रापि समानत्वात् तदेवं प्रतिपृथिव्यपि दिग्विभागेनाल्पबहुत्वमभिहितमिदानीं सप्तापि पृथिवीरधिकृत्य दिग्विभागेना
ल्पबहुत्वमाह दाहिणेहिंतो अहेसत्तमपुढविनेरइएहिंतो छट्ठीए तमाए नेरइया इत्यादि सप्तमपृथिव्याः पूर्वोत्तरपश्चिमदिग्भाविभ्यो नैरयि
केभ्यो ये सप्तमपृथिव्यामेव दाक्षिणात्यास्ते असंख्येयगुणास्तेभ्यः षष्ठपृथिव्यां तमःप्रभाभिधानायां पूर्वोत्तरपश्चिमदिग्भाविनोऽसंख्येयगुणा
:कथमिति चेदुच्यते इह सर्वोत्कृष्टपापकारिणः संज्ञिपंचेंद्रियतिर्यङ्मनुष्याः सप्तमनरकपृथिव्यामुत्पद्यंते किंचिद्धीनहीनतरपापकर्मकारि
णश्च षष्ठ्यादिषु पृथिवीषु सर्वोत्कृष्टपापकर्मकारिणश्च सर्वस्तोका बह वश्च यथोत्तरं किंचिद्धीनहीनतरादिपापकर्मकारिणस्त
तो युक्तमसंख्येयगुणत्वं सप्तमपृथिवीदाक्षिणात्यनारकापेक्षया षष्ठपृथिव्यां पूर्वोत्तरपश्चिमनारकाणामेवमुत्तरोत्तरपृथि
वीरप्यधिकृत्य भावयितव्यं तेभ्योपि तस्यामेव षष्ठपृथिव्यां दक्षिणस्यां दिशि नारका असंख्येयगुणा युक्तिरत्र प्रागेवोक्ता
तेभ्योपि पंचमपृथिव्यां धूमप्रभाभिधानायां पूर्वोत्तरपश्चिमदिग्भाविनोऽसं ख्येयगुणाः तेभ्योपि तस्यामेव पंचमपृथिव्यां दाक्षिणात्या
असंख्येयगुणा एवं सर्वास्वपि क्रमेण वाच्यं तिर्यक्पंचेंद्रियसूत्रं चाप्कायसूत्रवत् उ दिसाणुवाएणं सव्वत्थोवा मणुस्सा दाहिणउत्तरेणमित्यादि
सर्वस्तोका मनुष्या दक्षिणस्यामुत्तरस्यां च पंचानां भरतक्षेत्राणां पंचानामैरावतक्षेत्राणामत्यल्पत्वात् तेभ्यः पूर्वस्यां दिशि संख्येयगुणत्वात्
तेभ्योपि पश्चिमायां दिशि विशेषाधिकाः स्वभावत एवाधोलौकिकग्रामेषु मनुष्यबाहुल्यभावात् दिसाणुवाएणं सव्वत्थोवा भवणवासीत्यादि सर्व
स्तोका भवनवासिनो देवाः पूर्वस्यां पश्चिमायां दिशि तत्र भवनानामल्पत्वात् तेभ्य उत्तरदिग्भाविनोऽसंख्येयगुणाः स्वस्थाने तया तत्र भवनानां बा
हुल्यात् तेभ्योपि दक्षिणदिग्भाविनोऽसंख्येयगुणाः तत्र भवनानामतीवबाहुल्यात् तथाहि निकाये निकाये चत्वारिंशद्भवनश

प्रज्ञाप० वृ० २ तमःसहस्राणीति चिन्त्यते कृष्णपाक्षिकाश्च बहवस्तत्रोत्पद्यन्ते ततस्तासन्वंत्यसंख्येयगुणाः ४ व्यन्तरसूत्रे लावनायत्र शुषिरं तत्र ततः पूर्वस्यां दिशि घन-
त्वात् स्तोकाः ततोऽपरस्यां दिशि विशेषाधिका अधोलौकिकग्रामेषु शुषिरसम्भवात् ततोऽप्युत्तरस्यां दिशि विशेषाधिकाः स्वस्थानतया न-
गरावासबाहुल्यात् ततोऽपि दक्षिणस्यां दिशि विशेषाधिकाः अतिप्रभूततनगरावासबाहुल्यात् ५ तथा सर्वस्तोका ज्योतिष्काः पूर्वस्यां पश्चिमा-
यां च दिशि चन्द्रादित्यद्वीपेषूद्यानकल्पेषु कतिपयानामेव तेषां भावात् ततोऽपि दक्षिणस्यां दिशि विशेषाधिकाः यतो मानसे सरसि बहवो ज्यो-
तिष्काः क्रीडास्थानमिति क्रीडनायाऽऽगता नित्यमासते मानससरसि वा ये मत्स्यादयो जलचरास्ते आसन्नविमानदर्शनतः समुत्पन्नजातिस्मरणाः
किञ्चिद् व्रतं प्रतिपद्यानशनादि कृत्वा कृतनिदानास्तत्रोत्पद्यन्ते ततस्तालवंत्यो   त्तरादाक्षिणात्ततोऽपि विशेषाधिकाः तथा सौधर्मक-
ल्पे सर्वस्तोकाः पूर्वस्यां पश्चिमायां च दिशि विमानिकाः यतस्तावल्यावि   लिकाप्रविष्टानि विमानानि चतसृष्वपि दिक्षु तुल्या-
नि यानि पुनः पुष्पावकीर्णकानि तानि प्रभूतान्यसंख्येययोजनविस्तृ-   तानि च दक्षिणस्यामुत्तरस्यां च दिशि नान्यत्र ततः सर्वस्तो-
काः पूर्वस्यां पश्चिमायां दिशि तत उत्तरस्यां दिशि असंख्येयगुणाः पुष्पा-   वकीर्णकविमानानां बाहुल्यादसंख्येययोजनविस्तृत-
त्वाच्च ततोऽपि दक्षिणस्यां दिशि विशेषाधिकाः कृष्णपाक्षिकाणां प्राचुर्येण।   तद्गमनात् एवमीशानसनत्कुमारमाहेन्द्रकल्पसूत्राण्यपि
भावनीयानि ब्रह्मलोककल्पे सर्वस्तोकाः पूर्वोत्तरपश्चिमदिग्भाविनो देवा यतो बहवः कृष्णपाक्षिकास्तिर्यग्योनयो दक्षिणस्यां दि-
शि समुत्पद्यन्ते शुक्लपाक्षिकाः स्तोका इति पूर्वोत्तरपश्चिमदिग्भाविनः सर्वस्तोकाः ततोऽपि दक्षिणस्यां दिशि असंख्येयगुणाः कृष्णपाक्षिका-
णां बहूनां तत्रोत्पादात् एवं लान्तकशुक्रसहस्रारसूत्राण्यपि भावनीयानि आनतादिषु तु मनुष्या एवोत्पद्यन्ते ततः प्रतिकल्पं प्रतिग्रैवेयकं
प्रत्यनुत्तरविमानं च चतसृष्वपि दिक्षु प्रायो बहुसमा वेदितव्याः तथाभावात् ततः परं बहवः समा एव उपपातात् सोऽपीति ६ दिसाणुवाएणं सव्वत्थो-
वा सिद्धा दाहिणउत्तरेण मित्यादि सर्वस्तोकाः सिद्धा दक्षिणस्यामुत्तरस्यां च दिशि कथमिति चेदुच्यते इह मनुष्या एव सिद्ध्यन्ति नान्ये मनुष्या अपि

ध्यंतो यस्मिन्नाकाशप्रदेशेषु चरमसमये अवगाढास्तेष्वेवाकाशप्रदेशेषूर्ध्वमपि गच्छन्ति ते चैव चोपर्यवतिष्ठन्ते न मनागपि वक्रं गच्छन्ति ततः
प्र दक्षिणस्यां दिशि पञ्च भरतानि उत्तरस्यां दिशि पञ्चैरावतानि मनुष्या अल्पाः क्षेत्रस्याल्पत्वात् सुषमसुषमादौ च सिद्धाभावादिति दक्षि-
णोत्तरयोः सिद्धाः सर्वस्तोकाः ततः पूर्वस्यां दिशि संख्येयगुणाः पूर्वविदेहानां भरतैरावतक्षेत्रेभ्यः संख्येयगुणतया तन्मनुष्याणामपि संख्येयगु-
णत्वात् तेषां च सर्वकालं सिद्धिभावात् ततः पश्चिमायां दिशि विशेषाधिकाः अधोलौकिकग्रामेषु मनुष्यबाहुल्यात् गतं दिग्द्वारं सिद्धानां
गतिद्वारं तदिदमादिसूत्रं ७ एएसि णं भंते नेरइयाणमित्यादि सर्वस्तोका मनुष्याः परिमितसङ्ख्यराशिप्रमाणत्वात् सर्वस्थपदत्वाति-
च्छेदनकदायी राशिः षण्णवतिच्छेदनकदायी ततस्तेभ्यो नैरयिका असंख्येयगुणा अंगु-   लमात्रक्षेत्रप्रदेशराशेः संबन्धिनि प्रथमवर्गमूले द्वि-
तीयवर्गमूलेन गुणिते यावान् प्रदेशराशिर्भवति तावत्प्रमाणासु घन-   कृतस्य लोकस्यैकप्रादेशिकीषु श्रेणिषु यावं-
तो नभःप्रदेशास्तावत्प्रमाणत्वात् ततोऽपि देवा असंख्येयगुणा व्यंत-   राणां ज्योतिष्काणां च प्रत्येकं प्रतरासंख्येयभा-
गवर्तिश्रेणिगताकाशप्रदेशराशिप्रमाणत्वात् ततः सिद्धा अनंतगुण-   २ः अभव्येभ्योऽनन्तगुणत्वात् ततस्तिर्यग्योनिकाः
अनंतगुणा वनस्पतिकायिकानां सिद्धेभ्योऽप्यनन्तगुणत्वात् तदेवं नैरयिक।   तिर्यग्योनिकमनुष्यदेवसिद्धरूपाणां पञ्चानामल्प-
बहुत्वमुक्तमिदानीं नैरयिकतिर्यग्योनिकीमनुष्यमानुषीदेवदेवीसिद्धलक्षणानामष्टानामल्पबहुत्वमभिधित्सुराह एएसि णं भंते ने-
रइयाणमित्यादि सर्वस्तोका मनुष्यो मनुष्यस्त्रियः संख्येयकोटीकोटीप्रमाणत्वात् ताभ्यो मनुष्या असंख्येयगुणा इह मनुष्या इति
संमूर्छनजा अपि गृह्यन्ते ते च वदस्याविवक्षणात् ते च संमूर्छनजा वान्तादिषु नगरनिर्द्धमनान्तेषु जायमाना असंख्येयाः प्राप्यन्ते ततोऽपि
नैरयिका असंख्येयगुणा मनुष्या हि उत्कृष्टपदेऽपि श्रेण्यसंख्येयभागगतप्रदेशराशिप्रमाणा लभ्यन्ते नैरयिकास्त्वंगुलमात्रक्षेत्र-
प्रदेशराशिसत्कद्वितीयवर्गमूलगुणितप्रथमवर्गमूलप्रमाणासु श्रेणिगताकाशप्रदेशराशिप्रमाणास्ततो भवन्त्यसंख्येयगुणास्तेभ्य-

प्रज्ञा० वृत्ति॥

ष्टिर्यग्योनिकास्त्रियाः संख्येयगुणाः प्रतरासंख्येयभागवर्त्त्यसंख्येयश्रेणिगतनभःप्रदेशराशिप्रमाणत्वात् तेभ्योपि देवा असंख्येयगु
णा असंख्येयगुणप्रतरासंख्येयभागवर्त्त्यसंख्येयश्रेणिगतप्रदेशराशिमानत्वात् तेभ्योपि देवाः संख्येयगुणा द्वात्रिंशद्गुणत्वात्
तेभ्योपि सिद्धा अनंतगुणास्तेभ्योपि तिर्यग्योनिका अनंतगुणा अत्र युक्तिः प्रागेवोक्ता गतं गतिद्वारमिदानीमिंद्रियद्वारमधिकृत्याह ॥
एएसि णं भंते सइंदियाणमित्यादि सर्वस्तोकाः पंचेंद्रियाः संख्येययोजनकोटीकोटीप्रमाणविष्कंभसूचीप्रमितप्रतरासंख्येयभागवर्त्त्यसं
ख्येयश्रेणिगताकाशप्रदेशराशिप्रमाणत्वात् तेभ्यश्चतुरिंद्रिया विशेषाधिका विष्कंभसूच्यास्तेषां प्रभूतसंख्येययोजनकोटीकोटीप्रमा
णत्वात् तेभ्योपि त्रींद्रिया विशेषाधिकास्तेषां विष्कंभसूच्याः प्रभूततरसंख्येययोजनकोटीकोटीमानत्वात् तेभ्योपि द्वींद्रिया विशेषाधि
कास्तेषां विष्कंभसूच्याः प्रभूततमसंख्येययोजनकोटीकोटीप्रमाणत्वात् तेभ्योनिंद्रिया अनंतगुणाः सिद्धानामनंतत्वात् तेभ्यो
प्येकेंद्रिया अनंतगुणा वनस्पतिकायिकानां सिद्धेभ्योप्यनंतगुणत्वात् । तेभ्योपि सेंद्रिया विशेषाधिका द्वींद्रियादीना
मपि तत्र प्रक्षेपात् तदेवमुक्तमेकमोधिकानामल्पबहुत्वमिदानीमेतेषामेवापर्याप्तानां द्वितीयमल्पबहुत्वमाह ॥ एए
सि णं भंते सइंदियाणमित्यादि सर्वस्तोकाः पंचेंद्रिया अपर्याप्ताः एकस्मिन् प्रतरे यावंत्यंगुलासंख्येयभागमात्राणि खंडानि तावत्प्र
माणत्वात् तेषां तेभ्यश्चतुरिंद्रिया अपर्याप्ता विशेषाधिकाः प्रभूतप्रतरांगुलासंख्येयभागखंडप्रमाणत्वात् तेभ्यस्त्रींद्रिया अपर्याप्ता विशे
षाधिकाः प्रभूततरप्रतरांगुलासंख्येयभागखंडप्रमाणत्वात् तेभ्यस्त्रींद्रिया अपर्याप्ता विशेषाधिकाः प्रभूततमप्रतरांगुलासंख्येयभाग
खंडमानत्वात् तेभ्योपि द्वींद्रिया अपर्याप्ता विशेषाधिकाः प्रभूततमप्रतरांगुलासंख्येयभागखंडप्रमाणत्वात् तेभ्य एकेंद्रिया अपर्याप्ता अ
नंतगुणा वनस्पतिकायिकानामनंततया सदा प्राप्यमाणत्वात् तेभ्योपि सेंद्रिया अपर्याप्ता विशेषाधिकाः द्वींद्रियाद्यपर्याप्तानामपि तत्रप्र
क्षेपात् गतं द्वितीयमल्पबहुत्वमधुना तेषामेव पर्याप्तानामल्पबहुत्वमाह ॥ एएसि णं भंते सइंदियाणमित्यादि सर्वस्तोकाश्चतुरिंद्रियाः प ५२

र्याप्ता यतः स्वल्पायुषश्चतुरिंद्रियास्ततः प्रभूतकालमवस्थानाभावात् पृच्छासमये स्तोकाश्चावाप्यंते ते च स्तोका अपि प्रतरे यावंत्यंगुलसंख्येयभाग
मात्राणि खंडानि तावत्प्रमाणा वेदितव्याः तेभ्यः पंचेंद्रियाः पर्याप्ता विशेषाधिकाः प्रभूतप्रतरांगुलसंख्येयभागखंडमानत्वात् द्वींद्रियाः पर्याप्ता विशे
षाधिकाः प्रभूततरप्रतरांगुलसंख्येयभागखंडमानत्वात् तेभ्योपि त्रींद्रियाः पर्याप्ता विशेषाधिका द्वींद्रियादीनामपि पर्याप्तानां तत्र प्रक्षेपात् गतं तृती
यमल्पबहुत्वं संप्रत्येतेषामेव सेंद्रियादीनां प्रत्येकं पर्याप्तापर्याप्तानामल्पबहुत्वमाह ॥ एएसि णं भंते इत्यादि सर्वस्तोकाः सेंद्रियाः अ
पर्याप्तकाः इह सेंद्रियेषु मध्ये एकेंद्रियेषु मध्ये एकेंद्रिया एव बहवः एवं च सूक्ष्मा अपि वक्ष्यमाणेषां सर्वलोकापन्नत्वात् सूक्ष्मा अपर्याप्ताः सर्वस्तोकाः
पर्याप्ताः संख्येयगुणा इति सेंद्रिया अपर्याप्ताः सर्वस्तोकाः पर्याप्ताः संख्येयगुणा एवमेकेंद्रिया अपर्याप्ताः सर्वस्तोकाः पर्याप्ताः संख्ये
यगुणा भावनीया तथा सर्वस्तोका द्वींद्रियाः पर्याप्तका यावंति प्रतरे अंगुलस्यासंख्येयभागमात्राणि खंडानि तावत्प्रमाणत्वात्तेषां
तेभ्योऽपर्याप्ताः असंख्येयगुणाः प्रतरगतांगुलासंख्येयभागखंडप्रमाणत्वात् एवं त्रिचतुरिंद्रियाल्पबहुत्वान्यपि
वक्तव्यानि गतं षष्ठमल्पबहुत्वमिदानीं सप्तममल्पबहुत्वं संप्रत्येतेषां सेंद्रियादीनां समुदितानां पर्याप्तापर्याप्तानामल्पबहुत्वमा
ह ॥ एएसि णं भंते इत्यादि इदं चाष्टमं द्वितीयतृतीयाल्पबहुत्वभावनानुसारेण स्वयं भावनीयं तद्व्याख्यानाभिधानात् गतमिंद्रियद्वारमि
दानीं कायद्वारमधिकृत्याह ॥ एएसि णं भंते सकाइयाणमित्यादि सर्वस्तोकास्त्रसकायिका द्वींद्रियादीनामेव त्रसकायत्वात् तेषां च शेषकाया
पेक्षया अत्यल्पत्वात् तेभ्यस्तेजस्कायिका असंख्येयगुणा असंख्येयलोकाकाशप्रदेशप्रमाणत्वात् तेभ्यः पृथिवीकायिका विशेषाधिकाः प्रभू
तासंख्येयलोकाकाशप्रदेशप्रमाणत्वात् तेभ्योऽप्कायिका विशेषाधिकाः प्रभूततरासंख्येयलोकाकाशप्रदेशप्रमाणत्वात् तेभ्यो
वाउकायिका विशेषाधिकाः प्रभूततरासंख्येयलोकाकाशप्रमाणत्वात् तेभ्योप्वाउकायिका विशेषाधिकाः प्रभूततमासंख्येयलो
काकाशप्रदेशमानत्वात् तेभ्योप्यकायिका अनंतगुणाः सिद्धानामनंतत्वात् तेभ्यो वनस्पतिकायिका अनंतगुणा अनंतलोकाकाश

प्रदेशराशिमानत्वात् तेभ्यः सकायिका विशेषाधिकाः पृथिवीकायिकादीनामपि तत्र प्रक्षेपात् उक्तमौघिकानामल्पबहुत्वमिदानीमेते-
षामेवापर्याप्तानां द्वितीयमल्पबहुत्वमाह एएसि णं भंते सकाइयाणमित्यादि सुगमं संप्रत्येतेषामेव पर्याप्तानां तृतीयमल्पबहुत्वमाह
एएसि णं भंते सकाइयाणमित्यादि सुगमं सांप्रतमेतेषामेव सकायिकादीनां प्रत्येकं पर्याप्तापर्याप्तगतमल्पबहुत्वमाह एएसि णं भं-
ते सकाइयाणं पज्जत्तापज्जत्ताणमित्यादि सुगमं संप्रत्येतेषामेव सकायिकादीनां समुदितानां पर्याप्तापर्याप्तानामल्पबहुत्वं पंचममाह एएसि
णं भंते सकायिकाणमित्यादि सर्वस्तोकास्त्रसकायिकाः पर्याप्तकास्तेभ्यस्त्रसकायिका अपर्याप्तकाः असंख्येयगुणाः द्वीन्द्रियादी-
नामपर्याप्तानां पर्याप्तद्वीन्द्रियादिभ्यः असंख्येयगुणत्वात् ततस्तेजस्कायिका अपर्याप्ता असंख्येयगुणाः असंख्येयलोकाकाशप्रदेशप्र-
माणत्वात् ततः पृथिव्यब्वायवोऽपर्याप्तकाः क्रमेण विशेषाधिकास्ततस्तेजस्कायिकाः पर्याप्ताः संख्येयगुणाः सूक्ष्मेष्वपर्याप्तेभ्यः
पर्याप्तानां संख्येयगुणत्वात् ३ ततः पृथिव्यब्वायवः पर्याप्ताः क्रमेण विशेषाधिकाः ३ ततो वनस्पतयोऽपर्याप्ताः अनंतगु-
णाः १२ पर्याप्ताः संख्येयगुणाः एवं कायद्वारे सामान्येन पंचसूत्राणि ४ निपादितानि संप्रत्यस्मिन्नेव द्वारे सूक्ष्मबादरादिविशेषितानि दं-
पंचदश सूत्राण्याह एएसि णं भंते सुहुमाणमित्यादि सर्वस्तोकाः सूक्ष्मास्तेजस्कायिका असंख्येयलोकाकाशप्रमाणत्वात् तेभ्यः सू-
क्ष्मपृथिवीकायिका विशेषाधिकाः प्रभूतासंख्येयलोकाकाशप्रदेशप्रमाणत्वात् तेभ्यः सूक्ष्माप्कायिका विशेषाधिकाः प्रभूततरासं-
ख्येयलोकाकाशप्रदेशमानत्वात् ३ तेभ्यः सूक्ष्मवायुकायिका विशेषाधिकाः प्रभूततमासंख्येयलोकाकाशप्रदेशराशिमानत्वात् तेभ्यः सू-
क्ष्मनिगोदा असंख्येयगुणाः ग्रंथाग्रं ३००० सूक्ष्मग्रहणं बादरव्यवच्छेदार्थं द्विविधा हि निगोदाः सूक्ष्मा बादराश्च तत्र बादराः सूरणकंदादिषु सूक्ष्माः
सर्वलोकापन्नाः ते च प्रतिगोलकमसंख्येया इति सूक्ष्मवायुकायिकेभ्योऽसंख्येयगुणाः तेभ्यः सूक्ष्मवनस्पतिकायिका अनंतगुणाः प्रतिनिगो-
दमनंतानां जीवानां भावात् तेभ्यः सामान्यतः सूक्ष्मजीवा विशेषाधिकाः सूक्ष्मपृथिवीकायिकादीनामपि तत्र प्रक्षेपात् उक्तमौघिकानामिदम- ५३

ल्पबहुत्वमिदानीमेतेषामेवापर्याप्तानामाह एएसि णं भंते सुहुमअपज्जत्तगाणमित्यादि सर्वं प्राग्वद्भावनीयं संप्रत्येतेषामेव पर्याप्तानां तृतीय-
मल्पबहुत्वमाह ३ एएसि णं भंते सुहुमपज्जत्तगाणमित्यादि इदमपि प्रागुक्तक्रमेण भावनीयं अधुना अमीषामेव सूक्ष्मादीनां प्रत्येकं प-
र्याप्तापर्याप्तगतानि अल्पबहुत्वान्याह ७ एएसि णं भंते सुहुमाणं पज्जत्तापज्जत्ताणमित्यादि इह बादरेषु पर्याप्ता असंख्येयगुणा एकैकपर्या-
प्तनिश्रया असंख्येयानामपर्याप्तानामुत्पादात् तथा चोक्तं प्राक् प्रथमे प्रज्ञापनापदे पज्जत्तगनिस्साए अपज्जत्तगाणमित्यादि इह बादरेषु
पर्याप्तेभ्यः पर्याप्ता असंख्येयगुणा एकैकपर्याप्तनिश्रया असंख्येयानामपर्याप्तानामुत्पादात् तथा चोक्तं प्राक् प्रथमे प्रज्ञापनापदे पज्जत्तगनि-
स्साए अपज्जत्तगा वक्कमंति जत्थ एगो तत्थ नियमा असंखेज्जा इति सूक्ष्मेषु पुनरयं क्रमः पर्याप्ता अपर्याप्तेभ्यश्चिरकालावस्था-
यिन इति सदैव ते बहवो लभ्यंते ततः उक्तं सर्वस्तोकाः सूक्ष्मा अपर्याप्तास्तेभ्यः सूक्ष्माः पर्याप्तकाः संख्येयगुणाः एवं पृथिवी-
कायादिष्वपि प्रत्येकं भावनीयं सर्वेषां समुदितानां पर्याप्तापर्याप्तगतं नवममल्पबहुत्वमाह एएसि णं भंते सुहुमाणं सुहुमपुढ-
विकाइयाणमित्यादि सर्वस्तोकाः सूक्ष्मतेजस्कायिका अपर्याप्तकाः कारणं प्रागेवोक्तं तेभ्यः सूक्ष्मपृथिवीकायिका अपर्या-
प्ता विशेषाधिकास्तेभ्यः सूक्ष्माप्कायिका अपर्याप्ता विशेषाधिकाः तेभ्यः सूक्ष्मवायुकायिका अपर्याप्तका विशेषाधिकाः अत्रापि का-
रणं प्रागेवोक्तं तेभ्यः सूक्ष्मतेजस्कायिकाः पर्याप्ताः संख्येयगुणा अपर्याप्ताः संख्येयगुणा इत्यनंतरं भावितं तत्र सर्वस्तोकाः सूक्ष्मतेज-
स्कायिका अपर्याप्तास्ततः इत्यादि तेभ्यः सूक्ष्माः पर्याप्तपृथिवीकायिकादयो विशेषाधिका विशेषाधिकत्वं च मनागधिकत्वेन द्विगुणत्वं ततः सू-
क्ष्मतेजस्कायिकेभ्योऽपर्याप्तेभ्यः पर्याप्ताः सूक्ष्मतेजस्कायिकाः संख्येयगुणाः ततः सूक्ष्मवायुकायिकापर्याप्तेभ्योऽपि संख्येयगुणा
भवंति तेभ्यः सूक्ष्मपृथिवीकायिकापर्याप्ता विशेषाधिकाः तेभ्यः सूक्ष्मनिगोदा अपर्याप्ता असंख्येयगुणास्तेषामतिप्रभूतत्वात् तेभ्यः
सूक्ष्मनिगोदाः पर्याप्ताः संख्येयगुणाः सूक्ष्मेष्वपर्याप्तेभ्यः पर्याप्तानामोघतः संख्येयगुणत्वात् तेभ्यः सूक्ष्मवनस्पतिकायिका अप-

र्याप्तका अनंतगुणाः प्रतिनिगोदमनंतानंतानां तेषां भावात् तेभ्यः सामान्यतः सूक्ष्मा अपर्याप्तका विशेषाधिकाः सूक्ष्मपृथिवीकायिकादीनामपि त
त्र प्रक्षेपात् १२ तेभ्यः सूक्ष्मवनस्पतिकायिकाः पर्याप्तकाः संख्येयगुणाः सूक्ष्मेष्वपर्याप्तेभ्यः पर्याप्तकाः संख्येयगुणाः वह्नापांतराल विशे
षाधिकत्वं तदल्पमिति न संख्येयगुणत्वापायातः तेभ्यः सूक्ष्माः पर्याप्तका विशेषाधिकाः सूक्ष्मपृथिव्यादीनामपि पर्याप्तानां तत्र प्रक्षेपात् १४ तेभ्यः
सूक्ष्मा विशेषाधिकाः अपर्याप्तानामपि तत्र प्रक्षेपात् १५ तदेवमुक्तानि सूक्ष्माश्रितानि पंचसूत्राणि संप्रति बादराश्रितानि पंचोक्तक्रमेणाभिधि
त्सुराह ८ एएसि णं भंते बायरपुढविकाइयाणमित्यादि सर्वस्तोका बादरत्रसकायिका द्वीन्द्रियादीनामेव बादरत्रसत्वात् तेषां च शेषकायेभ्योऽत्य
ल्पत्वात् १ तेभ्यो बादरतेजस्कायिका असंख्येयगुणाः असंख्येय लोकाकाशप्रदेशप्रमाणत्वात् २ तेभ्यः प्रत्येकशरीरबादरवन
स्पतिकायिका असंख्येयगुणाः स्थानस्यासंख्येयगुणत्वात् बादर तेजस्कायिका हि मनुष्यक्षेत्र एव भवंति तथा चोक्तं द्वितीयस्था
नाख्ये पदे कहि णं भंते बायरतेउकाइयाणं पज्जत्तगाणं ठाणा पन्नत्ता गोयमा सट्ठाणेणं अंतो मणुस्सखेत्ते अड्ढाइज्जे
सु दीवसमुद्देसु निव्वाघाएणं पन्नरससु कम्मभूमीसु वाघायं पडुच्च पंचसु महाविदेहेसु एत्थ णं बायरतेउकाइयाणं पज्जत्तगा
णं ठाणा पन्नत्ता तहा जत्थेव बायरतेउकाइयाणं पज्जत्तगाणं ठाणा पन्नत्ता त त्थेव बायरतेउकाइयाणमपज्जत्तगाणं ठाणा पन्नत्ता इति बादरवन
स्पतिकायिकास्तु त्रिष्वपि लोकेषु भवनादिषु तथा चोक्तं तस्मिन्नेव द्वितीयस्थानाख्ये पदे कहि णं भंते बायरवणस्सइकाइयाणं पज्जत्तगाणं ठा
णा पन्नत्ता गोयमा सट्ठाणेणं सत्तसु घणोदहीसु घणोदहिवलएसु अहोलोए पायालेसु भवणेसु भवणपत्थडेसु उड्ढलोए कप्पेसु विमाणेसु विमाणावलियासु वि
माणपत्थडेसु तिरियलोए अगडेसु तलाएसु नदीसु दहेसु वावीसु पुक्खरिणीसु दीहियासु गुंजालियासु सरेसु सरपंतियासु सरसरपंतियासु बिलेसु बिलपं
तियासु उज्झरेसु निज्झरेसु चिल्ललेसु पल्ललेसु वप्पिणेसु दीवेसु समुद्देसु सव्वेसु चेव जलासएसु जलट्ठाणेसु एत्थ णं बायरवणस्सइकाइयाणं पज्जत्तगाणं
ठाणा पन्नत्ता तहा जत्थेव बायरवणस्सइकाइयाणं पज्जत्तगाणं ठाणा तत्थेव बायरवणस्सइकाइयाणं अपज्जत्तगाणं ठाणा पन्नत्ता इति ततः क्षेत्रस्या ५४

संख्येयगुणत्वादुपपद्यंते बादरतेजस्कायिकेभ्यः संख्येयगुणाः प्रत्येकशरीरबादरवनस्पतिकायिकास्तेभ्यो बादरनिगोदा असंख्येयगुणा
स्तेषामत्यंतसूक्ष्मावगाहनत्वात् जलेषु च सर्वत्रापि च भावात् पनकसेवालादयो हि जलेऽवश्यंभाविनः ते च बादरानंतकायिका इति ५ तेभ्यो
बादरपृथिवीकायिका असंख्येयगुणाः अष्टासु पृथिवीषु सर्वेषु विमानभवनपर्वतादिषु भावात् तेभ्यः संख्येयगुणा बादराप्कायिकाः समु
द्रेषु जलप्राचुर्यात् तेभ्यः संख्येयगुणा बादराप्कायिकाः समुद्रेषु जलप्राचुर्यात् तेभ्यो बादरवायुकायिका असंख्येयगुणाः सुषिरे सर्व
त्र वायुसंभवात् ७ तेभ्यो बादरवनस्पतिकायिका अनंतगुणाः प्रतिबादरनिगोदमनंतानां जीवानां भावात् ८ तेभ्यः सामान्यतो बादरा जीवा
विशेषाधिका बादरत्रसकायादीनामपि तत्र प्रक्षेपात् ९ गतमेकं प्रायिकानां बादराणामल्पबहुत्वमिदानीं तेषामेवापर्याप्तानां द्वितीय
माह ८ एएसि णं भंते बायरअपज्जत्तगाणमित्यादि सर्वस्तोका बादरत्रसकायि का अपर्याप्तका युक्तिरत्र प्रागुक्तैव तेभ्यो बादरतेजस्का
यिका अपर्याप्तका युक्तिरत्र प्रागुक्तैव तेभ्यो बादरतेजस्कायिका अपर्याप्ता असंख्येयगुणाः असंख्येयलोकाका
शप्रदेशप्रमाणत्वादित्येवं प्रागुक्तक्रमेण समस्तमल्पबहुत्वं भावनीयं गतं द्वि तीयमल्पबहुत्वमिदानीं तेषामेव पर्याप्तानां तृतीयम
ल्पबहुत्वमाह ८ एएसि णं भंते बादरपज्जत्तगाणमित्यादि सर्वस्तोका बादरतेजस्कायिकाः पर्याप्ता आवलिकासमयवर्गस्य कति
पयसमयन्यूनेनावलिकासमयेन गुणितस्य यावान् समयराशिस्तावत्प्रमाणत्वात्तेषां उक्तं च आवलिवग्गो ऊणावलिए गुणिओ हु बा
यरा तेऊ इति १ तेभ्यो बादरत्रसकायिकाः पर्याप्ता असंख्येयगुणाः प्रतरे यावंत्यंगुलसंख्येयभागमात्राणि खंडानि तावत्प्रमाणत्वात्तेषां
२ तेभ्यः प्रत्येकशरीरबादरवनस्पतिकायिकाः पर्याप्ता असंख्येयगुणाः प्रतरे यावंत्यंगुलासंख्येयभागमात्राणि खंडानि तावत्प्रमाणत्वा
त्तेषां उक्तं च पत्तेयपज्जवणकाइया उ पयरं हरंति लोगस्स अंगुलअसंखभागेणं भाइयमिति ३ तेभ्यो बादरनिगोदाः पर्याप्तका असंख्येय
गुणाः तेषामत्यंतसूक्ष्मावगाहनत्वात् जलाशयेषु च सर्वत्र भावात् ४ तेभ्यो बादरपृथिवीकायिकाः पर्याप्ता असंख्येयगुणाः तेषामत्यंतसूक्ष्म

वगाहनत्वात्सूक्ष्मत्वाच्चायेष्वप्यसर्वत्रभावात् ४ ततोऽपि बादरपृथिवीकायिकाः पर्याप्ता असंख्येयगुणा अतिप्रभूतसंख्येयप्रतरांगुलासंख्येयभागखं-
डमानत्वात् ५ ततोऽपि बादराप्कायिकाः पर्याप्ता असंख्येयगुणाः अतिप्रभूततरसंख्येयप्रतरांगुलासंख्येयभागखंडमानत्वात् ६ ततोऽपि बादर
वायुकायिकाः पर्याप्ता असंख्येयगुणाः घनीकृतस्य लोकस्यासंख्येयेषु प्रतरेषु संख्यातभागवर्त्तिषु यावंत आकाशप्रदेशास्तावत्प्र-
माणत्वात्तेषां ७ ततोऽपि बादरवनस्पतिकायिकाः पर्याप्ता अनंतगुणा प्रतिबादरैकैकनिगोदमनंतानां जीवानां भावात् ८ ततः सामान्यतो बादर
पर्याप्तका विशेषाधिकाः बादरतेजस्कायिकादीनामपि पर्याप्तानां तत्र प्रक्षेपात् ९ गतं तृतीयमल्पबहुत्वमिदानीयमल्पबहुत्वमिदानीमेते-
षामेव प्रत्येकपर्याप्तापर्याप्तगतान्यल्पबहुत्वान्याह । एएसि णं भंते बायराणं प ज्जत्तापज्जत्ताणमित्यादि इह बादरैकैकपर्याप्तनिश्रया असं-
ख्येया बादरा अपर्याप्ता उत्पद्यंते पज्जत्तगनिस्साए अपज्जत्तगा वक्कमंति जत्थ एगो तत्थ नियमा असंखेज्जा इति वचनात् ततः सर्वत्र पर्याप्तेभ्यो
ऽपर्याप्ता असंख्येयगुणा वक्तव्याः त्रसकायिकसूत्रं प्रागुक्तयुक्त्या भावनी यं गतं चतुर्थमल्पबहुत्वमिदानीं प्रत्येकं तेषामेव समुदिता-
नां पर्याप्तानां पंचममल्पबहुत्वमाह । एएसि णं भंते बायराणं भंते । बायरपुढविकाइयाणमित्यादि सर्वस्तोका बादरतेज-
स्कायिकाः पर्याप्तकास्तेभ्यो बादरत्रसकायिकाः पर्याप्तकास्तेभ्यो बादरत्रस । कायिकाः पर्याप्ता असंख्येयगुणा २ तेभ्यो बादरत्रसका-
यिका अपर्याप्ता असंख्येयगुणा ३ ततोऽपि बादरप्रत्येकवनस्पतिकायिकाः पर्याप्ता असंख्येयगुणाः ४ ततोऽपि बादरनिगोदाः पर्याप्तका असं-
ख्येयगुणाः ५ ततोऽपि बादरपृथिवीकायिकाः पर्याप्तका असंख्येयगुणाः ६ ततोऽपि बादराप्कायिकाः पर्याप्ता असंख्येयगुणाः ७ तेभ्योऽपि बाद-
रवायुकायिकाः पर्याप्ता असंख्येयगुणाः एतच्च पदचतुष्टये युक्तिः प्रागुक्तानुसरणीया ८ ततोऽपि बादरतेजस्कायिका अपर्याप्तका असंख्ये-
यगुणाः यतो बादरवायुकायिकाः पर्याप्ताः असंख्येयेषु प्रतरेषु यावंत आकाशप्रदेशास्तावत्प्रमाणा बादरतेजस्कायापर्याप्ता असंख्येय
लोकाकाशप्रमाणास्ततो भवंत्यसंख्येयगुणाः ९ ततः प्रत्येकबादरवनस्पतिकायिका १० बादरनिगोद ११ बादरवायुकायिका अपर्याप्ता ५५

यथोत्तरमसंख्येयगुणा वक्तव्याः यद्यपि चैते प्रत्येकमसंख्येयलोकाकाशप्रदेशप्रमाणं तथाप्यसंख्यातस्यासंख्यातभेदभिन्नत्वादि-
यथोत्तरमसंख्येयगुणत्वं न विरुध्यते १४ ततोऽपि बादरवायुकायिकापर्याप्तेभ्यो बादरवनस्पतिकायिका जीवाः पर्याप्ता अनंतगुणाः प्रतिबादरै-
कैकनिगोदमनंतानां भावात् १५ ततः सामान्यतो बादराः पर्याप्तकाः विशेषाधिकाः बादरतेजस्कायिकादीनामपि पर्याप्तानां तत्र प्रक्षेपात् १६ त-
तो बादरवनस्पतिकायिका अपर्याप्तका असंख्येयगुणाः एकैकपर्याप्तबादरवनस्पतिकायिकनिगोदनिश्रया असंख्येयानामपर्याप्तबादरव-
नस्पतिकायिकनिगोदानामुत्पादात् १७ ततो बादराः अपर्याप्ता विशेषाधिकाः बादरतेजस्कायिकादीनामप्यपर्याप्तानां तत्र प्रक्षेपात् १८ ते-
भ्यः पर्याप्तापर्याप्तविशेषणरहिताः सामान्यतो बादरा विशेषाधिकाः बादरपर्या प्ततेजस्कायिकादीनामपि तत्र प्रक्षेपात् १९ गतानि बाद-
राश्रितान्यपि पंच सूत्राणि संप्रति सूक्ष्मबादरसमुदायगतानि पंच सूत्राणि विवक्षुः । प्रथमतः औधिकं सूक्ष्मबादरसूत्रमाह । एएसि णं भंते
इत्यादि इह प्रथमं बादरगतमल्पबहुत्वं बादरगतमल्पबहुत्वं बादरपंचसू- त्र्यां यत्प्रथमसूत्रं तद्भावनीयं यावद्बादरवायु-
कायपदं ७ तदनंतरं यत् सूक्ष्मगतमल्पबहुत्वं तत् सूक्ष्मपंचसूत्र्यां यत् प्रथ- मं सूत्रं तद्वत् सूक्ष्मनिगोदवर्जिता १२ तदनंतरं बादरव-
नस्पतिकायिका अनंतगुणाः प्रतिबादरनिगोदमनंतानां भावात् १३ ततो बादरा । विशेषाधिकाः बादरतेजस्कायिकादीनामपि तत्र प्र-
क्षेपात् १४ तेभ्यः सूक्ष्मवनस्पतिका असंख्येयगुणा बादरनिगोदेभ्यः सूक्ष्मनिगोदानामसंख्येयगुणत्वात् १५ ततः सामान्यतः सूक्ष्मा विशे-
षाधिकाः सूक्ष्मतेजस्कायिकादीनामपि तत्र प्रक्षेपात् १६ गतमेकमल्पबहुत्वमिदानीमेतेषामेवापर्याप्तानां द्वितीयमाह । एएसि णं भंते इत्या-
दि सर्वस्तोका बादरत्रसकायिका अपर्याप्ता १ ततो बादरतेजस्कायिक बादरनिगोद बादरपृथिवीकायिक बादराप्कायिक बादरवायु-
कायिका अपर्याप्ताः क्रमेण यथोत्तरमसंख्येयगुणाः अत्र भावना बादरपंचसूत्र्यां द्वितीयापर्याप्तकसूत्रवत्कर्तव्या ७ ततो बादरवायुका-
यिकेभ्योऽपर्याप्तेभ्यः असंख्येयगुणाः सूक्ष्मतेजस्कायिका अपर्याप्ता अतिप्रभूतासंख्येयलोकाकाशप्रमाणत्वात् ८ ततः सूक्ष्मपृथिवी

कायिकसूक्ष्मनिगोदा अपर्याप्ता यथोत्तरमसंख्येयगुणा अत्र भावना सूक्ष्मपंचसूत्राय द्वितीयसूत्रवत् १२ तेभ्यः सूक्ष्मनिगोदापर्याप्तेभ्यो बादरव
नस्पतिकायिका जीवा अपर्याप्ता अनंतगुणाः प्रतिबादरैकैकनिगोदमनंतानां भावात् १३ तेभ्यः सामान्यतो बादरा अपर्याप्तका विशेषाधिकाः
बादरत्रसकायिकापर्याप्तादीनामपि तत्र प्रक्षेपात् १४ तेभ्यः सूक्ष्मवनस्पतिका अपर्याप्ता असंख्येयगुणाः बादरनिगोदापर्याप्तेभ्यः सूक्ष्मनिगो
दापर्याप्तानामसंख्येयगुणत्वात् १५ तेभ्यः सामान्यतः सूक्ष्मा अपर्याप्ता विशेषाधिकाः सूक्ष्मतेजस्कायिकापर्याप्तादीनामपि तत्र प्रक्षेपात्
१६ गतं द्वितीयमल्पबहुत्वमधुना एतेषामेव पर्याप्तानां तृतीयमल्पबहुत्वमाह ॥ ८ ॥ एएसि णं भंते सुहुमपज्जत्तयाणमित्यादि सर्वस्तोका
बादरतेजस्कायिकाः पर्याप्ताः तेभ्यो बादरत्रसकायिका बादरप्रत्येकवनस्पतिका- यिकबादरनिगोदबादरपृथिवीकायिकबादरवायु
कायिकाः पर्याप्ता यथोत्तरमसंख्येयगुणा अत्र भावना बादरपंचसूत्रगत तृतीयपर्याप्तसूत्रवत्कर्तव्या ७ बादरपर्याप्तवायु
कायिकेभ्यः सूक्ष्मतेजस्कायिकाः पर्याप्ता असंख्येयगुणाः बादरवायु- कायिका हि असंख्येयप्रतरप्रदेशराशिप्र
माणाः सूक्ष्मतेजस्कायिकाः पर्याप्ता असंख्येयलोकाकाशप्रदेशप्रमाणा- स्ततोऽसंख्येयगुणाः ८ ततः सूक्ष्मपृथिवीकायिका
सूक्ष्माप्कायिकसूक्ष्मवायुकायिकाः पर्याप्ताः क्रमेण यथोत्तरं विशेषाधिकाः ११ त- तः सूक्ष्मवायुकायिकेभ्यः पर्याप्तेभ्यः सूक्ष्मनिगोदाः प
र्याप्तका असंख्येयगुणाः तेषामतिप्रभूततया प्रतिगोलकं भावात् १२ तेभ्यो बादरवनस्पतिकायिका जीवाः पर्याप्तकाः अनंतगुणाः प्रतिबा
दरैकैकनिगोदमनंतानां भावात् १३ तेभ्यः सामान्यतो बादराः पर्याप्तका विशेषाधिकाः बादरतेजस्कायिकादीनामपि पर्याप्तानां तत्र प्रक्षेपात्
१४ तेभ्यः सूक्ष्मवनस्पतिकायिकाः पर्याप्ता असंख्येयगुणाः बादरनिगोदपर्याप्तेभ्यः सूक्ष्मनिगोदपर्याप्तानामसंख्येयगुणत्वात् १५ तेभ्यः सा
मान्यतः सूक्ष्माः पर्याप्ता विशेषाधिकाः सूक्ष्मतेजस्कायिकादीनामपि पर्याप्तानां तत्र प्रक्षेपात् १६ गतं तृतीयमल्पबहुत्वमिदानीमेतेषामेव सूक्ष्म
बादरादीनां प्रत्येकं पर्याप्तापर्याप्तानां चतुर्थमल्पबहुत्वमाह ॥ ८ ॥ एएसि णं भंते सुहुमाणं बायराणं पज्जत्तापज्जत्ताणमित्यादि सर्वत्रेयं भावना ५६

सर्वस्तोका बादराः पर्याप्ताः परिमितक्षेत्रवर्तित्वात् तेभ्यो बादरा अपर्याप्ता असंख्येयगुणा एकैकबादरपर्याप्तनिश्रया असंख्येयानां बादरापर्या
प्तानामुत्पादात् तेभ्यः सूक्ष्मा अपर्याप्ता असंख्येयगुणाः सर्वलोकापन्नतया तेषां क्षेत्रस्यासंख्येयगुणत्वात् तेभ्यः सूक्ष्मपर्याप्तकाः संख्येयगु
णाः चिरकालावस्थायितया तेषां सदैव संख्येयगुणतयावाप्यमानत्वात् गतं चतुर्थमल्पबहुत्वमिदानीमेतेषामेव सूक्ष्मपृथिवीकायिकादी
नां प्रत्येकं पर्याप्तानां च समुदायेन पंचममल्पबहुत्वमाह ॥ ८ ॥ एएसि णं भंते सुहुमाणं सुहुमपुढविकाइयाणमित्यादि सर्वस्तोका बादरते
जस्कायिकाः पर्याप्ताः आवलिकासमयवर्गे कतिपयसमयन्यूनैरावलिकासमयैर्गुणिते यावान् समयराशिस्तावत्प्रमाणत्वात्तेषां त
तो बादरत्रसकायिकाः पर्याप्ताः असंख्येयगुणाः प्रतरस्यांगुल- संख्येयभागमात्राणि खंडानि तावत्प्रमाणत्वात् तेषां त
तेभ्यो बादरत्रसकायिका अपर्याप्ता असंख्येयगुणाः प्रतरस्यांगु- लासंख्येयभागमात्राणि खंडानि तावत्प्रमाणत्वात्तेषां त
तः प्रत्येकबादरवनस्पतिकायिकबादरनिगोदबादरपृथिवीकायि- कबादराप्कायिकबादरवायुकायिकाः पर्याप्ता यथो
त्तरमसंख्येयगुणाः यद्यपि प्रत्येकं प्रतरस्यांगुलासंख्येयभाग- मात्राणि खंडानि तावत्प्रमाणास्तथाप्यंगुलासंख्येयभा
गस्यासंख्येयभेदभिन्नत्वादित्थं यथोत्तरमसंख्येयगुणत्वमपि धीयमा- नं न विरुध्यते ८ तेभ्यो बादरतेजस्कायिका अपर्याप्ता असं
ख्येयगुणाः असंख्येयलोकाकाशप्रमाणत्वात् ९ ततः प्रत्येकशरीरबादरवनस्पतिकायिकबादरनिगोदबादरपृथिवीकायिका
बादराप्कायिकबादरवायुकायिका अपर्याप्ता यथोत्तरमसंख्येयगुणा १४ ततो बादरवायुकायिकेभ्योऽपर्याप्तेभ्यः सूक्ष्मतेजस्कायिका
अपर्याप्ता असंख्येयगुणा १५ ततः सूक्ष्मपृथिवीकायिकसूक्ष्माप्कायिकसूक्ष्मवायुकायिका अपर्याप्ता यथोत्तरं विशेषाधिकाः १८ ततः सू
क्ष्मपर्याप्तास्तेजस्कायिकाः संख्येयगुणाः सूक्ष्मापर्याप्तेभ्यः पर्याप्तानामोघत एव संख्येयगुणत्वात् १९ ततः सूक्ष्मपृथिवीकायि
कसूक्ष्माप्कायिकसूक्ष्मवायुकायिकाः पर्याप्ता यथोत्तरं विशेषाधिकाः २२ तेभ्यः सूक्ष्मनिगोदा अपर्याप्तका असंख्येयगुणाः तेषामतिप्रभू

प्रज्ञापनावृ.

ऽनंतसर्वलोकव्यापित्वात् २३ सूक्ष्मनिगोदाः पर्याप्तकाः संख्येयगुणाः सूक्ष्मपर्याप्तेभ्यः पर्याप्तानामोघत एव सदा संख्येयगुणत्वात् एतच्चबा
दरापर्याप्ततेजस्कायिकादयः पर्याप्तसूक्ष्मनिगोदपर्यवसानाः प्रागुक्तपदार्था यद्यप्यन्यत्राविशेषेणासंख्येयलोकाकाशप्रदेशप्रमाणत
या संगीयंते तथाप्यसंख्येयत्वस्यासंख्यभेदभिन्नत्वादिह यथोक्तसंख्येयगुणत्वविशेषाधिकत्वमसंख्येयगुणत्वं प्रतिपद्यमानं न विरोधमागिति २
४ तेभ्यः पर्याप्तसूक्ष्मनिगोदेभ्यो बादरवनस्पतिकायिकाः पर्याप्ताः अनंतगुणाः प्रतिबादरमेकैकनिगोदमनंतानां जीवानां भावात् २५ ते
भ्यः सामान्यतो बादराः पर्याप्ता विशेषाधिकाः बादरपर्याप्ततेजस्कायिकादीनामपि तत्र प्रक्षेपात् २६ तेभ्यो बा
दरवनस्पतिकायिका अपर्याप्तका असंख्येयगुणाः एकैकपर्याप्तबादर निगोदनिश्रया असंख्येयानां बादरनिगोदापर्याप्तानामुत्पा
दात् २७ तेभ्यः सामान्यतो बादरा अपर्याप्ता विशेषाधिका बादरतेज स्कायिकादीनामप्यपर्याप्तानां तत्र प्रक्षेपात् २८ तेभ्यः सा
मान्यतो बादरा विशेषाधिकाः पर्याप्तानामपि तत्र प्रक्षेपात् २९ ते भ्यः सूक्ष्मवनस्पतिकायिका अपर्याप्ता असंख्येयगुणा
: बादरनिगोदस्यैव सूक्ष्मनिगोदानामपर्याप्तानामप्यसंख्येयगुणत्वा त् ३० ततः सामान्यतः सूक्ष्मा अपर्याप्तका विशेषाधिकाः सू
क्ष्मपृथिवीकायिकादीनामप्यपर्याप्तानां तत्र प्रक्षेपात् ३१ तेभ्यः सूक्ष्मवन स्पतिकायिकाः पर्याप्ताः संख्येयगुणाः सूक्ष्मवनस्पतिकायि
कापर्याप्तेभ्यः संख्येयगुणाः सूक्ष्मेष्वोघतोऽपर्याप्तेभ्यः पर्याप्तानां संख्येयगुणत्वात् ततः सूक्ष्मापर्याप्तेभ्योऽपि सूक्ष्मवनस्पतिकायिकाः पर्याप्ता
: संख्येयगुणाः विशेषाधिकत्वस्य संख्येयगुणत्वबाधनायोगात् ३२ तेभ्यः सामान्यतः सूक्ष्माः पर्याप्ता विशेषाधिकाः पर्याप्तसूक्ष्मपृथिवीकायिका
दीनामपि तत्र प्रक्षेपात् ३३ ततः सामान्यतः सूक्ष्माः पर्याप्तापर्याप्तविशेषणरहिता विशेषाधिका अपर्याप्तानामपि तत्र प्रक्षेपात् ३४ गतं सूक्ष्मबा
दरसमुदायगतं पंचममप्यल्पबहुत्वं तद्गतौ समर्थितानि पंचदशापि सूत्राणीति गतं कायद्वारमिदानीं योगद्वारमाह ७ एएसिणं भंते जीवाणं सजोगी
णमित्यादि सर्वस्तोका मनोयोगिनः संज्ञिनः पर्याप्ता एव हि मनोयोगिनस्ते च स्तोका इति तेभ्यो वाग्योगिनोऽसंख्येयगुणाः द्वीन्द्रियादीनां वा ५३

ग्योगिनां संज्ञिभ्यः संख्यातगुणत्वात् तेभ्योऽयोगिनोऽनंतगुणाः सिद्धानामनंतत्वात् तेभ्यः काययोगिनोऽनंता वनस्पतीनामनंतत्वात् यद्यपि
निगोदजीवानामेकं शरीरं तथापि ते तेनैकेन शरीरेण सर्वेऽप्याहारादिग्रहणं कुर्वंतीति सर्वेषामपि काययोगित्वान्नानंतगुणत्वव्याघातः तेभ्यः सा
मान्यतः सयोगिनो विशेषाधिका द्वीन्द्रियादीनामपि वाग्योग्यादीनां तत्र प्रक्षेपात् गतं योगद्वारमिदानीं वेदद्वारमाह ८ एएसिणं भंते जीवाणं सवेयगा
णमित्यादि सर्वस्तोकाः पुरुषवेदाः संज्ञिनामेव तिर्यग्मनुष्याणां देवानां च पुरुषवेदभावात् तेभ्यः स्त्रीवेदाः संख्येयगुणाः यत उक्तं जीवाभिग
मे तिरिक्खजोणियपुरिसेहिंतो तिरिक्खजोणियइत्थीओ तिगुणाओ तिरूवाहियाओ य तहा मणुस्सपुरिसेहिंतो मणुस्सइत्थीओ सत्तावीसगुणाओ स
त्तावीसरूवुत्तराओ य तहा देवपुरिसेहिंतो देवित्थीओ बत्तीसगुणाओ बत्तीसरूवुत्तराओ य इति वृद्धाचार्यैरप्युक्तं तिगुणा तिरूवअहिया तिरि
याणं इत्थिया मुणेयव्वा सत्तावीसगुणा पुण मणुयाणं तदहिया चेव बत्ती सगुणा बत्तीसरूवअहिया य तह य देवाणं देवीउ प
न्नत्ता जिणेहिं जियरागदोसेहिं अवेदका अनंतगुणाः सिद्धानामनं तत्वात् तेभ्यो नपुंसकवेदा अनंतगुणाः वनस्प
तिकानां सिद्धेभ्योऽप्यनंतगुणत्वात् सामान्यतः सवेदा विशेषाधिकाः स्त्रीवेद कानामपि तत्र प्रक्षेपात् गतं वेदद्वारमिदानीं कषाय
द्वारमाह ९ एएसिणं भंते जीवाणं सकसाईणमित्यादि सर्वस्तोका अकषा यिणः सिद्धानां कतिपयानां च मनुष्याणामकषायित्वात्
तेभ्यो मानकषायिणो मानकषायपरिणामवंतोऽनंतगुणाः प्रभूतजीवनिकायेषु मानकषायपरिणामस्यावाप्यमानत्वात् तेभ्यः क्रोधकषा
यिणो विशेषाधिकास्तेभ्योऽपि मायाकषायिणो विशेषाधिकास्तेभ्योऽपि लोभकषायिणो विशेषाधिकाः मानकषायपरिणामकालापे
क्षया क्रोधादिकषायपरिणामकालस्य यथोत्तरं विशेषाधिकतया क्रोधादिकषायिणामपि यथोत्तरं विशेषाधिकत्वभावात् लोभकषायिभ्यः
सामान्यतः सकषायिणो विशेषाधिका मानादिकषायिणामपि तत्र प्रक्षेपात् सकषायिण इत्यत्रैवं व्युत्पत्तिः कषायशब्देन कषायोदयः प
रिगृह्यते तथा च लोकव्यवहारः सकषायोदयः कषायोदयवानित्यर्थः सह कषायेण कषायोदयेन ये वर्तंते ते सकषायोदया विपाकावस्थाप

प्रज्ञाप०वृ०

नाः ॥ उदयमुपदर्शयंतः कषायकर्मपरमाणवस्तेषु सत्सु जीवस्यावश्यं कषायोदयसंभवात् सकषायाविद्यंते येषां ते सकषायिणः कषायोदयस
हिता इति तात्पर्यार्थः ॥ गतं कषायद्वारमिदानीं लेश्याद्वारं ॥ एएसि णं भंते सलेसाणमित्यादि सर्वस्तोकाः शुक्ललेश्या लांतकादिषु वाउत्तरप
र्यवसानेषु वैमानिकेषु देवेषु कतिपयेषु च गर्भव्युत्क्रांतिकेषु कर्मभूमकेषु संख्येयवर्षायुष्केषु मनुष्येषु तिर्यग्स्त्रीपुंसेषु च कतिपयेषु संख्येय
वर्षायुष्केषु तस्याः संभवात् तेभ्यः पद्मलेश्याकाः संख्येयगुणाः सा हि पद्मलेश्या सनत्कुमारमाहेंद्रब्रह्मलोककल्पवासिषु देवेषु तथा प्रभूतेषु
गर्भव्युत्क्रांतिकेषु कर्मभूमिजेषु संख्येयवर्षायुष्केषु मनुष्यस्त्रीपुंसेषु तथा गर्भव्युत्क्रांतिकतिर्यग्योनिकस्त्रीपुंसेषु संख्येयवर्षायुष्केषु वाप्यते
सनत्कुमारादिदेवादयश्च समुदिता लांतकादिदेवादिभ्यः संख्येयगुणा इति त   वंति शुक्ललेश्याकेभ्यः पद्मलेश्याकाः संख्येयगुणाः
तेभ्यस्तेजोलेश्याकाः संख्येयगुणाः सर्वेषां सौधर्मेशानज्योतिष्कदेवा   नां कतिपयानां च भवनपतिव्यंतरगर्भव्युत्क्रांतिकति
र्यक्पंचेंद्रियमनुष्याणां बादरापर्याप्तैकेंद्रियाणां च तेजोलेश्यासद्भावात्   ।ननु संख्येयगुणाः कस्मान्न भवंति कथं भवंता
ति चेत् उच्यते इह ज्योतिष्का भवनवासिभ्योऽप्यसंख्येयगुणाः किंतु नः   सनत्कुमारादिदेवेभ्यः स्वयं ज्योतिष्कास्तेजोले
श्याका सह सौधर्मेशानकल्पदेवास्तु ततोऽप्यवंतः संख्येयगुणा मद्धुक्तं च   सूत्रद्वापरिज्ञानात् लेश्यापदे हि गर्भव्युत्क्रांतिकतिर्यग्यो
निकानां च कृष्णलेश्याद्यल्पबहुत्वं सूत्रं च स्फुटं इति सव्वत्थोवा गब्भवक्कंतियतिरिक्खजोणिया सुक्कलेसा तिरिक्खजोणिणीओ संखेज्जगुणाओ प
म्हलेसा गब्भवक्कंतियतिरिक्खजोणिया संखेज्जगुणा तिरिक्खजोणिणीओ संखेज्जगुणाओ तेउलेसा गब्भवक्कंतियतिरिक्खजोणिया सं
खेज्जगुणा तेउलेसाओ तिरिक्खजोणिणीओ संखेज्जगुणाओ इति महादंडके च तिर्यग्योनिकस्त्रीभ्यो व्यंतरा ज्योतिष्काश्च संख्येयगुणा उक्ता
तत्ता यदि तिर्यग्योनिस्त्रीभ्यः संख्येयगुणा ज्योतिष्काः तथापि पद्मलेश्याकेभ्यस्तेजोलेश्याकाः संख्येयगुणा एव इदमत्र तात्पर्यं यदि के
वलान् देवानेव पद्मलेश्यानधिकृत्य देवा एव तेजोलेश्याकाश्चिंत्यंते ततस्ते न भवंत्यसंख्येयगुणाः यावता तिर्यक्सम्मिश्रा पद्मलेश्याकेभ्य

स्तिर्यक्सम्मिश्रा एव तेजोलेश्याकाश्चिंत्यंते तिर्यंचश्च पद्मलेश्याभ्योऽपि तिव बहवस्ततः संख्येयगुणा एवोक्ता न त्वसंख्येयगुणा इति तेभ्यः
लेश्याका अनंतगुणाः सिद्धानामनंतत्वात् तेभ्यः कापोतलेश्या अनंतगुणाः वनस्पतिकायिकानामपि कापोतलेश्यायाः संभवात् वनस्प
तिकायिकानां च सिद्धेभ्योऽप्यनंतगुणत्वात् तेभ्योऽपि नीललेश्या विशेषाधिकाः प्रभूततराणां नीललेश्यासंभवात् तेभ्योऽपि कृष्णले
श्याका विशेषाधिकाः प्रभूततमानां कृष्णलेश्याकत्वात् तेभ्यः सामान्यतः सलेश्या विशेषाधिकाः नीललेश्याकादीनामपि तत्र प्र
क्षेपात् गतं लेश्याद्वारमिदानीं सम्यक्त्वद्वारमाह ॥ एएसि णं भंते जीवाणं सम्मद्दिट्ठीणमित्यादि सर्वस्तोकाः सम्यग्मिथ्यादृष्टयः सम्यग्मिथ्याद
ष्टिपरिणामकालस्यांतर्मुहूर्तप्रमाणतया तिस्तोकत्वेन तत्प्रष्टासमये   स्तोकानामेव लभ्यमानत्वात् तेभ्यः सम्यग्दृष्टयोऽनंतगुणाः सि
द्धानामनंतत्वात् तेभ्योऽपि मिथ्यादृष्टयोऽनंतगुणा वनस्पतिकायि   कानां सिद्धेभ्योऽप्यनंतगुणत्वात् तेषां च मिथ्यादृष्टित्वादिति
गतं सम्यक्त्वद्वारमधुना ज्ञानद्वारमाह ॥ एएसि णं भंते जीवाणं आ   भिणिबोहियनाणीणमित्यादि सर्वस्तोका मनःप
र्यवज्ञानिनः संयतानामेवामर्षौषध्याद्यृद्धिप्राप्तानां मनःपर्यवज्ञानसं   भवात् तेभ्यः संख्येयगुणा अवधिज्ञानिनो नैरयिकति
र्यक्पंचेंद्रियमनुष्यदेवानामप्यवधिज्ञानसंभवात् तेभ्य आभिनिबोधि   कज्ञानिनः श्रुतज्ञानिनश्च विशेषाधिकाः संज्ञितिर्यक्पंचेंद्रि
यमनुष्याणामवधिज्ञानविकलानामपि केषांचिदाभिनिबोधिकश्रुतज्ञानभावात् स्वस्थाने तु द्वयेऽपि परस्परं तुल्याः जत्थ मइनाणं तत्थ सु
यनाणं जत्थ सुयनाणं तत्थ मइनाणमिति वचनात् तेभ्यः केवलज्ञानिनोऽनंतगुणाः सिद्धानामनंतत्वात् उक्तं ज्ञानिनामल्पबहुत्वमिदानीमज्ञा
निपक्षस्य तामामज्ञानिनामल्पबहुत्वमाह ॥ एएसि णं भंते जीवाणं मइअन्नाणीणमित्यादि सर्वस्तोका विभंगज्ञानिनः कतिपयानामेव नै
रयिकतिर्यक्पंचेंद्रियमनुष्याणां विभंगभावात् तेभ्यो मत्यज्ञानिनः श्रुताज्ञानिनोऽनंतगुणा वनस्पतीनामपि मत्यज्ञानश्रुताज्ञानभावात् तेषां चानंत
त्वात् स्वस्थाने तु परस्परं तुल्याः जत्थ मइअन्नाणं तत्थ सुयअन्नाणं जत्थ सुयअन्नाणं तत्थ मइअन्नाणमिति वचनात् संप्रत्यनया

प्रज्ञाप० वृत्ति

पांज्ञानिनां समुदायेनाल्पबहुत्वमाह ब एएसि णं भंते जीवाणमित्यादि सर्वस्तोका मनःपर्यवज्ञानिनः स्तेभ्यो ऽसंख्येयगुणा अवधिज्ञानिनः
तेभ्य आभिनिबोधिकज्ञानिनः श्रुतज्ञानिनश्च विशेषाधिकाः स्वस्थाने तु द्वयेपि परस्परं तुल्याः अत्र भावना प्रागेवोक्ता तेभ्यो ऽसंख्येयगुणा
विभंगज्ञानिनो यस्मात् सुरगतौ निरयगतौ च सम्यग्दृष्टिभ्यो मिथ्यादृष्टयो ऽसंख्येयगुणाः पठ्यंते देवनैरयिकाश्च सम्यग्दृष्टयो ऽवधिज्ञानिनो मि-
थ्यादृष्टयो विभंगज्ञानिन इत्यसंख्येयगुणास्तेभ्यः केवलिज्ञानिनो ऽनंतगुणाः सिद्धानामनंतत्वात् तेभ्यो मत्यज्ञानिनः श्रुताज्ञानिनश्चानंतगु-
णा वनस्पतिकायिकानां सिद्धेभ्यो ऽप्यनंतत्वात् तेषां च मत्यज्ञानिश्रुताज्ञानित्वात् स्वस्थाने तु द्वयेपि परस्परं तुल्याः गतं ज्ञानद्वारमिदानीं दर्शन-
द्वारमाह ब एएसि णं भंते जीवाणं चक्खुदंसणीणमित्यादि सर्वस्तोका अवधिदर्शनिनः देवनैरयिकाणां कतिपयानां च संज्ञितिर्यक्पंचे-
न्द्रियमनुष्याणामवधिदर्शनभावात् तेभ्यश्चक्षुर्दर्शनिनो ऽसंख्येयगुणाः सर्वेषां देवनैरयिकगर्भजमनुष्याणां संज्ञितिर्यक्पंचेंद्रि-
याणां असंज्ञितिर्यक्पंचेंद्रियाणां असंज्ञितिर्यक्चतुरिंद्रियाणां च चक्षुर्दर्शनभावात् तेभ्यः केवलदर्शनिनो ऽनंतगुणाः सि-
द्धानामनंतत्वात् तेभ्यो ऽचक्षुर्दर्शनिनो ऽनंतगुणाः वनस्पतिकायिकानां सिद्धेभ्यो ऽप्यनंतत्वात् गतं दर्शनद्वारमधुना संयतद्वारमा-
ह ब एएसि णं भंते जीवाणमित्यादि सर्वस्तोकाः संयताः उत्कृष्टपदेपि तेषां कोटिसहस्रपृथक्त्वप्रमाणतयोपलभ्यमानत्वात् कोटिसहस्सपु-
हुत्तं मणुयलोए संजयाणमिति वचनात् तेभ्यः संयतासंयता देशविरता असंख्येयगुणास्तिर्यक्पंचेंद्रियाणामसंख्यातानां देशविरतिसद्भावा-
त् तेभ्यो नोसंयता नोअसंयता नोसंयतासंयता अनंतगुणाः प्रतिषेधत्रयवृत्तयो हि सिद्धाः ते चानंता इति तेभ्यो ऽसंयता अनंतगुणाः वनस्पतीनां सिद्धेभ्यो-
ऽप्यनंतत्वात् गतं संयतद्वारं संप्रत्युपयोगद्वारमाह ब एएसि णं भंते जीवाणं सागारोवउत्ताणमित्यादि इहानाकारोपयोगकालः सर्वस्तोकः
साकारोपयोगकालः सर्वस्तोकः साकारोपयोगकालस्तु संख्येयगुणस्ततो जीवा अप्यनाकारोपयोगोपयुक्ताः सर्वस्तोकाः स्वल्पसम-
येतेषां स्तोकानामेवावाप्यमानत्वात् तेभ्यः साकारोपयोगोपयुक्ताः संख्येयगुणाः साकारोपयोगकालस्य दीर्घतयालब्धा बहवः समये बहुप्राप्य- ५८

माणत्वात् गतमुपयोगद्वारमिदानीमाहारद्वारं ब एएसि णं भंते आहारगाणमित्यादि सर्वस्तोका जीवा अनाहारकाः विग्रहगत्यापन्नादीनामे-
वानाहारकत्वात् उक्तं च विग्गहगइमावन्ना केवलिणो समुहया अजोगी य सिद्धा य अणाहारा सेसा आहारगा जीवा तेभ्य आहा-
रका असंख्येयगुणाः ननु वनस्पतिकायिकानां सिद्धेभ्योप्यनंतत्वात् तेषां चाहारकतयापि लभ्यमानत्वात् कथमनंतगुणा न भवंति तदयुक्तं व-
स्तुतत्वापरिज्ञानात् इह सूक्ष्मनिगोदाः सर्वसंख्ययाप्यसंख्येयाः तत्राप्यंतर्मुहूर्त्तसमयराशितुल्याः सूक्ष्मनिगोदाः सर्वकालं विग्रहे वर्त्त-
मानाः लभ्यंते ततो ऽनाहारका अप्यतिबहवः सकलजीवराशेरसंख्येयभागतुल्या इति तेभ्य आहारका असंख्येयगुणा एव नानंतगुणाः
गतमाहारद्वारमिदानीं भाषकद्वारमाह ब एएसि णं भंते जीवाणं भासगाणमित्यादि सर्वस्तोका भाषकाः भाषालब्धिसंपन्नाः द्वींद्रियादी-
नामेव भाषकत्वात् अभाषका भाषालब्धिहीना अनंतगुणा वनस्पतिकायिकानामनंतत्वात् गतं भाषकद्वारं संप्रति परीत्तद्वा-
रमाह ब एएसि णं भंते जीवाणमित्यादि इह परीत्ता द्विविधाः भवपरीत्ताः कायपरीत्ताश्च तत्र भवपरीत्ता येषां किंचि-
दूनो ऽपार्द्धपुद्गलपरावर्त्तमात्रः संसारः कायपरीत्ताः प्रत्येकशरीरिणः तत्र द्वये ऽपि परीत्ताः सर्वस्तोकाः शुक्लपाक्षिकाणां
प्रत्येकशरीरिणां वा जीवापेक्षया ऽतिस्तोकत्वात् नोपरीत्ता नोअपरीत्ता अनंतगुणाः उभयप्रतिषेधवृत्तयो हि सिद्धास्ते चानंता इति ते-
भ्यो ऽपरीत्ता अनंतगुणाः कृष्णपाक्षिकाणां साधारणवनस्पतीनां वा सिद्धेभ्योप्यनंतगुणत्वात् गतं परीत्तद्वारं संप्रति पर्याप्तद्वारं ब एएसि णं भं-
ते जीवाणं पज्जत्तगाणमित्यादि सर्वस्तोका नो अपर्याप्तकाः उभयप्रतिषेधवर्तिनो हि सिद्धास्ते चापर्याप्तकादिभ्यः सर्वस्तोका इति ते-
भ्यो ऽपर्याप्तका अनंतगुणाः साधारणवनस्पतिकायिकानां सिद्धेभ्योप्यनंतगुणानां सर्वकालमपर्याप्तत्वेन लभ्यमानत्वात् तेभ्यः पर्या-
प्ताः संख्येयगुणाः इह सर्वबहवो जीवाः सूक्ष्माः सूक्ष्माश्च सर्वकालमपर्याप्तेभ्यः पर्याप्ताः संख्येयगुणा इति संख्येयगुणा उक्ताः गतं पर्याप्तद्वा-
रं संप्रति सूक्ष्मद्वारं ब एएसि णं भंते जीवाणं सुहुमाणमित्यादि सर्वस्तोका जीवा नोसूक्ष्मा नोबादराः सिद्धा इत्यर्थः तेषां सूक्ष्मजीवरा-

ऽप्यनंतभागकल्पत्वात् तेभ्यो बादरा अनंतगुणा बादरनिगोदजीवानां सिद्धेभ्योऽनंतगुणत्वात् तेभ्यः सूक्ष्मा असंख्येयगुणाः बादर-
निगोदेभ्यः सूक्ष्मनिगोदानामसंख्येयगुणत्वात् गतं सूक्ष्मद्वारमिदानीं संज्ञिद्वारं एएसि णं भंते जीवाणं सन्नीणमित्यादि सर्वस्तोका-
ः संज्ञिनः समनस्कानामेव संज्ञित्वात् तेभ्यो नोसंज्ञिनोनोअसंज्ञिनोऽनंतगुणाः उभयप्रतिषेधवर्त्तिनो हि सिद्धास्ते च संज्ञिभ्योऽनंतगुणा एवेति ते-
भ्योऽसंज्ञिनोऽनंतगुणा वनस्पतीनां सिद्धेभ्योऽप्यनंतगुणत्वात् गतं संज्ञिद्वारमिदानीं भवसिद्धिकद्वारमाह एएसि णं जीवाणं भवसिद्धिया-
णमित्यादि सर्वस्तोका अभव्याः जघन्ययुक्तानंतकपरिमाणत्वात् उक्तं चानुयोगद्वारेषु उक्कोसए परित्ताणंतए रूवे पक्खित्ते जहन्नयं जुत्ताणंत-
यं होइ अभवसिद्धियावि तत्तिया चेव त्ति तेभ्यो नोभवसिद्धिका नोअ भवसिद्धिका अनंतगुणा यत उभयप्रतिषेधवृत्तयः सिद्धास्ते
जघन्ययुक्तानंतकपरिमाणादनंतगुणाः तेभ्योऽपि भवसि द्धिका अनंतगुणाः यतो भव्यनिगोदस्यैकस्यानंतभा-
गकल्पाः सिद्धा भव्यजीवराशिर्निगोदाश्चासंख्येया लोके इ ति गतं भवसिद्धिकद्वारं सांप्रतमस्तिकायद्वारमाह
एएसि णं भंते धम्मत्थिकायेत्यादि धर्मास्तिकायाधर्मास्तिक ायआकाशास्तिकाय एते त्रयोऽपि द्रव्यार्थतया द्रव्या-
पेक्षया द्रव्यार्थतया द्रव्यरूपतयाऽन्योन्यं तुल्याः समानाः प्रत्येकमे कसंख्याकत्वात् एते च सर्वस्तोकास्तेभ्यो जीवास्तिकायो
द्रव्यार्थतयाऽनंतगुणः जीवानां प्रत्येकं द्रव्यत्वात् ते च जीवास्तिकायेऽनंतत्वात् तस्मादपि पुद्गलास्तिकायो द्रव्यार्थतयाऽनंतगुणः कथ-
मिति चेदुच्यते इह परमाणुद्विप्रदेशकादीनि पृथक् पृथक् द्रव्याणि तानि च सामान्यतस्त्रिप्रकाराणि तद्यथा प्रयोगपरिणतानि मिश्रपरि-
णतानि विस्रसापरिणतानि तत्र प्रयोगपरिणतान्यपि तावत् जीवेभ्योऽनंतगुणानि एकैकस्य जीवस्यानंतैः प्रत्येकं ज्ञानावरणी-
यदर्शनावरणीयादिकर्मपुद्गलस्कंधैरावेष्टितत्वात् किं पुनः शेषाणि ततः प्रयोगपरिणतेभ्यो मिश्रपरिणतान्यनंतगुणानि तेभ्योऽपि
विस्रसापरिणतान्यनंतगुणानि तथा चोक्तं प्रज्ञप्तौ सव्वत्थोवा पुग्गला पयोगपरिणया मीसपरिणया अनंतगुणा इति तानवति जीवा- ६०

स्तिकायात् पुद्गलास्तिकायो द्रव्यार्थतयाऽनंतगुणः तस्मादप्यद्धासमयो द्रव्यार्थतयाऽनंतगुणः कथमिति चेदुच्यते इह एकस्यैव प-
रमाणोरनागतकालं तत्तद्द्विप्रदेशिक यावद्दशप्रदेशिकसंख्यातप्रदेशिकासंख्यातप्रदेशिकानंतप्रदेशिकस्कंधांतः परिणामितया अनंता भा-
विनः संयोगाः पृथक् पृथक्कालाः केवलवेदसोपलब्धाः तथा एकस्य परमाणोर्यथा सर्वेषां प्रत्येकं द्विप्रदेशिकादिस्कंधानां चानंताः सं-
योगाः पुरस्कृताः पृथक् पृथक्कालास्तदुपलब्धाः सर्वेषामपि सूक्ष्मबादरानंतवर्त्तितया परिणामसंभवात् तथा क्षेत्रतोऽप्येकं परमाणुमधिकृत्य भि-
न्नाकाशप्रदेशावगाहिभिन्नकालमवगाहिष्यत इत्येवमनंता एकस्य परमाणोर्भाविनः संयोगा यथा चैकस्य परमाणोस्तथा सर्वेषां पर-
माणूनां तथा द्विप्रदेशकादीनामपि स्कंधानामनंतप्रदेशस्कंधपर्यंतानां प्रत्ये कं तत्तदेकप्रदेशाद्यवगाहनादा तत्तद्भिन्नकाला अनंता भा-
विनः संयोगाः तथा कालतोऽप्येकं परमाणुमधिकृत्य भिन्नाकाशप्रदेशैककम समयस्थितिको द्विसमयस्थितिक इत्येवमेकस्यापि परमा-
णोरेकस्मिन्नाकाशप्रदेशेऽसंख्येया भाविनः संयोगाः एवं सर्वे ष्वप्याकाशप्रदेशेषु प्रत्येकमसंख्येया भाविनः सं-
योगाः तांश्च लोकव्यापिष्वाकाशप्रदेशेषु परावृत्तो कालस्यानंत त्वादनंताः कालतो भाविनः संयोगाः यथा चैकस्य परमा-
णोस्तथा सर्वेषां परमाणूनां सर्वेषां च प्रत्येकं द्विप्रदेशकादीनां स्कंधानां तथा भावतोऽप्येकं परमाणुमधिकृत्य भिन्नकालमेकगुणकालका-
दिभावेनापि एकस्यापि परमाणोर्भिन्नभिन्नकाला अनंताः संयोगाः यथा चैकस्य परमाणोस्तथा सर्वेषां परमाणूनां सर्वेषां च द्विप्रदेश-
कादीनां स्कंधानां पृथक् पृथक् अनंता भावतः पुरस्कृता योगाः तदेवमेकस्यापि परमाणोर्द्रव्यक्षेत्रकालभावविशेषसंबंधवशादनंता भावि-
नः समया उपलब्धा यथा चैकस्य परमाणोस्तथा सर्वेषां परमाणूनां सर्वेषां च प्रत्येकं द्विप्रदेशकादीनां स्कंधानां न चैतत्परिणामिकालस्तु व्यते-
रेकपरिणामी पुद्गलास्तिकायादिव्यतिरेकेणोपपद्यते ततः सर्वमिदं तात्त्विकमवसेयं उक्तं च संयोगपुरस्कारश्च नाम भाविहि युज्यते का-
लेन हि संयोगपुरस्कारात्यसमताकथं विद्युपपद्यते इति यथा च सर्वेषां परमाणूनां सर्वेषां च द्विप्रदेशकादीनां प्रत्येकं द्रव्यक्षेत्रकालभाव

प्रज्ञा०वृत्तिः।। विशेषसंबंधवशादनंतानामपि तेनाऽद्धासमया ख्यातीता अपीति सिद्धः पुद्गलास्तिकायादनंतगुणाऽद्धासमया द्रव्यार्थतयेति अंकं द्रव्या
र्थतया परस्परमल्पबहुत्वमिदानीमेतेषामेव प्रदेशार्थतया तदाह ८ एएसि णं भंते धम्मास्तिकायाऽधर्म्मास्तिकाय एतौ द्वावपि पर
स्परं प्रदेशार्थतया तुल्यावुभयोरपि लोकाकाशप्रदेशपरिमाणप्रदेशत्वात् शेषास्तिकायापेक्षया च सर्वस्तोकौ ततो जी
वास्तिकायः प्रदेशार्थतयाऽनंतगुणः जीवास्तिकाये जीवानामनंतत्वात् एकैकस्य च जीवस्य लोकाकाशप्रदेशपरिमाणप्रदेशत्वात् तस्मा
दपि पुद्गलास्तिकायः प्रदेशार्थतयाऽनंतगुणाः कथमिति चेत् उच्यते इह कर्मस्कंधप्रदेशा अपि तावत् सर्वजीवप्रदेशेभ्योऽनंतगुणा
एकैकस्य जीवप्रदेशस्यानंतानंतैः कर्मपरमाणुभिरावेष्टितपरिवे   ष्टितत्वात् किं पुनः सकलपुद्गलास्तिकायप्रदेशाः ततो
न वर्तिजीवास्तिकायात् पुद्गलास्तिकायः प्रदेशार्थतयाऽनंतगुणः त   स्मादप्यद्धासमयः प्रदेशार्थतयाऽनंतगुणाः एकैक
स्य पुद्गलास्तिकायप्रदेशस्य प्रागुक्तक्रमेण तत्तद्द्रव्यक्षेत्रका   लभावविशेषसंबंधभावतोऽनंतानामतीताद्धास
मयानामनंतानामनागतसमयानां भावात् तस्मादाकाशास्तिकायः प्रदे   शार्थतयाऽनंतगुणः अलोकस्य सर्वतोऽनंतभावात्
गतं प्रदेशार्थतयाऽल्पबहुत्वमिदानीं प्रत्येकं द्रव्यार्थप्रदेशार्थतयाऽऽ   ल्पबहुत्वमाह एएसि णं भंते इत्यादि सर्वस्तोको धर्म्मास्ति
कायो द्रव्यार्थतया एकत्वात् प्रदेशार्थतयाऽसंख्येयगुणः लोकाकाशप्रदेशपरिमाणप्रदेशात्मकत्वात् एवमधर्म्मास्तिकायसूत्रमपि भावनी
यं आकाशास्तिकायो द्रव्यार्थतया सर्वस्तोक एकत्वात् प्रदेशार्थतयाऽनंतगुणोऽपरिमितत्वात् जीवास्तिकायो द्रव्यार्थतया सर्वस्तोकः प्रदे
शार्थतयाऽसंख्येयगुणः प्रतिजीवं लोकाकाशप्रदेशभावात् तथा सर्वस्तोकः पुद्गलास्तिकायो द्रव्यार्थतया द्रव्याणां सर्वत्रापि स्तोकत्वा
त् स एव पुद्गलास्तिकायः स्वद्रव्यापेक्षया प्रदेशार्थतया चिंत्यमानोऽसंख्येयगुणः ननु बहवः खलु जगत्यनंतप्रदेशका अपि स्कंधा विद्यंते तत
तोऽनंतगुणाः कस्मान्न भवंतीति तदयुक्तं वस्तुतत्वापरिज्ञानात् इह हि स्तोका अनंतप्रदेशकाः स्कंधाः परमाण्वादयस्तु बहवः तथाहि वक्ष्यति सूत्रं सव्व ६१

त्थोवा अणंतपएसिया खंधा दव्वट्ठयाए परमाणुपोग्गला दव्वट्ठयाए अणंतगुणा संखेज्जपएसिया खंधा दव्वट्ठयाए संखेज्जगुणा असंखेज्जपएसिया
खंधा दव्वट्ठयाए असंखेज्जगुणा इति ततो यदा सर्वोऽपि पुद्गलास्तिकायः प्रदेशार्थतया चिंत्यते तदा अनंतप्रदेशकानां स्कंधानामतिस्तोकत्वात् पर
माणूनां चातिबहुत्वात् तेषां च पृथक् पृथक् द्रव्यत्वात् असंख्येयप्रदेशकानां च स्कंधानां परमाण्वपेक्षया असंख्येयगुणत्वादसंख्येयगुण एव
प्राप्यते नानंतगुणः अद्धासमए न पुच्छिज्जइ इति अद्धासमया द्रव्यार्थप्रदेशार्थतया न पृच्छ्यते कुत इत्याह प्रदेशाभावात् आह कथमद्धासमया
नां द्रव्यार्थता नियमो यावता प्रदेशार्थतापि तेषां विद्यत एव तथाहि यथा अनंतानां परमाणूनां समुदायः स्कंधो भण्यते स च तदवयवा
अप्रदेशाः स्वदेशादि सकलः कालोऽद्धा तदवयवास्तु समयाः प्रदेशा इति   तदयुक्तं दृष्टांतदार्ष्टांतिकवैषम्यात् परमाणूनां समुदाय स्कंद
स्कंधो भवति यदा ते सपरस्परसापेक्षतया परिणमंते परस्परनिरपे   क्षाणां केवलानां केवलपरमाणूनां स्कंधत्वायोगात् अद्धा
समयाः पुनः परस्परनिरपेक्षा एव वर्तमानसमयभावे पूर्वापरसमय   योरभावात् ततो न स्कंधत्वपरिणामस्तदभावाच्च ना
द्धासमयाः प्रदेशाः किंतु पृथक् द्रव्याण्येवेति संप्रत्यमीषां धर्म्मास्तिका   यादीनां सर्वेषां युगपत् द्रव्यार्थप्रदेशार्थतयाऽल्पबहु
त्वमाह एएसि णं भंते इत्यादि धर्म्मास्तिकायोऽधर्म्मास्तिकाय आकाशास्ति   काय एते त्रयोऽपि द्रव्यार्थतया तुल्याः सर्वस्तोकाश्च प्रत्येक
मेकसंख्याकत्वात् ततो धर्म्मास्तिकायोऽधर्म्मास्तिकाय एतौ द्वावपि प्रदेशार्थतयाऽसंख्येयगुणौ स्वस्थाने तु परस्परं तुल्या एतास्या
जीवास्तिकायो द्रव्यार्थतयाऽनंतगुणः अनंतानां जीवद्रव्याणां भावात् स एव जीवास्तिकायः प्रदेशार्थतयाऽसंख्येयगुणः असंख्येयानां प्रदेशानां
भावात् ततस्मादपि प्रदेशार्थतया जीवास्तिकायात् पुद्गलास्तिकायो द्रव्यार्थतयाऽनंतगुणः प्रतिजीवप्रदेशं ज्ञानावरणीयादिकर्म
पुद्गलस्कंधानामप्यनंतानंतानां भावात् स एव पुद्गलास्तिकायः प्रदेशार्थतयाऽसंख्येयगुणः अत्र भावना प्रागेव एतस्मादपि प्रदेशार्थ
तयात् अद्धासमया द्रव्यार्थप्रदेशार्थतयाऽनंतगुणाः अत्रापि भावना प्रागिव एतस्मादप्याकाशास्तिकायः प्रदेशार्थतयाऽनंतगुणः

प्रज्ञाप०वृत्ति॥

सर्वासु दिक्षु विदिक्षु च तस्यानंतानंतभावात् अद्धासमयस्य मनुष्यक्षेत्रमात्रभावात् ॥११॥ तदेवमस्तिकायद्वारमिदानीं चरमद्वारमाह । एएसि णं भंते जी
वाणं चरिमाणमित्यादि इह येषां चरमो भवः संभवी योग्यतया पि ते चरमास्तद्व्यतिरेकात्परे त्वचरमा अचरमास्ते अचरमाः सिद्धाश्च ते ये भव्या अपि न चरम
भवभावात् तत्र सर्वस्तोका अचरमाः अभव्यानां सिद्धानां च समुदितानामपि जघन्ययुक्तानंतकपरिमाणत्वात् तेभ्योऽनंतगुणाश्चरमाः अ
जघन्योत्कृष्टानंतानंतकपरिमाणत्वात् गतं चरमद्वारमधुना जीवद्वारमाह । एएसि णं भंते जीवाणं पोग्गलाणमित्यादि सर्वस्तोका जीवास्तेभ्यः पुद्ग
ला अनंतगुणा ३ पुद्गलेभ्योऽद्धासमया अनंतगुणा अत्र भावना प्रागेवोक्ता ३ तेभ्योऽद्धासमया अनंतगुणा अद्धाभ्यः सर्वद्रव्याणि विशेषाधिकानि क
थमिति चेदुच्यते इह ये अनंतरमद्धासमयाः पुद्गलेभ्योऽनंतगुणा उक्ताः । ते प्रत्येकं द्रव्याणि ततो द्रव्यचिंतायां तेपि परिगृह्यंते तत्र च
मध्ये सर्वजीवद्रव्याणि सर्वपुद्गलद्रव्याणि धर्मास्तिकायाधर्मास्तिकायाकाशास्तिकायद्र । व्याणि च प्रक्षिप्यंते तानि च समुदितान्यद्धासमयानामनं
तभागकल्पानीति तत्प्रक्षेपेऽपि नातिरिक्तं ज्ञानमिति तस्मादद्धासमये । भ्यः सर्वद्रव्याणि विशेषाधिकानि तेभ्यः सर्वप्रदेशा
अनंतगुणाः आकाशानंतत्वात् एतेभ्यः सर्वपर्यवा अनंतगुणा एकैकस्मि । न्नाकाशप्रदेशेऽनंतानामगुरुलघुपर्यायाणां भावात्
गतं जीवद्वारमधुना क्षेत्रद्वारमाह । खेत्ताणुवाएणं सव्वत्थोवा जीवा उड्ढ । लोयतिरियलोए इत्यादि क्षेत्रस्यानुपातोऽनुसारः क्षेत्रा
नुपातस्तेन चिंत्यमाना जीवाः सर्वस्तोका ऊर्ध्वलोकतिर्यग्लोके इह ऊर्ध्वलोकस्य यदधस्तनमाकाशप्रदेशप्रतरं यच्च तिर्यग्लोकस्य सर्वोपरि
तनमाकाशप्रतरमेतदूर्ध्वलोकतिर्यग्लोकमित्युच्यते प्रवचनप्रसिद्धं अत्रेयं भावना इह समस्तोपि चतुर्दशरज्ज्वात्मको लोकः सच त्रिधा भिद्य
ते तद्यथा ऊर्ध्वलोकस्तिर्यग्लोकोऽधोलोकश्च रुचकाच्चैतेषां विभागस्तथाहि रुचकस्याधस्तान्नवयोजनशतानि रुचकस्योपरिष्टान्नवयोज
नशतानि तिर्यग्लोकस्तस्य च तिर्यग्लोकस्याधस्तादधोलोक उपरिष्टादूर्ध्वलोकः देशोनसप्तरज्जुप्रमाण ऊर्ध्वलोकः समधिकसप्तरज्जुप्रमा
णोऽधोलोकोऽमध्येऽष्टादशयोजनशतोच्छ्रायस्तिर्यग्लोकस्तत्र रुचकसमाद्भूतलभागान्नवयोजनशतानि गत्वा यज्ज्योतिश्चक्रस्योपरितनं तिर्यग्लो ६२

कसंबंधि एकप्रादेशिकमाकाशप्रतरं तत् तिर्यग्लोकप्रतरं तस्य चोपरि यदेकप्रादेशिकमाकाशप्रतरं तदूर्ध्वलोकप्रतरं एते द्वे अपि ऊर्ध्वलो
कतिर्यग्लोक इति व्यपदिश्येते तथाभूतप्रवचनपरिभाषाप्रसिद्धेः तत्र वर्तमाना जीवाः स्तोकाः कथमिति चेदुच्यते इह ये ऊर्ध्वलोकमनुत्प
द्यमाना विवक्षितं प्रतरद्वयं स्पृशंति ये च तत्रस्था एव केवलं तत्प्रतरद्वयाध्यासिनो वर्तंते किल विवक्षितप्रतरद्वयवर्तिनस्ते येवा ऊर्ध्वलो
कोकादधोलोकमनुत्पद्यमानास्तत्प्रतरद्वयं स्पृशंति न शेषास्तेषां तदेतरविषयत्वात् अतः स्तोका एवाधिकृतप्रतरद्वयवर्तिनो जीवा नमूर्ध्वलो
कगतानामपि सर्वजीवानामसंख्येयो भागो न वरं म्रियमाणः प्राप्यते तत्र तिर्यग्लोके समुत्पद्यमाना विवक्षितं प्रतरद्वयं स्पृशंतीति कथमा
येऽकृतप्रतरद्वयसंस्पर्शिनः स्तोकाः सद्युक्तं चैतत्परिज्ञानात् तथाहि यद्य । पि नाम ऊर्ध्वलोकगतानां सर्वजीवानामसंख्येयो भागः
न वरं म्रियमाणः प्राप्यते तथापि न सर्व एव तिर्यग्लोके समुत्पद्यते । प्रभूततराणामूर्ध्वलोकः अधोलोके च समुत्पादात् तता
अधिकृतप्रतरद्वयवर्तिनः सर्वस्तोका एव तेभ्योऽधोलोकतिर्य । ग्लोके विशेषाधिकाः इह यदधोलोकस्योपरित
नमेकप्रादेशिकमाकाशप्रदेशप्रतरं यच्च तिर्यग्लोकस्य सर्वाधस्त । नमेकप्रादेशिकमाकाशप्रदेशप्रतरमेतत् द्वयमप्यधो
लोकतिर्यग्लोक इत्युच्यते तथाप्रवचनप्रसिद्धेः तत्रापि विग्रहगत्यात् । ऽवस्थितया वा वर्तंते ते विशेषाधिकाः कथमिति चेदुच्यते इह ये
अधोलोकात् तिर्यग्लोके तिर्यग्लोकाद्वाऽधोलोके इलिकागत्या समुत्पद्यमाना अधिकृतं प्रतरद्वयं स्पृशंति ये च तत्रस्था एव केवलं तत्प्रतरद्वया
ध्यासीना वर्तंते ते विवक्षितप्रतरद्वयवर्तिनो ये चापरे अधोलोकादूर्ध्वलोके समुत्पद्यमानास्तत्प्रतरद्वयं स्पृशंति ते न परिगृह्यंते तेषां स्व
स्थानेतरविषयत्वात् केवलमूर्ध्वलोकादधोलोको विशेषाधिक इत्यधोलोकात् तिर्यग्लोके इतिमागत्य समुत्पद्यमाना ऊर्ध्वलोकापेक्षया
विशेषाधिका अवाप्यंते ततो विशेषाधिकाः ३ तेभ्यस्तिर्यग्लोकवर्तिनः संख्येयगुणाः उक्तक्षेत्राद्धिकः तिर्यग्लोकक्षेत्रस्यासंख्येयगु
णत्वात् तेभ्यस्त्रैलोक्यत्रिलोकसंस्पर्शिनः संख्येयगुणाः इह ये केवलमूर्ध्वलोकस्थोऽधोलोके तिर्यग्लोके वा वर्तंते ये च विग्रहेण ऊर्ध्वलो

कतिर्यग्लोकाधोलोकौ तिर्यग्लोकौ स्पृशंति ते न गण्यंते किंतु ये विग्रहगत्यापन्ना अपि लोकान् स्पृशंति ते परिग्राह्याः सूत्रस्य विशेषविषयत्वा
त् ते च तिर्यग्लोकवर्त्तिभ्यः संख्येयगुणा एव कथमिति चेदुच्यते इह बहवः प्रतिसमयमूर्द्ध्वलोकेऽधोलोके च सूक्ष्मनिगोदा उद्वर्त्तंते ये च तिर्यग्लो
कवर्त्तिनः सूक्ष्मनिगोदा उद्वर्त्तंते यदि वाधोलोके ऊर्द्ध्वलोके वा केचित्तस्मिन्नेव वा तिर्यग्लोके समुत्पद्यंते ते न लोकत्रयसंस्पर्शिन इ
ति नाधिकृतसूत्रविषयाः तत्रोर्द्ध्वलोकाधोलोकगतानां सूक्ष्मनिगोदानामुद्वर्त्तमानानां मध्ये केचित् स्वस्थान एव ऊर्द्ध्वलोकेऽधोलोके वा
समुत्पद्यंते केचित्तिर्यग्लोके तेभ्यः संख्येयगुणा अधोलोकगता ऊर्द्ध्वलोकगता अधोलोके समुत्पद्यंते ते च तथोत्पद्यमाना अपि
लोकान् स्पृशंतीत्य संख्येयगुणाः कथं पुनरेतदवसीयते यदुत एवं प्रा णा बहवो जीवाः सदा विग्रहगत्यापन्ना लभ्यंते इति चेदुच्
यते युक्तिवशात् तथा हि प्रागुक्तमिदमत्रैव सूत्रं पर्याप्तद्वारे सव्वत्थोवा जीवा णोपज्जत्तगा णोअपज्जत्तगा अपज्जत्तगा अणंतगुणा प
ज्जत्ता संखेज्जगुणा इति ततएवं नाम पर्याप्ता बहवो यन्निततः प र्याप्ताः संख्येयगुणा नाः संख्येयगुणा नाप्यनंतगुण
१ अपर्याप्ता बहवोऽन्तरगतौ वर्त्तमाना लभ्यंते इति ४ तेभ्य ऊर्द्ध्वलो केऽधोलोके स्थिता असंख्येयगुणा उपपातक्षेत्रस्या
तिबहुत्वात् असंख्येयानां वनानां तत्र वर्त्तमानत्वात् तेभ्यो अधोलोकवर्त्तिनो विशेषाधिकाः ऊर्द्ध्वलोकक्षेत्रादधो
लोकक्षेत्रस्य विशेषाधिकत्वात् तदेवं सामान्यतो जीवानां क्षेत्रानुपातेनाल्पबहुत्वमुक्तमिदानीं चतुर्गतिदंडकक्रमेणैतदभिधित्सुरा
ह ७ खेत्ताणुवाएणं सव्वत्थोवा नेरइया तेलोक्के इत्यादि क्षेत्रानुपातेन क्षेत्रानुसारेण नैरयिकाश्चिंत्यमानाः सर्वस्तोकास्त्रिलोके लोक
त्रयसंस्पर्शिनः कथं लोकत्रयसंस्पर्शिनो नैरयिकाः कथं वा ते सर्वस्तोका इति चेदुच्यते इह ये मेरुशिखरे अंजनदधिमुखपर्वतशिखरादिषु
वा वापीषु वर्त्तमाना मत्स्यादयो नरकेषूत्पित्सव इलिकागत्या प्रदेशान् विक्षिपंति ते किल त्रैलोक्यमपि स्पृशंति नारकव्यपदेशं च लभंते त
कालमेव नरकेषूत्पन्नैर्नारकायुःप्रतिसंवेदनात् ते चैवंभूताः कतिपये इति सर्वस्तोकाः अन्ये त्वाचक्षते नारका एव यथोक्तवापीषु तिर्यक्पंचें ६३

द्रियतयोत्पद्यमानाः समुद्घातवशतो विक्षिप्तनिजात्मप्रदेशदंडाः परिगृह्यंते ते हि किल तदा नारका एव निर्विवादं तदायुःप्रतिसंवेदनात्
त्रैलोक्यसंस्पर्शिनश्च यथोक्तवापीयावदात्मप्रदेशदंडस्य विक्षिप्तत्वादिति तेभ्योऽधोलोकतिर्यग्लोकसंज्ञं प्रागुक्तप्रतरद्वयस्य संस्पर्शिनो
संख्येयगुणाः यतो बहवोऽसंख्येयेषु द्वीपसमुद्रेषु पंचेंद्रियतिर्यग्योनिका नरकेषूत्पद्यमाना यथोक्तं प्रतरद्वयं स्पृशंति तेभ्योऽपि तिर्यग्लोके
ऽसंख्येयगुणाः क्षेत्रस्यासंख्यातगुणत्वात् मंदरादिक्षेत्रादसंख्येयद्वीपसमुद्रात्मकक्षेत्रमसंख्येयगुणमित्यतोऽत एव तेऽसंख्येयगु
णाः अन्ये त्वभिदधति नारका एवासंख्येयेषु द्वीपसमुद्रेषु तिर्यक्पंचेंद्रियतयोत्पद्यमाना मारणांतिकसमुद्घातेन विक्षिप्तनिजात्मप्रदेशदंडा
इह व्याख्याता हि नारकायुःप्रतिसंवेदनान्नारका उद्वर्त्तमाना अपि च संख्येयाः प्र ण्यंते इति प्रागुक्तेभ्यः संख्येयगुणास्तेभ्योऽधोलोके ऽ
संख्येयगुणास्तस्य तेषां स्वस्थानत्वात् उक्तं नारकगतिमधिकृत्य क्षेत्रानु पातेनाल्पबहुत्वमिदानीं तिर्यग्गतिमधिकृत्याह ७
खेत्ताणुवाएणं सव्वत्थोवा तिरिक्खजोणिया उड्ढलोयतिरियलोए इत्यादि। इदं सर्वमपि सामान्यतो जीवसूत्रमिव भावनीयं
तदपि तिरश्च एव सूक्ष्मनिगोदानधिकृत्य भावितमधुना तिर्यग्योनिक। स्त्रीविषयमल्पबहुत्वमाह ७ खेत्ताणुवाएणं सव्वत्थो
वाउ तिरिक्खजोणिणीउ उड्ढलोए इत्यादि क्षेत्रानुपातेन तिर्यग्योनिकस्त्रिय श्चिंत्यमानाः सर्वस्तोका ऊर्द्ध्वलोके इह मंदरादिवापीप्रभृति
ष्वपि पंचेंद्रियतिर्यग्योनिकाः स्त्रियो भवंति ताश्च क्षेत्रस्याल्पत्वात् सर्वस्तोकाः ता ऊर्द्ध्वलोके ऊर्द्ध्वलोकतिर्यग्लोकसंज्ञप्रतरद्वये वर्त्तमा
ना असंख्येयगुणाः कथमिति चेदुच्यते यावत् सहस्रारदेवलोकस्तावद्देवा अपि गर्भव्युत्क्रांतिकतिर्यक्पंचेंद्रियतयोत्पद्यंते किंतु त
शेषकाया अपि यथासंभवमुपरिवर्त्तिनोऽपि तत्रोत्पद्यंते ततस्तासां सहस्रारांता देवा अन्ये च शेषकाया ऊर्द्ध्वलोकात्तिर्यग्लोके तिर्यक्पंचेंद्रि
यस्त्रीत्वेन तदायुःप्रतिसंवेदयमाना उत्पद्यंते या अपि तिर्यग्लोकवर्त्तिन्यस्तिर्यक्पंचेंद्रियस्त्रिय ऊर्द्ध्वलोके देवत्वेन शेषकायत्वेन चोत्पद्यमाना मारणां
तिकसमुद्घातेनोत्पत्तिदेशं निजनिजात्मप्रदेशदंडान् विक्षिपंति तास्तथाभूताः प्रतरद्वयं स्पृशंति तिर्यग्योनिकस्त्रियश्च ता अतोऽसंख्येयगुणाः क्षेत्र

स्यासंख्येयगुणत्वात् तेभ्यः त्रैलोक्ये संख्येयगुणाः यस्मादधोलोकात् भवनपतिव्यंतरनारकाः शेषकाया अपि च ऊर्द्ध्वलोके पि तिर्यग्लोके वा द्वींद्रियत्त्री
द्रियतया उत्पद्यमाना ऊर्द्ध्वलोकाद्वा अधोलोके च समवहता निजनिजांगप्रदेशदंडैः त्रीनपि लोकान्स्पृशंतीति प्रभूताश्चेति तथा तिर्यग्योनिक
स्त्रीतिर्यक्स्त्री प्रतिसंवेदनात् तिर्यग्योनिकस्त्रियस्ततः संख्येयगुणाः एताभ्यः अधोलोकतिर्यग्लोके ऊर्द्ध्वलोकतिर्यग्लोकसंज्ञप्रतरद्वयवर्त्तमा
नाः संख्येयगुणाः बहवो हि नारकादयः समुद्घातमंतरेणापि तिर्यग्लोकतिर्यक्पंचेंद्रियस्त्रीत्वेनोत्पद्यंते तिर्यग्लोकवर्त्तिन्यश्च स्त्रीवान तिर्यग्योनि
कस्त्रीत्वेनाधोलौकिकग्रामेषु पि च तेवतत्रोत्पद्यमाना यथोक्तं प्रतरद्वयं स्पृशंतीति तिर्यग्योनिकस्त्रियः प्रतिसंवेदनाश्च तिर्यग्योनिस्त्रियो पि तथा
ऽधोलौकिकग्रामा योजनसहस्रावगाहाः पर्यंतेऽर्वाक् क्वचित्प्रदेशोनवयो जनशतावगाहा अपि तत्र काश्चित्तिर्यग्योनिकस्त्रियो वस्थाने
नापि यथोक्तं प्रतरद्वयाध्यासितत्वात् तेनैवं ते पि वाह्यः संख्येय गुणाः एताभ्यो ऽधोलोके संख्येयगुणाः यतोऽधोलौकि
कग्रामाः सर्वेऽपि च समुद्रा योजनसहस्रावगाहास्ततो नवयोजनशता नामधस्तात् यावर्त्तंत मत्स्यप्रभृतिका स्त्रियस्ताः स्वस्थान
त्वात् प्रभूता इति संख्येयगुणाः ताभ्योपि तिर्यग्लोके संख्येयगुणाः क्षे त्रस्यासंख्येयगुणत्वात् उक्तं तिर्यग्गतिमधिकृत्याल्पब
हुत्वमिदानीं मनुष्यगतिविषयमाह ॥ खेत्ताणुवाएणमित्यादि क्षेत्रानुपातेन मनुष्या चिंत्यमाना त्रैलोक्ये त्रैलोक्यसंस्पर्शिनः सर्वस्तो
काः यतो ये ऊर्द्ध्वलोकादधोलौकिकग्रामेषु समुत्पित्सवो मारणांतिकसमुद्घातेन समवहता ये वा ततः केचित्समुद्घातवशाद्वहिर्निर्गतैः
स्वात्मप्रदेशैस्त्रीनपि लोकान्स्पृशंति ये पि वैक्रियसमुद्घातमाहारकसमुद्घातं वा गता तथाविधप्रयत्नविशेषात् दूरतरमूर्द्ध्वमधश्च विक्षिप्तात्मप्र
देशा ये च केवलिसमुद्घातगतास्ते पि त्रीनपि लोकान्स्पृशंतीति स्तोका इति सर्वस्तोकाः तेभ्य ऊर्द्ध्वलोकतिर्यग्लोकसंज्ञप्रतरद्वयसंस्पर्शिनो
भवंति विद्याधराणामपि च मंदरादिषु गमनं तत्र च रुधिरादिपुद्गलेषु संमूर्छिममनुष्याणामुत्पादः इति विद्याधराणां रुधिरादिपुद्गलसंमिश्रा
यदा गच्छंति तदा संमूर्छिममनुष्या अपि यथोक्तं प्रतरद्वयं स्पृशंति तत्रोपजायंते वा ततो बहव इत्यसंख्येयगुणाः तेभ्यो ऽधोलोकतिर्यग्लोके ऽधो

लोकतिर्यग्लोकसंज्ञप्रतरद्वये संख्येयगुणाः यतो ऽधोलौकिकग्रामेषु स्वभावत एव बहवो मनुष्यास्ततो ये तिर्यग्लोकान्मनुष्येभ्यः शेष
कायेभ्यो वा अधोलौकिकग्रामेषु गर्भव्युत्क्रांतिकमनुष्यत्वेन संमूर्छिममनुष्यत्वेन वा समुत्पित्सवो ये वा अधोलोकादधोलौकिकग्रामरूपात्
शेषाद्वा मनुष्येभ्यः शेषकायेभ्यो वा तिर्यग्लोके गर्भव्युत्क्रांतमनुष्यत्वेन वा संमूर्छिममनुष्यत्वेन वा समुत्पत्तुकामास्ते यथोक्तं किल प्रतरद्वयं स्पृ
शंति बहुतराश्चेते ततः स्वस्थानतोपि केचिदधोलौकिकग्रामेषु यथोक्तप्रतरद्वयस्पर्शिन इति इति प्रागुक्तेभ्यः संख्येयगुणाः तेभ्यः ऊर्द्ध्वलो
के संख्येयगुणाः सौमनसादिषु क्रीडार्थं चैत्यवंदननिमित्तं वा प्रभूततराणां विद्याधरचारणमुनीनां संभवात् तत्र च यथायोगं रुधिरादिपुद्गला
योगतः संमूर्छिममनुष्यसंभवात् तेभ्यो ऽधोलोके संख्येयगुणाः स्वस्थानत्वेन बहुत्वसंभवात् तेभ्यस्तिर्यग्लोके संख्येयगुणाः क्षेत्रस्य संख्ये
यगुणत्वात् स्वस्थानत्वाच्च मनुष्याणां क्षेत्रानुपातेन मानुषीविषयमल्पबहुत्वमाह । खेत्ताणुवाएणमित्यादि क्षेत्रानुपातेन मानुष्यश्चिं
त्यमाना सर्वस्तोकास्त्रैलोक्यस्पर्शिन्य ऊर्द्ध्वलोकादधोलोके समुत्पि त्सूनां मारणांतिकसमुद्घातवशाद्विनिर्गतदूरतरात्म
प्रदेशानामथवा वैक्रियसमुद्घातगतानां केवलिसमुद्घातगतानां वा त्रैलो क्यसंस्पर्शनात् तासां चातिस्तोकत्वमिति सर्वस्तोकाः ताभ्य
स्य ऊर्द्ध्वलोकतिर्यग्लोकसंज्ञप्रतरद्वये संख्येयगुणाः वैमानिकदेवानां शेषकायाणां वोर्द्ध्वलोकात्तिर्यग्लोके मनुष्यस्त्रीत्वेनोत्प
द्यमानानां तथा तिर्यग्लोकगतमनुष्यस्त्रीणामूर्द्ध्वलोके समुत्पित्सूनां मारणांतिकसमुद्घातवशाद् दूरतरमूर्द्ध्वं विक्षिप्तात्मप्रदेशानामद्यापि का
लमकुर्वतीनां यथोक्तं प्रतरद्वयं संस्पर्शनसंभवात् तासां चान्यापेक्षया बहुतरत्वात् ताभ्योऽधोलोकतिर्यग्लोके प्रागुक्तस्वरूपप्रतरद्वये सं
ख्येयगुणाः तिर्यग्लोकान्मनुष्यस्त्रीत्वेन शेषेभ्यो वाऽधोलौकिकग्रामेषु उत्पद्यमानानामधोलौकिकग्रामरूपात् वा बाह्यात् तिर्यग्लोके मनु
ष्यस्त्रीत्वेनोत्पित्सूनां च तासामधोलौकिकग्रामेषु च स्वस्थानतोपि यथोक्तप्रतरद्वयसंस्पर्शसंभवात् तासां च प्रागुक्ताभ्यो ऽतिबहुत्वात् ताभ्यो
ऽतिबहुत्वात् ताभ्योपि ऊर्द्ध्वलोके संख्येयगुणाः क्रीडार्थं चैत्यवंदनानिमित्तं वा सौमनसादिषु प्रभूततराणां संभवात् ताभ्योपि अधोलो

प्रज्ञा० वृत्तिः॥

केसंख्येयगुणाः स्वस्थानत्वेनतत्रापिबहूनांभावात्‌ तिर्यग्लोकेसंख्येयगुणाः क्षेत्रस्यसंख्येयगुणत्वात्स्वस्थानत्वाच्चगतंमनुष्यानधि
कृत्याल्पबहुत्वमिदानींदेवगतिमधिकृत्याह खेत्ताणुवाएणंसव्वत्थोवादेवाउड्ढलोएइत्यादि क्षेत्रानुपातेनचिंत्यमानादेवाःसर्वस्तो
काऊर्ध्वलोकेवैमानिकानामेवतत्रभावात्तेषांचाल्पत्वात्‌ यद्यपिभवनपतिप्रभृतयोजिनेन्द्रजन्ममहादौमंदरादिषुगच्छंति तथापिस्तोकाएव
इतिसर्वस्तोकाः तेभ्यऊर्ध्वलोकतिर्यग्लोकेऊर्ध्वलोकतिर्यग्लोकसंज्ञप्रतरद्वयेऽसंख्येयगुणास्तद्धिज्योतिष्काणांप्रत्यासन्नमितिस्वस्थानंतथाभ
वनपतिव्यंतरज्योतिष्कामंदरादौसौधर्मादिकल्पगताःस्वस्थानगमनागमनतस्तथासौधर्मादिषुदेवत्वेनोत्पित्सवोदेवायुःप्रतिसंवेदयमानाःस्वो
त्पत्तिदेशमभिगच्छंतीतितद्योग्यंप्रतरद्वयंस्पृशंतिततःसामस्त्येनतद्योग्यप्र तरद्वयसंस्पर्शिनःपरिभाव्यमानाअतिबहवइतिपूर्वोक्ते
भ्यःसंख्येयगुणाः तेभ्यस्त्रैलोक्यसंस्पर्शिनःसंख्येयगुणायतोभव नपतिव्यंतरज्योतिष्कवैमानिकादेवास्तथाविधप्रयत्नवि
शेषवशात्वैक्रियसमुद्घातेनसमवहताःसंतस्त्रीनपिलोकान्स्पृशंति तेचबहवःसमवहताःप्रागुक्तप्रतरद्वयस्पर्शिभ्यःसंख्ये
यगुणाःकेवलावदातमोपलभ्यंतइतिसंख्येयगुणाः तेभ्योऽधोलो कतिर्यग्लोकेअधोलोकतिर्यग्लोकसंज्ञप्रतरद्वये
वर्त्तमानाःसंख्येयगुणास्तद्धिप्रतरद्विकंभवनपतिव्यंतरदेवानांप्रत्यासन्न यास्वस्थानंतथाबहवोभवनपतयःस्वभवनस्थास्तिर्यग्लोकगमा
गमेनतथावर्त्तमानास्तथावैक्रियसमुद्घातेनसमवहतास्तथातिर्यग्लोकवर्त्तिनस्तिर्यक्पंचेंद्रियमनुष्यावाभवनपतित्वेनोत्पद्यमानाभवनप
त्यायुरनुभवंतस्तद्योग्यप्रतरद्वयसंस्पर्शिनःअतिबहवइतिसंख्येयगुणाः तेभ्योऽधोलोकेसंख्येयगुणाभवनपतीनांस्वस्थानमितिकृ
त्वातेभ्यस्तिर्यग्लोकेसंख्येयगुणाज्योतिष्कव्यंतराणांस्वस्थानत्वात्‌ अधुनादेवीरधिकृत्याल्पबहुत्वमाह खेत्ताणुवाएणंसव्वत्थोवाओदे
वीओउड्ढलोएइत्यादि सर्वदेवसूत्रमिवाविशेषेणभावनीयं तदेवमुक्तंदेवविषयमौघिकमल्पबहुत्वमिदानींभवनपत्यादिविशेषविषयं
प्रतिपिपादयिषुःप्रथमंभवनपतिविषयमाह खेत्ताणुवाएणंसव्वत्थोवाभवणवासीउड्ढलोएइत्यादि क्षेत्रानुपातेनभवनवासिनोदे ६५

वश्चिंत्यमानाःसर्वस्तोकाऊर्ध्वलोकेतथाहि केषांचित्सौधर्मादिष्वपिकल्पेषुपूर्वसांगतिकनिश्रयागमनंभवति केषांचित्मंदरेतीर्थकरजन्मम
हिमानिमित्तंनंदीश्वरादिष्वष्टाह्निकानिमित्तंपरेषांमंदरादिषुक्रीडानिमित्तंगमनमेतेचसर्वेऽपिस्तोकाइतिसर्वस्तोकाऊर्ध्वलोके तेभ्यऊर्ध्वलो
कतिर्यग्लोकसंज्ञप्रतरद्वयेऽसंख्येयगुणाःकथमितिचेदुच्यते इहतिर्यग्लोकस्थावैक्रियसमुद्घातेनसमवहताऊर्ध्वलोकंतिर्यग्लोकंच
स्पृशंति तथायेतिर्यग्लोकस्थाएवमारणांतिकसमुद्घातेनसमवहताऊर्ध्वलोकेसौधर्मादिषुदेवलोकेषुबादरपर्याप्तपृथिवीकायिक
तयाबादरपर्याप्तप्रत्येकवनस्पतिकायिकतयावाशुभमणिविमानादिषुस्थानेषूत्पत्तुकामाअद्यापिस्वमायुःप्रतिसंवेदयमानानपारभ
विकपृथिवीकायिकाद्यायुः द्विविधाहिमारणांतिकसमुद्घातसमवहताः । केचित्पारभविकमायुःप्रतिसंवेदयंतेकेचिन्नेतितथाचोक्तंप्र
ज्ञप्तौ जीवेणंभंतेमारणंतियसमुग्घाएणंसमोहएसमोहणित्ताजे भविएमंदरस्सपव्वयस्सपुरच्छिमेणंबायरपुढविकाइयत्ता
एउववज्जित्तएसेणंभंतेकिंतत्थगएउववज्जेज्जाउयाहुपडिनियत्तिय । त्तित्ताउववज्जइ गोयमा अत्थेगइएतत्थगएचेवउववज्ज
इ अत्थेगइएततोपडिनियत्तइत्तादोच्चंपिमारणंतियसमुग्घाए णंसमोहणइसमोहणित्ता ततोपच्छाउववज्जइत्तिइहभवा
युःप्रतिसंवेदनाच्चतेभवनवासिनएवलभ्यंतेइत्यदोषः । विक्षिप्तात्मप्रदेशदंडास्तथाऊर्ध्वलोकगमनागमनतस्तत्र
द्वयप्रत्यासन्नक्रीडास्थानतस्तद्योग्यंप्रतरद्वयंस्पृशंतिततःप्रागुक्तेभ्यःसंख्येयगुणाः तेभ्यस्त्रैलोक्येत्रैलोक्यसंस्पर्शिनःसंख्येयगु
णाः यतस्तेऊर्ध्वलोकेतिर्यक्पंचेंद्रियाभवनपतित्वेनोत्पत्तुकामास्तथास्वस्थानेवैक्रियसमुद्घातेनमारणांतिकप्रथमसमुद्घातेनवातथा
विधतीव्रप्रयत्नविशेषेणसमवहतास्त्रैलोक्यसंस्पर्शिनइतिसंख्येयगुणाः परस्थानसमवहतेभ्यःस्वस्थानसमवहतानांसंख्येयगुणत्वात्‌
तेभ्योऽधोलोकतिर्यग्लोकेअधोलोकतिर्यग्लोकसंज्ञप्रतरद्वयेऽसंख्येयगुणाः स्वस्थानप्रत्यासन्नतयातिर्यग्लोकगमनागमनभाव
तःस्वस्थानस्थिताक्रोधादिसमुद्घातगमनस्थबहूनांतद्योग्यप्रतरद्वयसंस्पर्शनाभावात्‌ तेभ्यस्तिर्यग्लोकेऽसंख्येयगुणाःसमवसरणादौवंदननि

पि नंदीश्वरवरमणीयेषु क्रीडानिमित्तमागमनसंभवादागमनाच्च चिरकालमवस्थानात् तेभ्योऽधोलोके संख्येयगुणा भवनवासिनामधोलो-
कस्य स्वस्थानत्वात् एवं भवनवासिदेवीगतमप्यल्पबहुत्वं भावनीयं संप्रति व्यंतरगतमल्पबहुत्वमाह खेत्ताणुवाएणमित्यादि क्षेत्रानुपातेन चिंत्य-
माना व्यंतराः सर्वस्तोकाः ऊर्ध्वलोके केषांचित् मेरुपंडकवनादौ गमनभावात् तेभ्य ऊर्ध्वलोकतिर्यग्लोकप्रतरद्वयरूपे असंख्येयगुणाः
केषांचित् स्वस्थानान्तर्वर्त्तितया अपरेषां स्वस्थानप्रत्यासन्नतया अन्येषां बहूनां मंदरादिषु गमनागमनभावात् तौ लोकप्रतरद्वयं स्पृशंति तेषां च स-
र्वेषां समुदायेन चिंत्यमानानामतिबहुत्वभावात् तेभ्यस्त्रैलोक्ये संख्येयगुणाः यतो लोकत्रयवर्त्तिनो विवक्षितास्तथाविधप्रयत्नविशेषवशा-
तो वैक्रियसमुद्घातेन समवहताः संतस्त्रीनपि लोकानात्मप्रदेशैः स्पृशंति ते च प्रागुक्तेभ्योऽतिबहव इति संख्येयगुणास्तेभ्योऽधोलो-
कतिर्यग्लोकप्रतरद्वयरूपे असंख्येयगुणाः अस्मिन्बहूनां व्यंतराणां स्वस्थानं ततस्तत्संस्पर्शिनो बहव इत्यसंख्येयगुणाः अधोलो-
के संख्येयगुणाः अधोलौकिकग्रामेषु तेषां स्थानभावात् बहूनामधोलोके क्रीडार्थं गमनभावात् तेभ्यस्तिर्यग्लोके
संख्येयगुणाः तिर्यग्लोकस्य तेषां स्वस्थानत्वात् एवं व्यंतरदेवीविषयमप्यल्पबहुत्वं वक्तव्यं संप्रति ज्योतिष्कविषयमल्पबहुत्वमाह
खेत्ताणुवाएणं सव्वत्थोवा जोइसिया इत्यादि क्षेत्रानुपातेन ज्योतिष्काश्चिंत्यमानाः सर्वस्तोकाः ऊर्ध्वलोके केषांचिदेव मंदरतीर्थ-
करजन्ममहोत्सवनिमित्तमपरेषां केषांचित् मंदरादिषु क्रीडानिमित्तं गमनसंभवात् तेभ्य ऊर्ध्वलोकतिर्यग्लोकप्रतरद्वयरूपे असंख्येयगु-
णाः स्वप्रतरद्वयं केचित् स्वस्थानस्थिता अपि स्पृशंति प्रत्यासन्नत्वात् अपरे वैक्रियसमुद्घातसमवहता अन्ये ऊर्ध्वलोकगमनागमनभावतस्ततोऽ-
धिकृतप्रतरद्वयस्पर्शिनः प्रभूता इत्यसंख्येयगुणाः तेभ्यस्त्रैलोक्ये त्रैलोक्यसंस्पर्शिनः संख्येयगुणाः ये हि ज्योतिष्कास्तथाविधतीव्रप्रयत्नवै-
क्रियसमुद्घातसमवहतास्त्रीनपि लोकान्स्वप्रदेशैः स्पृशंति ते स्वभावतोऽप्यतिबहव इति संख्येयगुणाः तेभ्योऽधोलोकति-
र्यग्लोकप्रतरद्वयवर्त्तमाना असंख्येयगुणाः यतो बहवोऽधोलौकिकग्रामेषु समवसरणादिनिमित्तमधोलोके क्रीडानिमित्तं गमनागमन- ६६

भावतो बहवश्चाधोलोकाज्ज्योतिष्केषु समुत्पद्यमाना यथोक्तं प्रतरद्वयं स्पृशंति तावायठं ततः पूर्वोक्तेभ्यः संख्येयगुणाः तेभ्यः संख्येयगु-
णा अधोलोके बहूनामधोलोके क्रीडानिमित्तमधोलौकिकग्रामेषु समवसरणादिषु चिरकालमवस्थानात् तेभ्योऽसंख्येयगुणास्ति-
र्यग्लोके तिर्यग्लोकस्य तेषां स्वस्थानत्वात् एवं ज्योतिष्कदेवीसूत्रमपि भावनीयं संप्रति वैमानिकदेवविषयमल्पबहुत्वमाह खेत्ता-
णुवाएणं सव्वत्थोवा वेमाणिया देवा उड्ढलोयतिरियलोए इत्यादि क्षेत्रानुपातेन क्षेत्रानुसारेण चिंत्यमाना वैमानिका देवाः सर्वस्तोका ऊ-
र्ध्वलोकतिर्यग्लोके ऊर्ध्वलोकतिर्यग्लोकसंज्ञप्रतरद्वये यतो ये अधोलोके तिर्यग्लोके वा वर्त्तमाना जीवा वैमानिकेषूत्पद्यंते ये
च तिर्यग्लोके वैमानिका गमनागमनं कुर्वंति ये च विवक्षितप्रतरद्वयाध्यासि क्रीडास्थानसंस्थिता ये च तिर्यग्लोकस्थिता एव वैक्रिय-
समुद्घातं मारणांतिकसमुद्घातं वा कुर्वाणास्तथाविधप्रयत्नविशेषात् ऊर्ध्वमात्मप्रदेशान्दंडं निसृजंति ते विवक्षितं प्रतरद्वयं स्पृशं-
ति ते चाल्पा इति सर्वस्तोकाः तेभ्यस्त्रैलोक्ये संख्येयगुणाः कथमिति चेदुच्यते इह ये अधोलौकिकग्रामेषु
समवसरणादिनिमित्तमधोलोके वा क्रीडादिनिमित्तं गताः संतो वैक्रियसमुद्घातं मारणांतिकसमुद्घातं वा कुर्वाणास्त-
थाविधप्रयत्नविशेषादूर्ध्वं विक्षिप्तात्मप्रदेशदंडा ये च वैमानिकभवादिलिकागत्योत्पद्यमाना अधोलौकिकग्रामेषु समुत्प-
द्यंते ते किल त्रीनपि लोकान्स्पृशंति बहवश्च पूर्वोक्तेभ्य इति संख्येयगुणाः तेभ्योऽधोलोकतिर्यग्लोकप्रतरद्वयसंज्ञे संख्येय-
गुणाः अधोलौकिकग्रामेषु समवसरणादौ गमनागमनभावतो विवक्षितप्रतरद्वयाध्यासिसमवसरणादौ चावस्थानतो बहूनां यथो-
क्तप्रतरद्वयसंस्पर्शनभावात् तेभ्योऽधोलोके संख्येयगुणा अधोलौकिकग्रामेषु बहूनां समवसरणादाववस्थानभावात् तेभ्यस्तिर्यग्लो-
के संख्येयगुणाः बहुषु समवसरणेषु बहुषु च क्रीडास्थानेषु बहूनामवस्थानभावात् तेभ्य ऊर्ध्वलोके असंख्येयगुणाः ऊर्ध्वलोकस्य
३ स्वस्थानत्वात् तत्र च सदैव बहुतरभावात् एवं वैमानिकदेवीविषयमपि सूत्रं भावनीयं संप्रत्येकेंद्रियादिगतमल्पबहुत्वमाह खेत्ताणु-

वाएगिंदिया इत्यादि क्षेत्रानुपातेन चिंत्यमानाः एकेंद्रिया जीवाः सर्वस्तोकाः ऊर्द्धलोकतिर्यग्लोके ऊर्द्धलोकतिर्यग्लोकसंज्ञप्रतरद्वये यतो ये तत्रस्था
एव केचन ये वा ऊर्द्धलोकात् तिर्यग्लोके तिर्यग्लोकाद्वा ऊर्द्धलोके समुत्पित्सवः कृतमारणांतिकसमुद्घातास्ते किल विवक्षितं प्रतरद्वयं स्पृशंति
स्वल्पाश्चेति सर्वस्तोकाः तेभ्यः अधोलोकतिर्यग्लोके विशेषाधिकाः यतो ये अधोलोकात् तिर्यग्लोके तिर्यग्लोकाद्वा अधोलोके इलि
कागत्या समुत्पद्यमाना विवक्षितं प्रतरद्वयं स्पृशंति तेभ्यश्च ऊर्द्धलोकाद्वा अधोलोको विशेषाधिक इति ते बहवो अधोलोकात् तिर्यग्लोके समुत्पद्य
माना अवाप्यंते इति विशेषाधिकाः तेभ्यस्तिर्यग्लोके असंख्येयगुणाः उक्तप्रतरद्विकक्षेत्रात् तिर्यग्लोकक्षेत्रस्यासंख्येयगुणत्वात् तेभ्यस्त्रै
लोक्ये असंख्येयगुणाः बहवो हि ऊर्द्धलोकादधोलोकाद्वा ऊर्द्धलोके   समुत्पद्यंते तेषां च मध्ये बहवो मारणांतिकसमुद्घातवशाद्वि
क्षिप्तात्मप्रदेशदंडास्त्रीनपि लोकान् स्पृशंतीति ते भवंत्यसंख्येयगुणा   स्तेभ्य ऊर्द्धलोके असंख्येयगुणा उपपातक्षेत्रस्यातिब
हुत्वात् तेभ्यः अधोलोके विशेषाधिकाः ऊर्द्धलोकक्षेत्रादधोलो   कक्षेत्रस्य विशेषाधिकत्वात् एवमपर्याप्तविषयं पर्याप्तवि
षयं च सूत्रं भावयितव्यमधुना द्वींद्रियविषयमल्पबहुत्वमाह च खेत्ताणु   वाएणं सव्वत्थोवा बेइंदिया इत्यादि क्षेत्रानुपातेन क्षेत्रा
नुसारेण चिंत्यमाना द्वींद्रियाः सर्वस्तोकाः ऊर्द्धलोके ऊर्द्धलोकस्यैकदेशे   तेषां संभवात् तेभ्यः ऊर्द्धलोकतिर्यग्लोके प्रतरद्वयरूपेऽ
संख्येयगुणाः यतो ये ऊर्द्धलोकात् तिर्यग्लोके तिर्यग्लोकाद्वींद्रियत्वेन समुत्पत्तुकामास्तदायुरनुभवंत इति कांगत्या समुत्पद्यंते ये च द्वींद्रिया ए
व तिर्यग्लोकादूर्द्धलोके ऊर्द्धलोकाद्वा तिर्यग्लोके द्वींद्रियत्वेनान्यत्वेन वा समुत्पत्तुकामाः कृतप्रथममारणांतिकसमुद्घाता अत एव द्वींद्रिया
युः प्रतिसंवेदयमानाः समुद्घातवशाद्दूरतरं विक्षिप्तनिजात्मप्रदेशदंडा येवमुक्तप्रतरद्वयाध्यासितक्षेत्रसमासीना स्तेप्युक्तप्रतरद्वयसंस्पर्शि
नो बहवश्चेति प्रागुक्तेभ्यः संख्येयगुणास्तेभ्यस्त्रैलोक्ये असंख्येयगुणा यतो द्वींद्रियाणां प्राचुर्येणोत्पत्तिस्थानान्यधोलोके तस्मादपि च प्रभू
ता तिर्यग्लोके तत्रापि ये द्वींद्रिया अधोलोकादूर्द्धलोके द्वींद्रियत्वेनान्यत्वेन वा समुत्पत्तुकामाः कृतप्रथममारणांतिकसमुद्घाताः समुद्घातवशा ६७

द्वात्मनिर्देशं यावत् विक्षिप्तात्मप्रदेशदंडास्ते द्वींद्रियायुः प्रतिसंवेदयमाना ये वा ऊर्द्धलोके द्वींद्रियाः शेषकायाद्वा द्वींद्रियत्वेन समुत्पद्यमाना द्वींद्रिया
युरनुभवंति ये च द्वींद्रियास्तिर्यग्लोकादधोलोके द्वींद्रियत्वेन शेषकायत्वेन वा उत्पित्सवः कृतप्रथममारणांतिकसमुद्घाता द्वींद्रियायुरनुभवंतः
समुद्घातवशादात्मनिर्देशं यावद्विक्षिप्तात्मप्रदेशदंडास्तेप्यधोलोकप्रतरद्वयं स्पृशंति प्रभूताश्चेति प्राग्वोक्ताद्भ्यः संख्येयगुणास्तेभ्यः अधोलो
के संख्येयगुणाः तत्रात्युत्पत्तिस्थानानामतिप्रभूतानां भावात् तेभ्योपि तिर्यग्लोके संख्येयगुणाः अतिप्रभूततराणां योनिस्थानानां तत्र भावात्
यथेदमौघिकं द्वींद्रियसूत्रं तथा पर्याप्तापर्याप्तद्वींद्रियसूत्रे अपि औघिकपर्याप्तापर्याप्तत्रींद्रियचतुरिंद्रियपर्याप्तापर्याप्तसूत्राणि भावनीयानि सांप्रतमौघि
कपंचेंद्रियविषयमल्पबहुत्वमाह च खेत्ताणुवाएणं सव्वत्थोवा पंचेंदिया   तेलोके इत्यादि क्षेत्रानुपातेन चिंत्यमानाः पंचेंद्रियाः स
र्वस्तोकास्त्रैलोक्यसंस्पर्शिनः यतो ये अधोलोकादूर्द्धलोके ऊर्द्धलो   काद्वा अधोलोके शेषकायाः पंचेंद्रियायुरनुभवंत इति का
गत्या समुत्पद्यंते ये च पंचेंद्रिया ऊर्द्धलोकादधोलोके अधोलो   ।के अधोलोकाद्वा ऊर्द्धलोके शेषकायत्वेन पंचेंद्रि
यत्वेनोत्पित्सवः कृतमारणांतिकसमुद्घाता इतस्ततश्चात्मनिर्देशं यावत् वि   क्षिप्तात्मप्रदेशदंडाः पंचेंद्रियायुरद्याप्यनुभवंति ते त्रै
लोक्यसंस्पर्शिनः स्वल्पाश्चेति सर्वस्तोकाः तेभ्य ऊर्द्धलोकतिर्यग्लोके प्रत   रद्वयरूपे संख्येयगुणाः उपपातेन समुद्घातेन वा यथोक्त
प्रतरद्वयसंस्पर्शसंभवात् तेभ्यः अधोलोकतिर्यग्लोके संख्येयगुणा अतिप्रभूततराणामुपपातसमुद्घाताभ्यामधोलोकतिर्यग्लोक
संज्ञप्रतरद्वयस्पर्शनाभावात् तेभ्य ऊर्द्धलोके संख्येयगुणाः वैमानिकानामवस्थानभावात् तेभ्यः अधोलोके संख्येयगुणाः वैमानिकदे
वेभ्यः संख्येयगुणानां नैरयिकादीनां तत्र भावात् तेभ्यस्तिर्यग्लोके असंख्येयगुणाः संमूर्च्छिमजलचरस्थलचरखचरादीनां व्यंतरज्योतिष्काणां संमूर्च्छिम
मनुष्याणां च तत्र भावात् एवं पंचेंद्रियापर्याप्तसूत्रमपि भावनीयं च पंचेंद्रियपर्याप्तसूत्रमिदं खेत्ताणुवाएणं सव्वत्थोवा पंचेंदिया पज्जत्तया उड्ढलो
ए इत्यादि क्षेत्रानुपातेन चिंत्यमानाः पंचेंद्रियाः पर्याप्ताः सर्वस्तोकाः ऊर्द्धलोके प्रायो वैमानिकानामेव तत्र भावात् तेभ्य ऊर्द्धलोकतिर्यग्लो

केप्रतरद्वयरूपे असंख्येयगुणाः विवक्षितप्रतरद्वयप्रत्यासन्नज्योतिष्काणां तदध्यासितक्षेत्राश्रितव्यंतरज्योतिष्कविद्याधरचारणमुनितिर्यक्पं
चेंद्रियाणामूर्ध्वलोकतिर्यग्लोके च गमनागमने कुर्वतामधिकृत्य प्रतरद्वयसंस्पर्शात् तेभ्यस्त्रैलोक्ये त्रैलोक्यसंस्पर्शिनः संख्येयगुणाः कथमि
ति चेदुच्यते यतो ये भवनपतिव्यंतरज्योतिष्कवैमानिका विद्याधरा वाऽधोलोकस्थाः कृतवैक्रियसमुद्घातास्तथाविधप्रयत्नविशेषादूर्ध्वलो
के विक्षिप्तात्मप्रदेशदंडास्त्रीनपि लोकान् स्पृशंतीति संख्येयगुणास्तेभ्योऽधोलोकतिर्यग्लोकप्रतरद्वयरूपे संख्येयगुणाः बहवो हि व्यं
तराः स्वस्थानप्रत्यासन्नतया भवनपतयस्तिर्यग्लोकऊर्ध्वलोके वा व्यंतरज्योतिष्कवैमानिकदेवा अधोलौकिकग्रामेषु समवसरणादौ वाऽधोलो
के क्रीडादिनिमित्तं गमनागमनं कुर्वंतस्तथा समुद्घातेन च तिर्यक्पंचेंद्रि   यः स्वस्थानप्रत्यासन्नतया अपरे तदध्यासितक्षेत्राश्रितत
याद्योर्लोकप्रतरद्वयं स्पृशंतीति ततः संख्येयगुणाः तेभ्योऽधोलोके सं   ख्येयगुणाः नैरयिकाणां भवनपतीनां च तत्रावस्थाना
त् तेभ्यः तिर्यग्लोके असंख्येयगुणास्तिर्यक्पंचेंद्रियमनुष्यव्यंतर   ज्योतिष्काणामवस्थानात् तदेवमुक्तं पंचेंद्रियाण
मल्पबहुत्वमिदानीमेकेंद्रियादीनां पृथिवीकायिकादीनां चानामौधिक   पर्याप्तापर्याप्तानां च प्रत्येकं त्रीण्यल्पबहुत्वान्याह च खेत्ताणु
वाएणं सव्वत्थोवा पुढविकाइया उड्ढलोयतिरियलोए इत्यादि इमानि पंचद   शापि सूत्राणि प्रागुक्तैकेंद्रियसूत्रवद्भावनीयानि २ सांप्रतमौ
घिकत्रसकायापर्याप्तपर्याप्तत्रसकायसूत्राण्याह च खेत्ताणुवाएणं सव्वत्थोवा तसकाइया तेलोक्के इत्यादि इमानि पंचेंद्रियसूत्रवद्भावनीया
नि गतं क्षेत्रद्वारमिदानीं बंधद्वारं वक्तव्यं बंधोपलक्षितं द्वारं बंधद्वारं तदाह च एएसिणं भंते जीवाणं आउयस्स कम्मस्स बंधगाणं अबंधगाणं प
त्यादि इहायुःकर्मबंधकानां पर्याप्तापर्याप्तानां सुप्तजागराणां समवहतानां सातवेदकानां इंद्रियोपयुक्तनोइंद्रियोपयुक्तानां साकारा
पयुक्तानाकारोपयुक्तानां समुदायेनाल्पबहुत्वं तत्र प्रत्येकं तावत् सुगमो यत्तु समुदायेषु एव न तदवगम्यते तत्र सर्वस्तोका आयुषो बंधकाः
अबंधकाः संख्येयगुणाः यतोऽनुभूयमानभवायुषि त्रिभागावशेषे परभविकमायुर्जीवा बध्नंति त्रिभागत्रिभागाद्यवशेषे वा ततो द्वौ त्रिभा ६८

गावबंधकाल एकस्त्रिभागो बंधकाल इति बंधकेभ्योऽबंधकाः संख्येयगुणाः तथा सर्वस्तोका अपर्याप्तकाः पर्याप्तकाः संख्येयगुणाः एतच्च
सूक्ष्मजीवानधिकृत्य वेदितव्यं सूक्ष्मेषु हि बाह्यव्याघाताभावतो न भवति ततस्तद्दता वाऽल्पबहूनां निष्पत्तिः स्तोकानामेव चानिष्पत्तिस्तथा सर्वस्तोकाः
सुप्ता जागराः संख्येयगुणाः एतदपि सूक्ष्मानेकेंद्रियानधिकृत्य वेदितव्यं यस्मादपर्याप्ताः सुप्ता एव लभ्यंते जागराः पर्याप्तास्तेन संख्ये
यगुणा इति तथा समवहता सर्वस्तोका यत इह समवहता मारणांतिकसमुद्घातेन परिगृह्यंते मारणांतिकश्च समुद्घातो मरणकाले न शेष
काले तथापि न सर्वेषामिति सर्वस्तोकाः तेभ्योऽसमवहता असंख्येयगुणा जीवनकालस्यातिबहुत्वात् तथा सर्वस्तोकाः सातवेदका यद
वः साधारणशरीरा अल्पप्रत्येकशरीरिणः साधारणशरीराश्च बहवोऽ   सातवेदकाः स्तोकाः सातवेदिनः प्रत्येकशरीरिणस्तु भूयांसः
सातवेदकाः असातवेदिनस्ततः स्तोकाः सातवेदकास्तेभ्योऽसात   वेदकाः संख्येयगुणाः तथा सर्वस्तोका इंद्रियोपयुक्ता
इंद्रियोपयोगो हि प्रत्युत्पन्नकालविषयस्ततस्तदुपयोगकाल   स्यास्तोकत्वात् पृच्छासमये ते स्तोका अवाप्यंते यदा
तु तमेवार्थमिंद्रियेण दृष्ट्वा विचारयति तदा नोइंद्रियो।   पयुक्तः स च पश्चात्कृततया नोइंद्रियोपयोगस्यातीता
नागतकालविषयो बहुकालत्वात् संख्येयगुणा नोइंद्रियोपयुक्तास्तथा स   र्वस्तोका अनाकारोपयुक्ता अनाकारोपयोगकालस्य स्तो
कत्वात् साकारोपयुक्ताः संख्येयगुणाः अनाकारोपयोगकालात् साकारोपयोगकालस्य संख्येयगुणत्वात् इदानीं समुदायगतं सूत्रो
क्तमल्पबहुत्वं भाव्यते सर्वस्तोका जीवा आयुःकर्मणो बंधकाः आयुर्बंधकालस्य प्रतिनियतत्वात् तेभ्यः पर्याप्ताः संख्येयगुणा यस्मादप
र्याप्ता अपि अनुभूयमानभवत्रिभागाद्यवशेषे आयुः पारभविकमायुर्बध्नंति ततो द्वौ त्रिभागावबंधकाल एको बंधकाल इति बंधकालादब
धकालः संख्येयगुणस्तेन संख्येयगुणा एवापर्याप्ता आयुर्बंधकेभ्यः तेभ्योऽप्यपर्याप्तेभ्यः सुप्ताः संख्येयगुणाः यस्मादपर्याप्तेषु च
पर्याप्तेषु च सुप्ता लभ्यंते पर्याप्ता अपर्याप्तेभ्यः संख्येयगुणा इत्यपर्याप्तेभ्यः सुप्ताः संख्येयगुणास्तेभ्यः समवहताः संख्येयगुणाः ब

प्रज्ञाप० वृत्तिः॥ ज्ञानां पर्याप्तत्वभवमारणांतिकसमुद्घाते न समवहतानां सदा लभ्यमानत्वात् तेभ्यः सातावेदकाः संख्येयगुणाः आयुर्बंधकापर्याप्तकभवेपि सा
तावेदका लभ्यमानत्वात् तेभ्य इंद्रियोपयुक्ताः संख्येयगुणाः असातावेदकानामपि इंद्रियोपयोगस्य लभ्यमानत्वात् तेभ्योऽनाकारो
पयोगोपयुक्ताः संख्येयगुणाः इंद्रियोपयोगेभ्यः नोइंद्रियोपयोगेभ्यश्च अनाकारोपयोगस्य लभ्यमानत्वात् तेभ्यः साकारोपयुक्ताः सं
ख्येयगुणा इंद्रियोपयोगेभ्यः साकारोपयोगकालस्य बहुत्वात् तेभ्यो नोइंद्रियोपयुक्ता विशेषाधिका नोइंद्रियानाकारोपयुक्ता
नामपि तत्र प्रक्षेपात् अत्र विनेयजनानुग्रहार्थं समस्तस्थापनया निदर्श्यते इह सामान्यतः किल साकारोपयुक्ता द्विनवत्यधिकं शतं १९२
ते च किल द्विधा इंद्रियसाकारोपयुक्ता नोइंद्रियसाकारोपयुक्ताश्च तत्रेंद्रि यसाकारोपयुक्ताः किलातीवाल्पा इति विंशतिसंख्याः क
ल्पितास्ततो द्विसप्तत्यधिकं शतं १७२ नोइंद्रियसाकारोपयुक्ताः नोइंद्रिया नाकारोपयुक्ता द्विपंचाशत् कल्प्यंते अतः सामान्यतः साकारो
पयुक्तेभ्य इंद्रियसाकारोपयुक्तेषु विंशतिकल्पेष्वपनीतेषु द्वि पंचाशत्कल्पेषु अनाकारोपयुक्तेषु प्रक्षि
प्तेषु चतुर्विंशत्यधिकं भवति ततः साकारोपयुक्तेभ्यो नोइंद्रि योपयुक्ता विशेषाधिकाः तेभ्यः सातावेदका विशेषाधि
काः इंद्रियोपयुक्तानामपि सातवेदकत्वात् १० तेभ्यः समवहता विशेषा धिकाः सातावेदकानामपि समवहतत्वभावात् ११ तेभ्यो जाग
रा विशेषाधिकाः समवहतानामपि केषांचित् जागरत्वात् १२ तेभ्यः पर्याप्ता विशेषाधिकाः सुप्तानामपि केषांचित् पर्याप्तत्वात् सुप्ता हि प
र्याप्ता अपर्याप्ता अपि भवंति जागरास्तु पर्याप्ता एवेति नियमः १३ तेभ्योऽपि पर्याप्तेभ्य आयुःकर्माबंधका विशेषाधिकाः अपर्याप्तानामप्यायुःकर्माबंध
कत्वभावात् १४ इदमेवाल्पबहुत्वं विनेयजनानुग्रहाय स्थापनाराशिभिः प्रदर्श्यते इह स्थापनायां पर्याप्तसत्त्वेन प्रत्यासत्तेः नवोपरितनायां पंक्तौ
आयुःकर्मबंधकाः अपर्याप्ताः समवहताः सातावेदका इंद्रियोपयुक्ता अनाकारोपयुक्ताः क्रमेण स्थाप्यंते तस्या अधस्तन्यां पंक्तौ तेषामेव प्र
दानामधस्तात् यथासं

आयुर्बंधकाः॥१॥	अपर्याप्त॥२॥	सुप्त४॥	॥	समवहता॥८॥	सातावेदका१६॥	इंद्रियोपयुक्त३२	अनागार६४॥
आयुरबंधका२५५	पर्याप्त२५४	जागरा२५२		असमवहता२४८	असातावेदका२४०	नोइंद्रियोपयुक्ताः२२४	सागार१९२॥

६९

ख्यमायुरबंधकाः पर्याप्ता जागरा असमवहता असातावेदका नोइंद्रियोपयुक्ताः साकारोपयुक्ताः स्थापना चेयं अत्रोपरितन्यां पंक्तौ सर्वाण्यपि प
दानि संख्येयगुणानि आयुःपदं स्वविषयमाश्रित्य तत्परिमाणसंख्यायामेकः स्थाप्यते ततः शेषपदानि किल जघन्येन संख्येयेन संख्येयगु
णानीति द्विगुणद्विगुणान्यंकास्तेषु स्थाप्यंते तद्यथा द्वौ चत्वारः अष्टौ षोडश द्वात्रिंशत् चतुःषष्टिः सर्वोऽपि जीवराशिरनंतानंतस्वरूपोऽप्यसत्क
ल्पनया षट्पंचाशदधिकशतद्वयपरिकल्प्यते ततोऽस्माद्राशेरायुर्बंधकादिगताः संख्याः शोधयित्वा यद्यच्छेषमवतिष्ठते तत्तत्
आयुरबंधकादीनां परिमाणं स्थापयितव्यं तद्यथा आयुरबंधकपदे द्वे शते पंचपंचाशदधिके शेषेषु यथाक्रमं द्वे शते चतुःपंचाशदधिके द्वे
शते द्विपंचाशदधिके द्वे अष्टचत्वारिंशदधिके द्वे शते चतुर्विंशत्यधिके द्विनवत्यधिकं शतं एवं च सति उपरितनपंक्तिगतान्यनाकारो
पयुक्तपर्यंतानि पदानि संख्येयगुणानि द्विगुणाधिकत्वात् ततः परं साका रोपयुक्तपदमपि संख्येयगुणं द्विगुणत्वात् शेषाणि तु नो
इंद्रियोपयुक्तादीनि प्रतिलोमं विशेषाधिकानि द्विगुणत्वस्याविक लत्वाभावात् तदेवं बंधद्वारमिदानीं पुद्गलद्वारमाह
खेत्ताणुवाएणं सव्वत्थोवा पोग्गला तेलोक्के इत्यादि इदमल्प बहुत्वं पुद्गलानां द्रव्यार्थत्वमंगीकृत्य क्षेत्रापेक्षया प्रदाया
तु तत्रावगाहक्षेत्रानुसारेण चिंत्यमानाः पुद्गलास्त्रैलोक्ये त्रैलोक्यसंस्पर्शिनः सर्वस्तोकास्त्रैलोक्यव्यापीनि पुद्गलद्रव्याणि तिस्राव:
यस्मान्महास्कंधा एव त्रैलोक्यव्यापिनस्ते चाल्पा इति तेभ्य ऊर्ध्वलोकतिर्यग्लोकेऽनंतगुणाः यतः तिर्यग्लोकस्य यः सर्वोपरितन एक
प्रादेशिकं प्रतरं यश्चाधोलोकस्य सर्वाधस्तनमेकप्रादेशिकं प्रतरमेतद्द्वयमपि प्रतरमूर्ध्वलोकतिर्यग्लोकमुच्यते तच्चानंताः संख्येयप्रदेश
का अनंता असंख्येयप्रदेशका अनंता अनंतप्रदेशकाः स्कंधाः स्पृशंतीति द्रव्यार्थतयाऽनंतगुणाः तेभ्योऽधोलोकतिर्यग्लोके प्रागुक्तप्र
कारेण प्रतरद्वयरूपे विशेषाधिकाः क्षेत्रस्य आयामविष्कंभाभ्यामनाम विशेषाधिकत्वात् तेभ्यस्तिर्यग्लोकेऽसंख्येयगुणाः क्षेत्रस्यासंख्ये
यगुणत्वात् तेभ्य ऊर्ध्वलोकेऽसंख्येयगुणाः यतस्तिर्यग्लोकक्षेत्रादूर्ध्वलोकक्षेत्रमसंख्येयगुणमिति तेभ्योऽधोलोके विशेषाधिकाः ऊ

प्रज्ञाप० वृत्तिः॥ ईषल्लोकादधोलोकस्य विशेषाधिकत्वात् देशोनसप्तरज्जुप्रमाणो ह्यूर्ध्वलोकः समधिकसप्तरज्जुप्रमाणस्त्वधोलोकः संप्रति दिगनुपातेना
ल्पबहुत्वमाह — दिसाणुवाएणं सव्वत्थोवा पोग्गला उड्ढदिसाए इत्यादि दिगनुपातेन दिगनुसारेण चिंत्यमाना नाम पुद्गलाः सर्वस्तोका ऊर्ध्व
दिशि इह रत्नप्रभायां समभूमितले मेरुमध्ये अष्टप्रादेशिको रुचकः तस्माद्विनिर्गता चतुःप्रादेशा ऊर्ध्वदिक् यावल्लोकांतमनंतरं च सर्वस्तो
काः पुद्गलाः तेभ्योऽधोदिशि विशेषाधिकाः अधोदिग् हि रुचकादेव प्रवर्तते चतुःप्रदेशा यावल्लोकांतमतस्तस्या विशेषाधिकत्वात् पुद्गला
विशेषाधिकाः तेभ्य उत्तरपूर्वस्यां दक्षिणपश्चिमायां च प्रत्येकमसंख्येयगुणाः स्वस्थाने तु परस्परं तुल्याः यतस्ते अपि दिशौ रुचकादिनिर्ग
ते मुक्तावलिसंस्थिते तिर्यग्लोकांतं ततस्तयोर्लोकांतत ऊर्ध्वलोकांतं पर्यवसिते ततो नैकैकस्यासंख्येयगुणत्वात् तत्र पुद्गला असंख्येय
गुणाः क्षेत्रं च स्वस्थाने समं ततस्तत्र पुद्गला अपि स्वस्थाने तुल्याः तेभ्यो दक्षिणपूर्वस्यामुत्तरपश्चिमायां च प्रत्येकं विशेषाधिकाः
स्वस्थाने तु परस्परं तुल्याः कथं विशेषाधिका इति चेत् उच्यते इह सौमनसगंधमादनेषु सप्तसप्तकूटानि विद्युत्प्रभ
माल्यवतोर्नव नव ततश्च कूटेषु धूमिकावश्यायादिसूक्ष्मपुद्गलाः प्रभूताः संभवंतीति ता विशेषाधिकाः स्वस्थाने तु क्षेत्रस्य
पर्वतादेश्च समानत्वात् तुल्याः तेभ्यः पूर्वस्यां दिशि असंख्येयगुणाः क्षेत्रस्यासंख्येयगुणत्वात् तेभ्यः पश्चिमायां विशेषाधिकाः अ
धोलौकिकग्रामेषु शुषिरभावतो बहूनां पुद्गलानामवस्थानभावात् दक्षिणेन विशेषाधिका बहूनां भवनशुषिरभावात् उत्तरस्यां विशेषाधि
का यत उत्तरस्यां मानससरोवरे संख्येययोजनकोटीकोटीप्रमाणमानसं सरः तत्र ये जलचराः पनकसेवालादयश्च सत्वाः तेषु अ
तिबहव इति तेषां तैजसकार्मणपुद्गलास्तत्र अधिकाः प्राप्यन्ते इति पूर्वोक्तेभ्यो विशेषाधिकाः साम्प्रतं पुद्गलविषयमल्पबहुत्वमुक्तमिदा
नीं सामान्यतो द्रव्यविषयं क्षेत्रानुपातेनाह — खेत्ताणुवाएणं सव्वत्थोवाइं दव्वाइं तेलोक्के इत्यादि क्षेत्रानुपातेन चिंत्यमानानि द्रव्याणि स
र्वस्तोकानि त्रैलोक्यस्पर्शीनि यतो धर्मास्तिकायाधर्मास्तिकायाकाशास्तिकायाः पुद्गलास्तिकायस्य महास्कंधा जीवास्तिकायस्य ७०

मारणांतिकसमुद्घातेनातीव समवहता जीवास्त्रैलोक्यव्यापिनस्ते चाल्पा इति सर्वस्तोकानि तेभ्य ऊर्ध्वलोकतिर्यग्लोके प्रागुक्तस्वरूपप्र
तरद्वयात्मके अनंतगुणानि अनंतैः पुद्गलद्रव्यैरनंतैर्जीवद्रव्यैस्तस्य संस्पर्शनात् तेभ्योऽधोलोकतिर्यग्लोके विशेषाधिकानि ऊर्ध्वलो
कतिर्यग्लोकादधोलोकतिर्यग्लोकस्य मनाक् विशेषाधिकत्वात् तेभ्य ऊर्ध्वलोके असंख्येयगुणानि क्षेत्रस्यासंख्येयगुणत्वात् तेभ्योऽ
धोलोकेऽनंतगुणानि कथमिति चेत् उच्यते इह अधोलौकिकग्रामेषु कालोऽस्ति तस्य च कालस्य तत्तत्परमाणुसंख्येयासंख्येयानंत
प्रादेशिकद्रव्यक्षेत्रकालभावपर्यायसंबंधवशात् प्रतिपरमाण्वादिद्रव्यमनंतता ततोऽनंतत्वादधोलोकेऽनंतगुणानि तेभ्यस्तिर्यग्लो
के संख्येयगुणानि अधोलौकिकग्रामप्रमाणानां खंडानां मनुष्यलोके कालद्रव्याधारभूतेषु संख्येयानामेव लभ्यमानत्वात् संप्र
ति दिगनुपातेन सामान्यतो द्रव्याणामल्पबहुत्वमाह — दिसाणुवाएणं सव्वत्थोवाइं दव्वाइं अहे दिसाए इत्यादि दिगनु
पातेन दिगनुसारेण चिंत्यमानानि द्रव्याणि सर्वस्तोकानि अधोदिशि अधोदिशि प्राग्व्यावर्णितस्वरूपायां तत ऊर्ध्वदिश्यनं
तगुणानि किं कारणमिति चेत् उच्यते इह ऊर्ध्वलोके मेरोः पंचयोजनशतिकं स्फटिकमयं कांडमस्ति तत्र च चंद्रादित्यप्र
भानुप्रवेशात् द्रव्याणां क्षणादिकालप्रतिभागोऽस्ति कालस्य च प्रागुक्तनीत्या प्रतिपरमाण्वादिद्रव्यमानंत्यात् अनंतगुणानि त
त उत्तरपूर्वस्यामीशान्यां दक्षिणपश्चिमायां नैर्ऋतकोण इत्यर्थः असंख्येयगुणानि क्षेत्रस्यासंख्येयगुणत्वात् स्वस्थाने द्वयान्यपि
परस्परं तुल्यानि समानक्षेत्रत्वात् तेभ्यो दक्षिणपूर्वस्यामाग्नेय्यामुत्तरपश्चिमायां वायव्यकोणे इति भावः विशेषाधिकानि विद्यु
त्प्रभमाल्यवत्कूटाश्रितानां धूमिकावश्यायादिसूक्ष्मपुद्गलद्रव्याणां बहूनां संभवात् तेभ्यः पूर्वस्यां दिशि असंख्येयगुणत्वात्
तेभ्यः पश्चिमायां विशेषाधिकानि अधोलौकिकग्रामेषु शुषिरभावतो बहूनां पुद्गलद्रव्याणामवस्थानभावात् ततो दक्षिणस्यां दि
शि विशेषाधिकानि बहूनां भवनशुषिरभावात् ततः उत्तरस्यां विशेषाधिकानि तत्र मानससरसि जीवद्रव्याणां तदाश्रितानां तैजसकार्मण

पुद्गलस्कंधद्रव्याणां च द्रव्याणां च प्रदेशसंख्यावान् संप्रति परमाणुसंख्येयप्रदेशानां परस्परमल्पबहुत्वमाह ॥ एगपएसिणं अंतपरमाणुपुग्गलाणं
।संखेज्जपएसियाणमित्यादि पाठसिद्धं नवरं सर्वाल्पबहुत्वानीयां सर्वत्र तथास्वाभाव्यं कारणं वाच्यं संख्यातत्वात् तथा सर्वबहुत्वप्रधानत्वमल्पबहु
त्वमाह च ॥ ॥एगपएसोगाढाणमित्यादि इह क्षेत्राधिकारतः क्षेत्रस्य प्राधान्यात् परमाणुद्व्यणुकाद्यनंतानंतकस्कंधा अपि विव
क्षिता एकप्रदेशावगाढा आधाराधेययोरभेदोपचारादेकद्रव्यत्वेन व्यवछियंते तेभ्यश्च ये तावदेकप्रदेशावगाढाः पुद्गलाः पुद्गलद्रव्याणि सर्व
लोकाकाशप्रदेशप्रमाणानीत्यर्थः नहि स कश्चिदेवं नभःप्रदेशोस्ति य एकप्रदेशावगाहनपरिणामपरिणतानां परमा
ण्वादीनामवकाशदानपरिणामेन परिणतो न वर्ततेति तेभ्यः संख्येय प्रदेशावगाढाः पुद्गलद्रव्यार्थतयासंख्येयगुणाः कथमि
ति चेदुच्यते इहापि क्षेत्रस्य प्राधान्यात् परमाणुकाद्यनंतानंतकस्कंधा द्विप्रदे शावगाढा एकद्रव्यत्वेन विवक्षितास्ततो नितरां तथाभूतानि पुद्ग
लद्रव्याणि सर्वलोकेभ्यः संख्येयगुणानि नभसो हि सर्वलोकप्रदे शास्तावन्तो असंख्येया अपि असत्कल्पनया दश ताव
त्कल्प्यंते तत्र प्रत्येकं विवक्षितोपि दशविधैकप्रदेशावगाहानि। पुद्गलद्रव्याणि लभ्यन्ते तदा द्विप्रदेशावगाहन्यस्य
ह्यन्यान्यो न परस्परसंयोगात् स्यातामिति नवत्यकप्रदेशा वगाढत्वात् द्विप्रदेशावगाढानि पुद्गलद्रव्याणि संख्येयगु
णानि एवं तस्यापि त्रिप्रदेशावगाढानि एवमुत्तरोत्तरं यावद्दश संख्येयप्रदेशावगाढानि ततः स्थितमेतदेकप्रदेशावगाढेभ्यः संख्येयप्र
देशावगाढा पुद्गला द्रव्यार्थतया संख्येयगुणा इति एवं तेभ्यः संख्येयप्रदेशा अवगाढाः पुद्गला द्रव्यार्थतया असंख्येयगुणाः असंख्यात
स्य असंख्यातभेदभिन्नत्वात् प्रदेशार्थता सूत्रं द्रव्यार्थप्रदेशार्थता सूत्रं च सुगमत्वात् स्वयं भावनीयं कालसूत्रमपि सुगमं स्वयं भावयित
व्यमिति नवरं एकसमयस्थितिका अपि पुद्गलाः एकगुणकालकादयो पि विवक्ष्याः तथैव सव्वत्थोवा अ
णंतपएसियाखंधा एगगुणकालगा परमाणुपुग्गला एगगुणकालगा दव्वट्ठयाए अणंतगुणा संखेज्जपएसियाखंधा एगगुणकालगा संखेज्जगुणा ८१

असंखेज्जपएसियाखंधा एगगुणकालगा असंखेज्जगुणा एएसि णं सव्वावा अणंतपएसियाखंधा एगगुणकालगा परमाणुपोग्गला एगगुण
कालगा अणंतगुणा इत्यादि एवं संख्येयगुणकालकानामसंख्येयगुणकालकानामनंतगुणकालकानामपि वाच्यं एवं शेषवर्णगंधरसा अपि वक्त
व्याः कर्कशमृदुगुरुलघवः स्पर्शा अपि एकप्रदेशावगाढादिनिसूत्रवद्वक्तव्याः तत्रैवं सव्वत्थोवा एगपएसोगाढा एगगुणकक्खडफासा दव्वट्ठयाए सं
खेज्जपएसोगाढा एगगुणकक्खडफासा दव्वट्ठयाए संखेज्जगुणा असंखेज्जपएसोगाढा एगगुणकक्खडफासा दव्वट्ठयाए असंखेज्जगुणा
इत्यादि एवं संख्येयगुणकर्कशस्पर्शा असंख्येयगुणकर्कशस्पर्शा अनंतगुणकर्कशस्पर्शा वाच्या एवं मृदुगुरुलघवः अवशेषाश्चत्वारः शी
तादयः स्पर्शा अपि वर्णादिवत् वक्तव्याः सूत्रपाठोल्पकालत्वेन सुगम बाह्यं भावनीयं गतं पुद्गलद्वारमिदानीं महादंडकं विवक्ष
र्गुरुराह च अह भंते इत्यादि अथ भदंत सर्वजीवाल्पबहुत्वं सर्वजी वाल्पबहुत्वं सर्वजीवाल्पबहुत्ववक्तव्यतात्मकं महा
दंडकं वर्त्तयिष्यामि रचयिष्यामीति तात्पर्यार्थः अनेन एतत् ज्ञापयति ती र्थकरा अर्थमाख्याति एवं भगवान् गणधरः स
र्वत्र तीर्थकरं प्रति प्रवर्त्तते न पुनः कदाचनापि सगुरुस्वरूपमिति तत् ज्ञापयति कुशला लपि कर्मणि विनीतेन गुरुमनापृच्छ्य न प्रवर्त्तितव्यं किं
तु तदनुज्ञया स्वस्मरणमन्यथाविनेयज्ञापनायोगात् विनयस्य हि लक्षणमिदं गुरुभिर्निर्दि ष्टं नाम्नायाद्गुरुश्चाज्ञावर्त्तकः शुश्रूषश्च सततं नित्यं स विने
यः प्रकीर्त्तितः गुरुश्चायं दुःखनीयः स च धर्मकर्त्ता च सदा धर्मप्रवर्त्तकः सत्वेभ्यो धर्मशास्त्रार्थदेशको गुरुरुच्यते इति महादंडकं वर्त्त
यिष्यामीत्युक्तं ततः प्रतिज्ञातमेव निर्वाहयति ॥ सव्वत्थोवा गब्भवक्कंतियमणुस्सा इत्यादि सर्वस्तोका गर्भव्युत्क्रांतिका मनुष्याः संख्येयकोटीको
टीप्रमाणत्वात् तेभ्यो मनुष्यस्त्रियः संख्येयगुणाः सप्तविंशतिगुणत्वात् उक्तं च सत्तावीसगुणा पुण मणुयाणं तदहिया चेव इत्यादि तेभ्यो बा
दरतेजस्कायिकाः पर्याप्ता असंख्येयगुणाः कतिपयवर्गन्यूनावलिकाघनसमयप्रमाणत्वात् तेभ्योनुत्तरोपपातिका देवा असंख्येयगुणाः
।क्षेत्रपल्योपमासंख्येयभागवर्त्तिनभःप्रदेशराशिप्रमाणत्वात् तेभ्य उपरितनग्रैवेयकदेवाः संख्येयगुणाः बृहत्तरक्षेत्रपल्योपमासंख्येय

भागवर्त्तिनः प्रदेशराशिप्रमाणत्वादेतदपि कथमवसेयमिति चेत् उच्यते विमानबाहुल्यात् तथाह्यनुत्तरदेवानां पंचविमानानि विमानशतमुपरि
तनग्रैवेयकत्रिकप्रतिविमानं चासंख्येया देवा यथा यथा चाधोवर्त्तीनि विमानानि तथा तथा देवा अपि प्राचुर्येण लभ्यन्ते ततोऽवसीयते अनुत्त
रोपपातिदेवेभ्यो बृहत्तरक्षेत्रपल्योपमासंख्येयभागवर्त्त्याकाशप्रदेशराशिप्रमाणा उपरितनग्रैवेयकत्रिकदेवा एवमुत्तरत्रापि भावना कार्या
यावदानतकल्पः तेभ्यो मध्यमग्रैवेयकत्रिकदेवाः संख्येयगुणाः तेभ्योऽधस्तनग्रैवेयकत्रिकदेवाः संख्येयगुणाः तेभ्योऽप्यच्युतकल्प
देवाः संख्येयगुणाः ८ तेभ्य आरणकल्पदेवाः संख्येयगुणाः यद्यप्यारणाच्युतकल्पौ समश्रेणिकौ यद्यप्यारणाच्युतकल्पौ समश्रेणिकौ समविमा
नसंख्याकौ च तथापि कृष्णपाक्षिकाः प्राचुर्येण दक्षिणस्यां दिशि समुत्पद्यन्ते ततो दक्षिणस्यां बहवः कृष्णपाक्षिकाः स्तोकाः शुक्लपा
क्षिकाश्च तावदच्युतकल्पे देवाः संख्येयगुणाः तेभ्योऽपि प्राणतकल्पे देवाः संख्येयगुणाः ८ तेभ्योऽप्यानतकल्पे देवाः संख्येयगु
णाः भावना आरणकल्पवत्कर्त्तव्या तेभ्योऽप्यधःसप्तमनरकपृथिव्यां नैरयिका असंख्येयगुणाः श्रेण्यसंख्येयभागगत
नभःप्रदेशराशिप्रमाणत्वात् ११ तेभ्यः षष्ठपृथिव्यां नैरयिका असंख्येयगुणाः एतच्च प्रागेव दिगनुपाते नैरयिकाल्पबहुत्वचिंतायां भा
वितं तेभ्योऽपि सहस्रारकल्पे देवा असंख्येयगुणाः षष्ठपृथिवीनैरयिकपरिमाणहेतुश्रेण्यसंख्येयभागापेक्षया सहस्रारकल्पदेवप्र
माणहेतोः श्रेण्यसंख्येयभागस्यासंख्येयगुणत्वात् १४ तेभ्यो महाशुक्रकल्पे देवा असंख्येयगुणाः विमानबाहुल्यात् तथाहि षट् सहस्राणि वि
मानानां सहस्रारकल्पे चत्वारिंशत् सहस्राणि महाशुक्रे अन्यच्चाधोधोविमानवासिनो बहुबहुतराः स्तोकस्तोकतरा उपरितनोपरितनविमानवासिनः ततः
सहस्रारदेवेभ्यो महाशुक्रकल्पे देवा असंख्येयगुणाः तेभ्योऽपि पंचमधूमप्रभापृथिव्यां नैरयिका असंख्येयगुणाः बृहत्तमश्रेण्यसं
ख्येयभागवर्त्तिनः प्रदेशराशिप्रमाणत्वात् तेभ्योऽपि लांतककल्पे देवा असंख्येयगुणाः अतिबृहत्तमश्रेण्यसंख्येयभागगतनभःप्रदेशराशि
प्रमाणत्वात् तेभ्योऽपि चतुर्थ्यां पंकप्रभायां पृथिव्यां नैरयिका असंख्येयगुणाः युक्तिः प्राग्वद्भावनीया तेभ्योऽपि ब्रह्मलोककल्पे देवा असंख्ये

यगुणाः युक्तिः प्रागुक्तैव तेभ्योऽपि तृतीयस्यां वालुकाप्रभायां पृथिव्यां नैरयिका असंख्येयगुणाः तेभ्योऽपि माहेंद्रकल्पे देवा असंख्येयगु
णाः तेभ्योऽपि सनत्कुमारकल्पे देवाः असंख्येयगुणाः युक्तिः सर्वत्रापि प्रागुक्तैव तेभ्यो द्वितीयस्यां शर्कराप्रभायां पृथिव्यां नैरयिका असंख्ये
यगुणाः एते च सप्तमपृथिवीनारकादय आ द्वितीयनारकपर्यन्ताः प्रत्येकं स्वस्थाने चिंत्यमानाः सर्वेऽपि घनीकृतलोकश्रेण्यसंख्येयभागवर्त्तिनः
प्रदेशराशिप्रमाणा द्रष्टव्याः केवलं श्रेण्यसंख्येयभागोऽसंख्येयभागः संख्येयभेदभिन्नस्ततोऽसंख्येयगुणत्वान्नयाल्पबहुत्वमभि
धीयमानं न विरुध्यते तेभ्योऽपि द्वितीयनरकपृथिवीनारकेभ्यः संमूर्च्छिममनुष्या असंख्येयगुणाः तदिह अंगुलमात्रक्षेत्रप्रदेशराशेः संबं
धिनि तृतीयवर्गमूले गुणिते यत्प्रथमवर्गमूलं यावान् प्रदेशराशिस्तावत्प्रमाणानि खंडानि यावंत्येकस्यां प्रादेशिक्यां श्रेणौ भवंति ता
वत्प्रमाणाः तेभ्य ईशानकल्पे देवा असंख्येयगुणाः यतोंऽगुलमात्रक्षेत्रप्रदेशराशेः संबंधिनि द्वितीयवर्गमूले तृतीयेन
वर्गमूलेन गुणिते यावान् प्रदेशराशिस्तावत्प्रमाणासु घनीकृतस्य लोकस्यैकप्रादेशिकीषु श्रेणिषु यावंतो न
भःप्रदेशास्तावत्प्रमाणा ईशानकल्पगता देवदेवीसमुदायस्तत्र किंचिदूनद्वात्रिंशत्तमभागकल्पा ईशानदेवास्ततो देवाः सं
मूर्च्छिममनुष्येभ्योऽसंख्येयगुणाः २५ तेभ्य ईशानकल्प एव देव्यः संख्येयगुणाः द्वात्रिंशद्गुणत्वात् द्वात्रिंशद्गुणा द्वात्रिंशद्रूपाधिकाश्च हि
देवेभ्यो देव्य इति वचनात् तेभ्यः सौधर्मकल्पे देवाः संख्येयगुणाः तत्र विमानबाहुल्यात् तथाहि तत्र द्वात्रिंशत् शतसहस्राणि विमानानामष्टावि
शतिः शतसहस्राणि विमानानामष्टाविंशतिः शतसहस्राणि ईशानकल्पे अपि च दक्षिणदिग्वर्त्ती सौधर्मकल्प ईशानकल्पस्तूत्तरदिग्वर्त्ती द
क्षिणस्यां च दिशि बहवः कृष्णपाक्षिकाः समुत्पद्यंते ततः ईशानदेवेभ्यः सौधर्मदेवाः संख्येयगुणाः न चेयं युक्तिर्माहेंद्रसनत्कुमारकल्प
योरप्युक्ता परं तत्र माहेंद्रकल्पापेक्षया सनत्कुमारकल्पे देवा असंख्येयगुणा उक्ता इह तु सौधर्मकल्पे संख्येयगुणा उदितं कथं घटते इति उच्यते वच
नप्रामाण्यात् न चात्र पाठभ्रमो यतोऽन्यत्राप्युक्तं ईशाणे सव्वत्थवि बत्तीसगुणा उ होंति देवीओ संखेज्जा सोहम्मे तओ असंखा भवणवासी २७ इति त

प्रज्ञा०वृत्तिः॥

त्यापि तस्मिन्नेव सौधर्मकल्पे देवाः संख्येयगुणाः द्वात्रिंशद्गुणत्वात् सप्तरूपविवर्जितगुणाकारत्वात् देवीभ्य इति वचनात् ततोप्यसंख्येयगुणा
भवनवासिनः कथमिति चेदुच्यते इह अंगुलमात्रक्षेत्रप्रदेशराशेः संबंधिनि प्रथमवर्गमूले द्वितीयेन वर्गमूलेन गुणिते यावान् प्रदेशराशि
र्भवति तावत्प्रमाणासु घनीकृतस्य लोकस्यैकप्रादेशिकीषु श्रेणिषु यावांस्तावान् भवनपतिदेवदेवीसमुदायस्तस्मात् किंचिन्न्यूनद्वात्रिंशत्तमभाग
कल्पास्तु भवनपतयो देवास्ताभ्यो घटंते सौधर्मदेवीभ्योऽप्यसंख्येयगुणा द्वात्रिंशद्गुणत्वात् ततोऽप्यसंख्येया रत्नप्रभायां पृथिव्यां नैरयिका असंख्ये
यगुणाः अंगुलमात्रक्षेत्रप्रदेशराशेः संबंधिनि प्रथमवर्गमूले द्वितीयेन वर्गमूलेन गुणिते यावान् प्रदेशराशिस्तावत्प्रमाणासु श्रेणिषु यावंत आ
काशप्रदेशास्तावत्प्रमाणत्वात् ततोपि खचरपंचेंद्रियतिर्यग्योनिकाः पुरुषा असंख्येयगुणाः प्रतरासंख्येयगुणाः प्रतरासंख्येयभागवर्त्यसं
ख्येयश्रेणिगतनभःप्रदेशराशिप्रमाणत्वात् ततोपि खचरपंचेंद्रियतिर्यग्योनिकाः स्त्रियः संख्येयगुणाः त्रिगुणत्वात् तिगुणा तिरूवअहि
या तिरियाणं इत्थियाओ होंति इति वचनात् ३३ ततः स्थलचरपंचेंद्रियतिर्यग्योनिकाः पुरुषाः संख्येयगुणाः बृहत्तरप्रतरा
संख्येयभागवर्त्यसंख्येयश्रेणिगताकाशप्रदेशराशिप्रमाणत्वात् ३४ तेभ्यः स्थलचरपंचेंद्रियतिर्यग्योनिकाः स्त्रियः संख्येयगुणा
स्त्रिगुणत्वात् ततो जलचरपंचेंद्रियतिर्यग्योनिकाः पुरुषाः संख्येयगुणाः बृहत्तमप्रतरासंख्येयभागवर्त्यसंख्येयश्रेणिगताकाशप्रदे
शराशिप्रमाणत्वात् ततो जलचरपंचेंद्रियतिर्यग्योनिकस्त्रियः संख्येयगुणाः त्रिगुणत्वात् ३७ ततोपि व्यंतरा देवाः पुंवेदोदयिनः संख्येय
योजनकोटीकोटीप्रमाणानि सूचिरूपाणि खंडानि सूचिरूपाणि खंडानि यावंत्येकस्मिन् प्रतरे भवंति तावंतः सामान्यतो व्यंतराः केवलमिह पुरु
षा विवक्षिता इति ते सकलसमुदायापेक्षया किंचिन्न्यूनद्वात्रिंशत्तमभागकल्पा वेदितव्याः ततो व्यंतरदेवस्त्रियः संख्येयगुणा द्वात्रिं
शद्गुणत्वात् ततो ज्योतिष्का देवाः संख्येयगुणाः ते हि सामान्यतः षट्पंचाशदधिकशतद्वयांगुलप्रमाणानि सूचीरूपाणि खंडानि यावंत्येकस्मिन् प्र
तरे भवंति तावत्प्रमाणाः परमिह पुरुषा विवक्षिता इति सकलसमुदायापेक्षया किंचिन्न्यूनद्वात्रिंशत्तमभागकल्पाः प्रतिपत्तव्याः ततस्तत्पत्न्यः ... ७३

वीभ्यः संख्येयगुणाः ४० ततोपि ज्योतिष्का देव्यः संख्येयगुणा द्वात्रिंशद्गुणत्वात् ४१ ताभ्यः खचरपंचेंद्रियतिर्यग्योनिका नपुंसकाः संख्येयगुणाः
क्वचिदसंख्येयगुणा इति पाठः स समीचीनो न यत इह पर्याप्तचतुरिंद्रिया वक्ष्यंते तेऽपि ज्योतिष्कदेवापेक्षया संख्येयगुणा एव पठ्य
ंते तथा हि षट्पंचाशदधिकशतद्वयांगुलप्रमाणानि सूचीरूपाणि खंडानि यावंत्येकस्मिन् प्रतरे भवंति तावत्प्रमाणा ज्योतिष्काः उक्तं
च छप्पन्नदोसयंगुलसूइपएसेहिं भाइयं पयरं जोइसिएहिं हीरइ इति अंगुलसंख्येयभागमात्राणि च सूचीरूपाणि खंडानि यावंत्येक
स्मिन् प्रतरे भवंति तावत्प्रमाणाश्चतुरिंद्रियाः उक्तं च पज्जत्तापज्जत्ता बितिचउअसन्निणो अवहरंति अंगुलसंखासंखप्पएसभइयं पुढो पयरं
अंगुलसंख्येयभागापेक्षया च षट्पंचाशदधिकमंगुलशतद्वयं संख्येयगुणं । ततो ज्योतिष्कदेवापेक्षया पर्याप्तचतुरिंद्रि
या अपि संख्येयगुणा एव घटंते किंतु नः पर्याप्तचतुरिंद्रियापेक्षया संख्येयभागमात्राः खचरपंचेंद्रियनपुंसका इति तेभ्योपि स्थलच
रपंचेंद्रियनपुंसकाः संख्येयगुणाः ततोपि जलचरपंचेंद्रियनपुंसकाः संख्येयगुणाः ४५ ततोपि पर्याप्ताः संज्ञ्यसं
ज्ञिलक्षणाः पंचेंद्रिया विशेषाधिकाः ततोपि पर्याप्तद्वींद्रिया विशेषाधिकाः ४७ ततोपि पर्याप्तत्रींद्रिया विशेषाधिकाः यद्यपि च
पर्याप्तचतुरिंद्रियादीनां पर्याप्तद्वींद्रियपर्यंतानां प्रत्येकमंगुलसंख्येयभागमात्राणि सूचीरूपाणि खंडानि यावंत्येकस्मिन् प्रतरे भवंति
तावत्प्रमाणत्वमविशेषेणान्यत्र वर्ण्यते तथाप्यंगुलसंख्येयभागस्यासंख्येयभेदभिन्नत्वादित्थं विशेषाधिकत्वमुच्यमानं न विरुध्यते उक्तं च महादंड
कमध्येऽपि ततो नपुंसकखचरथलयरसंखेज्जा जलयरनपुंसका चउरिंदियतो पणबितिपज्जत्त किंचि हिया इति ४८ ततोपि पर्याप्त
त्रींद्रियेभ्यः पर्याप्ताः पंचेंद्रिया असंख्येयगुणाः अंगुलासंख्येयभागमात्राणि खंडानि सूचीरूपाणि यावंत्येकस्मिन् प्रतरे भवंति तावत्प्रमाण
त्वात् ततश्चतुरिंद्रिया अपर्याप्ता विशेषाधिकाः ततोपि त्रींद्रिया अपर्याप्ता विशेषाधिकाः ५१ ततोपि द्वींद्रिया अपर्याप्ता विशेषाधिकाः यद्य
पि चापर्याप्तपंचेंद्रियादयोऽपर्याप्तद्वींद्रियपर्यंताः प्रत्येकमंगुलस्यासंख्येयभागमात्राणि खंडानि सूचीरूपाणि यावंत्येकस्मिन् प्रतरे भवंति तावत्प्र

माणा अन्यत्रापि विशेषेणाकाशप्रदेशासंख्येयभागस्य विविक्तत्वादिष्टं विशेषाधिकत्वमुच्यमानं न विरोधमास्कंदति तेभ्योपि द्वींद्रियापर्याप्तेभ्यः प्रत्येकबादरव
नस्पतिकाः पर्याप्ता असंख्येयगुणाः यद्यपि चापर्याप्तद्वींद्रियादिवत् पर्याप्तबादरवनस्पतिका अपि अंगुलासंख्येयभागमात्राणि सूचीरूपाणि खंडानि या
वंत्येकस्मिन् प्रतरे भवंति तावत्प्रमाणा अन्यत्राप्याकाशप्रदेशाप्यंगुलासंख्येयभागस्यासंख्येयत्वादविविक्तत्वात् बादरपर्याप्तप्रत्येकवनस्पतिपरिमाणचिंतायां
मंगुलासंख्येयभागोऽसंख्येयगुणहीनः परिगृह्यते ततो न कश्चिद्विरोधः ५३ तेभ्योपि बादरनिगोदा अनंतकायिकशरीररूपाः पर्याप्ता असं
ख्येयगुणाः ५४ तेभ्योपि बादरपृथिवीकायिकाः पर्याप्ता असंख्येयगुणाः ५५ तेभ्योपि पर्याप्ता बादराप्कायिकाः असंख्येयगुणाः यद्यपि पर्या
प्ताबादरप्रत्येकवनस्पतिकायिकपृथिवीकायिकाप्कायिकाः प्रत्येकमंगुला। संख्येयभागमात्राणि सूचीरूपाणि खंडानि यावंत्येकस्मि
न्प्रतरे भवंति तावत्प्रमाणा अन्यत्रापि विशेषेणाकाशप्रदेशाप्यंगुलासंख्येयभा दविविक्तत्वाद्विविक्तत्वादिष्टमसंख्येयगुणत्वं नाशिक्षात न कश्चि
द्विरोधः तेभ्यो बादरपर्याप्ताप्कायिकेभ्यो बादरवायुकायिकाः पर्याप्ता अ संख्येयगुणा घनीकृतलोकासंख्येयप्रतरगतन
भःप्रदेशराशिप्रमाणत्वात् तेभ्योपि बादरतेजस्कायिका अपर्याप्ता असंख्ये। यगुणाः असंख्येयलोकाकाशप्रदेशराशिप्रमाण
त्वात् ५८ तेभ्यः प्रत्येकशरीरबादरवनस्पतिकायिका अपर्याप्ता असंख्येयगुणा : ५९ तेभ्योपि बादरनिगोदा अपर्याप्तका असंख्येयगुण
: ५९ तेभ्योपि बादरनिगोदा अपर्याप्तका असंख्येयगुणाः ६० तेभ्योपि बादरपृथिवीकायिका अपर्याप्तका असंख्येयगुणाः ६१ तेभ्यो बा
दराप्कायिका अपर्याप्ता असंख्येयगुणाः ६२ तेभ्यो बादरवायुकायिका अपर्याप्तका असंख्येयगुणाः ६३ तेभ्यः सूक्ष्मतेजस्कायिका अ
पर्याप्तका असंख्येयगुणाः तेभ्यः सूक्ष्मपृथिवीकायिका अपर्याप्ता विशेषाधिकाः ६५ तेभ्यः सूक्ष्माप्कायिका अपर्याप्तका विशेषाधिकाः ६६।
तेभ्यः सूक्ष्मवायुकायिका अपर्याप्ता विशेषाधिकाः ६७ तेभ्यः सूक्ष्मतेजस्कायिकाः पर्याप्तकाः संख्येयगुणा अपर्याप्तसूक्ष्मेभ्यः पर्याप्तसूक्ष्माणां
स्वभावतः प्राचुर्येण भावात् तथा चाह अस्यामेव प्रज्ञापनायां संग्रहणिकारः जीवाणमपज्जत्ता बहुतरगा बायराण विन्नेया सुहुमाण य पज्जत्ता ओहेण ७४

या केवली बिंति ६८ तेभ्योपि सूक्ष्मपृथिवीकायिकाः पर्याप्ताः विशेषाधिकाः ६९ तेभ्योपि सूक्ष्माप्कायिकाः पर्याप्ता विशेषाधिकाः ७० तेभ्योपि
सूक्ष्मवायुकायिकाः पर्याप्ता विशेषाधिकाः ७१ तेभ्योपि सूक्ष्मनिगोदा अपर्याप्तका असंख्येयगुणाः ७२ तेभ्योपि पर्याप्ताः सूक्ष्मनिगोदाः संख्ये
यगुणाः यद्यपि चापर्याप्ततेजस्कायिकादयः पर्याप्तसूक्ष्मनिगोदपर्यंता अविशेषेणान्यत्रासंख्येयलोकाकाशप्रदेशराशिप्रमाणा उक्ता
स्तथापि लोकासंख्येयस्यासंख्येयभेदभिन्नत्वादिदमल्पबहुत्वमविरुध्यमानमुपपन्नं द्रष्टव्यं ७३ तेभ्योऽभव्यसिद्धिका अनंतगुणाः
जघन्ययुक्तानंतकप्रमाणत्वात् ७४ तेभ्यः प्रतिपतितसम्यग्दृष्टयोऽनंतगुणाः ७५ तेभ्यः सिद्धा अनंतगुणाः ७६ तेभ्योपि बादरवनस्पतिकायिकाः
पर्याप्ताः पर्याप्ता अनंतगुणाः ७७ तेभ्योपि सामान्यतो बादरपर्याप्ता विशेषा धिकाः बादरपर्याप्तपृथिवीकायिकादीनामपि तत्र प्रक्षेपात् ७८ तेभ्यो
ऽपि बादरापर्याप्तवनस्पतिकायिका असंख्येयगुणाः एकैकबादरनि। गोदपर्याप्तनिश्रया असंख्येयगुणानां बादरापर्याप्तनिगोदानां
संभवात् ७९ तेभ्यः सामान्यतो बादरा अपर्याप्ता विशेषाधिकाः ।बादरापर्याप्तपृथिवीकादीनामपि तत्र प्रक्षेपात् ८० तेभ्यः
सामान्यतो बादरा विशेषाधिकाः पर्याप्तानामपि तत्र प्रक्षेपात् ८१ ते भ्यः सूक्ष्मवनस्पतिकायिका अपर्याप्ता असंख्येयगुणाः ८२ ते
भ्यः सूक्ष्मा अपर्याप्ता विशेषाधिकाः तेभ्यः सामान्यतः सूक्ष्माः पर्याप्ता वि शेषाधिकाः पर्याप्तसूक्ष्मपृथिवीकायिकादीनामपि तत्र प्रक्षेपात् ८५
तेभ्यः पर्याप्तापर्याप्तविशेषणरहिताः सूक्ष्मा विशेषाधिकाः अपर्याप्तसूक्ष्मपृथिव्यप्तेजोवायुवनस्पतिकायिकानामपि तत्र प्रक्षेपात् ८६ तेभ्यो
ऽपि भवसिद्धिर्भवसिद्धिर्येषां ते भवसिद्धिकाः भव्या विशेषाधिकाः जघन्ययुक्तानंतकमात्राभव्यपरिहारेण सर्वजीवानां भव्यत्वात् ८७ तेभ्यः सा
मान्यतो निगोदजीवा विशेषाधिकाः ८८ इह भव्या अभव्याश्चातिप्राचुर्येण बादरसूक्ष्मनिगोदजीवराशावेव प्राप्यंते नान्यत्र अ
न्येषां सर्वेषामपि मिलितानामसंख्येयलोकाकाशप्रदेशराशिप्रमाणत्वात् अभव्याश्च युक्तानंतकसंख्यामात्रपरिमाणास्ततो भव्या अपकृ
ष्यंते किंचिन्मात्रा भव्याश्च प्रागभव्यपरिहारेण चिंतिताः इदानीं तु बादरसूक्ष्मनिगोदचिंतायां तेपि प्रक्षिप्यंत इति विशेषाधिकाः ८९ ते

प्रज्ञा०वृत्तिः

भ्यः सामान्यतो वनस्पतिजीवा विशेषाधिकाः प्रत्येकशरीरिणामपि वनस्पतिजीवानां तत्र प्रक्षेपात् तेभ्यः सामान्यतः एकेन्द्रिया विशेषाधिका
बादरसूक्ष्मपृथिवीकायिकादीनामपि तत्र प्रक्षेपात् ९० तेभ्यः सामान्यतस्तिर्यग्योनिका विशेषाधिकाः पर्याप्तापर्याप्तद्वित्रिचतुरिन्द्रियतिर्य
क्पंचेन्द्रियाणामपि तत्र प्रक्षेपात् ९१ तेभ्यश्चतुर्गतिका मिथ्यादृष्टयो विशेषाधिकाः इह केचिदविरतसम्यग्दृष्ट्यादिसंज्ञितिर्यक्पंचेन्द्रि
या सर्वेपि तिर्यंचो मिथ्यादृष्टयश्चिंतायां वा संख्येयनारकादयः प्रक्षिप्यंते ततस्तिर्यग्जीवराश्यपेक्षया चतुर्गतिका मिथ्यादृष्टयः सिद्ध्यमाना
विशेषाधिकाः ९२ तेभ्योप्यविरता विशेषाधिकाः अविरतसम्यग्दृष्टीनामपि तत्र प्रक्षेपात् ९३ तेभ्यः सकषायिणो विशेषाधिकाः देशविरतादी
नामपि तत्र प्रक्षेपात् तेभ्यश्छद्मस्था विशेषाधिकाः उपशांतमोहादीनाम पि तत्र प्रक्षेपात् ९५ तेभ्यः सयोगिनो विशेषाधिकाः सयोगिकेव
लिनामपि तत्र प्रक्षेपात् तेभ्यः संसारस्था विशेषाधिकाः अयोगिकेव लिनामपि तत्र प्रक्षेपात् ९७ तेभ्यः सर्वजीवा विशेषाधिकाः सिद्धा
नामपि तत्र प्रक्षेपात् ९८ इति श्रीमलयगिरिविरचितायां प्रज्ञा पनाटीकायां तृतीयपदं समाप्तं ३ ॥ ॥व्याख्यातं तृतीयप
दमिदानीं चतुर्थमारभ्यते तस्य चायमभिसंबंधः इहानंतरपदे दिगाद्य नादिना अल्पबहुत्वं संख्या निर्दिष्टा अस्मिंस्तु तथाऽल्पबहुत्वं
संख्यया निर्दिष्टानां सत्त्वानां जन्मतः प्रभृत्या मरणात् यन्नारकादिपर्यायरू पेणावस्थानमवस्थानं तच्चिंत्यते असमसंबंधेनायातस्यास्येदमा
दिसूत्रं नेरइयाणं भंते केवइयं कालं ठिई पन्नत्ता इति नैरयिकाणां भदंत कियंतं कालं स्थितिः प्रज्ञप्ता तत्र स्थीयते अवस्थीयते अनया आयुःकर्मवृत्त्या
त्येति स्थितिरायुःकर्मानुभूतिर्जीवनमिति पर्यायाः प्रश्नपाठश्चैव मिथ्यात्वादिनिरूपणानां कर्मपुद्गलानां ज्ञानावरणीयादिरूपतया परिणतानां
यदवस्थानं सा स्थितिरिति सिद्धं तथापि नारकादिपि नरकगतिपंचेन्द्रियजात्यादिनामकर्मोदया अत्र नारकत्वपर्यायस्थितिरपि नारकायुःप्रथमस
मयसंवेदनकाल एव तत्त्वविधानं नारकाद्युक्तमतोपि नारकत्वव्यपदेशो भवति तथा च सोऽत्र इदं वचनं नेरइए णं भंते नेरइएसु उववज्जइ यच्चाह
णं भंते नेरइए उववज्जइ अनेरइए उववज्जइ गोयमा नेरइए उववज्जइ गोयमा नेरइए उववज्जइ नो अनेरइए नेरइए उववज्जइ ७५

त्यादि ततः सैवायुःकर्मानुभूतिरिह स्थितिरभिधीयते इति निर्वचनमाह गोयमेत्यादि एतच्च पर्याप्तापर्याप्तविभागमकृत्वा सामान्यत उक्तं
यदा तु पर्याप्तापर्याप्तविभागश्चिंत्यते तदैवं सूत्रं अपज्जत्तनेरइयाणं भंते इत्यादि इह पर्याप्ताः द्विविधा लब्ध्या करणेन च तत्र नैरयिका देवाः संख्येयवर्षा
युष्कास्तिर्यङ्मनुष्याः करणेनैवापर्याप्ता न लब्ध्यपर्याप्तका नातिशयमेवमुक्तं तथा संग्रहणीवृत्तौ उपपातकाल एव करणेः कियंतं कालमपर्याप्ता इष्टा
शेषास्तु तिर्यग्मनुष्या लब्ध्या अपर्याप्ता उपपातकाले चतुरंच नारकदेवा तिर्यग्मनुष्या गर्भजाताश्च संख्येयवर्षायुषः एतच्च अपर्याप्तत्वं अवबो
धकालमायुः तिर्यग्मनुष्याः लब्धिपर्याप्ताविरहकालेय इह द्विविधा न भवति ह्यपर्याप्तनिरयकाणां च अपर्याप्तकाश्चेह ग्रन्यते तेषां वर्त्तमानं तन्मु
हूर्त्तमत उक्तं गोयमा जहन्नेणावि अंतोमुहुत्तं उक्कोसेणावि अंतोमुहुत्तं । गोयमा जहन्नेणं दस वाससहस्साइं अंतोमुहुत्तूणाइं उक्कोसेणं तेत्तीसं अपज्जा
त्तगापामेव उत्कर्षकालः पर्याप्तानां तत उक्तं पर्याप्तसूत्रे गोयमा जहन्नेणं दस वाससहस्साइं अंतोमुहुत्तूणाइं उक्कोसेणं तेत्तीसं
सागरोवमाइं अंतोमुहुत्तूणाइं एवं सर्वत्र पृथिवीविभागेन चिंतयति । पृथ्वीविभागेन चिंतयति ३ रयणप्पभापुढविनेरइ
याणं भंते इत्यादि सुगमं शेषमपि सुगमं प्राक् पदत्रिसमासेन तथा चंदविमा। णाणं भंते देवाणमित्यादि चंद्रविमाने जघन्यतः चंद्रो
पाश्चत्य परिवारभूतानां तत्परिवारभूतानां जघन्यतो पल्योपमचतुर्भागमानम् उत्कर्षतः चंद्राणां च इंद्रसामानिकादीनां वर्षलक्षाभ्यधिकं प
ल्योपमं चंद्रदेवस्य तु यथोक्तं पंचग्रहनक्षत्रताराविमानेषु सूर्यादिविमानेष्वपि भावनीयं ३ इति श्रीमलयगिरिविरचितायां प्रज्ञापनाटीकायां चतुर्थं
स्थित्याख्यं पदं समाप्तं ४ ॥ ॥व्याख्यातं चतुर्थपदमिदानीं पंचममारभ्यते तस्य चायमभिसंबंधः इहानंतरपदे नारकादिपर्यायस्य रू
पेणावस्थानमवस्थितिरुक्ता इह त्वौदयिकक्षायोपशमिकक्षायिकभावाश्रयपर्यायावधारणं प्रतिपाद्यते तत्र चेदमादिसूत्रं ३ कइविहाणं
भंते पज्जवा पन्नत्ता इत्यादि अथ केनाभिप्रायेण गौतमस्वामिना भगवानेवं पृष्टं उच्यते उक्तमादौ प्रथमे पदे प्रज्ञापना द्विविधा प्रज्ञा
पनी जीवप्रज्ञापना अजीवप्रज्ञापना चेति तत्र जीवाश्चाजीवाश्च द्रव्याणि द्रव्यलक्षणं च गुणपर्यायवद्द्रव्यमिति ततो जीवाजीवपर्यायाः तदा गमार्थमे

वं पृष्टे भगवान् गौतमाय वचनागोचरानपि निर्वचनमेवमेवाह गोयमा दुविहा पज्जवा पन्नत्ता तंजहा जीवपज्जवा य अजीवपज्जवा य इति तत्र पर्याया गुणा विशेषा
धर्मा इत्यनर्थांतरं अनुसंबंधं प्रतिपादयतेदमुक्तं इह बोदयिकादिना वाच्यपर्यायपरिमाणावधारणं प्रतिपाद्यते इति उदयिकादयश्च भावा जीवाजीवाश्र
याश्च ततो जीवपर्याया एव गम्यंते अथवास्मिन्निर्वचने भवत्वेवास्तां नाम पिपर्यायानुक्तमामतानमुद्दरः संबंधः तदनुक्रमविषयापरिज्ञानात् अदयि
को हि भावः पुद्गलहेतुरपि भवति ततो जीवाजीवात्मदातोदयिकभावस्य द्विविधत्वे संबंधकथन निर्वचनमत्राप्याविरोधः संप्रति संबंधपरि
माणावधारणाय पृच्छति ७ जीवपज्जवाणं भंते किं संखिज्जा इत्यस्मात् तवतस्यति सिद्धवर्जाः सर्वेऽपि नैरयिकादयः प्रत्येकमसंख्याताः असंख्ये
यत्वं संभवि समस्तापेक्षया वनस्पतयः सिद्धाश्च प्रत्येकमनंता अतः पर्यायिणामनं तत्वादनंता जीवपर्यायाः पृष्टो भगवानपि पृच्छासामान्येन निर्वच
नमुक्तवान् इदानीं विशेषविषयं प्रश्नं गौतमाह ७ नेरइयाणं भंते केवइया पज्जवा पन्नत्ता इति अथ केनाभिप्रायेणैवं गौतमः पृष्टवान् उ
च्यते पूर्वं किल सामान्यप्रश्ने पर्यायिणामनंतत्वात् पर्यायाणामानंत्यं मुक्तं यत्पुनः पर्यायिणामानंत्यं तात्पितृकमपि ति
शंकति नेरइयाणमित्यादि तत्रापि निर्वचनमिदमनंता इति अत्रैवं जातसंशयः प्रश्नयति सेकेणट्ठेणं भंते इत्यादि अथ केनार्थेन के
न कारणेनैवमुच्यते नैरयिकाणां पर्याया एवमनंता इति भगवानाह गोयमा नेरइयस्स दव्वट्ठयाए तुल्ले इत्यादि अथ
पर्यायाणामानंत्यं कथं घटते इति पृष्टे तदेव पर्यायाणामानंत्यं यथा युक्त्युपपन्नं भवति तथा निर्वचनीयं तान्यत्ततः केनाभिप्रायेण भगवतैवं निर्वचन
मवादि नैरयिकस्य द्रव्यार्थतया तुल्य इति उच्यते एकमपि द्रव्यमनंतपर्यायमित्यस्य न्यायस्य प्रदर्शनार्थं तत्रेयस्मादिदमपि नारकजीवद्रव्यमेकं संख्या
त्वं व्यवहमिदमपि इति नैरयिको नैरयिकस्य द्रव्यार्थतया तुल्यः द्रव्यमेवार्थः द्रव्यार्थस्तद्भावो द्रव्यार्थता तया तुल्य एवं तावद् द्रव्यार्थतया तुल्यत्वमति
हितमिदानीं प्रदेशार्थतामधिकृत्य तुल्यत्वमाह पएसट्ठयाए तुल्ले इदमपि नारकजीवद्रव्यं लोकाकाशप्रदेशपरिमाणप्रदेशमिदमपि लोकाकाश
प्रदेशमितप्रदेशार्थतया नैरयिको नैरयिकस्य तुल्यः प्रदेश एवार्थः प्रदेशार्थस्तद्भावः प्रदेशार्थता तया कस्मादिदमभिहितमिति चेत् उच्यते इ ३६

ह विह्यप्रदेशानार्थं तथाहि द्विविधं द्रव्यं प्रदेशावत् अप्रदेशावच्च तत्र परमाणुरप्रदेशो द्विप्रदेशादिकं तु प्रदेशावत् एतच्च द्रव्यं द्विविधं पुद्गलास्ति
कायवत् भवति शेषास्तु धर्मास्तिकायादीनि द्रव्याणि नियमात् सप्रदेशानि तत्राह पएसट्ठयाए सियहीणे इत्यादि नैरयिकाः संख्यातप्रदेशा
परस्य नैरयिकस्य तुल्यप्रदेशस्य अवगाहनमवगाहः शरीरोच्छ्रयो अवगाहनमेवार्थो अवगाहनार्थस्तद्भावोऽवगाहनार्थता तया अवगाह
नार्थतया सियहीणेत्यादि स्यादिदं प्रशमास्मिन् विवादविचारणास्तु नैकांतसंज्ञायत्र आदिशब्दस्तु अत्रानेकांतद्योतक स्यात् ग्रहणं स्याद्धीनो
नैकांतेन हीन इत्यर्थः स्यात्तुल्यो नैकांतेन तुल्य इत्यर्थः स्यादभ्यधिको नैकांतेनाभ्यधिक इति भावः कथमिति चेदुच्यते यस्मादु
त्कृष्टतो रत्नप्रभापृथिवीनैरयिकाणामुत्तरवैक्रियस्य शरीरस्य जघन्येनावगाहनाया अंगुलस्यासंख्येयभागमुत्कर्षतः स
प्तधनूंषि त्रयो हस्ताः षडंगुलानि उत्तरोत्तरासु पृथिवीषु द्विगुणा यावत् सप्तमपृथिवीनैरयिकाणां जघन्यतोऽवगाहना अंगुल
स्यासंख्येयभागः उत्कर्षतः पंचधनुःशतानीति तत्र स्याद्धीनत्वं यदि हीनस्ततोऽसंख्येयभागहीनो वा स्यात् संख्येय
भागहीनो वा संख्येयगुणहीनो वा स्यात् असंख्येयगुणहीनो वा अभ्यधिकस्ततोऽसंख्येयभागाभ्यधिको वा स्यात् संख्येयभा
गाभ्यधिको वा संख्येयगुणाभ्यधिको वा कथमिति चेदुच्यते एकः किल नारकः सर्वोत्कृष्टत्वेन पंचधनुःशतानि अपरस्तान्येवांगुलासंख्येयभा
गहीनानि अंगुलासंख्येयभागस्य पंचानां धनुःशतानां असंख्येयभागवर्तित्वात् ततोऽसौ अंगुलासंख्येयभागहीनः पंचधनुःशतप्रमाणादपरस्य
परिपूर्णपंचधनुःशतप्रमाणस्यापेक्षया असंख्येयभागहीनः इतरश्च तदपेक्षया असंख्येयभागाभ्यधिकः तथा एकः पंचधनुःशतानि द्वि
स्थितोऽपरस्तान्येव द्वाभ्यां त्रिभिर्वा धनुर्भिर्हीनानि तत्र द्विधनुरादिकं पंचानां धनुःशतानां संख्येयभागवर्तित्ततः सोऽपरस्य परिपूर्णपंचध
नुःशतप्रमाणस्यापेक्षया संख्येयभागहीनः इतरस्तु परिपूर्णपंचधनुःशतप्रमाणस्तदपेक्षया संख्येयभागाधिकः तथा एकः पंचविंशधनुःशत
प्रमाणोऽपरः परिपूर्णानि पंचधनुःशतानि पंचविंशधनुःशतं च लिंगेन पंचधनुःशतानि त्र्यधिकधनुःशतप्रमाणस्यापेक्षया संख्येयगु

प्रज्ञाप० वृत्तिः॥ णहीनो भवति तदपेक्षया स्थितिः परिपूर्णपंचधनुःशतप्रमाणासंख्येयगुणाधिका यथा एकोऽपर्याप्तावस्थायामंगुलस्यासंख्येयभागावगा
हे वर्त्तते अन्यश्च पंचधनुःशतानि तेन तेनांगुलासंख्येयभागश्चासंख्यातगुणितः सन् पंचधनुःशतप्रमाणो भवति ततोऽपर्याप्तावस्थायामंगु
लासंख्येयभागप्रमाणेऽवगाहे वर्त्तमानः परिपूर्णपंचधनुःशतप्रमाणापेक्षया असंख्येयगुणहीनः पंचधनुःशतप्रमाणस्तु तदपेक्षयाऽसंख्ये
यगुणाभ्यधिकः ठिइए सिय हीणे इत्यादि यथावगाहनया हीनोऽधिकश्चोक्तस्तथा स्थित्यापि वक्तव्यो भावः एतदेवाह ठिईए हीणे अ
संखेज्जइभागहीणे वा इत्यादि तत्र एकस्य किल नारकस्य त्रयस्त्रिंशत्सागरोपमाणि स्थितिरपरस्य तु तान्येव समयादिन्यूनानि ततः यः समयादिन्यूनत्र
यस्त्रिंशत्सागरोपमप्रमाणस्थितिकः स परिपूर्णत्रयस्त्रिंशत्सागरोपमस्थितिकनारकापेक्षया असंख्येयभागहीनः परिपूर्णत्रयस्त्रिंशत्सागरोपम-
स्थितिकस्तदपेक्षया असंख्येयभागाभ्यधिकः समयादेः सागरोपमापेक्षया असंख्येयभागमात्रत्वात् तथाऽसंख्येयैः समयैरेका
वलिका संख्याताभिरावलिकाभिरेक उच्छ्वासनिःश्वासकालः सप्तभिरुच्छ्वासनिःश्वासैरेकः स्तोकः सप्तभिः स्तोकैरेको लवः स
प्तसप्तत्या लवानामेको मुहूर्त्तः त्रिंशता मुहूर्त्तैरहोरात्रः पंचदशभिरहोरात्रैरेकः पक्षो द्वाभ्यां मासो द्वादशभिर्मासैः संवत्सरः पल्योपमसागरो
पमानि ततः समयावलिकोच्छ्वासमुहूर्त्तदिवसाहोरात्रपक्षमाससंवत्सरयुगैर्हीनः परिपूर्णस्थितिकनारकापेक्षया संख्येयभागहीनो भवति तदपे
क्षया स्थितितोऽसंख्येयभागाभ्यधिकस्तथा एकस्य त्रयस्त्रिंशत्सागरोपमाणि स्थितिः परस्य तान्येव पल्योपमैर्न्यूनानि दशभिश्च पल्योपमकोटीभिरेकं
सागरोपमं निष्पद्यते ततः पल्योपमैर्न्यूनस्थितिकः परिपूर्णस्थितिनारकापेक्षया संख्येयभागाभ्यधिकः तथा एकस्य सागरोपममेकं स्थितिरपरस्य परि
पूर्णानि त्रयस्त्रिंशत्सागरोपमाणि तत्रैकसागरोपमस्थितिकः परिपूर्णस्थितिकनारकापेक्षया संख्येयगुणहीनः एकस्य सागरोपमस्य त्रयस्त्रिंशता गुण-
नेन परिपूर्णस्थितिकत्वप्राप्तेः परिपूर्णस्थितिकस्तु तदपेक्षया संख्येयगुणाभ्यधिकः तथा एकस्य दशवर्षसहस्राणि स्थितिरपरस्य त्रयस्त्रिंशत्सागरोपमाणि
दशवर्षसहस्राणि चासंख्येयरूपेण गुणकारेण गुणितानि त्रयस्त्रिंशत्सागरोपमाणि भवंति ततो दशवर्षसहस्रस्थितिकस्त्रयस्त्रिंशत्सागरोपमस्थितिकनार ७७

कापेक्षया संख्येयगुणहीनस्तदपेक्षया तु त्रयस्त्रिंशत्सागरोपमस्थितिकोऽसंख्येयगुणाभ्यधिक इति तदेवमेकस्य नारकापेक्षया द्रव्यार्थतया
चतुल्यत्वमुक्तं क्षेत्रतोऽवगाहनं प्रति हीनाधिकत्वेन चतुःस्थानपतितत्वं कालतोऽपि स्थितितो हीनाधिकत्वेन चतुःस्थानपतितत्वमिदानीं भावाश्रयं हीनाधि
कत्वं प्रतिपाद्यते तत्र सकलमपि जीवद्रव्यं वा परस्परतो द्रव्यक्षेत्रकालभावैर्विभिन्नस्वलक्षणं यथा घटः तथाहि घटो द्रव्यत एको मार्त्तिकः परः कांचनो
राजतादिर्वा क्षेत्रत एक इहत्यः परः पाटलिपुत्रकः कालत एकोऽद्यतनोऽन्यस्त्वैषमः परुत्नो वा भावतः एकः श्यामोऽपरस्तु रक्तादिरेवमतः पुद्ग-
लविपाकिनामकर्मोदयनिमित्तजीवौदयिकभावाश्रयेण हीनाधिकत्वमाह कालवन्नपज्जवेहिं सिय हीणे सिय तुल्ले सिय अब्भहिए अस्या-
क्षरघटना पूर्ववत् तत्र यथा हीनत्वमभ्यधिकत्वं वा तथा प्रतिपादयति जइ हीणे इत्यादि इह भावापेक्षया हीनाधिकत्वचिंतायां हीनोऽधिको
वा षट्स्थानकमेवं यद्यदपेक्षया अनंतभागहीनं अनंतभागहीनं तस्य सर्वजीवानंतकेन भागे हृते यल्लभ्यते तेनानंततमेन भा
गेन हीनं यच्च यदपेक्षयासंख्येयभागहीनं तस्यापेक्षणीयस्यासंख्येयलोकाकाशप्रदेशप्रमाणेन राशिना भागे हृते
यल्लभ्यते तावता भागेन न्यूनं यच्च यदपेक्षया संख्येयभागहीनं तस्यापेक्षणीयस्योत्कृष्टसंख्येयकेन भागे हृते यल्लभ्यते तावता हीनं
गुणमधिकं वा तु यदुच्यते संख्येयगुणं तत् अवधिभूतमुत्कृष्टेन संख्येयकेन गुणितं सत् यावद्भवति तावत्प्रमाणमवसातव्यं यच्च यतोऽ
संख्येयगुणं तदवधिभूतमसंख्येयलोकाकाशप्रमाणेन गुणकारेण गुणितं सत् यावद्भवति तावदवसेयं यच्च यस्मादनंतगुणं तदव
धिभूतं सर्वजीवानंतकरूपेण गुणकारेण गुण्यते गुणितं सत् यावद्भवति तावत्प्रमाणं द्रष्टव्यं तथा चैतदेव कर्मप्रकृतिसंग्र
हिण्यां षट्स्थानकप्ररूपणावसरे उक्तं सव्वजीयाणंतमसंखलोग संखेज्जगस्स जेट्ठस्स भागो तिसु गुणणा तिसु इति सप्रत्यधिकृतवस्तु षट्स्थानप
तितत्वं भाव्यते तत्र कृष्णवर्णपर्यायपरिमाणं तत्त्वतोऽसंख्यातमप्यसत्कल्पनया किल दशसहस्राणि १०००० तस्य सर्वजीवानंतकेन शतपरि
माणपरिकल्पितेन भागो ह्रियते लब्धं शतं १०० तत्रैकस्य किल नारकस्य कृष्णवर्णपर्यायपरिमाणं दशसहस्राणि अपरस्य तान्येव शतेन हीनानि

प्रज्ञा० वृत्तिः॥

९९९९ शतं च सर्वजीवानंतकेन भागहारे लब्धं वा दनंततमो भागस्तावता यस्य तेन हीनानि दशसहस्राणि सोऽपरस्य परिपूर्णदशसहस्रप्रमाणकृष्णवर्णपर्या
यस्य नारकस्यापेक्षया अनंतभागहीनस्तदपेक्षया तु सोऽपरः कृष्णवर्णपर्यायैरनंतभागाभ्यधिकः तथा कृष्णवर्णपर्यायपरिमाणस्य दशसहस्रसंख्या
कस्यासंख्येयलोकाकाशप्रमाणपरिकल्पितेन पंचाशत्परिमाणेन भागो ह्रियते लब्धं द्विशतं एतावानसंख्येयतमो भागः
तत्रैकस्य किल नारकस्य कृष्णवर्णपर्यायदशसहस्राणि शतद्वयेन हीनानि ९८०० अपरस्य परिपूर्णानि दशसहस्राणि १०००० ततश्च शतद्वय
हीनदशसहस्रप्रमाणकृष्णवर्णपर्यायः स परिपूर्णकृष्णवर्णपर्यायनारकापेक्षया संख्येयभागहीनः परिपूर्णकृष्णवर्णपर्यायस्तु तदपेक्षया अस
ंख्येयभागाधिकः २ तथा तथैव कृष्णवर्णपर्यायराशेर्दशसहस्रसंख्याकस्य उत्कृष्टसंख्येयकपरिमाणपरिकल्पितेन दशकपरिमाणेन भाग
हारेण भागो ह्रियते लब्धं सहस्रं एतत्किल संख्याततमो भागः तत्रैकस्य नारकस्य किल कृष्णवर्णपर्यायपरिमाणं नवसहस्राणि ९०००
अपरस्य दशसहस्राणि सहस्रेण हीनानि सहस्रं च संख्येयतमो भाग इति नवसहस्रप्रमाणकृष्णवर्णपर्यायो दशसहस्रप्र
माणकृष्णवर्णपर्यायनारकापेक्षया संख्येयभागहीनस्तदपेक्षया त्वितर संख्येयभागाभ्यधिकः तथैकस्य नारकस्य किल कृष्णवर्णपर्या
यपरिमाणं सहस्रं अपरस्य दशसहस्राणि तत्र सहस्रं दशकेनोत्कृष्टसंख्यात ककल्पितेन गुणितं दशसहस्रसंख्याकं भवतीति सहस्रसंख्याक
कृष्णवर्णपर्यायनारकापेक्षया संख्येयगुणहीनस्तदपेक्षया परिपूर्णकृष्णवर्णपर्यायः संख्येयगुणाभ्यधिकः तथैकस्य किल नारकस्य कृष्ण
वर्णपर्याया द्विशतं परस्य परिपूर्णानि दशसहस्राणि द्विशतं चासंख्येयलोकाकाशप्रदेशपरिमाणकल्पितेन पंचाशत्परिमाणेन गुणका
रेण गुणितं दशसहस्राणि जायंते ततो द्विशतपरिमाणकृष्णवर्णपर्यायो नारकः परिपूर्णकृष्णवर्णपर्यायनारकापेक्षया असंख्येयगुणहीनस्तदपे
क्षया त्वितरोऽसंख्येयगुणाभ्यधिकः तथैकस्य किल नारकस्य कृष्णवर्णपर्यायपरिमाणं शतमपरस्य दशसहस्राणि शतं च सर्वजीवानंतकपरिक
ल्पितेन शतेन गुणकारेण गुणितं जायंते दशसहस्राणि ततः शतप्रमाणकृष्णवर्णपर्यायो नारकः परिपूर्णकृष्णवर्णपर्यायनारकापेक्षया अनंतगु ७८

णहीन इतरस्तु तदपेक्षयाऽनंतगुणाभ्यधिकः एवं कृष्णवर्णपर्यायानधिकृत्य हानौ वृद्धौ च षट्स्थानपतितत्वमुक्तं एवं शेषवर्णगंधरसस्पर्शैरपि
प्रत्येकं षट्स्थानपतितत्वं भावनीयं तदेवं पुद्गलविपाकिनामकर्मोदयजनितजीवौदयिकभावाश्रयेण षट्स्थानपतितत्वं भावनीयं इह द्रव्यतस्तु
ल्यत्वं वदता संसूचितं सर्वप्रकारेण निर्लेपजीवमसंपर्ककरमवदनलिप्तदेशकाललक्षणप्रत्ययबहुविशेषलादपरिणतायामिद्रव्यमित्यावि
तं अवगाहनतया चतुःस्थानपतितत्वमभिवदता सूचितं ततः संकोचविकोचधर्मा आत्मा न तु द्रव्यप्रदेशसंख्यया इति दर्शितं उक्तं चेदमन्यत्रापि विकस
नसंकोचनतया न तु द्रव्यप्रदेशसंख्याया हानिवृद्धी स्तः कृतं तत्क्रतावात्मनः स्मात् स्थित्या चतुःस्थानपतितत्वं वदता आयुःकर्मस्थितिनिबंध
कानामध्यवसायस्थानानामनुकर्षापकर्षविचित्ररूपदर्शिता अन्यथा स्थित्या चतुःस्थानपतितत्वायोगात् आयुःकर्म चोपलक्षणं तेन सर्वक
स्थितिनिर्वर्तकं प्रत्यध्यवसायानां कषायकर्षविचित्ररूपता तस्याः कृष्णादिपर्यायैः षट्स्थानपतितत्वमुपदर्शयता एकस्यापि नारकस्य प
र्यायाः अनंताः किं पुनः सर्वेषां नारकाणामिति दर्शितं अथ नारकाणां पर्यायानंत्यं पृष्टेन भगवता तदेव पर्यायानंत्यं न च
न्यत् ततः किमर्थं द्रव्यक्षेत्रकालाभिधानमिति तदयुक्तमभिप्रायापरिज्ञानात् इह न सर्वेषां सर्वत्र पर्यायाः समसंख्याः किंतु
षट्स्थानपतिताः तच्चानंतरमेव दर्शितं तच्च षट्स्थानपतितत्वं परिणामित्वमंतरेण न भवति तच्च परिणामित्वं यथोक्तलक्षणस्य द्रव्यस्येति
द्रव्यमभिहितं तथा न कृष्णादिपर्यायैरेव पर्यायवान् जीवः किंतु तत्क्षेत्रसंकोचधर्मतयापि तथा तद्व्यवस्थानयुक्ततयापीति ख्यापना
र्थं क्षेत्रकालाभ्यां चतुःस्थानपतितत्वमुक्तमिति कृतं प्रसंगेन तदेवमवसितं नैरयिकाणां पर्यायानंत्यमिदानीमसुरकुमारादिपर्या
यानभिधित्सुराह असुरकुमाराणं भंते केवइया पज्जवा पन्नत्ता इत्यादि सूत्रपाठः प्रायः सर्वेष्वसुरकुमारादिषु ततः सकलमपि चतुर्वि
शतिदंडकसूत्रं प्राग्वद्भावनीयं यस्तु विशेषः स उपदर्श्यते तत्र यत् पृथिवीकायिकादीनामवगाहनाया अंगुलासंख्येयभागप्रमाणाया अपि
चतुःस्थानपतितत्वं तदंगुलासंख्येयभागस्यासंख्येयभेदभिन्नत्वादवसेयं स्थित्या हीनत्वमभ्यधिकत्वं च त्रिस्थानपतितं न चतुःस्थानपतितमसं

प्रज्ञा०वृत्तिः॥

ख्येयगुणहीनत्वासंभवात्कथं भवतीति चेदुच्यते इह पृथिव्यादीनां सर्वजघन्यमायुः क्षुल्लकभवग्रहणस्य परिमाणमावलिकानां द्वे शते
षट्पंचाशदधिके षट्पंचाशदधिकावलिकाप्रमाणस्य सर्वसंख्येयक्षुल्लकभवग्रहणानां पंचषष्टिसहस्राणि पंचशतानि षट्त्रिंशदधिकानि इत्यष्टदशके
चत्वारिंशत्समया इत्येवमाद्यप्रमाणता दोति आवलियपमाणेणं खुड्डागभवग्गहणं भवति एतच्च जघन्यं पृथिव्यादीनां स्थितिरुत्कर्षतो
द्विसंख्येयवर्षप्रमाणा ततस्तासां संख्येयगुणहीनत्वासंभवः शेषहानित्रिकभावना त्वेवं एकस्य किल पृथिवीकायस्य स्थितिः परिपूर्णा
द्वाविंशतिवर्षसहस्राणि अपरस्य तान्येव समयन्यूनानि ततः समयन्यूनद्वाविंशतिवर्षसहस्रस्थितिकः परिपूर्णद्वाविंशतिवर्षसहस्रस्थितिकापे-
क्षया असंख्येयभागहीनस्तदपेक्षया चेतरोऽसंख्येयभागाधिकस्तथा। एकस्य परिपूर्णानि द्वाविंशतिवर्षसहस्राणि स्थितिरपरस्य तान्येवा-
न्तर्मुहूर्त्तादिना न्यूनानि अन्तर्मुहूर्त्तादिकं च द्वाविंशतिवर्षसहस्राणां संख्ये यतमो भागः ततोऽन्तर्मुहूर्त्तादिन्यूनद्वाविंशतिवर्षसहस्रस्थिति-
कः परिपूर्णद्वाविंशतिवर्षसहस्रस्थितिकापेक्षया संख्येयभागहीन स्तदपेक्षया चेतरः संख्येयभागाभ्यधिकः तथा एकस्य
द्वाविंशतिवर्षसहस्राणि स्थितिरपरस्यान्तर्मुहूर्त्तं मासो वर्षं वर्षसहस्रं वा। अन्तर्मुहूर्त्तादिकं नियतपरिमाणया संख्यया गुणितं द्वाविं-
शतिवर्षसहस्रप्रमाणं भवति ततोऽन्तर्मुहूर्त्तादिप्रमाणस्थितिकः परिपूर्णद्वाविं शतिवर्षसहस्रस्थितिकापेक्षया संख्येयगुणहीनस्तदपेक्षया तु प-
रिपूर्णद्वाविंशतिवर्षसहस्रस्थितिकः संख्येयगुणाभ्यधिकः एवमप्कायिकादीनामपि चतुरिन्द्रियपर्यन्तानां स्वस्वोत्कृष्टस्थित्यनुसारेण स्थित्या चतुःस्थानप-
तितत्वं भावनीयं ॥ तिर्यक्पंचेन्द्रियाणां मनुष्याणां च चतुःस्थानपतितत्वं तत्र बाहुल्कर्षतस्त्रीणि पल्योपमानि स्थितिः पल्योपमं चासंख्येयवर्षसहस्रप्रमा-
णमतः संख्येयगुणवृद्धिहान्योरपि संभवादुपपद्यते चतुःस्थानपतितत्वं एवं व्यन्तराणामपि तेषां जघन्यतो दशवर्षसहस्रस्थितिकत्वादुत्कर्षतः पल्योप-
मस्थितिः ज्योतिष्कवैमानिकानां तु न स्थित्या त्रिस्थानपतितत्वं यतो ज्योतिष्काणां जघन्यमायुः पल्योपमाष्टभागेनोत्कृष्टं वर्षलक्षाधिकं पल्योपमं वैमानि-
कानां जघन्यं पल्योपममुत्कृष्टं त्रयस्त्रिंशत्सागरोपमाणि दशकोटीकोटीसंख्येयपल्योपमप्रमाणं च सागरोपममतस्तेषामप्यसंख्येयगुणवृद्धिहान्य- ३९

संभवात्स्थितितस्त्रिस्थानपतितता शेषस्त्वत्र भावना तु भागमाश्रित्य यथा भावनीया तदेवं सामान्यतो नैरयिकादीनां प्रत्येकं पर्यायानन्त्यं प्रतिपादितमिदानीं ज-
घन्यावगाहनाद्यधिकृत्य तेषामेव प्रत्येकं पर्यायानन्त्यं प्रतिपिपादयिषुराह ॥ जहन्नोगाहणाणं नेरइयाणं इत्यादि सुगमं नवरं ठिइए चउट्ठाणवडिए
इति जघन्यावगाहनो हि दशवर्षसहस्रस्थितिकोऽपि भवति त्रयस्त्रिंशत्सागरोपमस्थितिकोऽपि सप्तमनरकपृथिव्यां ततो युज्यते स्थित्या चतुःस्थान-
पतितता तिन्नि नाणा तिन्नि अन्नाणा इति इह यदा संज्ञिपंचेन्द्रियो नरकेषूत्पद्यते तदा स नारकायुःसंवेदनप्रथमसमय एव
पूर्वगृहीतौदारिकशरीरपरिशाटं करोति तस्मिन्नेव च समये सम्यग्दृष्टेस्त्रीणि ज्ञानानि मिथ्यादृष्टेस्त्रीण्यज्ञानानि पद्यते नानाविग्रहेण वा-
गत्वा वैक्रियशरीरसंघातं करोति यस्त्वसंज्ञिपंचेन्द्रियो नरकेषूत्पद्यते तस्य तदानीं विभंगज्ञानं नास्तीति जघन्यावगाहनस्या-
ज्ञानानि भजनया द्वे त्रीणि वेति उत्कृष्टावगाहनसूत्रे स्थित्या। हीनोऽधिको वा त्रिस्थानपतितत्वं यतोऽसंख्येयभागहीनत्वं
वा संख्येयभागाधिकत्वं वा संख्येयभागाधिकत्वं वा न तु संख्येयया। संख्येयगुणवृद्धिहानी कस्मादिति चेदुच्यते उ-
त्कृष्टावगाहना हि नैरयिकाः पंचधनुःशतप्रमाणाः ते च सप्तमनरकपृथि व्यां तत्र जघन्या स्थितिः द्वाविंशतिः सागरोपमानि उत्कृष्टा त्र-
यस्त्रिंशत्सागरोपमाणि ततोऽसंख्येयसंख्येयभागहीनाधिकत्वे वा घटते न तु सं। ख्येयगुणहानिवृद्धी तथा चोत्कृष्टावगाहनानां त्रीणि ज्ञानानि
वा नियमादिति यतस्ते भजनया न भवन्ति असंज्ञिपंचेन्द्रिया उत्पाद्यस्य तेषामसंभवात् अजघन्योत्कृष्टावगाहनासूत्रे जघन्योत्कृष्टावगाहन-
या चतुःस्थानपतितत्वं तदेव अजघन्योत्कृष्टावगाहनो हि सर्वजघन्यांगुलासंख्येयभागमात्रादारभ्य सर्वोत्कृष्टत्वं यावत् अंगुलासंख्येयभागादारभ्याप-
कं च अंगुलासंख्येयभागन्यूनानि पंच धनुःशतानि ततः सामान्यनैरयिकसूत्र इवात्रापि युज्यते अवगाहनातश्चतुःस्थानपतितत्वं
स्थित्या चतुःस्थानपतितता स्वप्रतीता दशवर्षसहस्रेभ्य आरभ्योत्कर्षतस्त्रयस्त्रिंशत्सागरोपमाणामपि तस्य लभ्यमानत्वात् जघन्यस्थितिसूत्रे अवगा-
हनया चतुःस्थानपतितत्वं तस्यावगाहनाया जघन्यतोऽङ्गुलासंख्येयभागादारभ्योत्कर्षतः सप्तधनुरर्धचतुर्थहस्तमानत्वात् तथा त्रीणि ज्ञानानि अज्ञाना

तिक्तकषायां विकासादिविकल्पतया इत्यर्थः तथा निसन्नद्विमासं ज्ञिपंचेंद्रियेषु तत्र ज्ञानानां मतिपर्यायाणां वृद्धायां विज्ञानस्यालाभात् उत्कृष्टस्थिति चिंतायामवगाहनयाव
त्रिःस्थानपतितत्वं उत्कृष्टस्थितिकस्यावगाहनाया जघन्यातोऽगुलासंख्येयभागादारभ्योत्कर्षतः पंचानां धनुःशतानां भावेऽत्राप्यवगाहनमानात् अनुत्कृष्टस्थितिकाम
ध्येऽपि एवंवितव्या स्थितिजघन्योत्कृष्टतावपि तथा वक्तव्यं यथा जघन्यस्थितिसूत्रे वचनवरमयं विशेषो जघन्यस्थितिसूत्रे उत्कृष्टस्थितिसूत्रे च स्थि
त्यातुल्यत्वमभिहितमत्र तु चतुःस्थानपतितत्वं चतुःस्थानपतित इति वक्तव्यं समयाधिकद्वात्रिंशत्सागरोपमस्त्यारभ्योत्कर्षतः समयोनत्रयस्त्रिंशत्सागरोप
मायामवाप्यमानत्वात् जघन्यगुणकालिकादिसूत्राणि सुप्रतीतानि नवरं स्वस्थानात् स्वअप्पाणां च्छितित यस्य ज्ञानानि तस्याज्ञानानि न संतीति
यतः सम्यग्दृष्टेर्ज्ञानानि मिथ्यादृष्टेरज्ञानानि सम्यग्दृष्टिर्वा मिथ्यादृष्टिर्वा एषः। दर्शनत्रयं मिथ्यादृष्टिर्वा अपि सम्यग्दृष्टिर्वाऽपि दर्शनत्रयभावात् ज्ञान
मज्ञानाभावः एवमज्ञानस्य ज्ञानाभावः ततउक्तं जहा नाणा तह अण्णाणावि नवरं स्वस्थाने अन्नाणा तस्य ना
णाने भवंति इति चक्षुर्दर्शनादिसूत्राण्यपि भावनीयानि। नायातिप्रायः समानमसत्वात् जघन्यावगाहनानां द्वि
पृथिव्यादिसूत्रे स्थित्या त्रिस्थानपतितत्वं संख्येयवर्षायुष्कत्वात् एतद्भावना वमानानां पृथिवीकायिकसूत्रे च विविपर्यायचिंतायाम
ज्ञानवमत्यज्ञाने श्रुताज्ञाने च वक्तव्ये न तु ज्ञानानि तेषां सम्यक्त्वस्य तेषु सम्यक्त्वसहितस्योत्पादाभावात् तथा तथा वा उद्वर्त्ती
एषु इतिवचनात् अतएवेत्तदेवोक्तमत्र दो ठिकं अण्णाणा ठिकइति जघन्यावगाहनं द्वीन्द्रियसूत्रे दो हिंनाणा दोहिं अन्नाणा इति द्वीन्द्रियानां हि के
षांचित् अपर्याप्तावस्थायां सासादनसम्यक्त्वमवाप्यते सम्यग्दृष्टेः ज्ञानमिति ज्ञाने लभ्यते शेषाणामज्ञाने ततउक्तं मत्यज्ञानाद्यज्ञानात्सा
ज्ञानात्सामिति उत्कृष्टावगाहनायां अपर्याप्तावस्थायां अलाभात् सासादनसम्यक्त्वाभावात् तत एतज्ज्ञानेन वक्तव्यं तथा चाह एवं उक्कोसिओगाहणा
एविनवरं नाणा तत्थि नथा अजघन्योत्कृष्टावगाहना किल प्रथमसमयादूर्द्ध्वं भवति अपर्याप्तावस्थायामपि तस्याः संभवात् सासादनसम्यक्त्वतो ज्ञाने अ
न्येषामज्ञाने इति ज्ञाने वाज्ञाने च वक्तव्ये तथा चाह अजहन्नमणुक्कोसोगाहणए जहा जहन्नोगाहणए इति तथा जघन्यस्थितिसूत्रे उक्त्या

ज्ञाने एवं वक्तव्ये न तु ज्ञाने यतः सर्वजघन्यस्थितिकोलब्ध्यपर्याप्तको भवति न च लब्ध्यपर्याप्तकेषु मध्ये सासादनसम्यग्दृष्टिरुत्पद्यते किंकारण
मिति चेत् उच्यते लब्ध्यपर्याप्तकादि सर्वसंक्लिष्टः सासादनसम्यग्दृष्टिश्च मनाक्शुभपरिणामस्ततः सतेषु मध्ये नोत्पद्यते तेन ज्ञानेन
वलभ्यते न ज्ञाने उत्कृष्टस्थितिषु पुनर्मध्ये सासादनसम्यक्त्वसहितोत्पद्यते इति सूत्रे ज्ञाने अज्ञाने च वक्तव्ये तथा चाह एवं उक्कोसठि
इएवि नवरं दो णाणा अब्भहियाइति एवमजघन्योत्कृष्टस्थितिसूत्रमपि वक्तव्यं नाव सूत्राणि पाठसिद्धानि एवं त्रीन्द्रियचतुरिन्द्रियाअपि
वक्तव्याः नवरं चतुरिंद्रियाणां चक्षुर्दर्शनमधिकमनुषङ्गिचतुरिंद्रिया योगात् इति तेषां चक्षुर्दर्शनविषयमपि सूत्रं वक्तव्यं जघन्यावगाहन
तिर्यक्पंचेंद्रियसूत्रे ठिइए तिट्ठाणवडिए इति इह तिर्यक्पंचेंद्रियसूत्रे ठिइए तिट्ठाणवडिए इति इह तिर्यक्पंचेंद्रियसूत्रे ठि इए तिट्ठ
णवडिए इति इह तिर्यक्पंचेंद्रियः संख्येयवर्षायुष्कः एक जघन्यावगाहनो भवति नासंख्येयवर्षायुष्कः किंकारणमिति चेत् उच्यते अ
संख्येयवर्षायुष्का हि महाशरीराः कक्कुडिपरिणामबाधानामहाराः एवलभ्यते यथासम्मतमेषां च्यवनात् उत्कृष्टमितिपल्योपव
तिपल्योपमकात्रुत्पदनिविर्वतीर्यक्प्रभृत्यमाणासुत्रानसमयाः वृगाहनानिति ते षां जघन्यावगाहनालभ्यते किंतु संख्येयवर्षायुषां संख्ये
यवर्षायुष्कश्च स्थित्या त्रिस्थानपतिता एतद्भावितं प्राक् तत उक्तं स्थित्या त्रिस्थानप तिता इति दोहिं नाणेहिं दोहिं अन्नाणेहिं इति जघन्यावगा
हनकाहि तिर्यक्पंचेंद्रियः संख्येयवर्षायुष्कः पर्याप्तो भवति सोपि वाल्पकायेषु मध्ये समुत्पद्यमानस्य स्यावधिविभंगज्ञानासंभवात् द्वे ज्ञाने द्वे
अज्ञाने उक्ते यस्तु विभंगज्ञानसहितो नरकादिभ्यः संख्येयवर्षायुष्कपु तिर्यक्पंचेंद्रियेषु मध्ये समुत्पद्यमानो महत्सु तत्समहाकायेषु उत्पद्य
मानोऽपि स्वल्पकायेषु तथा स्वाभाव्यात् तन्मा विभंगज्ञानसूत्र विरोधः उत्कृष्टावगाहनतिर्यक्पंचेंद्रियसूत्रे तिहिं अन्नाणेहिं इति त्रिज्ञानेषु त्रि
ज्ञानैः परस्थानपतितत्वं तत्रीणि अज्ञानानि किमिति चेत् उच्यते इह यस्य योजनसहस्रं शरीरावगाहना स उत्कृष्टावगाहनः स च संख्येयवर्षायु
ष्कएवगाहनः स च संख्येयवर्षायुष्कः पर्याप्त एव भवति पर्याप्तत्वे च तस्य त्रीणि ज्ञानानि त्रीणि वाऽज्ञानानि भवंतिस्थित्या पिच सा उत्कृष्टावगाहनत्रिस्थानपतितः।

प्रज्ञाप०वृत्ति॥

संख्येयवर्षायुष्कस्यात् अजघन्योत्कृष्टावगाहनस्य ते स्थित्या चतुःस्थानपतितता जघन्योत्कृष्टावगाहनो हि संख्येयवर्षायुष्कोपि लभ्यते ततस्तदुपपद्यते
आयुष्कस्य चतुःस्थानपतितत्वं जघन्यस्थितिकतिर्यक्पंचेंद्रियसूत्रे द्वे अज्ञाने एव वक्तव्ये न तु ज्ञाने यतो सो जघन्यस्थितिको लब्ध्यपर्याप्तक ए
व तेन तस्य सास्वादनसम्यग्दृष्टित्वाद् इति उत्कृष्टस्थितिकतिर्यक्पंचेंद्रियसूत्रे दो नाणा दो अन्नाणा इति उत्कृष्टस्थितिको हि तिर्यक्पंचेंद्रि
यस्त्रिपल्योपमस्थितिको भवति तस्य च द्वे अज्ञाने तावत् नियते यदा पुनः षण्मासावशेषायुर्वैमानिकेषु बद्धायुष्को भवति तदा तस्य द्वे ज्ञाने लभ्ये
ते ततः उक्तं द्वे ज्ञाने द्वे अज्ञाने इति अजघन्योत्कृष्टस्थितिकतिर्यक्पंचेंद्रियसूत्रे ठिइए चउठाणवडिए इति अजघन्योत्कृष्टस्थितिको हि तिर्यक्पंचें
द्रियः संख्येयवर्षायुष्कोपि लभ्यते असंख्येयवर्षायुष्कोपि समयोनत्रिप ल्योपमस्थितिकः ततश्चतुःस्थानपतितता जघन्याभिनिबोधि
कतिर्यक्पंचेंद्रियसूत्रे ठिइए तिट्ठाणवडिए इति असंख्येयवर्षायुषो पि हि तिर्यक्पंचेंद्रियस्य सद्भूमिकाउसारणजघन्ये आभि
निबोधिकश्रुतज्ञाने लभ्येते ततः संख्येयवर्षायुष्कस्य जघन्याभिनि बोधिकज्ञाने संभवात् इति स्थित्या चतुःस्थानपतितता उ
त्कृष्टाभिनिबोधिकज्ञानसूत्रे स्थित्या त्रिस्थानपतितता वक्तव्या यत इह यस्यो त्कृष्टे आभिनिबोधिकश्रुतज्ञाने स नियमात् संख्येयवर्षायु
ष्कः संख्येयवर्षायुष्कस्य स्थित्या त्रिस्थानपतितत्वं व्याख्यातं प्राक् अवधिसूत्रे वि भंगसूत्रे पि च स्थित्या त्रिस्थानपतितता किं कारणमिति चेत् उच्यते
असंख्येयवर्षायुषो ऽवधिविभंगासंभवात् आह च मूलटीकाकारः उक्तं हि विभंगे तु नियमा तिट्ठाणवडिए किं कारणं भन्नइ उक्तं हि विभंगा असंख्येय
वासाउयस्स न हुंति जघन्यावगाहनमनुष्यसूत्रे ठिइए तिट्ठाणवडिए इति तिर्यक्पंचेंद्रियवत् मनुष्या अपि जघन्यावगाहनः संख्येयवर्षा
युष्कस्य स्थित्या त्रिस्थानपतित एवेति तिन्नि नाणा दो इति यदा कश्चित् तीर्थकरत्वेन उत्तरोपपातिकदेवो वा अवधिपतितेनावधिज्ञानेन जघन्याया
मवगाहनायामुत्पद्यते तदा अवधिज्ञानमपि लभ्यते इति त्रीणि ज्ञानानि इत्युक्तं विभंगज्ञानसहितस्तु नरकादिभ्यो जघन्यायामवगाहनायां नोत्प
द्यते तथास्वाभाव्यान्न ततो विभंगज्ञानं न लभ्यते इति द्वाभ्यामज्ञानाभ्यामित्युक्तं उत्कृष्टावगाहनमनुष्यसूत्रे ठिइए सिय अब्भहिए जइ हीणे असंख्ये ८२

ज्जभागहीणे जइ अब्भहिए असंखेज्जइभागअब्भहिए इति उत्कृष्टावगाहना हि मनुष्यास्त्रिगव्यूतास्त्रिगव्यूतानां स्थितिर्जघन्यतः पल्योपमासंख्ये
यभागहीनानि त्रीणि पल्योपमानि उत्कर्षतः परिपूर्णानि त्रीणि पल्योपमानि उक्तं च जीवाभिगमे उत्तरकुरुमाइयाणं मणुस्साणं भंते केवइकालं ठि
ई पण्णत्ता गोयमा जहन्नेणं तिन्नि पलिओवमाइं संखेज्जइभागहीणाइं उक्कोसेणं तिन्नि पलिओवमाइं त्रिपल्योपमासंख्येयभागश्च त्रया
णां पल्योपमानां संख्येयतमो भागः त्रिपल्योपमासंख्येयभागहीनपल्योपमत्रयस्थितिकः परिपूर्णपल्योपमत्रयस्थितिकापेक्षया संख्ये
यभागहीन इतरस्तु तदपेक्षया असंख्येयभागाधिकः शेषाः पुनर्द्वे ज्ञाने लभ्यंते दो नाणा दो अन्नाणा इति उत्कृष्टावगाहना हि संख्येयवर्षायु
षो असंख्येयवर्षायुषो वावधिविभंगासंभवस्य प्राग्व्याख्यातत्वात् ततो द्वे एव ज्ञाने द्वे वाज्ञाने इति तथा अजघन्योत्कृष्टावगाहनः संख्येयव
र्षायुष्कोपि भवत्यसंख्येयवर्षायुष्कोपि गव्यूतद्विगव्यूतादिप्रमाणाव गाहनयापि चतुःस्थानपतितत्वं स्थित्यापि तथा आद्येषु
चतुर्षु मतिश्रुतावधिमनःपर्यवरूपेषु ज्ञानेषु षट्स्थानपतितता तेषां च अन्येषामपि ज्ञानानां तत्तद्द्रव्यादिसापेक्षक्षयोप
शमविशिष्टतारतम्यभावात् केवलज्ञानपर्यवैस्तुल्यता निःशेषाव रणापगमतः प्रादुर्भूतस्य सदा भावात् शेषं सुगमं ज
घन्यस्थितिकमनुष्यसूत्रे दो हि अन्नाणेहिं इति द्वाभ्यामज्ञानाभ्यां मत्यज्ञानश्रुताज्ञानरू पाभ्यां षट्स्थानपतितता वक्तव्या न तु ज्ञानाभ्यां कस्मादिति
चेदुच्यते जघन्यस्थितिका मनुष्याः संमूर्छिममनुष्यास्ते नियमतो मिथ्यादृष्टयस्ततस्तेषामज्ञाने एव न ज्ञाने उत्कृष्टस्थितिमनुष्यसूत्रे दो नाणा दो
अन्नाणा इति उत्कृष्टस्थितिका हि मनुष्यास्त्रिपल्योपमायुषस्तेषां च तावद् ज्ञाने नियमते यदा पुनः षण्मासावशेषायुषो वैमानिकेषु बद्धायुष
स्तदा सम्यक्त्वलाभात् द्वे ज्ञाने लभ्यते अवधिविभंगौ वा संख्येयवर्षायुषां न स्त इति त्रीणि ज्ञानानीति नोक्तं अजघन्योत्कृष्टस्थितिकमनुष्यसूत्रम
जघन्योत्कृष्टावगाहनमनुष्यसूत्रमिव भावनीयं जघन्याभिनिबोधिकमनुष्यसूत्रे द्वे ज्ञाने वक्तव्ये द्वे दर्शने किं कारणमिति चेदुच्यते जघ
न्याभिनिबोधिको हि जीवो नियमादवधिमनःपर्यवज्ञानविकलः प्रबलज्ञानावरणकर्मोदयसद्भावादन्यथा जघन्याभिनिबोधिकज्ञा

प्रज्ञाप० वृत्तिः। नवात्यायामात्ततः स्वाचज्ञानदर्शनाभ्यां संभवादाभिनिबोधिकज्ञानपर्यवैस्तुल्यः श्रुतज्ञानपर्यवैर्व्यांदर्शनाभ्यांच षट्स्थानपतितत्वोक्ताः उत्कृष्टा-
भिनिबोधिकासूत्रे ठिईए तिट्ठाणवडिए इति उत्कृष्टाभिनिबोधिका हि नियमा असंख्येयवर्षायुषः संख्येयवर्षायुषश्च असंख्येयवर्षायुषां च अवस्थानवस्थानात् सर्वोत्कृष्टा-
भिनिबोधिकज्ञानासंभवात् संख्येयवर्षायुष्कश्च प्राग्उक्तयुक्त्या स्थित्या त्रिस्थानपतित इति जघन्यावधिसूत्रे च अवगाहनया त्रिस्थानपतितो वक्तव्य
: यतः सर्वजघन्यावधिर्यो उक्तः स तु पाणमनुष्याणां पारभविको न भवति किंतु तद्भववर्ती स पश्चात्पर्याप्तावस्थायां पर्याप्तावस्थायां तद्योग्य वि-
शुद्ध्यभावात् उत्कृष्टोऽप्यवधिर्भावतश्चारित्रिणस्ततो जघन्यावधिरुत्कृष्टावधिर्वा अवगाहनया त्रिस्थानपतितः अजघन्योत्कृष्टावधिः पारभविको
पि संभवति ततः पर्याप्तावस्थायामपि तस्य संभवादजघन्योत्कृष्टावधिरवगाह- | नया चतुःस्थानपतितः स्थित्या तु जघन्यावधिरुत्कृष्टावधिरज-
घन्योत्कृष्टावधिर्वा त्रिस्थानपतितः असंख्येयवर्षायुषामवध्यसंभवान्नसं- | ख्येयवर्षायुष्कं च त्रिस्थानपतितत्वात् जघन्यमनःपर्यव-
ज्ञानी उत्कृष्टमनःपर्यवज्ञानी च स्थित्या त्रिस्थानपतितः चारित्रिणामेव | मनःपर्यवज्ञानसद्भावात् चारित्रिणां च संख्येयव-
र्षायुष्कत्वात् केवलज्ञानसूत्रे तु ओगाहणट्ठयाए चउट्ठाणवडिए इति केवले | समुद्घातं प्रतीत्य तथाहि केवलिसमुद्घातमतः केवली
शेषाः केवलिभ्योऽसंख्येयगुणावगाहनाः स्वदपेक्षया शेषाः केवलिनोऽसं- | ख्येयगुणहीनावगाहनाः समुद्घाततस्तु शेषाः केवलिनः स्थान-
पतिता इति स्थित्या त्रिस्थानपतितं संख्येयवर्षायुष्कत्वात् व्यंतराणां यथा असुरकुमाराः ज्योतिष्कवैमानिका अपि तथैव नवरं स्थित्या त्रिस्थानपति-
ता वक्तव्याः एतदेव गाथावताविरूपसंहारमाह जहा णेर० ० ० ० से तं जीवपज्जवा तेण अजीवपर्याया संप्रत्यजीवपर्यायानभिधित्सुराह अजीवपज्जवा
णं भंते इत्यादि रूविअजीवपज्जवाय अरूविअजीवपज्जवाय इति रूपमिति रूपलक्षणमतत् गंधरसस्पर्शाः तेविद्यते येषां ते रूपिणः रूपिणश्च ते अ-
जीवाश्च रूप्यजीवास्तेषां पर्याया रूप्यजीवपर्याया इत्यर्थः तद्विपरीता अरूप्यजीवपर्यायाः अरूप्यजीवपर्याया इति भावः धम्मत्थिकाए इत्यादि
धर्मास्तिकाय इति परिपूर्णमवयविद्रव्यं धर्मास्तिकायस्य देश अस्य एवार्द्धादिरूपो विभागः धर्मास्तिकायस्य प्रदेशास्तस्यैव निर्विभागा भा- ८२

गाः एवं त्रिकमधर्मास्तिकाये आकाशास्तिकायेऽपि भावनीयं एतावता चात्मानात्यागमास्मिकावयवावयविभेदरूपं धर्मास्तिकायादिकं च स्थितिप्रति पा-
दितं अद्धासमयः अद्धासमयः नत्वरपर्यायावक्तव्ये उक्ता तास्मिन् कथं द्रव्यमत्रोपन्यासः उच्यते पर्यायपर्यायिणोः कथंचिदव्यतिरेकादित्युपनार्थः एवमुत्त-
रत्रापि अथः आह च मूलटीकाकारः अत्र सर्वत्र पर्यायपर्यायिणोः कथंचिदव्यतिरेकादिति दर्शनार्थमित्थं सूत्रोपन्यास इति परमार्थतस्तु इह धर्मास्ति-
कायदेशादिकं धर्मास्तिकायप्रदेशावसितादि ते णं भंते किं संखेज्जा इत्यादि ते स्कंधादयः प्रत्येकं किं संख्येया असंख्येया अनंता भगवानाह
अनंता एतदेव भावयति से केणट्ठेणं भंते इत्यादिपाठसिद्धं संप्रति इदं कक्रमेण परमाणुपुद्गलादीनां पर्याया अभिधानीयाः तत्र कक्रमेणायं
प्रथमतः सामान्येन परमाण्वादयश्चिंतनीयाः तदनंतरं एकप्रदेशावगाढादि | गाढा ततः एकसमयादिस्थितिका तदनंतरमेकगुणकालका-
दयः ततो जघन्यावगाहनाप्रकारेण तदनंतरं जघन्यस्थित्यादिना तदन- | तरं जघन्यगुणकालादिरूपेण तदनंतरं जघन्यप्रदेशा-
दिना तदनंतरं उक्तं च अणुमाइसुदियाणं खेत्ताइपएससंमया | ओगाहणाईण वसुद्देसाइइसाणं अ-
सा अक्कमक्कमसिका प्रथमतः परमाण्वादीनां चिंताकर्तव्या तदनंतरं क्षेत्रादि | प्रदेशसंगतानां अवगाहनाप्रदेशास्तु कालभावपरिग्रहः ततोय-
मर्थः प्रथमतः क्षेत्रप्रदेशावगाढादिभिः समस्तानां चिंताकर्तव्या तदनंतरं का- | लप्रदेशेरेकादिसमयस्थितानां भावप्रदेशैरेकगुणकाला-
कादिभिस्ततदनंतरं जघन्यावगाहनादीनामिति अत्रादिशब्दादजघन्यमध्यमोत्कृष्टावगाहनाजघन्यमध्यमोत्कृष्टस्थितिजघन्यमध्यमोत्कृष्टगुण-
कालकादिपरिग्रहः ततो जघन्यादिप्रदेशाजघन्यादिप्रदेशानामध्यमप्रदेशानामजघन्योत्कृष्टप्रदेशानामिति तत्र प्रथमतः क्रमे-
ण परमाण्वादीनां चिंताकर्तव्या इत्याह परमाणुपोग्गलाणं भंते इत्यादि स्थित्या चतुःस्थानपतितः परमाणवः समयादारभ्याकर्षितः संख्येयं कालम-
वस्थानभावात् कालादिवर्णपर्यायैः षट्स्थानपतिता एकस्यापि परमाणोः पर्यायानंत्याविरोधात् नन्वपरिमाणुरप्रदेशोऽगीयते ततः कथं
पर्यायानंत्याविरोधः पर्यायानंतता नियमतः प्रदेशापेक्षया प्रदेशस्य वस्तुतत्त्वापरिज्ञानात् परमाणुर्हि अप्रदेशोऽगीयते द्रव्यरूपतया सांशोऽपि न

प्रज्ञा० वृत्तिः। न्वाप्यमात्ततः शेषज्ञानदर्शनासंभवादाभिनिबोधिकज्ञानपर्यवैस्तुल्यः श्रुतज्ञानपर्यवैर्दर्शनाभ्यां च षट्स्थानपतित उक्ताः उक्कोसा-
भिनिबोधिका सावि ठिईए तिठाणवडिए इति उत्कृष्टाभिनिबोधिको हि नियमात्संख्येयवर्षायुः संख्येयवर्षायुषश्च प्रभावानवस्थानात् सर्वोत्कृष्टा-
भिनिबोधिकज्ञानासंभवात् संख्येयवर्षायुषश्च प्रायः कृष्ट्युक्तः स्थित्या त्रिस्थानपतित इति जघन्यावधिसूत्रे अवगाहनया त्रिस्थानपतितो वक्तव्य-
: यतः सर्वजघन्योऽवधिस्तिर्यक्पञ्चेन्द्रियाणां पारभविको न भवति किंतु तद्भवभावी सोऽपि पर्याप्तावस्थायाम् अपर्याप्तावस्थायां तद्योग्यवि-
शुद्ध्यभावात् उत्कृष्टोऽप्यवधिर्भवतश्चारित्रिणस्ततो जघन्यावधिरुत्कृष्टावधिर्वा अवगाहनया त्रिस्थानपतितः अजघन्योत्कृष्टावधिः पारभविको-
ऽपि संभवति ततोऽपर्याप्तावस्थायामपि तस्य संभवादजघन्योत्कृष्टावधिरवगाह- नया चतुःस्थानपतितः स्थित्या तु जघन्यावधिरुत्कृष्टावधिरज-
घन्योत्कृष्टावधिर्वा त्रिस्थानपतितः असंख्येयवर्षायुषामवधेरसंभवात् सं- ख्येयवर्षायुषां च त्रिस्थानपतितत्वात् जघन्यमनःपर्यव-
ज्ञानी उत्कृष्टमनःपर्यवज्ञानी च स्थित्या त्रिस्थानपतितः चारित्रिण एव मनःपर्यवज्ञानसद्भावात् चारित्रिणां च संख्येयव-
र्षायुष्कत्वात् केवलज्ञानसूत्रे अवगाहणट्ठयाए चउट्ठाणवडिए इति केवलि- समुद्घातं प्रतीत्य तथा हि केवलिसमुद्घातमतः केवली
शेषकेवलिभ्योऽसंख्येयगुणावगाहनस्तदपेक्षया शेषाः केवलिनोऽसं- ख्येयगुणहीनावगाहनाः स्वस्थाने तु शेषाः केवलिनस्त्रिस्थान-
पतिता इति स्थित्या त्रिस्थानपतितत्वं संख्येयवर्षायुष्कत्वात् व्यंतराणां यथा असुरकुमाराः ज्योतिष्कवैमानिका अपि तथैव नवरं ते स्थित्या त्रिस्थानपति-
ता वक्तव्याः एतद्वशागावनादि उपसंहारमाह ग्रंथाग्रं ५००० सेत्तं जीवपज्जवा तत्र जीवपर्यायाः संप्रत्यजीवपर्यायान्पृच्छति अ अजीवपज्जवा
णं भंते इत्यादि रूविअजीवपज्जवा य अरूविअजीवपज्जवा य इति रूपमिति उपलक्षणमेतत् गंधरसस्पर्शाश्च विद्यन्ते येषां ते रूपिणस्ते च ते अ-
जीवाश्च रूप्यजीवास्तेषां पर्याया रूप्यजीवपर्याया इत्यर्थः तद्विपरीता अरूप्यजीवपर्यायाः अमूर्त्ताजीवपर्याया इति भावः धम्मत्थिकाए इत्यादि
धम्मत्थिकाय इति परिपूर्णमवयविद्रव्यं धर्मास्तिकायस्य देशस्तस्यैवार्द्धादिरूपो विभागः धर्मास्तिकायस्य प्रदेशास्तस्यैव निर्विभागा भा- ८२

गाः एवं त्रिकं धर्मास्तिकाये आकाशास्तिकायेऽपि भावनीयं एतावता चात्मागमात्मकावयवावयविस्वरूपं धर्मास्तिकायादिकं वस्त्विति प्रतिपा-
दितं दशमोऽद्धासमयः नन्वत्र पर्यायाः प्रक्रान्ताः कथं द्रव्यमत्रोपन्यासः उच्यते पर्यायपर्यायिणोः कथंचिदभेदख्यापनार्थः एवं च
णायं ग्रंथः आह च मूलटीकाकारः अत्र सर्वत्र पर्यायपर्यायिणोः कथंचिद्भेदख्यापनार्थमित्थं सूत्रोपन्यास इति परमार्थतस्तु तदृष्टव्यं धर्मास्ति-
कायदेशा धर्मास्तिकायप्रदेशा इत्यादि ते णं भंते किं संखेज्जा इत्यादि तेऽद्धासमयादयः प्रत्येकं किं संख्येया असंख्येया अनन्ता भगवानाह
अनन्ता एतदेव भावयति से केणट्ठेणं भंते इत्यादि पाठसिद्धं संप्रति दंडकक्रमेण परमाणुपुद्गलादीनां पर्यायांश्चिंतनीयाः दंडकक्रमश्चायं
प्रथमतः सामान्यतः परमाण्वादयश्चिंतनीयास्तदनंतरं एकप्रदेशावगाढ गाढास्ततः एकसमयादिस्थितिकास्तदनंतरमेकगुणकालका-
दयः ततो जघन्यावगाहनादिप्रकारेण तदनंतरं जघन्यस्थित्यादिना तदन- नंतरं जघन्यगुणकालादिरूपेण तदनंतरं जघन्यप्रदेशा-
दिना भेदेनेति उक्तं च अणुमाइ उट्ठियाणं खंधाणं दुपएससंगया णं वड्ढ दसावगाहणाईण चेव डहदसाविदसाणं अ-
सा अद्दणगामनिका प्रथमतोऽण्वादीनां परिचिंता कर्तव्या तदनंतरं द्व्यादि प्रदेशसंगतानाम् आदिशब्दात् कालभावपरिग्रहः ततोऽय-
मर्थः प्रथमतः एकप्रदेशावगाढादिभिः समं ताश्चिंता कर्तव्या तदनंतरं का- लप्रदेशेनैकादिसमयस्थितानां च प्रदेशैकगुणकाला-
कादीनां तदनंतरं जघन्यावगाहनादीनामिति अत्रादिशब्देन मध्यमोत्कृष्टावगाहनाजघन्यमध्यमोत्कृष्टस्थितिजघन्यमध्यमोत्कृष्टगुण-
कालकादिवर्णपरिग्रहः ततो जघन्यादिप्रदेशा जघन्यादिप्रदेशानां मध्यमप्रदेशानामुत्कृष्टप्रदेशानामिति तत्र प्रथमतः क्रमे-
ण परमाण्वादीनां चिंतां कुर्वन्नाह परमाणुपोग्गलाणं भंते इत्यादि स्थित्या चतुःस्थानपतितत्वं परमाणूनां समयादारभ्याऽसंख्येयकालम-
वस्थानभावात् कालादिवर्णपर्यायैः षट्स्थानपतिता एकस्यापि परमाणोः पर्यायानंत्याभिधानात् ननु परमाणुरप्रदेश इति गीयते ततः कथं
पर्यायानन्त्याविरोधः पर्यायानन्त्या नियमतः प्रदेशान्मूर्तत्वयुक्तं वस्तुतत्त्वापरिज्ञानात् परमाणुर्हि अप्रदेशो गीयते द्रव्यरूपतया सांशमत्र

प्रज्ञापवृत्तेः॥

वर्तीति समुत्कालतावाच्यामपि अपएसाट्ठयाए उइतिवचनात् ततः कालतावाच्यां सप्रदेशा अपि न कश्चिद्दोषः तथा परमाण्वादीनामसंख्यातप्रदेश
कस्कंधपर्यंतानां केषांचिदनंतप्रदेशकानामपि स्कंधानां तथा एकप्रदेशावगाढानां यावदसंख्यातप्रदेशावगाढानां श्रीतास्त्रिविधरूपाश्चत्वार एवमप्य
वाइति ते सर्वपरमाण्वादीनां षट्स्थानपतितता वक्तव्या नवरोपदेशः द्विप्रदेशकस्कंधसूत्रे उगाहणट्ठयाए सिय हीणे सिय तुल्ले सिय अब्भहिए इत्या
दियदा ह्यवपि द्विप्रदेशकौ स्कंधौ द्विप्रदेशावगाढावेकप्रदेशावगाढावेकप्रदेशावगाढौ वा भवतस्तदा तुल्यावगाहनौ यदा त्वेको द्विप्रदे
शावगाढः परस्त्वेकप्रदेशावगाढस्तदैकप्रदेशावगाढो द्विप्रदेशावगाढापेक्षया प्रदेशहीनो द्विप्रदेशावगाढस्तु तदपेक्षया प्रदेशा
त्याधिकः शेषं प्राग्वत् त्रिप्रदेशकस्कंधसूत्रे उगाहणट्ठयाए सिय हीणे इत्या दि यदा ह्यवपि त्रिप्रदेशकौ स्कंधौ त्रिप्रदेशावगाढौ द्विप्रदे
शावगाढौ वा तदा तुल्यौ यदा त्वेकस्त्रिप्रदेशावगाढो वा द्विप्रदेशावगा। ढो वा अपरस्तु द्विप्रदेशावगाढ एकप्रदेशावगाढो वा तदा
द्विप्रदेशावगाढो यथाक्रमं त्रिप्रदेशावगाढापेक्षया एकप्रदेशाव गाढ द्विप्रदेशावगाढो तु तदपेक्षया एकप्रदेशाभ्यधि
कोयदा त्वेकस्त्रिप्रदेशावगाढः पर एकप्रदेशावगाढस्तदैकप्रदेशाव गाढस्त्रिप्रदेशावगाढापेक्षया द्विप्रदेशहीनस्त्रिप्रदेशावगा
ढस्तु तदपेक्षया द्विप्रदेशाभ्यधिकः एवमेकैकप्रदेशपरिवृद्ध्या चतुःप्रदे शादिषु स्कंधेष्ववगाहनामधिकृत्य हानिर्वृद्धिर्वा तावद्वक्तव्या यावद्
दशप्रदेशकस्कंधसूत्रे दशप्रदेशकस्कंधे एवं वक्तव्यं जइ हीणे पएसहीणे वा दुपएसहीणे वा जाव नवपएसहीणे वा अह अब्भहिए पएसमब्भहि
ए वा दुपएसमब्भहिए वा जाव नवपएसमब्भहिए इति तावता सर्वोत्क्रामसातरणसर्वकर्तव्याः संख्यातप्रदेशकस्कंधसूत्रे उगाहणट्ठयाए दुट्ठाण
वडिए इति संख्येयभागेन संख्येयगुणेन वेति असंख्यातप्रदेशकस्कंधसूत्रे उगाहणट्ठयाए चउट्ठाणवडिए इति असंख्यातभागेन संख्यातगुण
नासंख्यातगुणेनेति अनंतप्रदेशकस्कंधेष्ववगाहनामधिकृत्य चतुःस्थानपतितता अनंतप्रदेशावगाहनाया असंभवात् अनंतभागानंतगुणाभ्यां
वृद्धिहान्योरसंभवात् एगपएसोगाढाणं पोग्गलाणं भंते इत्यादि अत्र उच्चत्वट्ठयाए तुल्ले पएसट्ठयाए छट्ठाणवडिए इदमपि विवक्षितैकप्रदेशावगाढं पर ८३

माण्वादिकं द्रव्यमिदमप्यपरैकप्रदेशावगाढं द्व्यणुकादिकं द्रव्यमिति द्रव्यार्थतया तुल्यता प्रदेशार्थतया षट्स्थानपतितता अनंतप्रदेशकस्यापि
स्कंधस्यैकस्मिन्नाकाशप्रदेशेऽवगाहसंभवात् शेषं सुगमं एवं स्थितिभावाश्रयाण्यपि सूत्राणि भावनीयानि दुपएसोगाहणाणं भंते
दुपएसियाणमित्यादि द्विप्रदेशकस्य स्कंधस्यावगाहना एकप्रदेशात्मिका उत्कृष्टा द्विप्रदेशात्मिका अत्रापांतरालं नास्तीति मध्यमा
न लभ्यते तत उक्तमजहन्नमणुक्कोसोगाहणए नत्थि त्रिप्रदेशकस्य जघन्यावगाहना एकप्रदेशरूपा ।१। मध्यमा द्विप्रदेशरूपा ।२। उत्कृ
ष्टा त्रिप्रदेशरूपा ।३। चतुःप्रदेशस्य जघन्या एकप्रदेशरूपा ।१। उत्कृष्टा चतुःप्रदेशात्मिका ।४। मध्यमा द्विविधा द्विप्रदेशात्मिका ।२। त्रिप्रदे
शात्मिका वा ।३। एवं च सति मध्यमावगाहनश्चतुःप्रदेशको मध्यमावगा हनचतुःप्रदेशकापेक्षया यदि हीनस्तर्हि प्रदेशतो हीनो भवति
अथाभ्यधिकस्ततः प्रदेशतोऽभ्यधिकः एवं पंचप्रदेशादिस्कंधेषु मध्य मावगाहनामधिकृत्य प्रदेशपरिवृद्ध्या वृद्धिर्हानिश्च तावद्वक्त।
व्या यावद्दशप्रदेशकस्कंधः सप्रदेशपरिवृद्धिः सा चैवं वक्तव्या। अजहन्नमणुक्कोसोगाहणए दसपएसिए अजहन्नम
णुक्कोसोगाहणस्स दसपएसियस्स खंधस्स उगाहणट्ठयाए सिय हीणे। सिय तुल्ले सिय अब्भहिए जइ हीणे पएसहीणे जाव स
त्तपएसहीणे अह अब्भहिए पएसमब्भहिए जाव सत्तपएसमब्भहिए इति शेषं सूत्रं सुगमं स्वयं परिभावनीयं सुगमत्वात् नवरमनंतप्रदेश
कोत्कृष्टावगाहनाचिंतायां विइए वितुल्ले इति उत्कृष्टावगाहनः किलानंतप्रदेशकः स्कंधः सर्वोत्कृष्टतया समस्तलोकव्यापी स चाचित्तमहास्कंधः
केवलिसमुद्घातकर्मस्कंधो वा तयोश्चानयोरपि दंडकपाटमंथांतरपूरणलक्षणश्चतुःसमयप्रमाणेति तुल्यकालत्वात् शेषं सूत्रमाप
परिसमाप्तेः प्रागुक्तभावनानुसारेण स्वयं परिभावनीयं नवरं जघन्यप्रदेशकाः स्कंधा द्विप्रदेशकाः उत्कृष्टप्रदेशाः सर्वोत्कृष्टा अनंत
प्रदेशाः ५ इति श्रीमलयगिरिविरचितायां प्रज्ञापनाटीकायां विशेषाख्यं पंचमं पदं समाप्तं ५ ॥ ॥ तदेवं व्याख्यातं पंचमं पदं संप्रति
षष्ठमारभ्यते तस्य चायमभिसंबंधः इहानंतरपदे औदयिकभावाश्रयं पर्यायपरिमाणं व्यक्तं प्रतिपादितमिह त्वौदयिकस्यायोपश

प्रज्ञापनावृत्तिः

स्मिकविषयाः सन्नामा उपपातविरहादयश्चिंत्यन्ते तत्रादावियमधिकारसंग्रहणिगाथा बारस चउवीसा इं इत्यादि प्रथमं गतिषु सामान्यत उपपा
तविरहस्योद्वर्त्तनाविरहस्य च द्वादशमुहूर्त्तप्रमाणं वक्तव्यं तदनंतरं नैरयिकादिषु प्रत्येकमुपपातविरहस्योद्वर्त्तनाविरहस्य च चतुर्विंशतिमुहूर्त्तादि तिप्र
त्येकमादौ वक्तव्याः ततः संतरनिरंतरं नैरयिकादय उत्पद्यंते निरंतरं वेति वक्तव्यं तदनंतरमेकसमयेन नैरयिकादयः प्रत्येकं कति उत्पद्यंते क
ति वोद्वर्त्तंत इति चिंतनीयं ततः कुत आगत्योत्पद्यंते नारकादय इति चिंत्यं तत उद्वर्त्तनाइति नैरयिकादय उद्वृत्ताः संतः क्वोत्पद्यंत इति वक्तव्यं तदनं
तरं कतिभागावशेषेऽनुभूयमानभवायुषि जीवाः पारभविकमायुर्बध्नंतीति वक्तव्यं तथा कतिभिराकर्षैरुत्कर्षतः आयुर्बंधका इति चिंतायामु
त्कृष्टोऽष्टावाकर्षा वक्तव्या एष संग्रहणिगाथासंक्षेपार्थः एनमेव क्रमेण विवरीषुः। गइ निरयगई णं भंते केवइयं कालं विरहिया उववाएणं पन्नत्ता
इत्यादि निरयगतिर्नाम नरकगतिनामकर्मोदयजनिता जीवस्यौ। दयिको भवः स चैकः सप्तपृथिवीव्यापी विवक्षित एकव
चनं सप्तानामपि पृथिवीनां परिग्रहः णमिति वाक्यालंकारे भदंतेति गुर्वामं त्रणं परमकल्याणयोगिन् केवइयंति कियंतं कालं वि
रहिता शून्या उपपातेन उपपतनमुपपातस्तदन्यगतिकानां नारकत्वेनोत्पा द इति भावः तत एवं प्रश्ने कृते भगवता आत्मीयेषु कर्ष सा
द्विनिश्चायकैः एवं प्रश्ने कृते भगवानाह गोतम जघन्यत एकं समयं यावत् उत्कर्षतो द्वादशमुहूर्त्तान् निरंतरं भवति सा नावश्यं कस्या
मपि पृथिव्यामेकसमयादारभ्य द्वादशमुहूर्त्तप्रमाण उपपातविरहो न वर्त्तते चतुर्विंशतिमुहूर्त्तादिप्रमाणस्य वक्ष्यमाणत्वात् ततः कथं सर्वपृथिवीसमुदायेऽपि द्वा
दशमुहूर्त्तप्रमाणः प्रत्येकमभावे समुदायेऽभावादिति न्यायस्य श्रवणात् तदयुक्तं वचनापरिज्ञानात् यद्यपि हि नाम रत्नप्रभादिष्वेकैकस्यां नि
रेण न चतुर्विंशतिमुहूर्त्तादिप्रमाण उपपातविरहो वक्ष्यते तथापि यदा सप्तापि पृथिवीः समुदिता अपेक्ष्योपपातविरहश्चिंत्यते तदा स द्वादश
मुहूर्त्तप्रमाण एव लभ्यते द्वादशमुहूर्त्तानंतरमवश्यमन्यतरस्यां पृथिव्यामुत्पादसंभवात् यथा केवलवेदसोपलब्धिः यत्तु प्रत्येकमभावे सम
दायेऽप्यभाव इति न्यायः स कारणकार्यभावमुपगम्य चिंतायां नान्यत्रेति दोषः यथा नरकगतिर्द्वादशमुहूर्त्तानुत्कर्षत उपपातेन विरहिता एवं ति ८४

र्यग्गतिर्मनुष्यगतिर्देवगत्योऽपि सिद्धिगतिस्तूत्कर्षतः षण्मासान् उपपातेन विरहिता एवमुद्वर्त्तनापि नवरं सिद्धानामुद्वर्त्तनं न तेषां साद्यपर्यवसितकालतयावा
स्थितत्वादिति सिद्धिरुद्वर्त्तनया विरहिता वक्तव्या गतं प्रथमं द्वारमिदानीं चतुर्विंशतिरिति द्वितीयं द्वारमभिधित्सुराह रयणप्पभापुढविनेरइया
णं भंते केवइयं कालं विरहिया उववाएणं पन्नत्ता इत्यादि पाठसिद्धं नवरमत्रोत्कर्षविषया इमाः संग्रहणिगाथाः चउवीसइ मुहुत्ता स
त्त राइंदियाइं पक्खा य मासा य दो य चउरो छम्मासा नरएसु उक्कोस मासा उक्कोसेण चउवीसमुहुत्ता भवणवासीसु अविरहियाउ एइंदियाइं वि
गलाणं तह मुहुत्ता अंतमुहुत्तं तु पणिंदि य एवं तिरियगइ बारस मुहुत्ता संमुच्छिमगब्भमणुया कमसो चउवीस बारस मुहू वाणजोइससोहम्मीसाण
कप्पे चउवीसई मुहुत्ता उ कप्पम्मि सणंकुमारे दिवसा णव वीसई मुहुत्ता । माहिंदे राइंदिय बारस दस मुहुत्ता बंभलोगम्मि राइंदिअद्ध तेवी
स लंतए णं होति पणयालाण महसुक्के असीई सहस्सारे सयं तु ताउ। कप्पदुग मासा सा संखेज्जा तह वासा संखेज्ज उवरिट्टगे द
हिट्ठिमसम्झिमउवरिमउड्ढसयं सहस्स लक्खाइं वासाणं । विन्नेय उक्कोसेणं विरहकालो कालासंखातीतो ।
विजयाइसु चउसु ठिई नायव्वा संखेज्जा पल्लस्स य भागो सव्वट्ठे। सिद्धम्मि गतं द्वितीयं द्वारमधुना तृतीयमाह नेरइया णं भं
ते किं संतरं उववज्जंति इत्यादि पाठसिद्धं प्रागुक्तसूत्रार्थानुस्मरणेनावगन्तव्य सुगमत्वात् गतं तृतीयं द्वारमिदानीं चतुर्थं द्वारमाह नेरइया णं भं
ते एगसमएणं केवइया उववज्जंति इत्यादि निगदसिद्धं नवरं वनस्पतिसूत्रे सट्ठाणुववायं पडुच्च अणुसमयमविरहिया अणंता इति स्वस्थाने वनस्प
तीनां वनस्पतित्वेनोत्पादमधिकृत्य यतोऽनंतानंता वनस्पतय एव वनस्पतिषूत्पद्यमाना लभ्यन्ते ततस्तदा प्रतिसमयमविरहितं सर्वकालमनंता विज्ञेयाः
प्रतिनिगोदमसंख्येयभागस्य निरंतरमुत्पद्यमानतयोद्वर्त्तमानतया च लभ्यमानत्वात् परट्ठाणुववायं पडुच्च अणुसमयमविरहिया असंखेज्जा
इति परस्थानं पृथिव्यादयः किमुक्तं भवति यदि पृथिव्यादयः किमुक्तं भवति यदि पृथिव्यादयः स्वभवादुद्धृत्य वनस्पतिषूत्पद्यमानाश्चिंत्यंते तदा अ
नुसमयमविरहितमसंख्येया वक्तव्या इति तथा गर्भव्युत्क्रांतिका मनुष्या जघन्यत एको द्वौ वा त्रयो वा उत्कर्षतः संख्येया वक्तव्या यथा

आवलोकस्तु मनुष्या एवोत्पद्यंते न तिर्यंचोपि मनुष्याश्च संख्येयायुष एवानतादिषु देवेषूपि संख्येयायुष्कवर्जाज्ञातमसंख्येयायुः सिद्धिप्रतीतोऽत्र
र्षत्वात् एवं तेन सूत्रेणैतत्सूत्रमपि व्यक्तं नवरं जोइस वेमाणिया णं चयणं अभिलापो कायव्वो इति ज्योतिष्कवैमानिकानां हि सूत्रावाऽ
इत्तंत्व्यवनमित्युच्यते तथानादिकालप्रसिद्धमतमस्त्र च्यवनमित्यभिलापः कर्त्तव्यः सत्वेवं जोइसिया णं भंते एगसमएणं केवइया चयंति
गोयमा जहन्नेणं एगो वा दो वा इत्यादि तदेवं चतुर्थं द्वारमधुना पंचमं द्वारमभिधित्सुराह ॥ नेरइया णं भंते कओहिंतो इत्यादि पाठसिद्धं नवर
मेष संक्षेपार्थः सामान्यतो नारकोपपातचिंतायां रत्नप्रभोपपातचिंतायां च देवनारकपृथिव्यादिपंचकविकलेंद्रियत्रिकाणां तथा असंख्ये
यवर्षायुषश्चतुष्पदखेचराणां चापर्याप्तानामपि च पर्याप्तकानां तिर्यक्पंचेंद्रियाणां तथा मनुष्याणां संमूर्छिमानां गर्भव्युत्क्रांतिकानामप्यकर्मभू
मिजानां अंतरद्वीपजानां कर्मभूमिजानामप्यसंख्येयवर्षायुषां मसंख्येयवर्षायुषामपि च अपर्याप्तानां प्रतिषेधः शेषाणां विधानं
शर्कराप्रभायां संमूर्छिमानामपि प्रतिषेधः वालुकाप्रभायां भुजपरिसर्पाणामपि पंकप्रभायां खेचराणामपि धूमप्रभायां चतु
ष्पदानामपि तमःप्रभायामुरःपरिसर्पाणामपि सप्तमपृथिव्यां स्त्रीणामपि भवनवासिषूपपातचिंतायां देवनारकपृथिव्यादिपंचकविक
लेंद्रियत्रिकापर्याप्ततिर्यक्पंचेंद्रियसंमूर्छिमापर्याप्तगर्भव्युत्क्रांतिकमनुष्याणां प्रतिषेधः शेषाणां विधानं पृथिव्यब्वनस्पतिषु सकल
नैरयिकसनत्कुमारादिदेवानां तेजोवायुद्वित्रिचतुरिंद्रियेषु सर्वनारकसर्वदेवानां तिर्यक्पंचेंद्रियेषु आनतादिदेवानां मनुष्येषु सप्तमपृथिवी
नारकतेजोवायूनां व्यंतरेषु देवनारकपृथिव्यादिपंचकविकलेंद्रियत्रिकापर्याप्ततिर्यक्पंचेंद्रियसंमूर्छिमापर्याप्तगर्भव्युत्क्रांतिकमनुष्याणां
ज्योतिष्केषु संमूर्छिमतिर्यक्पंचेंद्रियासंख्येयासंख्येयवर्षायुष्कखचरांतरद्वीपजमनुष्याणामपि प्रतिषेधः एवं सौधर्मेशानयोरपि सनत्कु
मारादिषु सहस्रारपर्यंतेषु कर्मभूमिजासंख्येयवर्षायुष्ककर्मभूमिजानामपि प्रतिषेधः आनतादिषु तिर्यक्पंचेंद्रियाणामपि विजयादिषु
मिथ्यादृष्टिमनुष्याणामपीति गतं पंचमद्वारमिदानीं षष्ठद्वारमभिधित्सुराह नेरइया णं भंते अणंतरं उव्वट्टित्ता कहिं उववज्जंति इत्यादि पाठ। ८५

सिद्धं नवरमत्राप्ययं संक्षेपार्थः नैरयिकाणां पर्याप्तानां गर्भजसंख्येयवर्षायुष्कतिर्यक्पंचेंद्रियमनुष्येषूत्पादः अधःसप्तम
पृथिवीनारकाणां गर्भजसंख्येयवर्षायुष्कतिर्यक्पंचेंद्रियेष्वेव असुरकुमारादीनां व्यंतरज्योतिष्कसौधर्मेशानदेवानां बादरपर्याप्त
पृथिव्यब्वनस्पतिषु गर्भजसंख्येयवर्षायुष्कतिर्यक्पंचेंद्रियमनुष्येषु पृथिव्यब्वनस्पतिद्वित्रिचतुरिंद्रियाणां तिर्यग्गतौ मनुष्यगतौ च तेजोवा
यूनां तिर्यग्गतावेव तिर्यक्पंचेंद्रियाणां नारकतिर्यग्मनुष्यदेवगतिषु नवरं वैमानिकेषु सहस्रारपर्यंतेषु मनुष्याणां सर्वेष्वपि स्थानेषु सन
त्कुमारादिदेवानां सहस्रारदेवपर्यंतानां गर्भजसंख्येयवर्षायुष्कतिर्यक्पंचेंद्रियमनुष्येषु आनतादिदेवानां गर्भजसंख्येयवर्षायुष्कमनुष्ये
ष्वेवेति गतं षष्ठं द्वारमिदानीं सप्तमं द्वारं तस्य चायमभिसंबंधः येषां जीवानां नारकादिषु विविधमुपपातो वर्णितस्तैर्जीवैः पूर्वभवे वर्त्तमाने
रायुर्बद्धं ततः पश्चादुपपातोऽन्यथोपपातायोगात् तत्र कियति पूर्वभवायुषि शेषे पारभविकमायुर्बद्धमिति संशयापोहः सूत्रमिति
॥ नेरइया णं भंते केवइकालावसेसाउया परभवियाउयं पकरेंति इत्यादि पाठसिद्धं तदेवं सप्तमं द्वारमुक्तमधुनाष्टमं
नत्र वायुषि पारभविकमायुर्बध्नंतीति तत्प्रतिपादितं संप्रति यत्प्रकारं बध्नंति तत्प्रकारं नैरयिकादिदंडकक्रमेण प्रतिपादयति ॥
नेरइया णं भंते कइविहे आउयबंधे पन्नत्ते इत्यादि जाइनामनिहत्ताउए इति जातिरेकेंद्रियजात्यादिः पंचप्रकारा सैव नाम नामक
र्मण उत्तरप्रकृतिविशेषरूपं जातिनाम तेन सह निधत्तं निषिक्तं यदायुस्तज्जातिनामनिधत्तायुः निषेकश्च कर्मपुद्गलानामनुभवनार्थं रचना
सा चैवंलक्षणा मोत्तूण सगमबाहं पढमाइ ठिईइ बहुतरं दव्वं सेसे विसेसहीणं जावुक्कोसं ति ॥ गइनामनिहत्ताउए इति गति
र्नरकगत्यादिः चतुर्द्धा सैव नाम गतिनाम तेन सह निधत्तमायुर्गतिनामनिधत्तायुः स्थितिरिति यत्तेन भवेन स्थातव्यं तत्प्रधानं नाम स्थि
तिनाम अथवा यस्मिन्नायुष्युदयमागते नावतिष्ठते तद्गतिजातिशरीरपंचकादिव्यतिरिक्तं स्थितिनामावसेयमिति भावः गत्यादीनां वर्जनं तत
पृथक्पदैः गइनामनिहत्ताउए इत्यादिभिरुपात्तत्वात् तेन सह निधत्तमायुः स्थितिनामनिधत्तायुः तथा अवगाहते यस्यां सा अवगाहना शरीरमौदारिकादि तस्य ना

प्रज्ञाप० वृत्ति॥

मऔदारिकादिशरीरनामकर्म अवगाहनानामकर्मोच्यते तस्यैव प्रदेशाः कर्मपरिमाणवत्स्वप्रदेशाः संक्रमतोऽप्युदयप्राप्ता मानाः परिगृह्यंते तेन तत्प्रधा
नं नाम प्रदेशनाम किमुक्तं भवति तस्मिन् भवे प्रदेशतः उदयतस्तत्प्रदेशनामेति अनेन विपाकोदयमप्राप्तमपि नाम परिगृहीतं तेन प्रदेशनाम्ना
सह निधत्तमायुः प्रदेशनामनिधत्तायुः तथा अनुभागो विपाकः स चेह प्रकर्षभाषः परिगृह्यते तत्प्रधानं नाम अनुभागनाम यत् यस्मिन् भवे तीव्रविपा-
कं नामकर्मोदयते तद्यथा नारकायुषि अशुभवर्णगंधरसस्पर्शोपघातानादेयदुःस्वरायशःकीर्त्यादि नाम तेन तदनुभावनामेति तेन सह निधत्तमायु
रनुभावनामनिधत्तायुः अथ कस्माज्जात्यादिनामकर्मविशेषैरायुर्विशेष्यते उच्यते आयुः कर्मप्रधानत्वख्यापनार्थं तथाहि नारकाद्यायुरुदये सति जा
त्यादिनामकर्मणामुदयो भवति न तत्प्राबल्यः प्रधानता इति अथ जात्यादिना। सविशेषमायुः कियद्भिराकर्षैर्बध्नातीति जिज्ञासुर्जीवादिदंड-
कक्रमेण पृच्छति ७ जीवाणं भंते जाइनामनिहत्ताउयं कइहिं आगरिसे। हिं पगरिंतीत्यादि आकर्षो नाम तथाविधेन प्रयत्नेन कर्मपु
द्गलोपादानं यथा गौः पानीयं पिबती भयेन पुनः पुनराघाटयति ७ बंधो वा पियदानी दलियाणं जं धावंसायनिज्जातिनाम-
निधत्तायुरन्यदा बध्नाति तदा एकेनमंदेन द्वाभ्यां त्रिभिर्वा मंदतरेण त्रिभिश्चतु- र्भिर्वा मंदतमेन पंचभिः षड्भिः सप्तभिः ८ भिर्वा इह जात्यादिना
नामकर्म नियमेन आयुषा सह बध्यमानानामवसातव्यान न्याय्यकालेकाग्र्यं। चिन्नप्रकृतीनां अध्रुवबंधिनीत्वादपरासां परावर्तमानत्वात् एवं ततः का-
लमपि बंधसंभवेनाकर्षानियमात् ७ इति श्रीमलयगिरिविरचितायां प्रज्ञापनाटीकायां व्युत्क्रांत्याख्यं षष्ठं पदं समाप्तं॥ ॥व्याख्यातं षष्ठं पद-
मिदानीं सप्तममारभ्यते तस्य चायमभिसंबंधः इहानंतरपदे सत्त्वानामुपपातविरहादायोऽभिहिता अस्मिन्स्तु नैरयिकादिनामेवोच्छ्वासप्राणापानप-
र्याप्तिपर्याप्तानां यथासंभवमुच्छ्वासनिःश्वासक्रियाविरहाविरहकालपरिमाणमभिधेयमित्यनेन संबंधेनायातस्यास्येदमादिसूत्रं ७ नेरइयाणं भं-
ते इत्यादि नैरयिकाणमिति वाक्यालंकारे भदंतेति हे भदंतकालस्य इति प्राग्वत् तस्योत्पादनार्थं चेति याद्वा एषष्ठीनतायमर्थः कियतः कालात्कि-
यता वा कालेन आणमंति आनंति आनप्राणंति इति धातुपाठात् मकारोऽलाक्षणिकः एवमन्यत्रापि यथायोगं परिभावनीयं पाणमंति वा ऊसंति ८६

यार्थो एतदेव पदद्वयं क्रमेणार्थतः स्पष्टयति ऊससंति वा यदेवाक्रमानंति तदेवाक्रमूससंति तथा यदेवाक्रप्राणंति तदेवाक्रं निःश्वसंति अथ
वा आनमंति प्राणमंति इति णम प्रह्वत्वे इत्यस्य द्रष्टव्यं धातूनामनेकार्थतया ऊसनार्थस्यापि विरोधः अपरे व्यावर्णयंति आनंति प्राणंति इति आन्तरः ऊ-
रंती उच्छ्वासनिःश्वासक्रिया परिगृह्यते उच्छ्वसंति निश्वसंतीत्यनेन तु बाह्या एवं गोतमेन प्रश्ने कृते भगवानाह गोतम सततमविरहितं अतिदुः-
खिता हि नैरयिकाः इति तेषां च निरंतरमुच्छ्वासनिश्वासौ तथा लोके दर्शनात् तत्व सततं प्रायोऽह्नत्यापि स्यादत आह संततामेव सततमेवानवरमे
व तेकोपि समयमुच्छ्विरहकालादीर्घवशाक्रतत्वात् आनमंतीत्यादिः पुनरुच्चारणं शिष्यवचनेन आदरोपदर्शनार्थं कृपिराद्रियमाणवचना हि
शिष्याः संतोषा भवति तथा च सति तेऽपि नः उत्पन्नप्रश्नश्रवणार्थे निर्णयादि शुश्रु षंते लोकेवादेयवचना भवति एवं सर्वत्र व्याख्याप्रकारः
सीर्षाभिरहिक्षि असुरकुमारस्स जहन्नेणं सातिरेगस्स परकः इति इह देवेषु यस्य यावंति सागरोपमाणि स्थितिस्तस्य ता-
वत्पक्षप्रमाण उच्छ्वासनिःश्वासक्रियाविरहकाल असुरकुमाराणां। वोत्कृष्टा स्थितिरेकं सातिरेकं सागरोपमं तमसुरव-
लियमिति वचनात् ततः सातिरेगस्सपक्खस्स इति सातिरेकात्पक्षादूर्ध्वं। उच्छ्वसंतीत्यर्थः पृथिवीकायस्स वेमायाए इति विषमा-
मात्रातया किमुक्तं भवति अनियतविरहकालप्रमाणा तेषामुच्छ्वासनिःश्वास क्रियेति तथा देवेषु यावन्मात्रसागरोपमप्रमाणायुः स तथा सुखी सुखिता-
नीचयथायथा नरमहत्युच्छ्वासनिःश्वासक्रियाविरहकालोऽतः स्वरूपत्वादुच्छ्वासनिश्वासक्रियायास्ततो यथायुषः सागरोपमवृद्धिस्तथा तथोच्छ्वा-
सनिःश्वासक्रियाविरहप्रमाणस्यापि प्रकर्षवृद्धिः ७ इति श्रीमलयगिरिविरचितायां प्रज्ञापनाटीकायां सप्तममुच्छ्वासाख्यं पदं समाप्तं ७ ॥
एतदेवं व्याख्यातं सप्तमपदमिदानीमष्टममारभ्यते तस्य चायमभिसंबंधः इहानंतरपदे सत्त्वानामुच्छ्वासपर्याप्तिनामकर्मोदयागाथ्या विरहा-
विरहकालप्रमाणमुक्तं संप्रति वेदनीयोदयाश्रयाश्च ज्ञानावरणदर्शनावरणक्षयोपशमाश्रयाश्चात्मपरिणामविशेषानभिधित्सुरिद-
मष्टममाह कइणं भंते सन्नाओ पन्नत्ताओ इति कति कियत्संख्याणमिति वाक्यालंकारे भदंत संज्ञाः प्रज्ञप्ताः तत्र संज्ञानं संज्ञा आभोग इत्यर्थः

प्रज्ञाप० वृत्तौ ॥ यद्वा संज्ञायतेऽनयाऽयं जीव इति संज्ञा सा च वेदनीयमोहोदयाश्रिता ज्ञानावरणदर्शनावरणक्षयोपशमाश्रिता च विचित्रा आहारा-
दिप्राप्तिक्रियासैवोपाधिभेदाद्दशविधा तथा चाह गोतम दसविहा पन्नत्ता तं जहा आहारसन्नाइत्यादि तत्र क्षुद्वेदनीयो-
दयात् कवलाद्याहारार्थं तथाविधपुद्गलोपादानक्रियैवाहारसंज्ञा तस्या आभोगात्मिकत्वात् यद्वा संज्ञा तस्या आभोगात्मिकत्वात्
यद्वा संज्ञायते जीवोऽनयेति एवं सर्वत्रापि भावना कार्या तथा भयमोहनीयोदयात् भयोद्भ्रान्तस्य दृष्टिवदनविकाररोमांचोद्भेदादिक्रियाभ-
यसंज्ञा पुंवेदोदयान्मैथुनाय स्त्र्यालोकनप्रसन्नवदनसंस्तंभितोरुवेपथुप्रभृतिलक्षणा क्रिया मैथुनसंज्ञा तथा लोभोदयात् प्रधानसंसारकार-
णाभिष्वंगपूर्विका सचित्तेतरद्रव्योपादानक्रिया परिग्रहसंज्ञा तथा क्रोधवे दनीयोदयात् तदावेशगर्भा पुरुषमुखनयनदंतछदस्फुर
णचेष्टा क्रोधसंज्ञा तथा मानोदयादहंकारात्मिकोत्सेकादिपरिणति मानसंज्ञा ६ मायावेदनीयेनाशुभसंक्लेशादनृत
संभाषणादिक्रिया मायासंज्ञा तथा लोभवेदनीयोदयात् लो लसाचितनसचित्तेतरद्रव्यप्रार्थना लोभसंज्ञा तथा
मतिज्ञानावरणकर्मक्षयोपशमात् शब्दाद्यर्थगोचरा सामान्यावबोधक्रि यैव ओघसंज्ञा तथा तद्विशेषावबोधक्रिया लोकसंज्ञा एवं चे
दमापतितं दर्शनोपयोग ओघसंज्ञा ज्ञानोपयोगो लोकसंज्ञा अन्ये त्वभिद धति सामान्यप्रवृत्तिर्यथा वल्ल्यादेर्वृत्त्याद्यारोहणमोघसंज्ञा लोक
स्य दृष्ट्या प्रवृत्तिर्लोकसंज्ञा तादेवमेताः सुखप्रतिपत्तये स्पष्टरूपाः पंचेंद्रियानधिकृत्य व्याख्याताः एकेंद्रियाणां त्वेता अव्यक्तरूपा अवगंतव्या
नैरयिकसूत्रे उस्सन्नकारणं पडुच्च भयसन्नोवउत्ता इति उत्सन्नशब्दो बाहुल्यमुच्यते कारणशब्देन बाह्यकारणमाश्रित्य नैरयिका बाहुल्ये
न भयसंज्ञोपयुक्ता यथा हि संततं तेषां सर्वतः प्रवृत्ता नि परमाधार्मिकाद्यः कवचीशक्तिकुंतादीनि भयोत्पादकानीति संतइंभावं पडुच्चेति इह आंतरो
ऽनुभवः संततिभावमपेक्ष्य नैरयिका आहारसंज्ञोपयुक्ता अपि यावत्परिग्रहसंज्ञोपयुक्ता अपि अल्पबहुत्वचिंतायां सर्वस्तोका मैथुनसंज्ञो
पयुक्ता नैरयिका हि चक्षुर्निमीलनमात्रमपि न सुखिनः केवलमनवरतमतिप्रबलदुःखानलेनासंतप्यमानशरीरास्तेषां च अच्छिनिमीलियमित्तं न ८३

त्थि सुहं दुक्खमेव पडिबद्धं नरए नेरइयाणं अहोनिसं पच्चमाणाणं ततो मैथुनेतेषां न भवतीति यद्यप्यरंकविक्षेपं विद्रवंति सापि च स्तोकका
लेति एकसमये स्तोका मैथुनसंज्ञोपयुक्ता तेभ्यः संख्येयगुणा आहारसंज्ञोपयुक्ता दुःखितानामपि तेषां प्रभूतकालं वाहारग्रायाभावतः
एकसमये अतिप्रभूतानामाहारसंज्ञोपयुक्तानां संभवात् तेभ्यः संख्येयगुणा परिग्रहसंज्ञोपयुक्ता आहारशरीरादिदेहार्थमिच्छा भवति परिग्रहभा
उदाहरणादिषु प्रभूततरकालावस्थायिनी च परिग्रहेच्छा ततः एकसमये अतिप्रभूततराः परिग्रहसंज्ञोपयुक्ता अवाप्यंत इति तेभ्योऽपि
तेभ्यः संख्येयगुणाः तेभ्यो भयसंज्ञोपयुक्ताः संख्येयगुणा नारकेषु हि नैरयिकाणां सर्वतो भयमामरणांतमावितत एकसमये अतिप्रभू
ततमा भयसंज्ञोपयुक्ताः प्राप्यंत इति संख्येयगुणा तिर्यक्पंचेंद्रियास्त्व पि बाह्यकारणं प्रतीत्य बाहुल्येनाहारसंज्ञोपयुक्ता भवंति न
शेषसंज्ञोपयुक्ता सदा प्रत्यक्षत एवोपलक्षेः आंतरमंतर्भावमाश्रित्या हारसंज्ञोपयुक्ता अपि यावत्परिग्रहसंज्ञोपयुक्ता अपि अ
ल्पबहुत्वचिंतायां सर्वस्तोकाः परिग्रहसंज्ञोपयुक्ताः परिग्रहसं ज्ञायाः स्तोककालत्वेनैकसमये तेषां स्तोकानामे
वावाप्यमानत्वात् तेभ्यो मैथुनसंज्ञोपयोगस्य प्रभूततरकालत्वात् । तेभ्योऽपि भयसंज्ञोपयुक्ताः संख्येयगुणाः सजातीयावत्य
रजातीयाच्च तेषां भयसंभवतो भयोपयोगस्य प्रभूतकालत्वात् एक समये भयसंज्ञोपयुक्तानामतिप्रभूततराणामवाप्यमानत्वात्
तेभ्यः संख्येयगुणा आहारसंज्ञोपयुक्ताः प्रायः सततं सर्वेषामाहारसंभवात् मनुष्या बाह्यकारणमधिकृत्य बाहुल्येन मैथुनसंज्ञोपयुक्ताः
संततिभावमंतरानुभवरूपं प्रतीत्याहारसंज्ञोपयुक्ता अपि यावत्परिग्रहसंज्ञोपयुक्ता अपि अल्पबहुत्वचिंतायां सर्वस्तोका भयसंज्ञोपयु
क्ताः स्तोकानां स्तोककालं च भयसंज्ञासंभवात् तस्य आहारसंज्ञोपयोगस्य प्रभूततरकालभावात् अत एव हेतोस्तेभ्यः संख्येयगुणाः परिग्रह
संज्ञोपयुक्ताः तेभ्यो मैथुनसंज्ञोपयुक्ताः संख्येयगुणा मैथुनसंज्ञाया अतिप्रभूततरं कालं यावद्भावतः एकसमये तेषामतिप्रभूततरा-
णामवाप्यमानत्वात् तथा बाह्यकारणमधिकृत्य बाहुल्येन देवाः परिग्रहसंज्ञोपयुक्ताः मणिकनकरत्नादीनां परिग्रहसंज्ञोपयोगाद्व

नां तेषां सदा संनिहितत्वात् संततभावं च प्रत्याक्ष्य पंचमीत्यंतराहारसंज्ञोपयुक्ता अपि यावत्परिग्रहसंज्ञोपयुक्ता अपि अल्पबहुत्वचिंतायां सर्वस्तो
का आहारसंज्ञोपयुक्ता आहारेच्छाविरहकालस्यातिप्रभूततया आहारसंज्ञोपयोगकालस्य चातिस्तोकतया पृच्छासमये सर्वस्तोकानां
तेषामवाप्यमानत्वात् ततो भयसंज्ञोपयुक्ताः संख्येयगुणाः भयसंज्ञायाः उपयोगतनोत्प्रभूतकालत्वभावात् तेभ्यो मैथुनसंज्ञोपयुक्ताः संख्येयगुणा
पृच्छया बहवो वाच्याः स्वयमेव भावनीया इति ८ इति श्रीमलयगिरिविरचितायां प्रज्ञापनाटीकायां संज्ञाख्यमष्टमं पदं समाप्तं ८ ॥ ॥एतदा
ख्यातमष्टमं पदमधुना नवममारभ्यते तस्य चायमभिसंबंधः इहानंतरपदे सत्त्वानां संज्ञापरिणाम उक्त इह तु तेषामेव योनयः प्रतिपाद्यंते
तत्रादाविदं सूत्रं कइविहा णं भंते जोणी इत्यादि कतिविधा णमिति। पूर्ववत् नवरं योनिः प्रज्ञप्ता अथ योनिरिति कः शब्दार्थः उ
च्यते युवंति तैजसकार्मणशरीरवंतः संत औदारिकादि शरीरप्रायोग्यपुद्गलस्कंधसमुदायेन मिश्रीभवंत्यस्यामिति यो
निः सा च त्रिविधा शीतादिका त्रिप्रत्ययः भगवानाह गोतम त्रिविधा योनिः प्रज्ञप्ता तद्यथा शीता उष्णा शीतोष्णा तत्र शीत
स्पर्शपरिणामा शीता उष्णस्पर्शपरिणामा उष्णा शीतोष्णोभयरूपानयस्पर्श परिणामा शीतोष्णा तत्र नैरयिकाणां किंविधा योनिर्ज्ञाताः अस्या
वतृतीया शीतोष्णा कस्यां पृथिव्यां का योनिरिति विवक्ष्यते रत्नप्रभायां। वालुकाप्रभायां च यानि नैरयिकाणामुपपातक्षेत्राणि तानि
सर्वाण्यपि शीतस्पर्शपरिणामपरिणतानि उपपातक्षेत्रव्यतिरेकेण चान्यत्सर्वमपि तत्पृथिवीषट्कमुष्णस्पर्शपरिणामपरिणतं ततस्तत्रत्या
नैरयिकाः शीतयोनिका उष्णां वेदनां वेदयंते पंकप्रभायां बहून्युपपातक्षेत्राणि शीतस्पर्शपरिणामपरिणतानि स्तोकान्युष्णस्पर्शपरिणा
मपरिणतानि येषु च प्रस्तटेषु नरकावासेषु शीतस्पर्शपरिणामान्युपपातक्षेत्राणि तेषु तदतिरेकेणान्यत्सर्वमुष्णस्पर्शपरिणामं येषु प्रस्तटेषु
नरकावासेषु चोपपातक्षेत्राण्युष्णस्पर्शपरिणामानि तेषु तदतिरेकेणान्यत्सर्वं शीतस्पर्शपरिणामं ततस्तत्रत्या बहवो नैरयिकाः शीतयो
निका उष्णां वेदनां वेदयंते स्तोका उष्णयोनिकाः शीतवेदनामिति धूमप्रभायां बहून्युपपातक्षेत्राण्युष्णस्पर्शपरिणामपरिणतानि स्तोका ८८

नि शीतस्पर्शपरिणामानि येषु च प्रस्तटेषु नरकावासेषु चोष्णस्पर्शपरिणामपरिणतान्युपपातक्षेत्राणि तेषु तदतिरेकेणान्यत्सर्वं शीतपरि
णामं येषु च शीतस्पर्शपरिणामान्युपपातक्षेत्राणि तेषूष्णस्पर्शपरिणामं ततस्तत्रत्या बहवो नारका उष्णयोनिकाः शीतां वेदनां वेदयंते
स्तोकाः शीतयोनिका उष्णवेदनामिति तमःप्रभायां तमस्तमःप्रभायां चोपपातक्षेत्राणि सर्वाण्युष्णस्पर्शपरिणामपरिणतानि तदतिरेके
ण चान्यत्सर्वं तत्र शीतस्पर्शपरिणामं ततस्तत्रत्या नारकाः उष्णयोनिकाः शीतवेदनां वेदयंते नारका इति एवं भवनवासिनां गर्भव्युत्क्रांतिकमनुष्या
णां व्यंतरज्योतिष्कवैमानिकानां चोपपातक्षेत्राणि शीतोष्णरूपोभयस्पर्शपरिणतानि ततस्तेषां योनिरुभयरूपतया भवनवासीनां शीतोष्णा
एकेंद्रियाणामग्निकायिकवर्जानां द्वित्रिचतुरिंद्रियसंमूर्छिमतिर्यक्पंचेंद्रियसंमूर्छिममनुष्याणां चोपपातस्थानानि शीतस्पर्शान्युष्ण
स्पर्शान्युभयस्पर्शान्यपि भवंतीति तेषां त्रिविधा योनिस्तेजस्कायिका। उष्णयोनिकाः तथा प्रत्यक्षत उपलंभः अल्पबहुत्ववि
तायां सर्वस्तोकाः शीतोष्णयोनयः शीतोष्णरूपोभययोनिकाः भवनवासिगर्भजतिर्यक्पंचेंद्रियगर्भजमनुष्या
व्यंतरज्योतिष्कवैमानिकानामेवोभययोनिकत्वात् तेभ्योऽसंख्येय। गुणा उष्णयोनिकाः सर्वेषां सूक्ष्मबादरभेदभिन्नानां
तेजस्कायिकानां प्रभूततराणां नैरयिकाणां कतिपयानां पृथ्व्यब्वायुप्रत्ये कवनस्पतीनां चोष्णयोनिकत्वात् अयोनिका अनंतगु
णाः सिद्धानामनंतत्वात् तेभ्यः शीतयोनिका अनंतगुणाः अनंतकायिकानां सर्वेषामपि शीतयोनिकत्वात् तेषां च सिद्धेभ्योऽप्यनंतगुणत्वा
त् अथ प्रकारांतरेण योनिः प्रतिपिपादयिषुराह कइविहा णं भंते जोणी पन्नत्ता इत्यादि सचित्ता जीवप्रदेशैः संबद्धा अचित्ता सर्वथा जीवविप्र
मुक्ता मिश्रा जीवविप्रमुक्ताविप्रमुक्तस्वरूपा तत्र नैरयिकाणां यान्युपपातक्षेत्राणि तानि न केनचित् जीवेन परिगृहीतानीति तेषामचित्ता योनिः य
द्यपि च सूक्ष्मैकेंद्रियाः सकललोकव्यापिनस्तथापि न तत्स्वदेहोपपातस्थानेऽवकृत्ता आत्मीयात्मीयानुगमसंबद्धा इत्यचित्तैव तेषां योनिः एव
मसुरकुमारादीनां भवनपतीनां व्यंतरज्योतिष्कवैमानिकानां वाचित्ता योनिर्भावनीया पृथिवीकायिकादीनां संमूर्छिममनुष्यपर्यंतानामुप

प्रज्ञा० टी०॥ पातत्कत्वं जीवैः परिगृहीतमपरिगृहीतं तु च यथायावं च संभवतीति त्रिविधापि योनिः गर्भव्युत्क्रांतिकतिर्यक्पंचेंद्रियाणां गर्भव्युत्क्रांतिकमनुष्याणां च योना
त्वन्निश्रविना अपि शुक्रशोणितादिपुद्गला संतीति मिश्रा तथा योनिः अल्पबहुत्वचिंतायां सर्वस्तोका जीवा मिश्रयोनिकाः गर्भव्युत्क्रांतितिर्यक्पंचेंद्रिय
मनुष्याणामेव मिश्रयोनिकत्वात् तेभ्योऽचित्तयोनिका असंख्येयगुणाः नैरयिकदेवानां कतिपयानां च प्रत्येकं पृथिव्यप्तेजोवायुप्रत्येकवनस्प-
तिद्वित्रिचतुरिंद्रियसंमूर्छिमतिर्यक्पंचेंद्रियसंमूर्छिममनुष्याणामचित्तयोनिकत्वात् तेभ्योऽयोनिका अनंतगुणाः सिद्धानामनंतत्वात् तेभ्यः सचित्त-
योनिका अनंतगुणा निगोदजीवानां सचित्तयोनिकत्वात् तेषां च सिद्धेभ्योऽप्यनंतगुणत्वात् संप्रति प्रकारांतरेण योनीः प्रतिपादयितुकाम आह
कइविहा णं भंते जोणी पन्नत्ता इत्यादि तत्र नारकाणां संवृता योनिर्नरकनिष्कुट नारकाणां निष्कुटानां संवृतगवाक्षकल्पत्वात् तत्र च जाताः सं
तो नैरयिकाः प्रवर्धमानमूर्तयस्तेभ्यः पतंति शीतेभ्य उष्णेषु उष्णेभ्यः शीतेषु। तिभवनपतिव्यंतरज्योतिष्कवैमानिकानामपि संवृता यो
निस्तेषां देवदूष्यांतरितत्वादात् देवसयणिज्जंसि देवदूसंतरिए अंगुल संखेज्जइ इति वचनात् एकेंद्रिया अपि संवृतयोनि
कास्तेषामपि योनिः स्पष्टमनुपलक्ष्यमाणत्वात् द्वींद्रियादीनां चतुरिंद्रियपर्यंता नां संमूर्छिमतिर्यक्पंचेंद्रियसंमूर्छिममनुष्याणां च विवृता
योनिस्तेषामुत्पत्तिस्थानस्य जलाशयादेः स्पष्टमुपलभ्यमानत्वात् गर्भव्युत्क्रांति। कमनुष्याणां च संवृतविवृता योनिः गर्भस्य संवृतरूपत्वात् ग
र्भस्यांतः स्वरूपतो नोपलभ्यते बहिः स्वदरवृद्ध्यादिनोपलक्ष्यत इति अल्पबहुत्वचिंतायां सर्वस्तोकाः संवृतविवृतयोनिका गर्भव्युत्क्रांतिकतिर्य
क्पंचेंद्रियमनुष्याणामेव संवृतविवृतयोनिकत्वात् तेभ्यो विवृतयोनिकाः संख्येयगुणा द्वींद्रियादीनां चतुरिंद्रियपर्यवसानानां संमूर्छिमतिर्यक्पंचेंद्रि
यसंमूर्छिममनुष्याणां च विवृतयोनिकत्वात् तेभ्यो अयोनिका अनंतगुणाः सिद्धानामनंतत्वात् तेभ्यः संवृतयोनिका अनंतगुणा वनस्पतीनां संवृतयो
निकत्वात् तेषां च सिद्धेभ्योऽप्यनंतगुणत्वात् संप्रति मनुष्ययोनिविशेषप्रतिपादनार्थमाह कइविहा णं भंते जोणी पन्नत्ता इत्यादि कूर्मवदुन्नता वा
यस्यां सा कूर्मोन्नता संखावर्तवदावर्तो यस्यां सा संखावर्ता वंसीपत्रं तदाकारत्वात् वंसीपत्रा: तत्र शंखावर्तायां योनौ बहवो जीवा ८९

जीवसंबद्धाः पुद्गलाश्चावक्रमंते आगच्छंति व्युत्क्रामंति गर्भतयोत्पद्यंते न तथा चीयंते न तथापचीयंते सामान्यतश्चयमागच्छंति उपचीयंते विनाशमुपयांत्यप्यमायां
निष्पत्तिं नियंति अतिप्रबलकामाग्निपरितापाद्विध्वंसगमनादिति वृद्धवादः ॥ इति श्रीमलयगिरिविरचितायां प्रज्ञापनाटीकायां योनिपदं नव
मं पदं ॥ एतदेवं व्याख्यातं नवमं पदमिदानीं दशममारभ्यते तस्य चायमभिसंबंधः इहानंतरपदे सत्त्वानां योनयः प्रतिपादिता अस्मिंस्तु यदुपपातक्षे
त्ररत्नप्रभादि तस्य चरमाचरमविभागप्रदर्शनं क्रियते तत्र चेदमादिसूत्रं ॥ कइ णं भंते पुढवीओ पन्नत्ताओ इत्यादि सुगमं नवरमीषत्प्राग्भारा पंचचत्वा
रिंशल्लक्षयोजनविष्कंभप्रमाणा शुद्धस्फटिकसंकाशा सिद्धशिला इमा णं भंते रयणप्पहा पुढवी किं चरमा अचरमा इत्यादि इह चरमत्वं
चरमाचरमपरिभाषा तु अन्यापेक्षया चरमं नाम पर्यंतवर्ति तच्चरमत्वमापेक्षिकमन्यापेक्षया तस्याभावात् यथा पूर्वशरीरापेक्षया चरमं शरीरमिति अचर
मं प्रांतमध्यवर्ति तदपि चापेक्षिकं तस्य चरमापेक्षयाभावात् यथांत र्वाविशेषान्यशरीरापेक्षया मध्यशरीरमचरमशरीरं तद
वं चरमाचरमात्मकत्वे वचनात् प्रश्नः कृतः संप्रति भगवानुत्तरमाह चरमा इं अचरमाइं इति एतानि वचनानि प्रश्नसूत्राणि तथा
विधैकत्वपरिणामविशिष्टद्रव्यविषयाणि अन्यानि संप्रति प्रदेशानधिकृत्य प्रश्न यन्सूत्रमाह चरमंतपएसा य अचरमंतपएसा य इति चर
माण्येवांतवर्तित्वाद्वा चरमांतप्रदेशाः अचरममेवैकस्याप्यपेक्षया तु तेनैव त्रिधा। दंता अचरमांतप्रदेशाः तदेवं पृष्टप्रश्नसूत्रे भगवाना
ह एतमस्या रत्नप्रभायाः पृथिव्या न चरमाचरमत्वमापेक्षिकमित्युक्तं वाशात्मदपेक्षणीयमस्तिकेवला या एवं तदन्यनिरपेक्षया: पृष्टत्वात् नाप्य
चरमा तत एवाह नाप्यचरमा अचरममपि आपेक्षिकं न चाशात्मदपेक्षणीयमस्तीति किंतु अनंभवति इयं रत्नप्रभा पृथिवी न पश्चिमा नापि मध्यमा तदे
न्यमपेक्षणीयस्याविवक्षणादिति अत एव न चरमाणि चरमत्वव्यपदेशस्यैवासंभवात् बहुवचनासंभवात् तथा हि यदा तस्याश्चरमत्व
व्यपदेशो नैवोक्तयुक्त्या नोपपद्यते तदा कथं तद्विषयं बहुवचनमुपपत्तुमर्हतीति एवमचरमाण्यपि प्रतिषेधनीयानीति प्रागुक्तयुक्त्याचरमत्वपदे
शस्यासंभवात् नवचरमांतप्रदेशा उक्तयुक्त्याचरमत्वस्याचरमत्वस्य वा संभवतस्तत्प्रदेशकल्पनाया अप्यसंभवात् यद्येवं तर्हि किंस्वरूपा सत्या

प्रज्ञा० पद १०॥ अत्राह नियमं नियमेनाचरमं चरमाणि चेत्युक्तं भवति यदीयमखंडरूपा विवक्षिता रत्नप्रभा ततस्तदा यथोक्तं संगानामेकतापरिणतेन त्वपदेशपानत्वा
तियदा च संख्येयप्रदेशपानत्वतियदा च संख्येयप्रदेशावगाहत्वात् कावयवविभागात्मिका विवक्षा ततस्तदा यथोक्तं निर्वचनविषया भवति तथा
हि रत्नप्रभा पृथिवी तावदनन्तप्रकारेण व्यवस्थिता स्थापना चेयं एवम्  व्यवस्थिताया अस्या निःशेषतव्यवस्थितानि खंडानि प्रत्येकं तथा विधविशे
षैकत्वपरिणामपरिणतानि चरमाणि यत्पुनर्मध्यमहदेकं खंडं तच्चाविशिष्टैकत्वपरिणामयुक्तत्वादेन विवक्षितमि
त्यचरमं तत्र खंडरूपा च यमन्यथा तदनाव प्रसंगात् तदवयवी चायं रूपतया चिंतायामचरमं चरमाणि चेत्यखंडैकनिर्वचनविषयाप्रतिप्र
दितायदा पुनः प्रदेशचिंता क्रियते तदेवं निर्वचरमांतप्रदेशा अचरमांतप्रदेशा। अतत्वाहि ये बाह्यखंडगताः प्रदेशास्ते चरमांतप्रदेशा
ये पुनर्मध्यैकखंडगताः प्रदेशास्ते चरमांतप्रदेशा ये पुनर्मध्यैकखंडगताः प्रदेशास्ते अचरमांतप्रदेशा अत्यन्तव्यावृत्तत्वात् चरमा
णि नाम तथा विधप्रविष्टतरप्रांतेकप्रादेशिकश्रेणिपटलरूपाणि मध्यम २१या: चरम इति तदपि समीचीनं दोषाभावात् चरमा
न्तप्रदेशा यथोक्तरूपप्रांतेकप्रादेशिकश्रेणिपटलगता प्रदेशाः अचरमां तप्रदेशा मध्यखंडगताः प्रदेशा अनेन निर्वचनसूत्रे
ण एकांतेन नयभित्याधप्रश्नात्तन्न अवयवावयवि विरूपरत्नप्रभादिकं वस्तु तयोस्तु व यवावयविनोः भेदाभेदरूपत्वात् विदितं यथावावयवावय
विरूपतायां पराक्षेपणावकाशस्तथा धर्मसंग्रहणिटीकायां बाल्यवस्तुप्रतिष्ठा च समासप्रतिपादितमिति ततो अवधार्यं एवं जाव अहेसत्तमा पुढवी त्या
दिसूत्रसप्तकं पृथिवीप्रश्ननिर्वचनान्युक्तानि एवं शर्करादयो अपि वक्तव्याः सौधर्मादीनि च विमानानि अनुत्तरविमानपर्यंतविमानानि ईषत्प्राग्भारा
लोकश्च वक्तव्यः सप्रपातापि सुगमस्तत्सूत्रपरिपाटिर्नीयमत्रेवं अलोगेणं भंते किं चरमे अचरमे चरमाइं अचरमाइं इत्यादि एवमलोकवि
ड इति पदसूत्रे उक्तप्रकारेण लोको अपि वक्तव्यः सचेवं अलोएणं भंते किं चरमे अचरमे इत्यादि प्रश्नसूत्रं तथैव निर्वचनसूत्रं गोयमा अचरमं च चरमाणि
यचरमंतपदेसा य अचरमंतपएसा य तत्र चरमाणि या निखंडानि लोकनिष्कुटप्रतिष्ठानि तेषां समस्तानां सर्वमध्यवर्ति चरमखंडगताः प्रदेशाः अचरमांतप्रदे ९७

शाः अचरमखंडगताः प्रदेशाः अचरमांतप्रदेशाः संप्रत्येतेषां रत्नप्रभादीनां प्रत्येकं चरमाचरमादिगतमल्पबहुत्वमभिधित्सुरिदमाह इमीसे
णं भंते रयणप्पभाए पुढवीए अचरमस्स य चरमाण य इत्यादि प्रश्नसूत्रं सुगमं निर्वचनसूत्रं सर्वस्तोकं द्रव्यार्थतया अस्या रत्नप्रभायाः पृथिव्या अचर
मखंडं कस्मादिति चेदत आह एकं निमित्तं कारणं हेतुश्च सर्वासां विलक्षीनां प्राप्यादर्शनमिति न्यायादत्राहतो पचमात तावदयमर्थः यस्मात्तथावि
धैकस्कंधपरिणामपरिणतत्वादेकं ततः स्तोकं तस्मात्तथा निचरमाणि खंडानि तानि असंख्येयगुणानि तेषामसंख्यातत्वात् अचरमं चरमाणि च
समुदितानि विशेषाधिकानि विवक्षितकायामाह अचरमं चरमाणि च समुदितानि विशेषाधिकानि तथाहि यदचरमद्रव्यं तत् चरमद्रव्येषु प्र
क्षिप्तं ततश्चरमस्य एकेनाधिकत्वात् विशेषाधिकत्वात् विशेषाधिकस मुदायो भवति प्रदेशार्थचिंतायां सर्वस्तोका अचरमांतप्रदेशाय
तेऽचरमखंडानि मध्यखंडापेक्षया तेषां मध्यखंडगतप्रदेशास्ततस्तेषामसंख्येयगु णानामपि प्रदेशास्ते मध्यखंडगतप्रदेशापेक्षया सर्वस्तो
कास्तथा चरमप्रदेशा असंख्येयगुणाः अचरमखंडस्यैक स्यापि चरमखंडसमुदायापेक्षया अतिरेके असंख्या
यगुणत्वात् चरमांतप्रदेशा अचरमांतप्रदेशा अहदयपि समुदिता अचरमं तप्रदेशेषु विशेषाधिकाः कथमिति चेत् उच्यते इह चरमांतप्रदेशा अ
चरमांतप्रदेशापेक्षया असंख्येयभागप्रमाणा स्तोकाः चरमांतप्रदेशेषु चर मांतप्रदेशेषु प्रक्षिप्यन्ते अचरमांतप्रदेशेभ्यो विशेषाधिकाः
भवंतीत्यर्थः प्रदेशार्थचिंतायां अचरमं चरमाणि यदा विविक्षितानि ह्याहुः चरमांतप्रदेशा असंख्येयगुणा इति अचरमचरमसमुदायाश्चरमांत
प्रदेशा असंख्येयगुणाः कथमुच्यते इह यदचरमखंडं तदसंख्येयप्रदेशावगाढमपि द्रव्यार्थतया एकं चरमेषु पुनः खंडेषु प्रत्येकमसंख्ये
याः प्रदेशाः भवंति चरमाचरमद्रव्यसमुदायादसंख्येयगुणा अचरमांतप्रदेशाः तेभ्यश्चरमांतप्रदेशाः संख्येयगुणाः तेभ्योऽपि चरमाच
रमप्रदेशाः समुदिता विशेषाधिका इति पूर्ववत् अलोकस्य प्रदेशार्थतायां सर्वस्तोका अलोकस्य चरमांतप्रदेशा लोकनिष्कुटे च वर्तमानत्वात्
तेभ्यश्चरमांतप्रदेशा अनंतगुणा अलोकस्यानंतत्वात् चरमांतप्रदेशा अचरमांतप्रदेशा समुदिता विशेषाधिकाः चरमांतप्रदेशास्य चरमांतप्रदे

आपेक्ष्या अनंतनामकल्पासमस्तेषामचरमांतप्रदेशानां चोपकल्पितेष्वचरमांतप्रदेशेष्वपि विशेषाधिका एव न भवंति संप्रति लोकालोकस्य समु
दायविषयं प्रश्नसूत्रमाह लोगालोगस्स णं भंते अचरमस्स य चरमाण य इत्यादि प्रश्नसूत्रं सुगमं निर्वचनमाह गोयमा इत्यादि गोयमा लोक
स्य एकैकस्य चरमखंडं तत्र लोकस्यैकत्वात् तस्माल्लोकस्य चरमखंडद्वयाण्यसंख्येयगुणानि तेषामसंख्यातत्वात् ततोऽप्यलोकस्य चरम-
खंडानि विशेषाधिकानि कथमिति चेदुच्यते इह यद्यपि लोकस्य चरमखंडानि तथा तानि संख्ययानि तथापि प्रागुपदर्शितेष्टकान्यासपरिकल्प
नया तान्यष्टौ परिकल्प्यंते तद्यथा एकैकं चतसृषु दिक्षु एकैकं च विदिक्षु इति अलोकचरमखंडानि तु न्यासपरिकल्पनया परिगण्यमानानि
द्वादश तद्यथा एकैकं चतसृषु दिक्षु द्वे द्वे विदिक्षु इति द्वादश चाष्टभ्यो न हि गुणानि त्रिगुणानि च किंतु विशेषाधिकानीति तथापि अलोक
स्य चरमखंडेभ्यो लोकस्य चरमखंडानि अलोकस्य चरमाचरम। खंडानि समुदितानि विशेषाधिकानि तथाहि लोकस्य च
रमखंडानि प्रागुक्तपरिकल्पनया अष्टौ विवक्षितचरमखंडमिति कृत्वा। यमीलने नव अलोकस्यापि चरमखंडानि समुदितानि
त्रयोदश भवंति एषामेकत्र मीलने द्वाविंशतिः सा च द्वादशभ्यो न द्विगुण २ किंतु विशेषाधिकेति अलोकस्य चरमखंडेभ्यो लोकालोक
चरमाचरमखंडानि समुदितानि विशेषाधिकानि प्रदेशार्थतापि चिंतायां २ सर्वस्तोका लोकस्य चरमांतप्रदेशाः अष्टखंडसक्तानामेव प्रदे
शानां भावात् तेभ्यो लोकस्य चरमांतप्रदेशा विशेषाधिकाः तेभ्योऽपि लोकस्याचरमांतप्रदेशा असंख्येयगुणाः द्वयस्यातिप्रभूततया तत्प्रदे
शानामपि अतिप्रभूततया भावात् तेभ्योऽप्यलोकस्य चरमांतप्रदेशा अनंतगुणाः द्वयस्यानंतगुणत्वात् तेभ्योऽपि लोकस्य चरमांतप्रदेशा अचरमांत
प्रदेशा अलोकस्यापि चरमांतप्रदेशा अचरमांतप्रदेशाः समुदिता विशेषाधिकाः कथमिति चेदुच्यते इह अलोकस्याचरमांतप्रदेशा
लोकस्य चरमाचरमाचरमांतप्रदेशा अलोकस्याचरमांतप्रदेशाश्च प्रक्षिप्यंते तत्र सर्वसंख्यासंख्याश्चानंतराश्यपेक्ष्या अतिस्तोका इ
ति प्रक्षिप्यपि तेऽलोकस्याचरमांतप्रदेशेभ्यो विशेषाधिका एव एतदनुसारेण द्रव्यार्थप्रदेशार्थचिंतासूत्रमपि स्वयं परिभावनीयं नवरं लोका ९१

लोकचरमाचरमखंडेभ्यो लोकस्य चरमांतप्रदेशा असंख्येयगुणा इति लोकस्य किल चरमाणि खंडान्यष्टौ एकैकस्मिंश्च खंडे प्रदेशा अ
संख्येया लोकालोकचरमखंडानि च समुदितानि द्वाविंशतिस्ततस्ता लोकालोकचरमचरमखंडेभ्यो लोकस्य चरमांतप्रदेशा अस
ख्येयगुणाः शेषपदभावना प्राग्वत् सव्वदव्वा विसेसाहिया इति लोकालोकचरमाचरमांतप्रदेशेभ्यः सर्वद्रव्याणि विशेषाधिकानि अनंतानंत
संख्यानां जीवानां तथा परमाण्वात्मकस्कंधपर्यंतानां प्रत्येकमनंतसंख्यानां पृथक् २ द्रव्यत्वात् तेभ्योऽपि सर्वप्रदेशा अनंतगुणाः तेभ्योऽपि सर्वप
र्याया अनंतगुणाः प्रतिप्रदेशमुपरितनदर्शितानामनंतपर्यायाणामानंत्यात् तदेवं रत्नप्रभादिकं चरमादिविकल्पैश्चिंतितमिदानीं परमाण्वादिकं चिंतयन्ना
ह परमाणुपुग्गले णं भंते इत्यादि अत्र प्रश्नसूत्रे षड्विंशतिर्भंगा यतस्त्रीणि पदानि चरमावक्तव्यलक्षणानि तेषां चैकैकसंयोगप्रत्येकमे
कवचनांतबहुवचनांतभंगास्तद्यथा चरमः १ अचरमः २ अवक्तव्यः ३ एते त्रयो ब हुवचनेन तद्यथा चरमाणि १ अचरमाणि २ अवक्तव्यानि सर्वसं
ख्यया षट् द्विकसंयोगाश्चत्वारो भंगा चरमाचरमपदयोरेकश्चरमावक्त व्यपदयोर्द्वितीयः अचरमावक्तव्यपदयोस्तृतीयः एके
कस्मिंश्च चत्वारो भंगास्त्रयो द्विकसंयोगे एवं चरमश्चाचरमश्च चर मश्चाचरमाश्च चरमाश्चाचरमश्च चरमाश्चाचरमाश्च स्थापना ॥ ६६ ६। ६६ एकमेव
च त्रयोर्भंगा चरमावक्तव्यपदयोः ॥ ।६ ६। ६६ एवमेव चाचरमावक्तव्यपदयोः ॥ ।६ ६। ६६ सर्वसंख्यया द्विकसंयोगा द्वादश भंगाः त्रिकसंयो गे एकव
चनबहुवचनाभ्यामष्टौ स्थापना ॥८॥ ॥। ।ऽ। ।ऽ। ।ऽऽ ६॥ ६।६ ६६। ६६६ सर्वसंकलनेन याः षड्विंशतिः अत्र निर्वचनमाह गोयमा परमाणुपुग्गले लो नोच
रम इत्यादि परमाणुपुद्गलश्चरमो न भवति चरमत्वं ह्यन्यापेक्षं न चात्रान्यदपेक्षणीयमस्ति तस्याविवक्षणात् एकस्य परमाणोर्द्रव्यतोऽन्यापेक्षया चर
मत्व प्रकल्प्यते निरवयवत्वात् तस्मान्न चरमो नाप्यचरमो निरवयवतया मध्यभावायोगात् किंत्ववक्तव्यः चरमव्यपदेशकारणतः सन्यतया व
रमशब्देनाचरमशब्देन वा व्यपदेष्टुमशक्य। त्वात् वक्तुमशक्य इति अवक्तव्यं तु चरमशब्देनाचरमशब्देन वाऽऽभवति भिन्नस्तन्यतया वक्तुमशक्यता
दवक्तव्यमिति स्थापना ⊡ शेषास्तु भंगाः प्रति षेध्याः परमाणोस्तेषामसंभवात् वक्ष्यति च परमाणुमियतइत्थं अस्यायमर्थः परमाणोः परमा

प्रज्ञापना वृ॰॥

पुद्गलास्तांश्च तृतीयो भंगः परिहार्यः शेषा निरवयवत्वेन प्रतिषेध्याः दुपएसिए णं भंते इत्यादि प्रश्नसूत्रं प्राग्वत् निर्वचनमाह गोयमा सिय चरमे नो अचरमे अवत्तव्वए इत्या
दि द्विप्रदेशकः स्कंधः स्यात् कदाचिच्चरमः कथमिति चेत् उच्यते इह यदा द्विप्रदेशकः स्कंधो द्वयोराकाशप्रदेशयोरवगाढो भवति समश्रेण्या
व्यवस्थितयोः स्थापना तदा एकोऽपि परमाणुरपरपरमाण्वपेक्षया चरम इति चरमः अचरमस्तु न भवति सर्वद्रव्याणा
मपि केवलाचरमत्वस्यायोगात् यदा तु स एव द्विप्रदेशिकः स्कंध एकस्मिन्नाकाशप्रदेशेऽवगाहते तदा स तथाविधैकत्वपरिणामपरिणतत्वात्पर
माणुवत् चरमव्यपदेशकारणस्याभावान्न चरमशब्देन व्यपदेष्टुं शक्यते नाप्यचरमशब्देनेति अवक्तव्यः शेषास्तु भंगाः प्रतिषेध्याः तथावस्थाने प
दमात्तइयाहाइडुपएसे अस्यायमर्थः द्विप्रदेशके स्कंधे प्रथमो भंगः चरम इति तृतीयोऽवक्तव्य इति भवति शेषास्तु प्रतिषेध्या असंभवात्
असंभवस्तु प्रतीत एव तिपएसिए णं भंते खंधे इत्यादि प्रश्नसूत्रं प्राग्वत् निर्वचनं गोयमा सिय चरमे इत्यादि इह यदा त्रिप्रदेशिकः
स्कंधो द्वयोराकाशप्रदेशयोः समश्रेण्या व्यवस्थितयोरव वगाढो भवति स्थापना तदाऽसौ चरमः सावयवत्वा
वात् द्विप्रदेशिकस्कंधवत् भावनीयोऽचरमप्रतिषेधः प्राग्वत् स्यादव क्तव्य इति यदा स एव त्रिप्रदेशकः स्कंध एकस्मिन्नाकाशप्रदेशेऽव
गाहते तदा परमाणुवत् चरमाचरमव्यपदेशकारणस्याभावात् चरमाचरम शब्दाभ्यां व्यपदेष्टुमशक्यत्वादवक्तव्यः चतुर्थादयः षष्ठपर्यंताः प्रतिषे
ध्याः असंभवात् असंभवस्तु प्रतीत एव [illegible] अवक्तव्यः नवमस्तु ग्राह्यः स्वयमाह सिय चरमाइं य अवत्तव्वए य पाठान्तरं हि बहुवचनतानीयमर्थः स्यात्क
दाचिदयं भंगश्चरमौ वाऽचरमश्च तत्र यदा स त्रिप्रदेशिकः स्कंधस्त्रिष्वाकाशप्रदेशेषु समश्रेण्या व्यवस्थितेष्ववगाहते स्थापना तदादिमांतिमौ
द्वौ परमाणू पर्यंतवर्तित्वाच्चरमौ मध्यमस्तु मध्यवर्तित्वादचरम इति दशमस्तु प्रतिषेध्यः स्कंधस्य त्रिप्रदेशिकत्वात् चरमाचरमशब्दयोर्वक्तुः वचनमिति भिन्ना
संभवात् एकादशस्तु ग्राह्यः स्वयमाह सिय चरमे य अवत्तव्वए य स्यात्कदाचिदयं भंगश्चरमश्चावक्तव्यश्च तत्र यदा स त्रिप्रदेशिकः समश्रेण्या विश्रेण्या
चैवमवगाहते स्थापना तदाऽसौ परमाणौ समश्रेण्या व्यवस्थिताविति द्विप्रदेशावगाढद्विप्रदेशकस्कंधवच्चरमव्यपदेशकारणात् अतश्चरम एकश्च ९२

परमाणुर्विश्रेणिस्थश्चरमाचरमशब्दाभ्यां व्यपदेष्टुमशक्यत्वादवक्तव्यः शेषास्तु भंगाः सर्वेऽपि प्रतिषेध्याः वक्ष्यति च एवं मोत्तूण तइयनवमे इक्कारसमे य
तिपएसे अस्यायमर्थः त्रिप्रदेशके स्कंधे प्रथमो भंगश्चरम इति तृतीयोऽवक्तव्य इति नवमश्चरमौ वाऽचरमश्च एकादशश्चरमश्चावक्तव्यश्चेति
भवंति शेषा भंगा न घटंते चउप्पएसिए णं भंते खंधे इत्यादि प्रश्नसूत्रं प्राग्वत् निर्वचनमाह गोयमा सिय चरमे इत्यादि अत्र प्रथमतृतीयनवमद
शमैकादशद्वादशत्रयोविंशतितमरूपाः सप्त भंगा ग्राह्याः शेषाः प्रतिषेध्याः तत्र प्रथमभंगभावना यथा चरम इति इह यदा चतुःप्रदेशकः स्कंधो
द्वयोराकाशप्रदेशयोः समश्रेण्या व्यवस्थितयोरवगाहते स्थापना तदा चरमः सा च चरमत्वभावना समश्रेणिव्यवस्थितद्विप्रदे
शावगाढद्विप्रदेशिकस्कंधवद्भावनीया तृतीयो भंगः स्यादवक्तव्य इति स चैवं यदा एव चतुःप्रदेशकः स्कंध एकस्मिन्नाकाश
प्रदेशेऽवगाहते स्थापना तदा परमाणुवदवक्तव्यः नवमः स्याच्चरमौ वाऽचरमश्च स चैवं यदा स चतुःप्रदेशात्मकः स्कंधस्त्रिष्वाकाश
प्रदेशेष्ववगाहते तदा आद्यंतप्रदेशावगाढौ चरमौ मध्यप्रदेशावगाढश्चाचरमः स्याच्चरमौ चाचरमश्च तत्र
यदा स चतुःप्रदेशकः स्कंधः समश्रेण्या व्यवस्थितेषु चतुर्ष्वाकाशप्रदेशेष्ववगाहते तदा आद्यंतद्विप्रदेशावगाढौ
द्वौ परमाणू चरमौ द्वौ तु मध्यमयोराकाशप्रदेशयोरवगाढौ द्वौ परमाणू अचरमाविति एकादशः स्याच्चरमश्चावक्तव्यः स
चैवं यदा स चतुःप्रदेशकः स्कंधस्त्रिष्वाकाशप्रदेशेषु समश्रेण्या विश्रेण्या चैवमवगाहते स्थापना तदा समश्रेणिव्यवस्थितद्विप्रदे
शावगाढद्वयः परमाणवो द्विप्रदेशावगाढद्विप्रदेशकस्कंधवच्चरमः एकश्च विश्रेणिस्थः परमाणुरिव चरमाचरमशब्दाभ्यां व्यपदेष्टुमशक्यत्वा
दवक्तव्य इति द्वादशः स्याच्चरमश्चावक्तव्यौ च स चैवं यदा स चतुःप्रदेशात्मकः स्कंधश्चतुर्ष्वाकाशप्रदेशेष्ववगाहते तत्र द्वौ परमाणू द्वयोः
समश्रेण्या व्यवस्थितयोराकाशप्रदेशयोर्द्वौ च परमाणू द्वयोर्विश्रेण्या व्यवस्थितयोः स्थापना तदा द्वौ परमाणू समश्रेण्या व्यवस्थितौ द्विप्र
९१ देशावगाढद्विप्रदेशकस्कंधवच्चरमः द्वौ च परमाणू विश्रेणिव्यवस्थितौ केवलपरमाणुवच्चरमाचरमशब्दाभ्यां व्यपदेष्टुमशक्यत्वा

प्रज्ञा० वृ०॥ त्रयोविंशतितमः स्याच्चरमोवाचरमश्चावक्तव्यश्च कश्चमिति विवर्त्तन्ते इह यदा सप्तप्रदेशकः स्कंधएकत्रवर्त्तिकाशप्रदेशे व्यवगाहते
त्रयः परमाणवः श्रेणिसमश्रेण्याव्यवस्थिताकाशप्रदेशेष्वेकौ विश्रेणिस्थप्रदेशस्थापना ०।०।० तदा त्रिषु परमाणुषु समश्रेणिव्यवस्थितेषु
मध्ये आद्यंतौ परमाणुपर्यंतवर्त्तिनौ चरमौ मध्यवर्त्ती अचरमो विश्रेणिस्थः अवक्तव्य इति बहुवचनांतत्वेऽत्र चरमावरमस्यावक्तव्यस्य चैकदा सत्वात् एकत्वरस्यायवारसमासेन
गावत्र्योपपातवीसइमायवोबाधवोगतायां तु पंचपरमाणुनिष्पन्नेऽत्रत्यादि सूत्रं प्राग्विवक्तितमाह णायमाणियं चरमेइत्यादि इह भेद
दयुक्तं जीवस्य हि तथास्वाभाव्यात् द्वावुपयोगावेकस्मिन् समये न स्यातां योगक्रियाविशेषास्त्वनेके अप्येकस्मिन् समये घटंत एव तथाहि
कापि नर्तकी भ्रमणादि कृत्वा विदग्धतया एकस्मिन्नपि समये हस्तपादादिगता विविधाः क्रियाः कुर्वती दृश्यत एवं वस्तुतः प्रत्येकमेकस्मि
न् समये तत्साद्गात्रयोपजायते एकस्मिन्नेव समये संघातपरिशा टावपि तानकश्चिद्दोषः आह च भाष्यकृत् गहणविसग्ग
पयत्नापत्ता परविरोहिणा कह समए दोन्नि वा योगा नाहा इ कि । [illegible] रियाण को दोसो इ ह तीयउत्तः समएणातेव द्विती
य समयोपात्तान् भाषापुद्गलान् मुंचति पुनरन्यानादत्ते उक्क [illegible] षेण असंख्येयान् समयान् निरंतरं गृह्णाति तथा वा
हऽउक्कोषेणासंख्येयान् समयान् गृह्णातीतियोगः कदाचिद्वियता संख्याये समये एकं ग्रहणमत्यंततः आह आद्यसमयप्रति
तदपि कदाचिद्विरहितमपि व्यवहारतः अनुसमयमित्येव मुच्यते ततश्च । दांक्काव्यवहारमाह अविरहितं एवं निरंतरं गृह्णाति त
त्र समये ग्रहणमेव न निसर्गः अगृहीतस्य निसर्गाभावात् पर्यंतसमये मोक्ष एव भाषाभिप्रायोपरमतो ग्रहणासंभवात् द्वि
तीयादिषु समयेषु ग्रहणनिसर्गावयुगपत्कालं तिष्ठापनावयं । गा। गा। गा। गा। गा॥ गा॥ जीवाणं भंते जाइं दव्वाइं भासत्ताए गहियाइं निसर
इत्यादि प्रश्नसूत्रं सुगमं निर्वचनमाह सांतरं निरंतरं नियमचलाव । ३॥ नि । नि । नि । नि । नाइं तावत् ग्रहणं निरंतरमुक्तं तथा चानंतरसूत्रं अ
णुसमयविरहियं निरंतरं गिण्हइ इति तती निसर्गोपि प्रथमवर्ज्जेषु शेषेषु समयेषु निरंतरं प्रतिपत्तव्यो गृहीतस्यावश्यमनंतरसमये निस
र्गात्ततोयदुक्तं सांतरं निसृजति ततो निरंतरमिति तद्ग्रहणापेक्षयाऽवसेयं तथाहि यस्मिन् समये यानि भाषाद्रव्याणि गृह्णाति तानि तस्मि

त्तेव समयेषु च निर्यथा प्रथमसमयगृहीतानि नतरस्मिन्नेव प्रथमसमये किंतु द्वितीये स्मिन् २ समये गृहीतानि तदनंतरस्मिन् २ स्मिन् समये तत्र ग्रहण
पूर्वा निसर्गः गृहीतस्य निसर्गायोगादिति सांतरो निसर्ग उक्तः आह च भाष्यकृत् अण्णसमयम्मि णत्तेयं गहणं न णियरजं ता विसेसाहका
विकृता निरंतरविवक्षणादुक्तं संतरा न णेउं गहणा वक्काए य निरंतरं सिक्काइं गहियाइं नजं निसिरइ तो निसिरइ कहं एवमनिसिरणं
न हि निसिरिज्जइ नागहियं गहणंतरियं निसंतरं तेण इति एतदेव सूत्रकृदपि स्पष्टयति संतरं निसिरमाणो एगेणं समएणं निसिरइ इति ए
केन प्रथमप्रथमसमयेन गृह्णाति एकेन तानंतरसमयेन निसृजति अथवा ग्रहणापेक्षा निसर्गाभावात् एकेनाद्यसमये
न गृह्णात्येव न निसृजति गृहीतस्य निसर्गसंभवात् तथा एके न पर्यवसाना। समये न निसृजत्येव गृह्णाति न तथापि प्राणयोरभावात् ग्रहण
संभवात् तथा अन्ये द्वितीयादिषु समयेषु गृहीतान् ग्रहणनिसर्गयोः। तानि तावन्निरंतरं उभयं तावद्वौ समयौ उत्कर्षतः स
त्वेयान् समयान् एतदेवाह निसिरमाणो वा एणं इह गहणं इसम इयं किं सोसो णं असंखेज्जसमइयं अंतोमुहुत्तं
यं गहणनिसिरणोवात इति तं जीवणं भंते इत्यादि प्र। अभवं तुगामं नगरावाना हणोतम भिन्नान्यपि निसृजति अभि
न्नान्यपि इह यः मंदा नावना इह कश्चिद्वक्ता मंदप्रयत्नो गीत्वप्रयत्न अतएव व्याध्याधिविशेषतो अनादरतो मंदप्रयत्नः सन् भाषाद्रव्याणि
तथा भूतान्येव स्थूलखंडात्मकानि निसृजति यस्तु तीव्रप्रयत्नो दिग्गजदुर्मुखादिर्वक्ता तीव्रप्रयत्नः सन् भाषाद्रव्याणि आदाननिसर्गप्रय
त्नाभ्यां खंडशः कृत्वा निसृजति आह च भाष्यकृत् कोई मंदप्पयत्तो निसिरइ सकलाइं दव्वाइं अन्नो तिव्वपयत्तो सो मुंचइ भिंदिउं ताइं तत्र
ये भिन्नाइं पि निसिरइ इति अभिन्नाइंपि निसिरइ इन्नाइं भिन्नाइं निसिरइ इत्यादि यानि तावत् प्रयत्ना वक्ता अभिन्नान्येव निसृजति तानि
निसृष्टानि स्थूलत्वादसंख्येयान्यवगाहनावर्गणा अतिक्रम्य भिद्यमानानि संख्येयानि योजनानि गत्वा विध्वंसमानानि निसृष्टदिग्लोकांते स्पृशंति ले
शमात्रप्राप्तवंतीत्यर्थः तं कंच भिन्नाइं सुहुमयाए अणंतगुणं वड्ढियाइं लोगंतमावेति निसर्गमिति यानि सामर्थ्यतो मंदप्रयत्नो वक्ता

भासमानान्येव सकलान्यभिन्नानि निसाद्व्यपरिणमयानि सूति नात्यसंख्येया अवगाहनावर्गणा गत्वा अवगाहनाएकैकस्य नाशाड्व्यस
अनंतानां असंख्येयप्रदेशात्मकक्षेत्रविभागरूपा सा समवगाहनानां वर्गणाः समुदायास्ता असंख्येया अतिक्रम्य तदनन्तरं विशार
रुतानि विद्यातीत्यर्थः विशरारुतानि विशीर्णानि च संख्येयानि योजनानि गत्वा विध्वंसमागच्छंति शब्दपरिणामं विजहतीत्यर्थः।
तं कंच गं जमसंखेज्जाओ अवगाहणवग्गणाओ भिन्नाइं भिदेति भिसिमिति यसतसहस्सं तत्थ णं जे ते भिन्नान्यपि निसृजतीत्युक्तं त
त्रकतिविधः शब्दद्रव्याणां भेद इति तसिणं भंते दव्वाणं मित्यादि तत्र खंडभेदो लोहखंडादिवत् प्रतरभेदो अभ्रपटलवत् चूर्णि
ताभेदस्तिलचूर्णिकाभेदः क्षिप्तपिष्टवत् अनुतटिकाभेदः इक्षुत्वगादि वत् उत्करिकाभेदः मुद्गादिवर्षवत् एतानेव भेदान्यत्र व्याख्याक्रमः
प्रश्ननिर्वचनसूत्राण्याह से किं तं खंडाभेदे इत्यादि पाठसिद्धं नवरमनुतटिकाभेदः अवगाटाः कूपाः तडागा निद्र
दा अपि नद्यो गिरिनद्यादयः व्याप्यासु वृत्तसमाकाराः ताः पु क्करिण्यः दीर्घिका समुद्रो नद्यः वक्रा नद्यो गुंजालि
काः बहूनि केवलानि केवलानि पुष्पप्रकरवत् विप्रकीर्णानि सरांसि तान्येव एकैकपंक्त्या व्यवस्थितानि सरःपंक्तयः ये
षु सरस्सु पंक्त्या व्यवस्थितेषु कूपादकं प्रणालिकया संचरति सा सरःसरःपंक्तिः अप्रतीताभेदा लोकतः प्रत्येतव्याः अल्पब
हुत्वसूत्रं प्रमाणान्यवस्थितिप्रतिपन्नत्वमुत्करविषयत्वात् तदेव सूत्रं सर्वमपि पाठसिद्धं स्थावकं ज इत्याह णं भंते इत्यादि न इति द्विव
चनं पुरुषादिति बहुवचनं पुरुषाः इति स्त्रीवचनमियं स्त्री पुरुषवचनमयं पुमान् नपुंसकवचनमिदं कुंडं अध्यात्मवचनं यदन्यत् चेतस
निधाय विप्रतारकबुद्ध्या भिलापुरपि सहसा यदन्यत्नितादव्युत्पनीतवचनं प्रशंसावचनं यथा रूपवती स्त्री अपनीतवचनमिदं
१ वचनं यथा अयं कुरूपा स्त्री उपनीतापनीतवचनं यत्र प्रशस्यमिंदतिये यथा रूपवती स्त्री परं दुःशीला अपनीतवचनं यत्रैकं दिया प्रशंसति
यथा अयं कुरूपा परं सुशीला तिअतीतवचनमकारोदित्यादि प्रत्युत्पन्नवचनं वर्तमानकालवचनं करोतीत्यादि अनागतकालवचनं करिष्य

प्रज्ञा० वृत्ति॥

नीत्यादि प्रत्यक्षवचनमयमित्यादि परोक्षवचनं सइत्यादि एतानि च षोडशापि वचनानि यथावस्थितवस्तुविषयाणि न काल्पनिकानि ततो यदेता
नि सम्यगुपयुज्य वदति तदा सा भाषा प्रज्ञापनी द्रष्टव्या तथा चाह इच्चेयं भंते एगवयं वा एगवयणमित्यादि नावितार्थमस्याग्रार्थः प्रतीत एव संप्रति
प्रागुक्तमेव सूत्रं सूत्रांतरसंबंधनार्थं ऽवयः पठति ७ कइ णं भंते भासज्जाया पन्नत्ता इत्यादि सुगमं नवरं आउत्तं भासमाणो इति सम्यक्प्रवचनमा
लिन्यादिरक्षणपरतया भाषमाणः प्रभावादि प्रवचनोड्डाहरक्षणादि निमित्तं गुरुलाघवपर्यालोचनेन मृषापि भाषमाणः साधुराराधक एवेति ते
णपरमित्यादि ततः आयुक्तं भाषमाणान् पराः संयतान् तानि वाक्कायसंयमविकलाः विरता विरमति स्म विरतान विरतास्तु विरतः सावद्यव्यापा
रादसिद्धमनाडत्यर्थः अत एव न प्रतिहतं मिथ्यादुःकृतदानप्रायश्चि त्तप्रतिपत्त्यादिना न नाशितमतीतं पातं प्रत्याख्यानं चायाः करण
तया निषिद्धमनागतं पापकर्म यैस्ते न प्रतिहतप्रत्याख्यान पापकर्माणः एषं पाठसिद्धं अल्पबहुत्वचिंतायां सर्वस्तोकाः स
त्यभाषकाः इहयः सम्यगुपयुज्य सर्वज्ञमतानुसारेण वस्तुप्र तिष्ठापनबुद्ध्या भाषते स सत्यभाषकास्ते च पृष्ठाः स्तोका लोक
तिपत्त्यादिलक्ष्यंत इति सर्वस्तोकाः १ तेभ्यः संख्येयगुणाः सत्य मृषाभाषकाः बहूनां प्रायो यथा तथा सत्यमृषाभाषणसंभवा
ल्लोके तथा दर्शनात् तेभ्यः संख्येयगुणा मृषाभाषकाः क्रोधमति प्रमातानां परवंचनाद्यभियुक्तानां प्रचुरतराणामुपलंभात् तेभ्यो मृषा
भाषकत्वात् तेभ्यः संख्येयगुणा असत्यामृषाभाषकाः द्वींद्रियादीनामप्यसत्यामृषाभाषकत्वात् तेभ्यो नंतगुणा भाषकाः सिद्धानामेकेंद्रिया
णां चानंतत्वात् ८ इति श्रीमलयगिरिविरचितायां प्रज्ञापनाटीकायां भाषाख्यमेकादशमं पदं समाप्तं ११ तदेवं व्याख्यातमेकादशं पदमिदानीं
द्वादशमारभ्यते अस्य चायमभिसंबंधः इहानंतरपदे जीवानां सत्यादिभाषाविभागोपदर्शितस्तेन भाषा च शरीरायत्ता शरीरप्रभवा भाषेत्युक्तेर्वच
तिपादितत्वात् अन्यत्राप्युक्तं गोयमा इयकाइएणं निसरइ तहवाइएणमिति ततः शरीरप्रविभागप्रदर्शनार्थमिदमारभ्यते तत्रेदमादिसूत्रं कइ णं
भंते शरीराए पन्नत्ता इत्यादि तत्र शीर्यते प्रतिक्षणं शीर्यंत इति शरीराणि तानि च पंचेति कियत्संख्याकानि णमिति वाक्यालंकारे २०८

शरीराणि भगवानाह पंच शरीराणि प्रज्ञप्तानि तान्येव नामतः आह उरालिए इत्यादि अमीषां शब्दार्थमात्रं व्यक्तमिदमभिधीयते तत्रार्थं किंचि
दुच्यते उदारं प्रधानं प्राधान्यं चास्य तीर्थंकरगणधरशरीरापेक्षया ततोन्यस्यानुत्तरसुरशरीरस्याप्यनंतगुणहीनत्वात् अथवा उरालं नाम
विस्तरवत् विस्तरवत्त्वं चास्यावस्थितप्रमाणतयाऽस्य सातिरेकयोजनसहस्रमानत्वात् वैक्रियं तु तावदवस्थितप्रमाणं न लभ्यते उक्तार्थतोप्यवस्थितप्र
माणस्य पंचधनुःशतप्रमाणत्वात् तच्च तावत्प्रमाणं सप्तम्यामेवावनौ उत्तरवैक्रियं योजनलक्षप्रमाणं तत्तदवस्थितमानवैवर्त्तिवाभावात्
तान्ननु तदपेक्षया आह च पूर्वं निरुक्त उरालेनाम विस्तरालं विसालंति जं नणियं होइ कह सा इरेगजोयणसहस्समवट्ठियप्पमाणमो
रालियं अन्नमिद्दहमित्तं वेउव्वियं होइ तं तु अणवट्ठियं तु पंचध णुसयाइं अहे सत्तमाए इमं तु अवट्ठियप्पमाणं साइरेग
जोयणसहस्सं वनस्सतीनामिति अथवा उरालं विरलप्रदेशतया घनं मृत्प्रदेशोपचितत्वात् इदं त्वाय लष्ट्वत्वादिव
१ अरालं समयपरिभाषया मांसास्थिस्नाय्वाद्यवबद्धं सर्वत्रवज्रार्थ कइक प्रत्ययः उदारमेव उरालमेव उरलमेव वा
कुदारिकं मृत्पादरादित्वादि शब्दरूपनिष्पत्तिः प्राकृतत्वात् उरालियमि ति उक्तं च तत्थोदारमुरालं उरलं अरालमहवा विन्नेयं
उरालियंति पढमं पडुच्च तित्थेसरसरीरं भण्णइ यतः छोरालं विउरवंतं च। णं सयंपमाणं इह पवत्थि अप्पणं इदमेत्तं विसालंति उरलंपि
वपएसोवचियंपिमहल्लगं जहा भिंडं मंसठियाहारु बद्धं उरालं समयपरिभासा तथा विविधा विशिष्टा वा क्रिया विक्रिया तस्यां भवं वैक्रि
यं उक्तं च विविहा विसिट्ठगा वा किरिया तीए जं तं वेउव्वियं तयं तु णियमा नारगदेवाण पगईए अथवा वैकुर्विकमिति शब्दसंस्कार
: तत्र विकुर्व इति सिद्धांत धातुः विकुर्वणं विकुर्वः विविधाः क्रिया इत्यर्थः तेन निर्वृत्तं वैकुर्विकं तथा चतुर्दशपूर्वविदा कार्ये त्यागोत्पन्नो
ग बालनाद्भियत इत्याहारकं तदुक्तं सो विकारस्सेउसं कम्मणा उन्नं कम्मंति तन्नादारिकादीनां शरीराणामिदं प्रपन्यासे किंचिद
भिप्रायो उक्तस्तु यथा कर्मविदप्रवृत्त इति उच्यते असाति उत्सूमः किंतदिति चेदुच्यते परं परं प्रदेशास्तोक्यपरंपरंवर्गणाप्रदेशबाहु

त्वं तस्मादौदारिकात् वैक्रियस्य प्रदेशा सौक्ष्म्यं वैक्रियादप्याहारकादपि कार्मणस्य तथा औदारिकात् वैक्रियस्य वर्गणाप्रदेशा बादरत्वं वै।
क्रिया दाहारकस्याहारकात्तैजसस्य तैजसात्कार्मणस्येति एतान्येव शरीराणि नैरयिकादिषु संभवतश्चिंतयति ७ नेरइयाणं भंते
केवइया सरीरा पन्नत्ता इत्यादि पाठसिद्धं शरीराणि च जीवानां द्विविधानि तद्यथा बद्धानि च तत्र यानि चिंताकाले जीवैः परिगृहीतानि वर्त्तते ता-
नि बद्धानि च पूर्वं भवेषु परित्यक्तानि तानि मुक्तानि तेषां बद्धानां मुक्तानां च परिमाणमिदानीं द्रव्यक्षेत्रकालैः प्ररूपणीयं तत्र द्रव्येरव्यादि दि-
:क्षेत्रेण श्रेणिप्रतरादिना कालेनावलिकादिना तत्रौदारिकशरीरमधिकृत्याह केवइयाणं भंते ओरालियसरीरा पन्नत्ता इत्यादि इ-
ह प्राकृतलक्षणवशादिह प्रत्ययस्य स्वार्थिकत्वात् तावति बद्धेल्लया इति बद्धानी। त्यर्थः मुक्किल्लया इति मुक्तानीत्यर्थः तत्र बद्धान्यसंख्येयानि
असंख्येयत्वमेव प्रथमतः कालतो निरूपयति असंखेज्जाहिं त्यादि प्रतिसमयमेकैकशरीरापहारे असंख्ये-
याभिरुत्सर्पिण्यवसर्पिणीभिरपहियंते किमुक्तं भवति अ। संख्येयासूत्सर्पिण्यवसर्पिणीषु यावंतः समयास्तावत्प्रमाणा-
नि बद्धान्यौदारिकशरीराणि वर्त्तते इदं कालतः परिमाणं क्षेत्रत आह ॥खेत्ततो असंखेज्जा लोगा इति क्षेत्रतः परिसंख्यान-
मसंख्येया लोका एतदुक्तं भवति सर्वाण्यपि बद्धान्यौदारिकशरीराणि। आत्मीयात्मीयावगाहनाभिराकाशप्रदेशाः परस्परमपी-
डीनाक्रमेण स्थाप्यंते तदा नीतेरेवमासीयमाणोऽसंख्येया लोका व्याप्नुवंति इह एकैकस्मिन्नप्याकाशप्रदेशे एकैकौदारिकशरी-
रकस्थापनया असंख्येया लोका व्याप्यंते परं सूत्रे नाचार्यैरात्मीयावगाहनास्थापनया प्ररूपणा कृतेति ततो अपसिद्धांतदोषमापादिष्य
स्माभिरपि तथैव प्ररूपणा क्रियते आह चूर्णिकारोऽपि इह इक्किक्कपए सरीरमेगं ठविज्जइ तो वि असंखेज्जा लोगा भवंति किं तु अव-
सिद्धंतदोसपरिहरणत्थं अप्पप्पणियाहिं ओगाहणाहिं ठविज्जंतइति आह ननु अनंता जीवास्ततः कथमसंख्येयान्यौदारिकशरीराणि उच्य-
ते इह द्विविधा जीवाः प्रत्येकशरीरिणोऽनंतकायिकाश्च तत्र ये प्रत्येकशरीरिणस्तेषां प्रतिजीवमेकैकमौदारिकशरीरमन्यथा प्रत्येक- २०९

शरीरभाजो यतोऽनंतकायिकास्तेषामनंतानामनंतानामेकैकमौदारिकशरीरमतः सर्वसंख्ययाप्यसंख्येयान्यौदारिकशरीराणि
मुक्तान्यौदारिकशरीराण्यनंतानीति तान्यनंतत्वं कालक्षेत्रद्रव्यैर्निरूपयति अणंताहिं इत्यादि कालतः परिमाणं प्रतिसमयमे-
कैकशरीरापहारेऽनंताभिरुत्सर्पिण्यवसर्पिणीभिः सर्वात्मनापह्रियंते किमुक्तं भवत्यनंतासूत्सर्पिण्यवसर्पिणीषु
यावंतः समयास्तावत्प्रमाणानीति क्षेत्रतः परिमाणमनंता लोका अनंतेषु लोकप्रमाणेष्वाकाशखंडेषु यावंत आकाशप्रदेशास्तावत्प्रम-
माणानीत्यर्थः द्रव्यतः परिमाणमभवसिद्धिकेभ्यः सकाशादनंतगुणानि यद्येवं तर्हि सिद्धराशिप्रमाणानि भविष्यंतीति तत आह सिद्धानाम-
नंतभागः अनंतभागमात्राणि ननु द्वयोरपि राश्योर्मध्यवर्तीनि अभवसिद्धिकसिद्ध रूपयोर्मध्यपतिते प्रतिसमयं गृह्यंते किं तद्राशिप्रमा-
णानि भवंतु नैवं यतस्तत्र यदि तत्प्रमाणानि स्युस्तर्हि तथैव निर्देशः :क्रियेत तस्य सुखप्रतिपत्तिहेतुत्वात् प्रतिज्ञा हि सूत्रकृत आर्यश्या-
मा तत्स्वभावा निर्देशाभावादवसीयते न तद्राशिप्रमाणानि। ननु तर्हि तेषां प्रतिपतितसम्यग्दृष्टीनामथ सामान्ये-
स्वरूपविभाज्यत्वात कदाचिदभ्यावृत्तिस्वरूपैः कदाचित्तुल्यानि अपि अनियतप्रमाणत्वात् न तु सर्वकालं तत्प्रमाणानि।
आह च चूर्णिकृत तो किं पडिवडियसम्मद्दिट्ठिरासिप्पमाणाइं होज्जा ततो भिंदाए विरासी णं मज्झे पडिवडंति भिकाणं तप्पमाणाइं
तप्पमाणाइं होतो होतो तिंविवमिहिमोहो तो तप्पमाणतप्पमाणाइं तो किं तभिं हिहा होज्जा अवसिंहाज्जा भवइ कयाइ हिंगं का-
याई अवसिट्टाति कयाइ थोवाइं न निच्चकालं तप्पमाणाइं इति अपरः प्राह कथं मुक्तानि यथोक्तानंतसंख्याप्रमाणान्युपपद्यंते
यावता यदि तावदौदारिकादिशरीराणि यावदविकलानि तावद्गृह्यंते तत एषामनंतकालमवस्थानाभावादनंतत्वं न घटते यदि पुनरनंतमपि
कालमवस्थानं भवेत् ततोऽनंतानंतशरीरगणनादनंतानि भवेयुः यावता नानंतकालमवस्थानं नापि पुद्गलानामुत्कर्षतोऽप्यसंख्येयका-
लावस्थानाभिधानात् अथ ये पुद्गला जीवेनौदारिकत्वेन गृहीत्वा मुक्ता अतीताः 1 तेषां ग्रहणं तद्विषयं पुद्गलाः सर्वे पि जीवैः

प्रत्येकमौदारिकत्वेन गृहीतामुक्ता इति सर्वपुद्गलग्रहणमापन्नं तथा च सति यदुक्तमभवसिद्धिकेभ्योऽनन्तगुणानि सिद्धानामनन्तभागमात्राणी-
ति तद्विरुध्यते सर्वजीवेभ्योऽपि प्रभूततानन्तगुणकारणानां तद्गुणत्वस्य प्रसक्तत्वादिति उच्यते इह मुक्तानामौदारिकशरीराणां नाविक-
लानामेव केवलानां ग्रहणं नाप्यौदारिकत्वेन ये गृहीतामुक्ताः पुद्गलास्तेषां मुक्तदोषप्रसंगात् किंतु यत् शरीरमौदारिकं जीवेन गृही-
तमुक्तं तत् विशरारुभावं विघटनमनन्तखंडीभवति तथानन्तानि खंडानि यावत्ते पुद्गला औदारिकपरिणामं न जहतीति तावत्प्रत्येक-
मौदारिकशरीरव्यपदेशं लभन्ते यत्पुनरौदारिकपरिणामं त्यक्तवन्तस्ते न गण्यन्ते तत एवमेकस्यापि शरीरस्यानन्तानि शरीराणि जाता-
नि एवं सर्वशरीरेष्वपि भावनीयं तथा च सत्येकैकस्य शरीरस्यानन्त खंडीभावादेकस्मिन्नपि समये प्रभूतान्यनन्तानि शरीराणि
एवाप्यन्ते तथा चासंख्येयं कालमवस्थानं तेन चासंख्येयेन काले नान्यानि जीवैर्विप्रमुक्तान्यसंख्येयान्यवाप्यन्ते तान्यपि
व प्रत्येकमनन्तखंडीभावानि तेषु च मध्ये तावता कालेन या न्यौदारिकशरीरपरिणामं विजहति तान्यपि परित्य-
ज्यन्ते शेषाणि गण्यन्ते तत एवमुक्तानि यथोक्तप्रमाणानन्तसंख्या कान्यौदारिकशरीराण्युपपद्यन्ते इति न चैतत्सम-
नीषिकाविजृम्भितं यत आह चूर्णिकृत् न विअविग्गहाणमेव केव लाणं गहणं एयं न य उरालियगहणमुक्काणं सव्वेउग्गला-
णं किंतु जं सरीरमोरालियं जीवेण मुक्कं तं खलु अणंतखंडभिन्नं होइ जाव ते पुग्गला तं जीवनिव्वत्तियं ओरालियसरीरकायप्पओग-
न मुवंति न ताव अन्नपरिणामेण परिणमंति ताइं पत्तेयं सरीराइं लब्भंति एवमेक्केक्कस्स ओरालियसरीरस्स अणंतखंडभिन्नत्तणओ
अणंताइं खवओरालियसरीराइं भवंति इत्यादि आह कथमेकैकशरीरस्याऽदृश्यस्य शरीरत्वं व्यवह्रियते उच्यते लवणदृष्टान्तेन तथा-
हि खार्यपि लवणमुच्यते द्रोणोऽपि लवणमाढकोऽपि लवणं यावदेकापि शर्करा लवणमेवमिहापि सकलमप्यौदारिकशरीरं
शरीरमुच्यते तदर्द्धमपि तदेकदेशोऽपि यावदनन्ततमोऽपि शरीरमिति कोऽत्राभिप्राय इति चेदुच्यते इह यथा लवणपरिणामपरिण-

तः स्तोको बहुर्वा पुद्गलसंघातो लवणमुच्यते तथौदारिकशरीरयोग्यपुद्गलसंघातोऽप्यौदारिकत्वमपरिणतः स्तो-
को बहुर्वा औदारिकशरीरव्यपदेशं लभते अथवा भवति समुदायैकदेशेऽपि समुदायशब्दोपचारो यथा अंगुल्यग्रस्पृष्टे स्पृष्टमयादे-
वदत्त इत्यादौ न कश्चिद्दोषः ननु यद्येवं कथं तान्यनन्तानि लोकाकाशप्रदेशप्रमाणान्यौदारिकशरीराण्येकस्मिन् लोके अव-
गाहन्ते उच्यते प्रदीपप्रकाशवत् तथाहि एकस्यापि प्रदीपस्यार्चींषि सकलमपि भवनमाभासयन्ति अन्येषामप्यनेकेषां प्रदीपानाम-
र्चींषि तत्रैवानुविशंति परस्परमविरोधेन तथौदारिकाण्यपि एवं शेषशरीरेष्वपि वक्ष्यमाणेष्वपि भावनीयं किमिति प्रथमतः
कालेन प्ररूपणा कृता उच्यते कालेन तावदवस्थितया पुद्गलशरीराणां प्ररूपणाऽनायासेन ततः कालो गरीयानिति प्रथमतस्तेन प्ररू-
पणा उक्ता त्वौदारिकाणि संप्रति वैक्रियाण्याह केवइया णं भंते इ त्यादि बद्धान्यसंख्येयानि तत्र कालतः परिमाणं प्र-
तिसमयमेकैकशरीरापहारे तस्मान्नासंख्येयाभिरुत्सर्पि णीअवसर्पिणीभिरपह्रियन्ते किमुक्तं भवति असं-
ख्येयासूत्सर्पिण्यवसर्पिणीषु यावन्तः समयास्तावत्प्रमाणानीति क्षेत्रतः असंख्येयाः श्रेणयः तासां च श्रेणीनां परिमा-
णं प्रतरस्यासंख्येयो भागः किमुक्तं भवति प्रतरस्यासंख्येयतमे भागे यावत्यः श्रेणयः सप्रदेशास्तासु श्रेणिषु यावन्त आकाशप्रदेशा-
स्तावत्प्रमाणानि बद्धानि वैक्रियशरीराणीति अथ श्रेणिरिति किमभिधीयते उच्यते घनीकृतस्य लोकस्य सर्वतः सप्तरज्जुप्रमाणस्या-
यामतः सप्तरज्जुप्रमाणा मुक्तावलिरिवैका आकाशप्रदेशपंक्तिः कथं पुनर्लोको घनीक्रियते कथं वा सप्तरज्जुप्रमाणो भवतीति उ-
च्यते इह लोकश्चतुर्दशरज्जुप्रमाणः अधस्तात् विस्तरतो देशोनसप्तरज्जुप्रमाणः एकरज्जुमध्यभागे तिर्यग्लोके ब्रह्मलोकप्रदेशे ब्रह्म-
देशे पञ्चरज्जुरूपो लोकान्ते रज्जुपरिमाणं सूर्यमण्डलसदृशः सर्वदिक्कांतादारभ्य परदिक्कांतं यावत् एवंप्रमाण-
स्य लोकस्य वैशाखस्थानस्थकटिस्थकरयुग्मपुरुषाकारस्य बुद्ध्या त्रसनाड्या दक्षिणभागवर्तिनो लोकखंडमधस्ताद्देशोनरज्जुविस्ता-

रूपतिरिक्तसप्तरज्जूच्छ्रयं परिगृह्य त्रसनाड्यास्तस्य पार्श्वे ऊर्ध्वाधोभागविपर्यासेन संघात्यते ऊर्ध्वलोकोऽधः क्रियते अधोलोकस्तूर्ध्वमिति संघा
त्यते इति ततः ऊर्ध्वलोके त्रसनाड्या दक्षिणभागवर्तिनौ यौ द्वौ खण्डौ ऊर्ध्वलोकाकारसंस्थितौ प्रत्येकं दैर्घ्येण सार्द्धत्रयरज्जुप्रमाणौ तौ बुद्ध्या समादाय
विपरीततया उत्तरपार्श्वे संघात्यते एवं च किं जातं मध्यभागे लोकार्द्धदेशेऽनन्तरं एकरज्जुविस्तारं सप्तरज्जूच्छ्रयं उपरितनमर्द्धं त्रिरज्जुविस्तारं द
शोनसप्तरज्जूच्छ्रयं ततः उपरितनमर्द्धं बुद्ध्या गृहीत्वा अधस्तनस्याधस्तादुत्तरपार्श्वे संघात्यते तथा च सति सातिरेकसप्तरज्जूच्छ्रयो देशोनसप्तर
ज्जुविस्तारोऽधस्ताज्जातः अन्यच्च सप्तरज्जुपरिधेर्यदधिकं तत्र यदुच्छ्रयोऽर्द्धं आयतमुत्तरपार्श्वे संघात्यते ततो विस्तारतोऽपि परिपूर्णाः सप्तरज्ज
वो भवंति एवमेव लोको घनीकृतः सप्तरज्जुप्रमाणो भवति यच्चेह क्वचित् न घनवृत्तं सप्तरज्जुप्रमाणवान्स्यादिति तच्च व्यवहारणीयं
तत्र यद्दिक्कादौ लिखितं दर्शितं सिद्धान्ते तत्र यत्र क्वचनापि श्रेणिः प्रतरस्याग्रहणेन तु सर्वत्राप्येवं घनीकृतस्य लोकस्य
सप्तरज्जुप्रमाणस्यावसातव्यं मुक्तान्यौदारिकवज्ज्ञातव्यानीति आहा रकविषयसूत्रं केवइयाणं भंते आहारगसरीरा
इत्यादि बद्धानि सिय अत्थि सिय नत्थि इति अस्तीति निपातो बहुवचनार्थः कदाचित्सन्ति कदाचिन्न सन्तीत्यर्थः यस्मादंतरमाहारक
शरीरस्य जघन्यत एकः समय उत्कर्षतः षण्मासाः उक्तं च आहाराइं लाए। बद्धानि सन्ति तानि कियन्ति उच्यते जघन्यत एकं समयं
द्वे त्रीणि इति यदाप्युत्कर्षतः सहस्रपृथक्त्वं मुक्तान्यौदारिकवत् तैजसविषयं सूत्रमाह तेयगाणं भंते तेयगसरीरा इत्या
दि तत्र बद्धान्यनन्तानि अनन्तत्वं कालक्षेत्राभ्यां निरूपयति अणंताहिं इत्यादि कालतः परिमाणमनन्ताभिरुत्सर्पिण्यवसर्पिणीभिः समयप्रमाणेनापहृतानि
नंतलोकप्रमाणाकाशखण्डप्रदेशपरिमाणानि द्रव्यतः परिमाणं सिद्धेभ्योऽनन्तगुणानि तैजसं हि शरीरं सर्वसंसारिजीवानां प्रत्येकं सं सा
रिणश्च जीवाः सिद्धेभ्योऽनंतगुणास्ततस्तैजसशरीराण्यपि सिद्धेभ्योऽनंतगुणानि भवंति सव्वजीवाणं अणंतभागूणाइ इति सर्वजीवानां
योऽनंततमो भागस्तेनोनानि इदमत्र भावना सिद्धानां तैजसशरीरं न विद्यते सर्वज्ञाणीनां तैजसानि सिद्धाश्च सर्वजीवानामनंततमो भागस्तेनो

नानि भवंति मुक्तान्यनन्तानि तदेवानन्तत्वं कालक्षेत्राभ्यां प्ररूपयति अणंताहिं इत्यादि कालक्षेत्रसूत्रभावना प्राग्वत् द्रव्यतः परिमाणं सर्वजीवेभ्योऽनं
तगुणानि कथमिति चेदुच्यते इह एकैकस्य संसारिजीवस्य एकैकं तैजसशरीरं तानि च जीवैर्विप्रमुक्तानि सन्ति प्रागुक्तयुक्त्या अनन्तानि भ
वंति तेषां चासंख्येयकालं यावदवस्थानं तावता च कालेन जीवैर्विप्रमुक्तान्यनन्तानि तैजसशरीराणि प्रतिजीवमसंख्येयानि तथा च तेषामपि
प्रत्येकं प्रागुक्तयुक्त्या अनन्तानन्तत्वं भवति ततश्च सर्वजीवेभ्योऽनंतगुणानि इति जीववर्गस्यानंततमभागप्रमाणानि जीववर्गप्रमाणानि कस्मा
न्न भवंतीति चेदुच्यते यदि एकैकस्य जीवस्य सर्वजीवराशिप्रमाणानि किंचित्समधिकानि वा भवेयुस्तदा सिद्धानंतभागप्रमाणं भवति वस्तु
हि तान्येव राशिमात्रस्य राशिगुणनेन भवंति यथा चतुष्कस्य चतुष्केन गुणः। तो षोडश आगतः स वर्ग इति न चैकैकस्य सर्वजीवप्रमाणानि
किंचित्समधिकानि वा तैजसशरीराणि किंतु स्तोकानि तानि अपि च संख्येयकालावस्थायीनि तावता कालेन यान्यन्यानि
नवं तिष्ठन्त्यपि स्तोकानि कालस्य स्तोकत्वात् ततो जीववर्गप्रमा। णानि न भवंति किंतु जीववर्गस्यानंततमभागमात्राणि इत्थं
नेतरथा प्रमाणतो यावत् सर्वाचार्यप्रदर्शितमिदं निदर्शनं सर्वजीवाः किल दशसहस्राणि अनंतान्यपि बुद्ध्या असत्कल्पनया दशसहस्राणि तेषां च
दशसहस्राणां वर्गो दशकोट्यः तैजसशरीराणि च मुक्तान्यसत्कल्पनया दशलक्षप्रमाणानि ततः सर्वजीवेभ्यः किल शतगुणानि
सर्वजीवराशेर्वर्गमपेक्ष्य शतगुणानि जीववर्गस्य शततमभागवर्तीनि ततो जीववर्गस्यानंततमभागमात्राणि एवं कार्मणशरीराण्यपि वक्तव्यानि मुक्तानि
भावनीयानि तदुक्तेः सहभावित्वात् उक्ताः औघिकानि पंचापि शरीराणि संप्रति नैरयिकादिविशेषणविशेषितानि चिंत्यंते नेरइयाणं
भंते इत्यादि नैरयिकाणां बद्धान्यौदारिकाणि शरीराणि न संति भवप्रत्ययतस्तेषामौदारिकशरीरासंभवात् मुक्तान्यौघिकमुक्तौदारिकशरीर
वत् वैक्रियाणि बद्धानि यावंतो नैरयिकास्तावत्प्रमाणानि तानि चासंख्येयानि तदेवासंख्येयत्वं कालक्षेत्राभ्यां प्ररूपयति असंखेज्जा
हिं इत्यादि कालतः परिमाणं प्रतिसमयमेकैकशरीरापहारे सामस्त्येनासंख्येयाभिरुत्सर्पिण्यवसर्पिणीभिरपह्रियंते किमुक्तं भवति असं

प्रज्ञाप०वृत्ति॥

ख्येया अवसर्पिण्युत्सर्पिणीषु यावंतः समयास्तावत्प्रमाणानीति हृदयं ताः संख्याताः श्रेणयः असंख्येयासु श्रेणिषु यावंत आकाशप्रदेशास्तावत्प्रमा-
णानीति भावः अथ प्रतरस्यासंख्येयाः श्रेणयो भवंति ततः स्यादिदं ज्ञायते नागादो वद ततः कियत्संख्याकाः श्रेणय इत्याशंकायां विशेषनिर्द्धा-
रणार्थमाह प्रतरस्यासंख्येयभागः किमुक्तं भवति प्रतरस्यासंख्येयतमे भागे यावत्यः श्रेणयस्तावत्यः परिगृह्यंते इदमप्यविशेषतरपरिमाणमिति
णं सेढीणं विक्खंभसूई इत्यादि तासां श्रेणीनां विष्कंभतो विस्तारमधिकृत्य सूचिरेकप्रादेशिकी श्रेणिरंगुलप्रथमवर्गमूलं द्वितीयवर्गमूलगुणितं
इयमत्र भावना इह प्रज्ञापकेन घनीकृतः सप्तरज्जुप्रमाणो लोकः पट्टिकादौ स्थापनीयः श्रेणयश्च रेखाकारेण दर्शनीयाः दर्शयित्वा चैवं प्रमा-
णं वक्तव्यं अंगुलप्रमाणस्य क्षेत्रस्य यावान् प्रदेशराशिस्तस्यासंख्येयानि वर्गमूलानि भवंति तद्यथा प्रथमवर्गमूलं तस्यापि यद्वर्गमूलं त-
स्यापि यत्वर्गमूलं तत्तृतीयं वर्गमूलमेवमसंख्येयानि वर्गमूलानि भवंति तत्र प्रथमं यत्वर्गमूलं तत् द्वितीयेन वर्गमूलेन गुण्यते
गुणिते च सति यावंतः प्रदेशा भवंति तावत्प्रदेशात्मिका सूचिर्बुद्ध्या क्रियते ततस्तावद्विष्कंभा ता द्रष्टव्याः ततस्तया स्थाप-
नीया तस्याश्च यावत्प्रमाणस्यायामवत्यः श्रेणयः स्वबुद्ध्या तावत्यः परिगृह्यंते तावदंति दर्शितमंगुलमात्रक्षेत्रप्रदेशराशिसत्ताः संख्या-
ताप्यसत्कल्पनया षट्पंचाशदधिकद्विशतकल्पितास्तया प्रथमं वर्गमूलं षोडश द्वितीयं चत्वारः तृतीयं द्वौ तत्र द्वितीयेन वर्गमूलेन चतुष्कल-
क्षणेन प्रथमवर्गमूलं षोडशलक्षणं गुण्यते जाताश्चतुःषष्टिस्तावत्यः श्रेणयः परिगृह्यंते अमुमेवार्थं करणेन कथयति अहवणं इत्यादि
अथवेति प्रकारांतरेणेति वाक्यालंकारे अंगुलमात्रक्षेत्रप्रदेशराशेर्द्वितीयस्य वर्गमूलस्यासत्कल्पनया चतुष्कलक्षणस्य यो घनस्तावत्प्रमाणाः
इह यस्य राशेर्यो वर्गः स तेन राशिना गुण्यते स घनो भवति यथा द्विकस्याष्टौ तथाहि द्विकस्य वर्गश्चत्वारस्ते द्विकेन गुण्यंते जाता अष्टाविति एवमि-
हापि चतुष्कस्य वर्गः षोडश ते चतुष्केन गुण्यंते ततश्चतुष्कस्य घनो भवति तत्रापि स एव चतुःषष्टिरिति प्रकारद्वयेऽप्यर्थतो न भेद इत्याह गणितमार्गोपदेशज्ञा-
स्तावकेन गुण्यते ततः स्वबुद्ध्या प्रकारद्वयमेवोपदर्शितमत्याह तीव्यापि प्रकारास्ति अंगुलबिइयवग्गमूलं पढमवग्गमूलपडुप्पन्नमिति आत्मवलि ११२

दर्थितं अंगुलमात्रक्षेत्रप्रदेशराशेः प्रथमवर्गमूलेन गुणिते यावान् प्रदेशराशिर्भवति तावत्प्रमाणया सूच्या यावत्यः स्पृष्टाः श्रेणयस्तावतीषु श्रे-
णिषु यावंत आकाशप्रदेशास्तावत्प्रमाणानि नैरयिकाणां बद्धानि वैक्रियशरीराणीति मुक्तान्यौदारिकवत् आहारकाणि बद्धानि न संति ता-
न्यपि तथा भवनात् मुक्तानि पूर्ववत् तैजसकार्मणानि वैक्रियवत् मुक्तानि पूर्ववत् असुरकुमाराणामौदारिकशरीराणि नैरयिकवत् वै-
क्रियाणि बद्धान्यसंख्येयानि तानि चासंख्येयकालक्षेत्राभ्यां प्ररूपयति तत्र कालसूत्रं प्राग्वत् क्षेत्रतः असंख्येयाः श्रेणयः असंख्येयासु श्रे-
णिषु यावंत आकाशप्रदेशास्तावत्प्रमाणानीत्यर्थः ताश्च श्रेणयः प्रतरस्यासंख्येयभागाः प्रतरासंख्येयभागवर्तिता इत्यर्थः तत्र नारकचिंता-
यामपि प्रतरासंख्येयभागवर्तिता उक्ता सूत्रे विशेषतरं परिमाणमाह तासिणं सेढीणमित्यादि तासां श्रेणीनां परिमाणाय या विष्कंभसूचिः सा
अंगुलमात्रप्रदेशराशेः संबंधिनः प्रथमवर्गमूलस्यासंख्येयो भागः किमुक्तं भवति अंगुलमात्रक्षेत्रप्रदेशराशेरसत्कल्प-
नया षट्पंचाशदधिकशतद्वयप्रमाणस्य यत् प्रथमवर्गमूलं षोडशलक्षणं तस्यासंख्येयभागे यावंत आकाशप्रदेशा
असत्कल्पनया पंच षट् वा तावत्प्रदेशात्मिका श्रेणिपरिमाणाय विष्कंभसूचिरवसातव्या एवं च नैरयिकापेक्षया सा बा-
विष्कंभसूचिरसंख्येयगुणहीना तथाहि नैरयिकाणां श्रेणिपरिमाणाय विष्कंभसूचिरंगुलप्रथमवर्गमूलं द्वितीयवर्गमूलप्रत्युत्पन्नं ते-
यावद्भवति तावत्प्रदेशात्मिका द्वितीयं च वर्गमूलं तत्रतो असंख्यातप्रदेशात्मकं ततः संख्येयगुणा प्रथमवर्गमूलप्रदेशात्मिका नैरयि-
काणां सूचिरसुराणामंगुलप्रथमवर्गमूलसंख्येयभागप्रदेशात्मिकेत्युक्तं चैतत् यस्मान्महादंडके सर्वेऽपि भवनपतयो रत्नप्रभानैरयिकेभ्यो-
ऽप्यसंख्येयगुणहीना उक्ता अतः सर्वनैरयिकापेक्षया तु सुतरामसंख्येयगुणहीना भवंति मुक्तान्यौधिकमुक्तवत् आहारकाणि नैरयिक-
वत् तैजसकार्मणानि बद्धान्यबद्धानि वैक्रियवत् मुक्तान्यौधिकमुक्तवत् यथा चासुरकुमाराणामुक्तं तथा शेषाणामपि भवनपतीनां वाच्यं याव-
त्स्तनितकुमाराणां पृथिव्यादिसूत्रे बद्धान्यौदारिकशरीराण्यसंख्येयानि तत्रापि कालतः परिमाणचिंतायां प्रतिसमयमेकैकश-

प्रज्ञा०वृत्तिः।

रीरावहारसामान्येनासंख्येयाभिरुत्सर्पिण्यवसर्पिणीभिरपह्रियंते क्षेत्रतः परिमाणचिंतायामसंख्येयलोका आत्मीयात्मीयावगाहना
भिरसंख्येयालोकाव्याप्यंते मुक्तान्यौघिकमुक्तवत् तेजसकार्मणानि बद्धानि बद्धौदारिकवत् मुक्तान्यौघिकमुक्तवत् वातकायस्य
औदारिकशरीराणि पृथिव्यादिवत् वैक्रियाणि बद्धान्यसंख्येयानि तानि प्रतिसमयमेकैकशोऽपहारे पल्योपमासंख्येयभागेन नि
:शेषतोऽपह्रियंते किमुक्तं भवति पल्योपमासंख्येयतमे भागे यावंतः समयास्तावत्प्रमाणानीति ननु [illegible] वायुकायिकाश्च
तुर्विधाः सूक्ष्मा बादराश्च एकैके द्विधा पर्याप्ता अपर्याप्ताश्च तत्र बादरपर्याप्तव्यतिरिक्ताः शेषास्त्रयो राशयः प्रत्येकमसंख्येयलोकाकाश
प्रमाणाः बादरपर्याप्ता अपि प्रतरासंख्येयभागप्रमाणास्तत्र त्रयाणां राशीनां वैक्रियलब्धिरेव नास्ति बादरपर्याप्तानामपि संख्येयभाग
मात्राणां लब्धिर्न शेषाणामाह च चूर्णिकृत् तिण्हं ताव रासीणं वेउव्वियलद्धी चेव नत्थि बायरपज्जत्ताणंपि संखेज्जइभागमे
त्ताणं लद्धी अत्थि त्ति ततः पल्योपमासंख्येयभागसमयप्रमाणान्येव बद्धानि समये वायवो वैक्रियवर्त्तिनः प्राप्यंते
नाधिका इति इह केचिदाचक्षते सर्व एव वायवो वैक्रियवर्त्तिनः प्र वावैक्रियाणां चेष्टाया एवासंभवात् तदसमीचीनं वस्तुग
तेरपरिज्ञानात् वायवो हि स्वभावत एव लोकप्रता वैक्रिया अपि तेवां ति प्रतिपत्तव्या वाताद्यायुरिति व्यक्तत्वात् आह च चूर्णिकृत् ज
णसव्वेसु चेव लोगागासेसु चला वायवो वायंति तम्हा अवेउव्विया वि वाया वायंतीति चिन्हमिति मुक्तानि वैक्रियाण्यौघिकमुक्तव
त् तेजसकार्मणानि बद्धानि बद्धौदारिकवत् मुक्तान्यौघिकमुक्तवत् तेजसकार्मणानि बद्धानि बद्धौदारिकवत् मुक्तान्यौघिकमुक्तवत्
वनस्पतिकायिकचिंतायामौदारिकाणि पृथिव्यादिवत् तेजसकार्मणवत् द्वीन्द्रियाणां बद्धान्यौदारिकशरीराण्यसंख्येयानि तत्र कालतः
परिमाणचिंतायामसंख्येयाभिरुत्सर्पिण्यवसर्पिणीभिरपह्रियंते असंख्यातासु उत्सर्पिण्यवसर्पिणीषु यावंतः समयास्तावत्प्रमाणानीति भावः क्षेत्र
तोऽसंख्येयाः श्रेणयोऽसंख्यातासु श्रेणिषु यावंत आकाशप्रदेशास्तावत्प्रमाणानीत्यर्थः तासां च श्रेणीनां परिमाणविशेषनिर्धारणार्थमा ११३

प्रतरस्यासंख्येयभागप्रमिता असंख्येयाः श्रेणयः परिगृह्यंत इति भावः प्रतरासंख्येयभागो नैरयिकभवनपतीनामपि प्रतिपादि
तस्ततो विशेषतरपरिमाणनिरूपणार्थं सूचीमानमाह तासिणं सेढीणमित्यादि तासां श्रेणीनां परिमाणावधारणाय या विष्कंभसूची सा असंख्ये
या योजनकोटीकोट्यः असंख्येया योजनकोटीकोटिप्रमाणेत्यर्थः अथवेदमन्यद्विशेषतः परिमाणं असंखेज्जाइं सेढिवग्ग
मूलाइं इति एकस्याः परिपूर्णायाः श्रेणेः प्रदेशराशेः प्रथमं वर्गमूलं द्वितीयं वर्गमूलं यावदसंख्येयतमं वर्गमूलं एतानि सर्वाण्यपि ए
कत्र संकल्प्यंते तत्र च संकलितेषु यावान् प्रदेशराशिर्भवति तावत्प्रदेशात्मिका विष्कंभसूचिरस्या अत्र निदर्शनं श्रेणौ किल प्रदे
शा असंख्याता अप्यसत्कल्पनया पंचषष्टिसहस्राणि पंचशतानि षट्त्रिंशदधिकानि ६५५३६ तेषां प्रथमं वर्गमूलं द्वे शते षट्पंचाशद
धिके २५६ द्वितीयं षोडश १६ तृतीयं चत्वारः ४ चतुर्थं द्वौ २ एते षां च संकलनेन जाते द्वे शते अष्टसप्तत्यधिके २७८ एताव
तो किलासत्कल्पनया प्रदेशानां सूचिरिति अथवेति ठीइ। याः किंप्रमाणाभिरवगाहनाभिराधीयमानाः कि
यता कालेन सकलप्रतरमापूरयंति तत आह अंगुलासंख्येय। भागप्रमाणाभिरवगाहनाभिः प्रत्यावलिकाः संख्येया
भागमेकैकावगाहनारचनातोऽसंख्याभिरुत्सर्पिण्यवसर्पिणी भिरापूर्यते इयमत्र भावना एकैकस्मिन्नावलिकाया असं
ख्येयतमे भागे एकैका अंगुला असंख्येयभागप्रमाणा अवगाहना रच्यते ताऽसंख्येयाभिरुत्सर्पिण्यवसर्पिणीभिः सकलम
पि प्रतरं द्वीन्द्रियशरीरैरापूर्यते एतदेवापहारेण स्पष्टयन्नाह ठ बेइंदियाणमित्यादि द्वीन्द्रियाणां संबंधिभिरौदारिकशरीरैर्बद्धैः
प्रतरमसंख्येयाभिरुत्सर्पिण्यवसर्पिणीभिरपह्रियते अपप्रतरमिति क्षेत्रतः परिमाणमुत्सर्पिण्यवसर्पिणीभिरिति कालतः किंप्रमाणे
न [illegible] क्षेत्रेण कालेन वा अपहरणमत आह अंगुलपयरस्स आवलिआए य असंखेज्जइभागपलिभागेणं ति अंगुलमात्रस्य प्रतरस्यै
कप्रादेशिकश्रेणिरूपस्य असंख्येयभागेन असंख्येयभागप्रमाणेन खंडेन इदं क्षेत्रविषयं परिमाणं कालपरिमाणमावलिकाया असं

प्रज्ञा०वृ०॥

ख्येयभागप्रतिभागेन असंख्येयतमेन प्रतिभागेन किमुक्तं भवति एकैकद्वीन्द्रियेणांगुलासंख्येयभागमात्रं खंडमावलिकाया असंख्ये-
यतमेन भागेनापह्रियते द्वितीयेनापि तावन्मात्रं खंडं तावता कालेन एवमपह्रियमाणास्ते द्वीन्द्रियाः सर्वैरसंख्येयाभिरुत्सर्पिण्यवसर्पि-
णीभिः सकलमपह्रियंते इति मुक्कान्यौधिकमुक्कावत् तैजसकार्मणानि बद्धानि बद्धौदारिकवत् वैक्रियाणि बद्धानि तेषां न संति मु-
क्कान्यौधिकमुक्कवत् एवं त्रिचतुरिन्द्रियाणामपि तिर्यक्पंचेन्द्रियाणां बद्धानि मुक्कानि चौदारिकाणि द्वीन्द्रियवत् वैक्रियाणि बद्धानि असंख्ये-
यानि तत्र कालतः परिमाणचिंतायामसंख्येयाभिरुत्सर्पिण्यवसर्पिणीभिरपह्रियंते क्षेत्रतः असंख्येयासु श्रेणिषु यावंत आकाशप्रदे-
शास्तावत्प्रमाणानि तासां च श्रेणीनां परिमाणं प्रतरस्यासंख्येयो भा- गः तथा चाह जहा असुरकुमाराणमिति यथा असुरकुमारा-
णां तथा वक्तव्यं नवरं विष्कंभसूचिपरिमाणचिंतायामंगुलप्रथम- वर्गमूलस्यासंख्येयो भागः इह तु संख्येयो भागो वा-
च्यः किमुक्तं भवति अंगुलमात्रक्षेत्रप्रदेशराशेः यत्प्र- थमं वर्गमूलं तस्यासंख्येयतमे भागे यावंत आकाश-
प्रदेशास्तावत्प्रदेशात्मिका सूचिः परिगृह्यते तावत्यो वक्तव्याः। श्रेणयः स्पृष्टास्ताभिः श्रेणिभिर्यावंत आकाशप्रदेशास्ताव-
त्प्रमाणानि तिर्यक्पंचेन्द्रियाणां बद्धानि वैक्रियशरीराणि उक्तं च अंगु- लमूलासंखियभागप्पमियाउ होंति सेढीओ उत्तरविउव्वियाणं
तिरियाणं सन्निपज्जत्ताणं मुक्कान्यौधिकमुक्कवत् तैजसकार्मणानि बद्धौदारिकवत् मुक्कान्यौधिकमुक्कवत् मनुष्याणां बद्धान्यौदा-
रिकशरीराणि स्यात्कदाचित्संख्येयानि कदाचिदसंख्येयानि कोऽर्थ इति चेदुच्यते इह द्विविधा मनुष्या गर्भव्युत्क्रान्तिकाः संमूर्छिमा-
श्च तत्र गर्भव्युत्क्रान्तिकाः सदावस्थायिनो न कश्चित्कालो यो गर्भव्युत्क्रान्तिकै रहितो भवति संमूर्छिमास्तु कदाचिद्विद्यंते कदाचिन्न विद्यं-
ते कदाचित्सर्वथापि तेषामभावो भवति तेषामुत्कर्षतोऽन्तर्मुहूर्तायुष्कत्वात् अन्तरस्य चोत्कर्षतश्चतुर्विंशतिमुहूर्तप्रमाणत्वात् ततो यदा सर्वथा
संमूर्छिमा मनुष्या न विद्यंते किंतु केवला गर्भव्युत्क्रान्ता एव तिष्ठंति तदा स्यात्संख्येयाः संख्येयानामेव गर्भव्युत्क्रान्तिकानां भावात् महाशरीरत्वेन ११५

त्यकशरीरत्वेन सति परिमितक्षेत्रवर्तित्वात् यदा तु संमूर्छिमा अपि तदा असंख्येयाः संमूर्छिमानामुत्कर्षतः श्रेण्यसंख्येयभागवर्तिनभःप्रदेशा-
राशिप्रमाणत्वात् तथा चाह जहण्णपदे संखेज्जा इत्यादि जघन्यपदं नाम यत्र सर्वस्तोका मनुष्याः प्राप्यंते अत्र किमत्र संमूर्छिमानां ग्रहणमुत गर्भव्यु-
त्क्रान्तिकानामुच्यते गर्भव्युत्क्रान्तिकानामेव तेषामेव सदावस्थायितया संमूर्छिमविरहे सर्वस्तोकतया प्राप्यमाणत्वात् उत्कृष्टपदे तु उभयेषाम-
पि ग्रहणं यदाह मूलटीकाकारः मेतराणां ग्रहणमुत्कृष्टपदे जघन्यपदे गर्भव्युत्क्रान्तिकानामेव केवलानां ग्रहणमिति अस्मिन् जघन्यपदे
संख्येया मनुष्याः तत्र संख्यायास्तदभिप्रायमिति न ज्ञायते कियंत इति विशेषसंख्यां निर्धारयति संख्येयाः कोटीकोट्यः अथवा इदमन्यत्
विशेषतरं परिमाणं तिजमलपयस्स उवरिं चउजमलपयस्स हेट्ठा इति इ। इह मनुष्यसंख्याप्रतिपादिकान्येकोनत्रिंशदंकस्थानानि
वक्ष्यमाणानि तत्र समयपरिभाषया अष्टानामष्टानामंकस्थानानां यमल- पदमिति संज्ञा चतुर्विंशत्या चांकस्थानैः त्रीणि यमल-
पदानि लभ्यन्ते उपरितनानि पंचांकस्थानानि तिष्ठंति अथ च यमलपदमष्ट- भिरंकस्थानैर्भवतीति चतुर्थं यमलपदं न प्राप्यते।
ततश्चोक्तं त्रयाणां यमलपदानामुपरि पंचभिरंकस्थानैर्वर्तमानत्वाच्चतु- र्थस्य यमलपदस्याधस्तात् त्रिभिरंकस्थानैर्हीनत्वात्।
अथवा द्वौ द्वौ वर्गौ समुदितौ एकं यमलपदं चत्वारो वर्गाः समुदिता द्वे यम- लपदे षड् वर्गाः समुदितास्त्रीणि यमलपदानि अष्टौ वर्गाः
समुदिताश्चत्वारि यमलपदानि तत्र यस्मान्मनुष्याणां वर्गाणामुपरि वर्तंते षष्ठस्य वर्गस्याधस्तात्तत उक्तं त्रियमलपदस्योपरि चतुर्थयमलप-
दस्याधस्तादिति त्रियमलपदस्योपरि त्रयाणां यमलपदानां समाहारस्त्रियमलपदं तस्य तथा चतुर्णां यमलपदानां समाहारश्चतुर्यमलपदं त-
स्य संप्रति स्पष्टतरं संख्यानमुपदर्शयति अहव णं छट्ठवग्गो पंचमवग्गपडुप्पण्णो इति अथवेति प्रकारांतरे णमिति वाक्यालंकारे षष्ठो वर्गः पं-
चमवर्गेण प्रत्युत्पन्नो गुणितः सन् यावान् भवति तावत्प्रमाणा जघन्यपदे मनुष्याः तत्र एकस्य वर्ग एक एव स तु वृद्धिं न गत इति वर्गेण गण्यते द्व-
योर्वर्गश्चत्वारः एष प्रथमो वर्गः चतुर्णां वर्गः षोडश एष द्वितीयो वर्गः १६ षोडशानां वर्गो द्वे शते षट्पंचाशदधिके एष तृतीयो वर्गः २५६

योः शतयोः षड्विंशत्यधिकयोर्वर्गः पंचषष्टिसहस्राणि पंचशतानि षट्त्रिंशदधिकानि एष चतुर्थो वर्गः ६५५३६ एतस्य वर्गस्य वर्गश्चत्वारि कोटिशत-
न्येकोनत्रिंशत्कोटय एकोनपंचाशल्लक्षाः सप्तषष्टिः सहस्राणि द्विशतषण्णवत्यधिकानि एष पंचमवर्गः ४२९४९६७२९६ एतदंकं च चत्तारि य को-
डिसया अउणत्तीसं च होंति कोडीओ अउणावण्णं लक्खा सत्तट्ठी चेव य सहस्सा दो य सया छण्णउया पंचमवग्गो समासओ होइ एयस्स कओ वग्गो छ-
ट्ठो जो होइ तं वोच्छं एतस्य पंचमवर्गस्य यो वर्गः तस्य परिमाणमेकं कोटीकोटीशतसहस्रं चतुरशीतिः कोटीकोटीसहस्राणि चत्वारि शतानि सप्त-
षष्ट्यधिकानि कोटीशतानि चतुश्चत्वारिंशत् कोटिलक्षाणि सप्त कोटीसहस्राणि त्रीणि सप्तत्यधिकानि कोटिशतानि पंचनवतिर्लक्षाणि एकपंचाश-
त्सहस्राणि षट्शतानि षोडशाधिकानि १८४४६७४४०७३७०९५५१६१६ षष्ठो वर्गः अंकं च लक्खं कोडाकोडी चउरासीइं भवे सह-
स्साइं चत्तारि य सत्तट्ठा होंति सया कोडिकोडीणं चोयालं लक्खाइं । कोडीणं सत्त चेव य सहस्सा तिण्णि सया य सत्तरा य को-
डीणं होंति नायव्वा पंचाणउई लक्खा एक्कावण्णं भवे सहस्साइं छ । सोलसुत्तरसया एसो छट्ठो हवइ वग्गो । इ-
ति षष्ठो वर्गः पंचमवर्गेण गुण्यते सति यावान् राशिर्भवति तावत्प्रमाणा । जघन्यपदे मनुष्याः तच्चैतावन्ति ७९२२८१६२५१४
२६४३३७५९३५४३९५०३३६ एतान्येकोनत्रिंशदंकस्थानानि एतानि च कोटीकोट्यादिभिः प्रकारैः कथमपि अभिधातुं न शक्यन्ते अ-
तः पर्यन्तवर्त्तिनोऽङ्कस्थानादारभ्याङ्कस्थानसंग्रहमात्रं पूर्वपुरुषप्रणीतेन गाथाद्वयेनाभिधीयते छ तिन्नि तिन्नि सुन्नं पंचेव य नव य तिन्नि
चत्तारि पंचेव तिन्नि नव पंच सत्त तिन्नेव तिन्नेव चउ छद्दो चउ एक्को पण दो छक्केक्कगो य अट्ठेव दो दो नव सत्तेव य ठाणाइं उवरि हुंताइं अहवा इयमक-
स्थानसंग्रहः छ ति ति सुन्नं पण नव ति चउ पण ति नव पंच सत्त ति ति चउ छ दो चउ एक्को पण दो छ एक्को अट्ठ दो दो नव सत्त एसा पढमस्स कमसन्नियठाणा एतच्चा-
न्यवएकोनत्रिंशदंकस्थानानां पूर्वांगैः परिसंख्यानं क्रियते तत्र चतुरशीतिर्लक्षाणि पूर्वांगं चतुरशीतिर्लक्षाश्चतुरशीतिर्लक्षै-
र्गुण्यन्ते ततः पूर्वं भवति तस्य परिमाणं सप्ततिः कोटिलक्षाणि षट्पंचाशत् कोटिसहस्राणि ७०५६०००००००००० एतेन भागो ह्रियते

ततस्तदिदमागतं एकादश पूर्वकोटीकोट्यो द्वाविंशतिः पूर्वकोटीलक्षाणि चतुरशीतिः पूर्वकोटीसहस्राणि अष्टौ दशोत्तराणि पूर्वको-
टिशतानि एकाशीतिः पूर्वलक्षाणि पंचनवतिः पूर्वसहस्राणि त्रीणि षट्पंचाशदधिकानि पूर्वशतानि अतः ऊर्ध्वं पूर्वैर्भागो न लभ्यते ततः पूर्वांगै-
र्भागहरणं तत्रेदमागतं एकविंशतिः पूर्वांगलक्षाणि सप्ततिः पूर्वांगसहस्राणि षट् एकोनषष्ट्यधिकानि पूर्वांगशतानि ततः ऊर्ध्वमिदमन्यदुद्धरति
त्र्यशीतिर्लक्षाणि पंचाशत्सहस्राणि त्रीणि शतानि षट्त्रिंशदधिकानि मनुष्याणामिति तथा च वृद्धाचार्यप्रणीता अत्र गाथा मणुयाण ज-
हन्नपदे एक्कारस पुव्वकोडिकोडीओ बावीसं कोडिलक्खा कोडिसहस्सा य चुलसीइं अट्ठेव य कोडिसया पुव्वाण दसुत्तरा तओ होंति एक्का-
सीई लक्खा पंचाणउई सहस्सा य छप्पन्ना तिन्नि सया पुव्वाणं पुव्वं पि या अप्पेए तहा पुव्वंगाइं इमाइं अहियाइं एगवीसं लक्खाइं एगवीसं पुव्वं-
गाण सयरी सहस्सा छच्चेव य एगुणसट्ठा पुव्वंगाण सया होंति तह य। इसीइ सहस्सा पण्णासं चेव तुल्लं च सहस्सा य तिण्णि सया छत्ती-
सा एवइया विगला मणुया इति इमामेव संख्यां विशेष- एलेन निर्दिशन् प्रकारान्तरेणाह अहवणं छन्नउईछेयण-
गदायी रासी इति अहवणं त्रिधा यत् षण्णवतिछेदनकानि यो राशि- र्ददाति स षण्णवतिछेदनकदायी राशिः किमुक्तं भवति यो
राशिरर्द्धेनार्द्धेन छिद्यमानः षण्णवतिवारान् छेदं सहते पर्यंते च सकल- मेकं रूपं पर्यवसितं भवति स षण्णवतिछेदनकदायी राशिरि-
ति कः पुनरयमिति चेदुच्यते षष्ठवर्गः पंचमवर्गेण गुणितः कोऽत्र प्रत्यय इति चेदुच्यते इह प्रथमो वर्गश्छिद्यमानो द्वे छेदनके
ददाति तद्यथा प्रथमं छेदनकं द्वौ द्वितीयमेकमिति द्वितीय एकमिति द्वितीयो वर्गश्चत्वारि छेदनकानि तत्र प्रथममष्टौ द्वितीयं चत्वारस्तृतीयं
चत्वारस्तृतीयं द्वौ चतुर्थमेक इति एवं तृतीयो वर्गोऽष्टौ छेदनकानि प्रयच्छति चतुर्थः षोडश पंचमो द्वात्रिंशतं षष्ठः चतुःषष्टिमेवं पंचमवर्गे-
ण गुणितः षण्णवतिं कथमिति चेदुच्यते इह यो यो वर्गो येन येन वर्गेण गुण्यते तत्र तयोर्द्वयोरपि छेदनकानि प्राप्यन्ते यथात्र
प्रथमवर्गेण गुणितो द्वितीयो वर्गः इह तथाहि द्वितीयो वर्गः षोडशलक्षणः प्रथमवर्गेण चतुष्करूपेण गुण्यते जाता चतुःषष्टिः तस्याः प्रथमं छेदनकं द्वा-

अजाएष्टर्त्रि॥

त्रिंशतः द्वितीयं षोडशात् तृतीयमष्टौ चतुर्थं चत्वारः पंचमं द्वौ षष्ठं एक इति एवमनया त्रायिनावतीयं तत्र पंचमवर्गस्य द्वात्रिंशतः त्रिदनकानि षष्ठे वर्तुः षष्टिः ततः पंच
मवर्गेण षष्ठे वर्गे गुणिते पण्णवतिः छेदनकानि प्राप्यन्ते अवापर्ककरूपं प्राप्ययिद्वा ततः षण्णवतिवारान् गुणा द्विगुणीक्रियते कृतं च सत्यदि तावत्प्रमा
णा राशिर्भवतिवाता वसातव्यमेषषण्णवतिछेदनकदायी राशिरिति तादवं जघन्यपदमनिहितमिदानीमुत्कृष्टपदमाह गर्भजमनुष्याअसंख्य
या इत्यादि उत्कृष्टपदे मनुष्या भवंति ते असंख्येया असंख्याता अपि कालतः परिमाणचिंतायां प्रतिसमयमेकैकमनुष्यापहारे सामस्त्येनासंख्येया
भिरुत्सर्पिण्यवसर्पिणीभिरपहियंत इत्यता रूपप्रक्षिप्रमनुष्यैरेकाश्रेणिः परिपूर्णापिङ्गतेति किमुक्तं भवतिउत्कृष्टपदे ये मनुष्यास्तेषु
मध्ये एकस्मिन्नसत्कल्पनया रूपप्रक्षिप्ते सकलापि श्रेणिरेकापहि यते तस्याश्च श्रेण्याः क्षेत्रकालाभ्यामपहारमार्गणा कालतस्तावत्
दसंख्येयाभिरुत्सर्पिणीभिः क्षेत्रतोंगुलप्रथमवर्गमूलं तृतीयव र्गमूलप्रत्युत्पन्नं किमुक्तं भवतिं गुलमात्रक्षेत्रप्रदेशराशिरस
त्कल्पनया षट्पंचाशदधिकं शतद्वयप्रमाणं तस्य यत्प्रथमव र्गमूलमसत्कल्पनया षोडशलक्षणं तत्तृतीयेन व
र्गमूलेनासत्कल्पनया द्विकलक्षणेन गुण्यते गुणिते च सति यावा न् प्रादेशराशिर्भवति असत्कल्पनया द्वात्रिंशत्प्रमाणस्तावत्प्रमा
णोः खंडैः रपहियमाणा यावत् श्रेणिर्निष्ठामियर्ति तावन्मनुष्या अ पि निष्ठामुपयांतीत्याह कथमेकस्यां श्रेण्यामेवंप्रमाणैः खंडैर
पहियमाणायामसंख्येया उत्सर्पिण्यवसर्पिण्यो लगंतीत्युच्यते क्षेत्रस्यातिसूक्ष्मत्वात् उक्तं च सूत्रेपि सूक्ष्मस्तावद्भवति कालस्ततः सूक्ष्मतरं भवति क्षेत्रं
अंगुलश्रेणिमात्रे असंख्याः उत्सर्पिण्यवसर्पिण्योऽसंख्या इति मुक्तान्योधिकमुक्तवत् वैक्रियाणि बद्धानि संख्यानि गर्भव्युत्क्रांतिकानामेव
तेषां विक्रियालब्धिसंभवात् मुक्तान्योधिकमुक्तवत् आहारकाण्योधिकाहारकवत् तैजसकार्मणानि बद्धानि बद्धौदारिकवत् मुक्ता
न्योधिकमुक्तवत् व्यंतराणां औदारिकाणि यथा नैरयिकाणां वैक्रियाणि बद्धान्यसंख्येयानि तत्र कालतः परिमाणचिंतायां प्रतिसमयमेकै
कापहारे असंख्येयाभिरुत्सर्पिण्यवसर्पिणीभिरपहियंते क्षेत्रतोऽसंख्येयाः श्रेणयः असंख्याताः श्रेणयः यावंत आकाशप्रदेशास्तावत्प्रमा ११६

णानीति भावः ताश्च श्रेणयः कियंत्य इति चेत् उच्यते प्रतरस्यासंख्येयो भागः प्रतरासंख्येयभागप्रमिता इत्यर्थः तथा चाह विष्कंभसू
चीरिति वैक्रियशरीराणि व्यंतराणां यथा नैरयिकाणां केवलं सूच्याविशेषसम्भवात् नवरमित्यादि नवरं तासां श्रेणीनां वि
ष्कंभसूचिर्वक्तव्येति शेषः सा च सूचिः प्रतरासंख्येयभागप्रमिता इति चेत् उच्यते इह महादंडके पंचेंद्रियतिर्यग्नपुंसकेभ्यः संख्येयगुणहीना व्यंतराः
पठ्यंते तेषां विष्कंभसूचिरपि तिर्यक्पंचेंद्रियविष्कंभसूचेरसंख्येयगुणहीनाव्याख्येया इति आह च मूलटीकाकारोपि महादंडके पंचेंद्रिय
तिर्यग्नपुंसकेभ्यः संख्येयगुणहीना व्यंतराः पठ्यंते तस्मात् विष्कंभसूचिरपि तेभ्यो असंख्येयगुणहीना वक्तव्येति सं
प्रति प्रतिभागमुच्यते प्रतिभागो नाम खंड संख्येयशतयोजनसमयवर्ग पलिभागः प्रतरस्य संख्येययोजनशतवर्गप्रमाणः प्रतिभा
गः प्रतरस्य अपहरणे अपहरणे वा इति वाक्यशेषः इय मत्र भावना संख्येययोजनशतवर्गप्रमाणानि खंडानि य
दि एकैकव्यंतरः स्थाप्यते तत् सकलमपि प्रतरं समापयंति । यदि वा एकैकव्यंतरापहारे एकैकं संख्येययो
जनशतवर्गप्रमाणं खंडमपहियते तत एकत्र व्यंतरा निष्ठां यांति प्रतरं सकलं प्रतरमिति मुक्तान्योधिकवत् आहा
रकाणि नैरयिकवत् तैजसकार्मणानि बद्धानि बद्धवैक्रियवत् । मुक्तान्योधिकमुक्तवत् ज्योतिष्काणामौदारिकाणि नैरयिकवत्
वैक्रियाणि बद्धान्यसंख्येयानि तत्र कालतो मार्गणायां प्रतिसमयमेकैकापहारे सामस्त्येनासंख्येयाभिरुत्सर्पिण्यवसर्पिणीभिरप
हियंते क्षेत्रतोऽसंख्येयाः श्रेणयः ताश्च श्रेणयः प्रतरासंख्येयभागप्रमिता तथा चाह ता इ श्रेणीनां विष्कंभ इति नवरमित्यादि तावि
शेषं दर्शयति नवरं तासां श्रेणीनां विष्कंभसूचिर्वक्तव्येति शेषः इयमपि सूचिः सिद्धत्वात्काकथमिति स्वयमेवाह इति चेत् उच्यते यस्मान्महा
दंडके व्यंतरेभ्यो ज्योतिष्काः संख्येयगुणा उक्तास्ततस्तेषां विष्कंभसूचिरपि तेषां विष्कंभसूचेः संख्येयगुणा द्रष्टव्याः तथा चाह मूलटीकाका
रो ज्योतिष्काणामंतरहिता व्यंतरेभ्यः संख्येयगुणा पठ्यंते तस्माद्विष्कंभसूचिरपि तेभ्यः संख्येयगुणा वक्तव्येति नवरं प्रतिभागः स्पष्टत

ताविशेषमेवाह ॥ विष्कंभंगुलमयव अपलिनागापयरस्सइति षष्ठं वा शतादधिकशतादधिकशतद्वयांगुलवर्गप्रमाणास्तु श्रेणिखंडयष्टेकैको
ज्योतिष्कावाप्यते ततोऽस्मत्कल्पनया प्रतरमापूरयति यदि वा यद्येकैकज्योतिष्कापहारेणैकैकं षट्पंचाशदधिकशतद्वयवर्गप्रमाणं श्रेणिखं
डमपहियते ततएकज्योतिष्काः परिसमाप्तिमुपयांति अपरमेकं सकलप्रतरमिति एवं ज्योतिष्काणां व्यंतरेभ्यः संख्येयगुणहीनः प्रतिभागः सं
ख्येयगुणाभ्यधिकाः सूचिः एवं संप्रदायसूत्रः षट्पंचाशदधिकशतद्वयप्रमाणएवप्रविभागउक्तो न तु षट्पंचाशदधिकशतद्वयवर्गप्रमाणप्र
मावक्षेत्रः ब यत्सद्दोसयंगुलसइयपणासहिंनाइयपयरं ज्जोइसिएहिं हीरइइति मुक्तान्योधिकमुक्तवत् आहारकाणि नेरयि
कवत् तेजसकार्मणानि बद्धानि बद्धवैक्रियवत् मुक्तान्योधि   कमुक्तवत् वैमानिकानामौदारिकाणि नेरयिकवत् वैक्रि
याणि बद्धानि असंख्येयानि तत्र कालतो मार्गणा ज्योतिष्कव   त् क्षेत्रतो मार्गणा संख्येया श्रेणयः किमुक्तं भवति
असंख्येयासु श्रेणिषु यावंत आकाशप्रदेशास्तावत्प्रमाणा   नीति तासां च श्रेणीनां परिमाणं प्रतरस्यासंख्येयत
मः प्रतरासंख्येयभागप्रमिताह्योऽयमर्थः तत्र प्रतरासंख्येयभा   गो नैरयिकादिमार्गणायामभिहितस्तथापि विशेषतरं परि
माणप्रतिपादयन्निमित्तमित्याह तासां श्रेणीनां विष्कंभसूची   अंगुलद्वितीयवर्गमूलं तृतीयवर्गमूलप्रत्युत्पन्नं एतदुक्तं भवति अं
गुलमात्रक्षेत्रप्रदेशराशेरसत्कल्पनया षट्पंचाशदधिकशतद्वयप्रमाणस्य यत् द्वितीयवर्गमूलमसत्कल्पनया चतुष्कलक्षणं तत्तृतीय
वर्गमूलेनासत्कल्पनया द्विकरूपेण गुणितं यस्मिंस्तावान्प्रदेशराशिरेवत्यसत्कल्पनयाऽष्टौ वा वत्प्रदेशात्मिकया विष्कंभसूच्या प
रिमिताः श्रेणयः परिग्राह्याः तत्रापि तावंत्य एव श्रेणय इति प्रकारद्वयेऽप्यर्थोऽवसेयः मुक्तान्योधिकमुक्तवत् आहारकाणि नैरयिकवत्
तैजसकार्मणानि बद्धानि बद्धवैक्रियवत् मुक्तान्योधिकमुक्तवत् ॥ इति श्रीमलयगिरिविरचितायां प्रज्ञापनाटीकायां द्वादशं पदं समा
प्तं ॥ ॥ तदेवं व्याख्यातं द्वादशं पदं संप्रति त्रयोदशमारभ्यते तस्य चायमभिसंबंधः इहानंतरपदे औदारिकादिशरीरविभाग उक्तस्तानि

पुनः शरीराणि तथापरिणाममंतरेण निर्वर्तितानि न भवंति ततः परिणामस्वरूपप्रदर्शनार्थमिदमारभ्यते तत्रेदमादिसूत्रं ॥ कइविहेणं भंते परि
णामे पण्णत्ते इत्यादि कतिविधः कतिप्रकारो णमिति वाक्यालंकारे भदंत परिणामः प्रज्ञप्तः परिणमनं परिणामः अकर्तरीति भावे घञ्प्र
त्ययः परिणमनं च नयमतभेदेन विचित्रं नयाश्च नैगमादयोऽनेकास्तेषां च सर्वेषामपि संग्राहकौ प्रवचने द्वौ नयौ तद्यथा द्रव्यास्तिकनयः प
र्यायास्तिकनयश्च तथा चाह श्रीमल्लवादिनः संगृहीतसमस्तपरस्परलवागारणाद्बुद्धिद्वयपक्षवर्त्तंयसेसा द्विगम्या सितं [?] द्रव्यास्तिकन
यमतेन परिणामो नाम यत्कथंचित्सदेवोत्तरपर्यायरूपं धर्मांतरमधिगच्छति न च पूर्वपर्यायस्यापि सर्वथावस्थानं नाप्येकांतेन विनाश
था चोक्तं परिणामो ह्यर्थांतरगमनं न च सर्वथा व्यवस्थानं न च सर्वथा विना   शः परिणामस्तद्विदामिष्टः पर्यायास्तिकनयमतेन पुनः परि
णमनं पूर्वसत्पर्यायापेक्षया विनाश उत्तरेण चासता पर्यायेण प्रादुर्भा   वस्थावामुभयनयमधिकृत्यान्यत्राप्युक्तं सत्पर्यायेण वि
नाशः प्रादुर्भावोऽसता च पर्ययतः द्रव्याणां परिणामः प्रोक्तः   खलु पर्ययनयस्य [?] भगवानाह गौतम द्विविधः प
रिणामः प्रज्ञप्तस्तद्यथा जीवपरिणामश्चाजीवपरिणामश्च तत्र जीवा   स्य परिणामो जीवपरिणामः स प्रायोगिकः अजीव
स्य परिणामोऽजीवपरिणामः स वैस्रसिकः वशात्सुगतानि करे [?]   दसूत्राकोतांश्चनेयत् अत्र सूत्रकृदेव दर्शयति तथा चाह जीव
परिणामेणं भंते इत्यादि दशविधो जीवपरिणामस्तद्यथा गतिपरिणामः इत्यादि तत्र गम्यते नैरयिकादिगतिकर्मोदयवशादवाप्यत इति
गतिर्नैरयिकत्वादिपर्यायपरिणतिर्गतिरेव परिणामः गतिपरिणामः तथा इंदनादिंद्र आत्मा ज्ञानलक्षणः परमैश्वर्ययोगात् तस्येदमिंद्रियमिति
निपातनादिंद्रशब्दादियप्रत्ययः इंद्रियाण्येव परिणाम इंद्रियपरिणामः तथा कषंति हिंसंति परस्परं प्राणिनोऽस्मिन्निति कषः संसारस्तमयं
ते गच्छंत्येभिर्जंतव इति प्रापयंतीति कषायाः कर्मणोऽण्प्रत्ययः कषाया एव परिणामः कषायपरिणामः लेश्यादिशब्दार्था वो
वक्ष्यमाणाः लेश्यैव परिणामः योग एव परिणामः उपयोग एव परिणाम उपयोगपरिणामः एवं ज्ञानपरिणामदर्शनपरिणामचारित्र

परिणामो वेदपरिणामश्च पि तावतीयं संभवमीषां पदानामित्थं क्रमेणोपन्यासकारणमभिधीयते तत्र सर्वभावा नरकादावाश्रिता गतिपरिणामं वि
नाप्रादुःष्यन्ति ततः प्रथमं गतिपरिणाम उक्तः गतिपरिणामे च सत्यवश्यमिन्द्रियपरिणाम इति तदनन्तरमिन्द्रियपरिणाम उक्तः इन्द्रियपरिणामे च स
ति इष्टानिष्टविषयसंबन्धाद्रागद्वेषपरिणतिरुपजायत इति तदनन्तरं कषायपरिणामः कषायपरिणामश्चावश्यं लेश्यापरिणामाविनाभावी न तथाहि
लेश्यापरिणामः सयोगिकेवलिनामपि यावद्भवति यतो लेश्यानां स्थितिनिरूपणावसरे लेश्याध्ययने शुक्ललेश्याया इयं जघन्योत्कृ
ष्टा च स्थितिः प्रतिपादिता मुहुत्तद्धं तु जहन्ना उक्कोसा होइ पुव्वकोडीउ नवहिं वरिसेहिं ऊणा नायव्वा सुक्कलेसाए इति सा च नववर्षोनपूर्वको
टिप्रमाणोत्कृष्टा स्थितिः शुक्ललेश्यायाः सयोगिकेवलिन्युपपद्यते। नान्यत्र कषायपरिणामस्तु सूक्ष्मसंपरायं यावद्भवति ततः क
षायपरिणामो लेश्यापरिणामाविनाभावी ततो लेश्यापरिणामस्तु। कषायपरिणामं विनापि भवति ततः कषायपरिणामा
नन्तरं लेश्यापरिणाम उक्तो न तु लेश्यापरिणामानन्तरं कषाय। परिणामः तथा लेश्यापरिणामो योगपरिणामा
त्मको योगपरिणामा लेश्या इति वचनात् तदुपपादयिष्यते वायम। र्थो लेश्यापदे सविस्तरमतो लेश्यापरिणामानन्तरं यो
गपरिणाम उक्तः संसारिणां च योगपरिणतानामुपयोगपरिणतिर्भवतीति योगपरिणामानन्तरमुपयोगपरिणामः सति चोपयोगपरिणा
मे ज्ञानपरिणाम इति तदनन्तरं ज्ञानपरिणाम उक्तः ज्ञानपरिणामश्च द्विधा सम्यक्ज्ञानपरिणामो मिथ्याज्ञानपरिणामश्च तौ च न सम्यक्त्वमि
थ्यात्वव्यतिरेकेण भवत इति तदनन्तरं दर्शनपरिणामः जीवानां जिनवचनाकर्णनतो तान्नवत्र संवेगादिभावतश्चारित्रावरणकर्मक्षयोपशम
तश्चारित्रपरिणाम उपजायते ततो दर्शनपरिणामः चारित्रपरिणामश्चाचारवेदपरिणामं प्रलयमुपनयंति महासत्त्वास्ततश्चारित्रपरिणामान
न्तरं वेदपरिणामानन्तरं वेदपरिणाम उक्तः स्त्रीवेदसुक्ताज्जीवस्य गत्यादयः परिणामविशेषाः संभवत्येतेषामेव यथाक्रमं लक्षणं तत्पदर्शयति ग
इपरिणामेणं भंते कइविहे पण्णत्ते इत्यादि पाठसिद्धं नवरं नैरयिकादयो वेदपरिणामविशेषाद्विशिष्टास्तान् तथा प्रतिपादयति नेरइ ११८

याइत्यादि सूत्रमनन्तरं नैरयिकाणां कृष्णनीलकापोतरूपास्तिस्र एव लेश्या न शेषास्तत्रापि तिस्रः पृथिवीक्रमेणोक्तं आद्ययोर्द्वयोः पृथिव्योः का
पोतलेश्या तृतीयस्यां कापोतलेश्या नीललेश्या च चतुर्थ्यां नीललेश्या पंचम्यां नीललेश्या कृष्णलेश्या च षष्ठीसप्तम्योः कृष्णलेश्यैव ततउक्तं कण
ह्लेसा वि नीललेसा काउलेसा वि तथा तिर्यक्पंचेन्द्रियमनुष्यव्यतिरेकेणान्यत्र चारित्रपरिणामः सर्वथा न भवति न च सम्यग्दर्शनेन चारित्रपरिणा
मनिषेधः वेदपरिणामचिंतायां च नैरयिकाणां नपुंसका एव न स्त्रियो नापि पुरुषाः नारकाः संमूर्छिमा नपुंसका नीति वचनात् एवं असुरकुमारा अपि नवरं
मतिमथ्यकृत्यादवगाति कापोतमेषां च महर्द्धिकानां तेजोलेश्यापि भवति तदुक्तं तेउलेस्सा विइति वेदपरिणामचिंतायां स्त्रियः पुरुषाश्च भवन्ति न नपुंसका
देवानां नपुंसकत्वस्याभावात् तथा पृथिवीकायसूत्रे नवरं लेसापरिणाम णमित्यादि इह पृथिव्यंबुवनस्पतीनां तेजोलेश्यापि संभवति
येन सौधर्मेशानपर्यन्तानां देवानामेतेषूत्पत्तिसंभवात् तदुक्तं तेउलेसा विइति तथा पृथिव्यादीनां पंचानामपि सास्वादन
सम्यक्त्वमपि न भवति आगमे निषेधात् नतो ज्ञाननिषेधः सम्यक्। निषेधश्च कृतः सम्यग्मिथ्यात्वपरिणामस्तु संज्ञिपंचेन्द्रि
याणामेव भवति न शेषाणामतो निषेधः द्वीन्द्रियादीनां पुनः केषांचि। करणपर्याप्तावस्थानां सास्वादनसम्यक्त्वमवाप्यते ततो मति
ज्ञानपरिणतावपि सम्यग्दृष्टयो यथोक्ता तिर्यक्पंचेन्द्रियाणां च षडपि ले श्याः संभवति ततः सूत्रे उक्तं जाव सुक्कलेस्सा विइति तथा दे
शतः चारित्रपरिणामोऽपि तेषामुपलभ्यत इति तदुक्तं चरित्ताचरित्ती विइति तथा ज्योतिष्काणां तेजोलेश्यैव केवला न शेषा लेश्या अतो लिखितं
लेश्यादि स्निग्धबंधनपरिणामश्च रूक्षबंधनपरिणामश्च तत्र स्निग्धस्य सतो बंधनपरिणामः स्निग्धबंधनपरिणामः तथा रूक्षस्य सतो बंधनप
रिणामो रूक्षबंधनपरिणामः अत्राशाोद्युमनो नानुकालदृष्टान्ता अथ कथं स्निग्धस्य रूक्षता बंधनपरिणामो भवति कथं वा रूक्षस्य सत इति बं
धनपरिणामस्य लक्षणमाह समनिद्धयाए इत्यादि परस्परं समस्निग्धतायां समगुणस्निग्धतायां तथा परस्परं समरूक्षतायां बंधो न भवति किंतु
यदि परस्परं स्निग्धस्य रूक्षस्य च विषममात्रा भवति तदा बंधः स्कंधतो उपजायते इयमत्र भावना समगुणस्निग्धस्य परमाण्वादेः सम

प्रज्ञाप० वृत्तिः॥

परिणामो वेदपरिणामश्चेति नवानां चामीषां पदानामित्थं क्रमेणोपन्यासे कारणमभिधीयते तत्र सर्वे नारकादिभावा अपि गतिपरिणामं वि-
ना प्रादुःष्यन्तीति ततः प्रथमं गतिपरिणाम उक्तः गतिपरिणामे च सत्यवश्यमिन्द्रियपरिणाम इति तदनन्तरमिन्द्रियपरिणाम उक्तः इन्द्रियपरिणामे च स-
ति इष्टानिष्टविषयसंबन्धाद् रागद्वेषपरिणतिरुपजायते इति तदनन्तरं कषायपरिणामः कषायपरिणामश्चावश्यं लेश्यापरिणामाविनाभावी न पुनर्ले-
श्यापरिणामः सयोगिकेवलिनामपि यावद्भवति यतो लेश्यानां स्थितिनिरूपणावसरे लेश्याध्ययने शुक्ललेश्याया जघन्योत्कृ-
ष्टा च स्थितिः प्रतिपादिता मुहुत्तद्धं तु जहन्ना उक्कोसा होइ पुव्वकोडीउ नवहिं वरिसेहिं ऊणा नायव्वा सुक्कलेसाए इति सा च नववर्षोनपूर्वको-
टिप्रमाणोत्कृष्टा स्थितिः शुक्ललेश्यायाः सयोगिकेवलिन्युपपद्यते। नान्यत्र कषायपरिणामस्तु सूक्ष्मसंपरायं यावद्भवति ततः क-
षायपरिणामो लेश्यापरिणामाविनाभूतो लेश्यापरिणामस्तु। कषायपरिणामं विनापि भवतीति ततः कषायपरिणामा-
नन्तरं लेश्यापरिणाम उक्तो न तु लेश्यापरिणामानन्तरं कषाय। परिणामः तथा लेश्यापरिणामो योगपरिणामा-
त्मको योगपरिणामो लेश्या इति वचनात् उपपादयिष्यते चायमर्थो लेश्यापदे सविस्तरमतो लेश्यापरिणामानन्तरं यो-
गपरिणाम उक्तः संसारिणां च योगपरिणतानामुपयोगपरिणतिर्जायते ततो योगपरिणामानन्तरमुपयोगपरिणामः सति चोपयोगपरिणा-
मे ज्ञानपरिणाम इति तदनन्तरं ज्ञानपरिणाम उक्तः ज्ञानपरिणामस्तु द्विधा सम्यग्ज्ञानपरिणामो मिथ्याज्ञानपरिणामश्च तौ च न सम्यक्त्वमि-
थ्यात्वव्यतिरेकेण भवत इति तदनन्तरं दर्शनपरिणाम उक्तः जीवानां जिनवचनाकर्णनतो नवनवसंवेगादिभावतश्चारित्रावरणकर्मक्षयोपशम-
तश्चारित्रपरिणाम उपजायते ततो दर्शनपरिणामः चारित्रपरिणामश्चात्र वेदपरिणामं प्रलयमुपनयन्ति महासत्त्वा अतश्चारित्रपरिणामान-
न्तरं वेदपरिणाम उक्तः एवमुक्ता जीवस्य गत्यादयः परिणामविशेषाः संप्रत्येतेषामेव यथाक्रममुत्तरभेदानुपदर्शयति ग-
इपरिणामेणं भंते कइविहे पन्नत्ते इत्यादि पाठसिद्धं संप्रति नैरयिकादयो ये परिणामविशेषविशिष्टास्तान् प्रतिपादयति नेरइ- ११८

या इत्यादि सुगमं नवरं नैरयिकाणां कृष्णनीलकापोतरूपास्तिस्र एव लेश्या न शेषास्तत्रापि तिस्रः पृथिवीक्रमेणैवं आद्ययोर्द्वयोः पृथिव्योः का-
पोतलेश्याः तृतीयस्यां कापोतलेश्या नीललेश्याश्च चतुर्थ्यां नीललेश्याः पञ्चम्यां नीललेश्याः कृष्णलेश्याश्च षष्ठीसप्तम्योः कृष्णलेश्या एव तत उक्तं क-
ण्हलेसावि नीललेसावि काउलेसावि तथा तिर्यक्पञ्चेन्द्रियमनुष्यव्यतिरेकेणान्यत्र चारित्रपरिणामः सर्वथा न भवति भवस्वाभाव्यात् ततश्चारित्रपरिणा-
मनिषेधः वेदपरिणामचिन्तायां च नैरयिकाणां नपुंसकवेद एव न स्त्रियो नापि पुरुषाः नारकसंमूर्च्छिमा नपुंसका इति वचनात् एवमसुरकुमारा अपि नवरं
[illegible] च महर्द्धिकानां तेजोलेश्यापि भवति तत उक्तं तेउलेसावि इति वेदपरिणामचिन्तायां स्त्रियः पुरुषा वा न तु नपुंसका-
देवानां नपुंसकवेदस्यासंभवात् तथा पृथिवीकायसूत्रे तेउलेसा परिणामेणमित्यादि इह पृथिव्यम्बुवनस्पतीनां तेजोलेश्यापि संभवति
येन सौधर्मेशानपर्यन्तानां देवानामेतेषूत्पादसंभवात् तत उक्तं तेउलेसावि इति तेषां च पृथिव्यादीनां पञ्चानामपि सासादन-
सम्यक्त्वमपि न भवति आगमे निषेधात् ततो ज्ञाननिषेधः सम्यक्त्व। निषेधश्चोक्तः ततः सम्यग्मिथ्यात्वपरिणामस्तु संज्ञिपञ्चेन्द्रि-
याणामेव भवति नान्येषामसंज्ञिनां निषेधः द्वीन्द्रियादीनां पुनः केषांचि। करणपर्याप्तावस्थानां सासादनसम्यक्त्वमवाप्यते ततस्ते
ज्ञानपरिणता अपि सम्यग्दृष्टयः प्रज्ञापिताः तिर्यक्पञ्चेन्द्रियाणां च षडपि ले श्याः संभवन्ति ततः सूत्रे उक्तं जाव सुक्कलेसावि इति तथा दे-
शतः चारित्रपरिणामोऽपि तेषामुपजायते तत उक्तं चरित्ताचरित्तीवि इति तथा ज्योतिष्काणां तेजोलेश्यैव केवला न शेषा लेश्या ततस्तेउ-
लेसा इत्यादि स्निग्धबन्धनपरिणामश्च रूक्षबन्धनपरिणामश्च तत्र स्निग्धस्य सतो बन्धनपरिणामः स्निग्धबन्धनपरिणामः तथा रूक्षस्य सतो बन्धनप-
रिणामो रूक्षबन्धनपरिणामश्चशब्दौ स्वगतानेकभेदसूचकौ अथ कथं स्निग्धस्य सतो बन्धनपरिणामो भवति कथं वा रूक्षस्य सत इति बन्ध-
नपरिणामस्य लक्षणमाह समनिद्धयाए इत्यादि परस्परं समस्निग्धतायां समगुणस्निग्धतायां तथा परस्परं समरूक्षतायां बन्धो न भवति किन्तु
यदि परस्परं स्निग्धस्य रूक्षस्य च विषममात्रा भवति तदा बन्धः स्कन्धतापजायते इयमत्र भावना समगुणस्निग्धस्य परमाण्वादेः सम-

गुणस्निग्धेन परमाण्वादिना सह संबंधो न भवति तथा समगुणरूक्षस्यापि परमाण्वादिना सह संबंधो न भवति किंतु यदि स्निग्धः स्निग्धेन रूक्षो
रूक्षेण सह विषमगुणो भवति तदा विषममात्रत्वाद्भवति तेषां परस्परं संबंधः विषममात्रया बंधो भवतीत्युक्तं ततो विषममात्रानिरूपणार्थ
माह च णिद्धस्स णिद्धेण दुयाहिएणेत्यादि यदि स्निग्धस्य परमाण्वादेः स्निग्धगुणेनैव सह परमाण्वादिना बंधो भवितुमर्हति तदा नियमा
त् द्व्याद्यधिकत्र्याद्यधिकादिगुणेनैव परमाण्वादिनेति भावः रूक्षगुणस्यापि परमाण्वादे रूक्षगुणेन परमाण्वादिना सह यदि बंधो भवति तदा
तस्यापि तेन द्व्यधिकादिगुणेनैव नान्यथा यदा पुनः स्निग्धरूक्षयोर्बंधस्तदा कथमिति चेदत आह णिद्धस्स लुक्खेणेत्यादि स्निग्धस्य रूक्षेण सम
ह बंधमुपैति उपपद्यते जहन्नवज्जो विसमः समो वा किमुक्तं भवति एक गुणरूक्षं चैकगुणाद्विशेषस्य द्विगुणरूक्षं चैकगुणाद्विशेषस्य द्विगुणा
रूक्षं चैकगुणाद्विशेषस्य द्विगुणस्निग्धादि द्विगुणरूक्षादिना सर्वेण बंधो भवतीति उक्तो बंधनपरिणामोऽधुना गतिपरिणाममा
ह गइपरिणामे णं भंते इत्यादि द्विविधो गतिपरिणामस्तद्यथा स्पृ शद्गतिपरिणामोऽस्पृशद्गतिपरिणामश्च तत्र स्पृश
त्या गतिपरिणामः स स्पृशद्गतिपरिणामो यथा ठिक्करिकाया उ जलस्योपरि प्रयत्नेन तिर्यक्प्रक्षिप्तायाः सा हि तथा प्रक्षिप्ता
सती अपांतराले जलं स्पृशंती स्पृशंती गच्छति बालजनप्रसिद्धमेतत् त थास्पृशतो गतिपरिणामोऽस्पृशद्गतिपरिणामः यदस्पृशन्
केनापि सहापांतराले संस्पर्शमनुभवति तस्यास्पृशद्गतिपरिणाम इति भावः अन्ये त्वाहुः स्पृशद्गतिपरिणामो नाम यत्प्रय
त्नविशेषात् क्षेत्रप्रदेशान् स्पृशन् गच्छति अस्पृशद्गतिपरिणामो यत् क्षेत्रप्रदेशानस्पृशन्नेव गच्छति तच्च न सम्यक् नभसः सर्वव्यापितया तत्प्र
देशसंस्पर्शव्यतिरेकेण गतेरसंभवात् बहुश्रुतेभ्यो वा परिभावनीयं अत्रैव प्रकारांतरमाह अहवा दीहगइपरिणामे य हस्सगइ
परिणामे य इति अथवेति प्रकारांतरे अन्यथा वा गतिपरिणामो द्विविधः तद्यथा दीर्घगतिपरिणामो ह्रस्वगतिपरिणामश्च तत्र विप्रकृष्टदेशांतर
प्रापिपरिणामो दीर्घगतिपरिणामस्तद्विपरीतो ह्रस्वगतिपरिणामः परिमंडलादिसंस्थानविशेषाः षड् भेदा यथा प्रागेव व्याख्याता इतिवायोम ११८

आख्यायंते अगुरुलघुपरिणामो भाषादिपुद्गलानां कम्मगमणभासाई एयाइं अगुरुलहुयाइं इति वचनात् तथा अंतसूक्ष्मानंतद्रव्याणां वा का
शादीनां अगुरुलघुपरिणामग्रहणमुपलक्षणं तेन गुरुलघुपरिणामोऽपि द्रष्टव्यः स चौदारिकादिद्रव्याणां तैजसद्रव्यपर्यंतानामवसेयः उ
रालियवेउव्वियआहारगतेयगुरुलहुदव्वा इति वचनात् सुब्भिसद्दे इति शुभशब्दः दुब्भिसद्दे इति अशुभः शब्द इति च इति श्रीमलय
गिरिविरचितायां प्रज्ञापनाटीकायां त्रयोदशं पदं समाप्तं १३ ॥ ॥ तदेवं व्याख्यातं त्रयोदशं पदमधुना चतुर्दशमारभ्यते तस्य चायम
भिसंबंधः इहानंतरपदे गत्यादिलक्षणो जीवपरिणामः सामान्यतो उक्तः सामान्यं च विशेषनिष्ठमतः स एव विशेषतः कश्चित् कचित् प्र
तिपाद्यते तत्रैकेंद्रियाणामपि क्रोधादिकषायभावात् सकषायत्वा जीवः कर्मणो योग्यान् पुद्गलान् आदत्ते इति वचनात् प्राधा
न्येन बंधहेतुत्वादादावेव विशेषतः कषायपरिणामप्रतिपादनार्थ मिदमारभ्यते तत्रेदमादिसूत्रं कइ णं भंते कसायाइ
त्यादि कति कियत्संख्याकाः कषाया इति पूर्ववत् भति कियत्संख्याकाः कषाया इति पूर्ववत् रदंतपर
मकल्याणयोगेन कषायाः प्रज्ञप्ताः कषंति विलिखंति वि लिखंति कर्मरूपं क्षेत्रं सुखदुःखशस्योत्पादनायेति कषा
याः कृष्णादिक आदेः प्रत्ययो निपातनात् ऋकारस्य अकारः यदिवा कलुषयंति शुद्धस्वभावं संतं कर्ममलिनं कुर्वंति जीवमिति कषा
याः पूर्ववत् आयप्रत्ययः निपातनात् कलुषशब्दस्य णिजंतस्य कषादेशश्चोक्तं च सुहदुक्खबहुस्सइयं कम्मखेत्तं कसंति ते जम्हा कलुसंति जं
च जीवं तेण कसाइत्ति वुच्चंति निर्वचनसूत्रेऽप्यार्षत्वेन इकारादिदं कषस्य अपि सूत्रं कइपइट्ठिए णं भंते इत्यादि कियत्सु प्रकारेषु प्रतिष्ठितो न
देतां क्रोधः भगवानाह चउप्रतिष्ठितः तद्यथा आत्मप्रतिष्ठित आत्मप्रतिष्ठितः किमुक्तं भवति स्वयमाचरितस्य ऐहिकं प्रत्यपायमवबुध्य य
दा कश्चिदात्मन एवोपरि क्रुध्यति तदा आत्मप्रतिष्ठितः क्रोधः परप्रतिष्ठित इति यदा परः उदीरयति आक्रोशादिना कोपं तदा किल तद्विषयः क्रोध
उपजायते इति स परप्रतिष्ठित इति नैगमनयदर्शनमेतत् नैगमनयो हि तद्विषयतामात्रेणापि तत्प्रतिष्ठितं मन्यते यथा जीवसम्यग्दर्शनमजीवस

प्रज्ञाप० वृत्तिः॥

ष्यादर्शनमित्यादावात्मपक्षोऽलंगः सम्यग्दर्शनस्याधिकरणचिन्तायामाविष्कृतं तदुभयप्रतिष्ठित आत्मपररूपोभयप्रतिष्ठितः यदा कश्चित्स्वापराधविक्षपराध
वशादात्मपरविषयं क्रोधमाधत्ते तदा स प्रतिष्ठितानामयमिति स्वयं दुश्चरणमाक्रोशादिकं वा कारणं निरालंबन एव केवलः क्रोधवेदनीयोदयादुपजायते,
सहितात्मप्रतिष्ठितः स्वयं दुश्चरणमावतस्यात्मविषयत्वाभावान्नापि परप्रतिष्ठितः परस्यापि निरपराधतया अपराधमलावनीया अभावतः क्रोधालंबनत्वा
योगात् द्रष्टव्यस्तु कस्यापि कदाचिदेवमेव केवलः क्रोधवेदनीयोदयादुपजायमानः क्रोधस्वभावः पश्चात्तदुत्तं आशामतिक्रम्य कारणं क्रोधान्तेषु विरु
पंलाघत नववक्ति विच्छित्ताघायतीति अत एवोक्तं सर्वमहर्षिभिः सापेक्षाणि च निरपेक्षाणि च कर्म्माणि फलविपाकेषु सोपक्रमं च निरुपक्रमं च दृष्टं च
यायुक्तमिति एवं मानमायालोभा अपि आत्मपरोभयप्रतिष्ठिता अभावनीयाः तदेवमधिकरणमभिधायेदानीमुत्पत्तिकारणमभिधित्सुराह
कतिहिं णं भंते ठाणेहिं कोहुप्पत्ती भवइ इत्यादि तिक्खुत्तो सिरिति। स्थानानि कारणानि कतिभिः कियत्संख्याकैः स्थानैः कारणैः
क्रोधोत्पत्तिर्भवति भगवानाह चउहिं स्थानैः ज्ञानैश्चतुर्भिः स्थानैराह। खेत्तं पडुच्च इत्यादि तत्र नैरयिकाणां नैरयिकक्षेत्रं प्रती
त्य तिरश्चां तिर्यक्क्षेत्रं मनुष्याणां मनुष्यक्षेत्रं देवानां देवक्षेत्रं च पडुच्च। खेत्तं वत्थु सचेतनं वा अचेतनं शरीरं प्रतीत्य उ:संस्थितं विरूपं वा उपधिं प्र
तीत्य तियत् यत् यस्यापकरणं तस्य तत्स्वोरादिनापह्रियमाणं मत्तु वा वा तीत्य एवं नैरयिकादिदंडकसूत्रमपि संप्रति सम्यग्दर्शनादिगुणविघा
तहेतुत्वमाह कइविहे णं भंते इत्यादि अनंतानुबंध्यादिनामानार्थमयेकर्म्मप्रकृतिपदे वक्ष्यामो नावार्थस्तु सम्यक्त्वगुणविघातहेतुरनंतानुबंधी
देशविरतिघाती अप्रत्याख्यानः सर्वविरतिगुणविघाती प्रत्याख्यानावरणः यथाख्यातचारित्रविघातकः संज्वलनः एतान्चतुरोऽपि नैरयिकादि
दंडकक्रमेण चिंतयति एवं मानमायालोभा अपि प्रत्येकं चतुर्विधाः सामान्यतो दंडकक्रमेण च भावनीयाः संप्रत्येतेषामेव क्रोधादीनां निर्वृत्ति
मिदानीं वक्तव्यत्वादाह कइविहे णं भंते इत्यादि यदा परस्यापराधं सम्यगवबुध्य क्रोधकारणं व्यवहारतः पुष्टमवलंब्यमानात्मा स्यात्
क्रोधः उपजायते इत्याभोगनिर्वर्तितः यदा त्वेवमेव तथाविधमुहूर्तं विचारात् गुणदोषविचारणाशून्यः परवशीभूय क्रोधः १२७

कुरुते तदा स क्रोधोऽनाभोगनिर्वर्तितः उपशांतोऽनुदयावस्थः अनुपशांत उदयावस्थः एवमेतद्विषयं दंडकसूत्रमपि भावनीयं एवं मानमायालोभाः प्रत्ये
कं चतुःप्रकाराः सामान्यतो दंडकक्रमेण च वक्तव्याः संप्रति फलमभिधित्सुः कालत्रयवर्तिनामष्टानामपि कर्मणामुपचयमाह जीवा णं भंते कइहिं ठाणेहिं अट्ठ
कम्मपयडीओ चिणिंसु इत्यादि जीवाः कतिभिः स्थानैरष्टौ कर्मप्रकृतीश्चितवंतः चयनं नाम कषायपरिणतस्य कर्म्मपुद्गलोपादानमात्रं भगवा
नाह चउहिं ठाणेहिं स्थानैः तद्यथा क्रोधेन मानेन मायया लोभेन च एवं नैरयिकादिदंडकोऽपि वक्तव्यः एष दंडकोऽतीतकालविषयः एवं वर्त्तमान
कालभविष्यत्कालविषयावपि वाच्यौ एवमुपचयबंधोदीरणावेदननिर्जराविषया अपि प्रत्येकं त्रयस्त्रयो दंडका वाच्या इति सर्वसंख्यया अष्टादश दंडकाः तत्र
उपचयो नाम स्वाबाधाकालस्योपरि ज्ञानावरणीयादिकर्मपुद्गलादीनां वेदनार्थं निषेकः स चैवं प्रथमस्थितौ सर्वप्रभूतं द्वितीयस्यां स्थितौ
विशेषहीनं एवं विशेषहीनं तावद्वाच्यं यावदुत्कृष्टकालबध्यमाना याः स्थितयः उत्कृष्टास्थितिः तत्र स्वस्वविपाककर्मप्रकृतिस्थितिकायां पंचसप्तति
कायां वा स्थितौ मितिततो बध्यते बंधनं नाम ज्ञानावरणीयादिकर्मपुद्गलानामयोऽक्षरप्रकारेण स्वाबाधाकालोत्तरकाल
निषेकानंतरं यद्भूयः कषायपरिणतिविशेषान्निकाचनं उदीरणा उदीरणाकरणवशात् कर्मपुद्गलानामनुदयप्राप्तानामुदयावलि
कायां प्रवेशनं तदपि द्विविधमपि विशिष्टतथाविधकषायपरिणतवशात् इवतीतिवत्तं द्विंगणं द्विंतं दीर्घस्थितं दीर्घस्थितिस्थानत्वात् कर्मस्वरूपानिति
करणापिक्षीणमोहादयो ज्ञानावरणादीनामुदीरकाः संतीति इति वेदनानुभवः स्वाबाधाकालक्षयादुदयप्राप्तस्य उदीरणाकरणेन वा उदयमुपनीतस्य
कर्मण उपभोगः निर्जरा कर्मपुद्गलानामनुभूयानुभूय कर्मत्वापादनमात्मप्रदेशेभ्यः सहसंश्लिष्टानां ज्ञानावरणीयादिकर्मपुद्गलानामनु
भूयशातनमिति भावः तं कथं च पुच्छकयकम्मसाडणं निर्जरा इति वचनादत्र निर्जरा इष्टव्या कषायवशात्तत्र सर्वनिर्जरा साधितकषायस्या
सर्वनिरुद्धायोगस्य शैलेश्यामादिमध्यारोहतो भवति न चाकषायस्य अत एव चतुर्विंशतिदंडकसूत्रमध्ये विशेषदर्शनात् निर्जरायाः सर्वकालं सर्वेषामपि
सामान्यतो वा एतत् समस्तं यत् यत् पदमधिकृत्य प्राक्सूत्राण्यक्तानि तानि तानि यत् नानुग्रहणि गाथया निर्दिष्टानि आयपइट्ठिए इत्यादि प्रथमं सामान्यसूत्रं प्र

नीतमिति असंस्कृतं द्वितीयमाम्रप्रतिष्ठितपदोपलक्षितं सूत्रं ततः नंतरं चयपदोपलक्षितं तदनंतरमालागपदोपलक्षितं तच्छायापचयबंधादीर
णावेदनीयनिर्जराविषयाणि कृत्स्नाण्यवधि णाति च पदचयसूत्रोपलक्षणं ॥ इति श्रीमलयगिरिविरचितायां प्रज्ञापनाटीकायां चतुर्दशं पदं
समाप्तं ॥ १४ ॥ ॥ व्याख्यातं चतुर्दशं पदं अधुना पंचदशमारभ्यते इहानंतरपदे प्रमत्तानं बंधहेतुत्वात् विशेषतः कषायपरिणाम उक्तः इदानीं तु
इंद्रियवतामेव लेश्यादिसद्भाव इति विशेषत इंद्रियपरिणामनिरूपणार्थमिदमारभ्यते अत्र चादावेवेदमधिकारसंग्रहगाथाद्वयम्
कारसंग्रहकमिदं गाथाद्वयं संठाणं बाहल्लं इत्यादि प्रथममिंद्रियाणां संस्थानं वक्तव्यं संस्थानं नाम आकारविशेषः ततो बाहल्यं वक्तव्यं बा
हल्यं नाम बाहल्यतापिंडत्वमिति ततस्तदनंतरं पृथुत्वं वक्तव्यं पृथुत्वं विस्तारः तदनंतरं कतिप्रदेशमिति कतिप्रदेशमिंद्रियमिति वक्तव्यं तद
नंतरमवगाढमिति विषयं कर्कशादिगुणविषयं वाल्पबहुत्वं ततः स्पृष्टमिति स्पृष्टग्रहणमुपलक्षणं तेनास्पृष्टविषयं सूत्रं वक्तव्यं तदनंतरं प्रविष्टमि
प्रविष्टाप्रविष्टविषयचिंता विषयः ततो विषयपरिमाणं । ततोऽनगारविषयं सूत्रं तदनंतरमाहारविषयं तत आदायमिति आद
र्शविषयं तदनंतरमसिविषयं ततो मणिविषयं ततस्तैलवि षयं ततः फाणितविषयं तदनंतरं वसाविषयं ततः कंबलविषयं ततः स्थू
णाविषयं तदनंतरं थिग्गलमिति आकाशथिग्गलविषयं ततो द्वीपोद धिविषयं ततो लोकविषयं तदनंतरमलोकविषयमिति तत्र संस्थानादिक
मिंद्रियाणां वक्तव्यमिति प्रथमत इंद्रियविषयं सूत्रमाह ॥ कइ णं भंते इंदियापण्णत्ता इत्यादि कतिविधसंख्याकानि णमिति वाक्यालंकारे भदंत
इंद्रियाणि प्रज्ञप्तानि भगवानाह गौतम पंचेंद्रियाणि प्रज्ञप्तानि तान्येव नामत आह सोइंदिए इत्यादि एतानि च पंचापी
द्रियाणि द्विधा तद्यथा द्रव्येंद्रियाणि भावेंद्रियाणि च तत्र द्रव्येंद्रियं निर्वृत्त्युपकरणरूपं भावेंद्रियं लब्ध्युपयोगात्मकं निर्वृत्तिर्नामाकारः सापि द्विधा बाह्या अभ्यंतरा च तत्र बाह्या कर्णपर्पटिकादिरूपा सा
च विचित्रा न प्रतिनियतरूपतया शक्यते तथाहि मनुष्यस्य श्रोत्रे नेत्रयोरुभयपार्श्वतो भ्रूविनीलोत्पलावघाटितरूपा तत्र श्रवणं भ्रूपक्ष्म

१२१

याममोवांडिता नेत्रयोरुपरितीक्ष्णभावना गणयादिज्ञातिलदानामतिविषमा अभ्यंतरा तु निर्वृत्तिः सर्वेषामपि जंतूनां समानैव तथा
चेंद्रियाणां संस्थानादि विषयाणि स्पर्शनेंद्रियस्य निर्वृत्तिर्बाह्याभ्यंतरभेदा न प्रतिपत्तव्या इयं चेह विनिर्दिष्टा दत्तप्रयत्नेन तत्संस्थानविषये
स्थानविषयमेवत कस्मात् उच्यते तदैव कस्मिन्विषये ग्रहणं तत्र कि संठाणसंठिए पण्णत्ते इति उपकरणेंद्रियं चक्षुरादीनां निर्वृत्तिर्यास्विकस्यासमाना शक्तिर
च्छेदनमप्रतिकार्यं अभ्यंतरानिर्वृत्तिसमस्याः शक्तिविशेषः इदं चोपकरणरूपं द्रव्येंद्रियमांतरनिर्वृत्तेः कथंचिदर्थांतरं शक्तिमतः कथं
चिद्भेदात् कथंचिदभेदात् अतो निर्वृत्तौ सत्यामपि तस्यामांतरनिर्वृत्तौ द्रव्यादिनोपकरणस्य विघातसंभवात्तथाहि सत्यामपि कदंबपुष्पाद्याकृतिरूपायामांतरनि
र्वृत्तावतिकठोरतरघनगर्जितादिना शक्त्युपघाते सति न परिच्छेत्तुमीशते ॥ ॥ भावेंद्रियमपि द्विधा लब्धिरूपमुपयोगरूपं च
तत्र लब्धिः श्रोत्रेंद्रियादिविषयः सर्वात्मप्रदेशानां तदावरणक्षयोपशमः उपयोगः स्वविषये लब्ध्यनुसारेणात्मनो व्यापारः प्र
णिधानमिति सांप्रतमाभ्यंतरनिर्वृत्तिमधिकृत्य संस्थानादि विचिंतयि षुः प्रथमतः संस्थानं चिंतयति ॥ सोइंदिए णं भंते
किंसंठिए पण्णत्ते इत्यादि पाठसिद्धं नवरं बाहल्यं चिंतयति सोइंदिए णं भंते केवइयं बाहल्लेणं पण्णत्ते इत्यादि इदमपि पाठ
सिद्धं नवरं अयमर्थः सर्वाण्यपि बाहल्येनांगुलासंख्येयभागमिति अत्र शिष्यः प्रश्नयति यद्यंगुलासंख्येयभागबाहल्यं स्पर्शनेंद्रियं तत
कथं खड्गक्षुरिकाद्युपघाते अंतः शरीरस्य वेदनानुभावः तदेतदसमीचीनं सम्यगवस्तुतत्त्वापरिज्ञानात् इह स्पर्शनेंद्रियस्य विषयः स्पर्शो नाम शीतादिः
नवरं खड्गक्षुरिकाद्युपघाते अंतः शरीरस्य शीतादिस्पर्शवेदनमपि किंतु केवलं दुःखवेदनं तच्च दुःखरूपवेदनमात्मा केवलेन परिशरीरेण
दुःखवति न केवलेनैवेंद्रियेण ज्वरादिवेदनवत् ततो न कश्चिद्दोषः अथ शीतलपानकादिपाने अंतः शीतस्पर्शवेदनानुभूयते ततः क
थं समाधानमिति ॥ इह स्पर्शनेंद्रियं सर्वत्रापि प्रदेशपर्यंतवर्त्तिविद्यते तथा पूर्वसूरिभिर्व्याख्यानात् तथा चाह मूलटीकाकारः सर्वप्रदे
शपर्यंतवर्त्तित्वात्त्वचोऽभ्यंतरेऽपि शुषिरस्योपरि त्वगिंद्रियस्य भावोऽपपद्यते तत्र शीतस्पर्शवेदनानुभवः अधुनापृथुत्वविषयं सूत्रमाह ॥ सोइंदि

पण्णत्ते के वइयं पोहत्तेणं पण्णत्ते इत्यादि इहत्वचं स्पर्शनेंद्रियतिरिक्तानां श्रोत्रघ्राणानां चतुर्णामिंद्रियाणामात्मांगुलेन प्रतिपत्तव्यं स्पर्शनेंद्रियस्य तु उत्सेधांगुलेन तद्देहाश्रितानींद्रियाणि देहस्याप्युत्सेधांगुलेन प्रमीयते उस्सेहपमाणतो मिणसु देहमिति वचनात् ततइंद्रियाण्यप्युत्सेधांगुलेन मातव्यानि तेनात्मांगुलेनेति तदयुक्तं जिह्वादीनामप्युत्सेधांगुलेन पृथुत्वमितानामभ्युपगमे गव्यूतादीनां मनुष्याणां रसास्वादनाभावप्रसक्तेः तथाहि त्रिगव्यूतादीनां च हस्तादीनां च सुमहाशरीराणि तेषां सातिशयातिविशालानि मुखानि जिह्वापि तेषां युक्तमुत्सेधांगुलेनात्मांगुलापेक्षयाकारतयाल्पत्वात् ततोऽतिरिक्तमकस्य जिह्वेंद्रियस्यांगुलपृथक्त्वलक्षणो विस्तारः परिहीयेत तदा अल्पतया न सर्वां जिह्वां व्याप्नुयात् सर्वव्यापित्वाभावाच्च तया सोऽवाङ्गल्पेन सर्वात्मना जिह्वाया रसवेदनलक्षणः प्रतिप्राणिप्रसिद्धो व्यवहारः स व्यवच्छिद्यमानोऽपाद्येव घ्राणादिविषयोऽपि यथायोगं भावनीयः तस्मादात्मांगुलेन जिह्वादीनां पृथुत्वमवसेयं नोत्सेधांगुलेनेति आह लघुरूपकृत् इंद्रियमाणवितथं नयणिव्वं तिगाउयाइणं जिब्भिंदियाइमाणमव्ववहारविरुद्धं १ अस्याक्षरगमनिका तत्रुत्सेधांगुलेनेंद्रियमानेपि ज्ञासामिंद्रियविषयपरिमाणचिंतायामित्यपि शश्वद्भजनीयं विकल्पनीयं विकल्पेइस्यात्तत्कोपि न इस्यात इत्यर्थः किमुक्तं भवति स्पर्शनेंद्रियपृथुत्वपरिमाणचिंतायां ग्राह्यमन्येंद्रियपृथुत्वपरिमाणचिंतायां न ग्राह्यं घामात्मांगुलेन परिमाणकरणादिति कथमिदमेवमवसेयमिति चेत् अत आह यतो यस्मात्सर्वेषामपींद्रियाणामुत्सेधांगुलेन परिमाणकरणे त्रिगव्यूतादीनामादिशब्दात् द्विगव्यूतादिपरिग्रहो जिह्वेंद्रियादिमानं सुव्यक्तं मव्यवहारविरुध्येत् यथा च विरुध्यते तथानंतरमेव भावितमिति संप्रति कतिप्रदेशावगाढं द्वारमतिपादयति व तेणं इंदिएणं भंते इत्यादि निगदसिद्धमल्पबहुत्वद्वारमाह व एएसिणं भंते इत्यादि सर्वस्तोकं चक्षुरिंद्रियमवगाहनार्थतया किमुक्तं भवति सर्वस्तोकप्रदेशावगाढं चक्षुरिंद्रियं ततः श्रोत्रेंद्रियमवगाहनार्थतया संख्येयगुणं प्रभूततरप्रदेशेषु तस्यावगाहनाभावात् ततोपि घ्राणेंद्रियमवगाहनार्थतया संख्येयगुणमतिप्रभूततरप्रदेशेषु तस्यावगाहनाभावात् ततोपि जिह्वेंद्रियमवगाहनार्थतया असंख्येयगुणं तस्या १२२

गुलपृथक्त्वप्रमाणविस्तारात्मकत्वात् यस्तु दृश्यतेऽसौ स्तोकत्वात् संख्येयगुण इति सोऽपि नायुक्त्युपपन्नत्वात् तथाहि चक्षुरादीन्यपींद्रियाणि प्रत्येकमंगुलासंख्येयभागविस्तारात्मकानि जिह्वेंद्रियं त्वंगुलपृथक्त्वविस्तारमतोऽसंख्येयगुणमवतइपपद्यते न तु संख्येयगुणमिति ततः स्पर्शनेंद्रियं संख्येयगुणं तथाहि अंगुलपृथक्त्वप्रमाणविस्तारं जिह्वेंद्रियं पृथक्त्वं च हि प्रभूतानवत्यः स्पर्शेंद्रियं शरीरप्रमाणमिति सुमहदपि तदुपपद्यते संख्येयगुणमिति यत्तु वक्तुः पृथुत्वाकृष्टदृश्यते पागोः संख्येयगुणमिति सोऽपि नो युक्तिविकल्पत्वात् तथाहि आत्मांगुलपृथक्त्वपरिमाणं जिह्वेंद्रियं शरीरपरिमाणं तु स्पर्शनेंद्रियं शरीरं चोत्कर्षतोऽपि लक्षयोजनप्रमाणं ततः कथमसंख्येयगुणमुपपद्यते इति अनेनैव क्रमेण प्रदेशार्थतयापि सूत्रं परिभावनीयं नक्रप्रकारांतरेणेत्युभयसूत्रमपि। यानि तु कर्कशगुरुगुणादिसूत्राणि तानि पाठसिद्धानि नवरमल्पबहुत्वसूत्रे चक्षुःश्रोत्रघ्राणजिह्वास्पर्शनेंद्रियाणां यथोत्तरं कर्कशगुरुगुणा अमीषामेव पश्चानुपूर्व्या यथासर्वं मृदुलघुगुणा स्पर्शेंद्रियस्योत्तरं कर्कशतया यथापूर्वं चातिकोमलतयोपलभ्यमानत्वात् युगपदुभयाल्पबहुत्वसूत्रे स्पर्शनेंद्रियस्य कर्कशगुरुगुणेहितेतस्मात्तदेवमृदुलघुगुणा अनंतगुणा इति । शरीराहि कतिपयाण्यवप्रदेशानपि विवक्षितः शीतातपादिसंपर्कतः कर्कशावनंत आन्यानुबंधेन तदंतर्गता अपि मृदव इति घटंते स्पर्शनेंद्रियस्य कर्कशगुरुगुणाल्पमृदुलघुगुणा अनंतगुणा इति अमुमेव संस्थानादीनल्पबहुत्वपर्यंतानि द्वाराणि नैरयिकादिषु चिंतयति नेरइयाणं भंते इत्यादि सुगमं नवरं नेरइयाणं भंते फासिंदिए किं संठिए पण्णत्ते इत्यादि द्विविधं हि नैरयिकाणां शरीरं भवधारणीयमुत्तरवैक्रियं च तत्र भवधारणीयं तेषां भवस्वभावत एव निर्मूलविलुप्तपक्षोत्पाटितसकलग्रीवादिरोमपक्षिशरीरवत् अतिबीभत्ससंस्थानोपेतं यदप्युत्तरवैक्रियं तदपि हुंडसंस्थानमेव तथाहि यद्यपि ते वयं मतिशुभतरं शरीरं विकुर्विष्याम इत्यभिसंधिना वैक्रियशरीरमारभंते तथापि तेषां मत्यंताशुभतथाविधनामकर्मोदयादतीवाशुभतरमेवापद्यते इति असुरकुमारसूत्रे भवधारणीयं समचतुरस्रसंस्थानं तथाभवस्वाभाव्यात् उत्तरवैक्रियं तु नानासंस्थितं स्वेच्छया तस्य निष्पन्नत्वात् पृथिव्या

दिविषयाणि तु सूत्राणि सूत्राणि तु प्रतीतान्येव संप्रति स्पृष्टद्वारमाह पुट्ठाइं भंते सद्दाइं सुणेइ इत्यादि प्राकृतत्वात्सर्वत्र द्वितीयार्थे प्रथमा एवम-
न्यत्रापि सूत्रे प्रतिपत्तव्यं स्पृष्टान् भदंत श्रोत्रेंद्रियमिति कर्तृपदं सामर्थ्याल्लभ्यते शब्दान् शृणोति अस्पृष्टान्वा भगवानाह स्पृष्टान् शृणोति नत्वस्पृष्टानि
इति स्पृष्टमात्रान् तनौ रेणुमिवालिंगितमात्रानित्यर्थः पुट्ठं रेणुव तणुम्मि इति वचनात् विशिष्टं तत्प्रतिपादितं अर्थाऽऽपत्तिरिति शब्दाः नास्पृष्टान् शृणोति सूक्ष्मा-
णि तद्विपरीतानि तदेतियावत् किमुक्तं भवति स्पृष्टमात्राण्येव शब्दद्रव्याणि श्रोत्रेंद्रियमुपलभते न तु घ्राणेंद्रियादिवत् बद्धस्पृष्टानीति कस्मादिति चे-
दुच्यते इह शब्दद्रव्याणि घ्राणेंद्रियादिविषयद्रव्यापेक्षया सूक्ष्माणि तथा बहूनि तथा तत्क्षेत्रवासिशब्दयोग्यद्रव्यवासकानि च त-
तः सूक्ष्मत्वादतिप्रभूतत्वात्तदन्यवासकत्वाच्चात्मप्रदेशैः स्पृष्टमात्राण्यपि निर्वृत्तींद्रियमध्यप्रविश्य स्वविज्ञानकं उपकरणेंद्रियमभि-
व्यंजयंति श्रोत्रेंद्रियं च घ्राणेंद्रियाद्यपेक्षया पटुविषयपरिच्छेदपटुतरं ततः स्पृष्टमात्राण्यपि तानि श्रोत्रेंद्रियमुपलभ्यते नास्पृ-
ष्टान् सर्वथात्मप्रदेशैः सह संबंधमप्राप्तान् श्रोत्रेंद्रियस्य प्राप्तविषयपरिच्छेदस्वभावत्वात् यथा श्रोत्रेंद्रियस्य प्राप्यकारि-
त्वं तेषां नंद्यध्ययनटीकादौ व्यवस्थितमिति ततोऽवधार्यं पुट्ठाइं भंते रूवाइं इत्यादि सूत्रं निर्वचनमाह नो तमनस्पृष्टानि रूपाणि
पश्यतीति वक्तव्यं किं तु स्पृष्टानि चक्षुषोऽप्राप्यकारित्वात् तत्त्वाप्राप्यकारित्वं तत्त्वार्थटीकादौ विस्तरेण प्रसाधितमिति ततोऽवधारणीयं।
गंधादिविषयाणि सूत्राणि सुप्रसिद्धानि नवरं स्पृष्टान् गंधान् आजिघ्रतीत्यादि यदप्युक्तं तथापि बद्धस्पृष्टानीति द्रष्टव्यं यत उक्तमानि बद्धस्पृष्टानि
ति द्रष्टव्यं यत उक्तमावश्यकनिर्युक्तौ पुट्ठं सुणेइ सद्दं रूवं पुण पासइ अपुट्ठं तु गंधं रसं च फासं च बद्धपुट्ठं वियागरे इति तत्र स्पृष्टानीति पूर्ववत् बद्धा-
नीति आत्मप्रदेशैरात्मीकृतानि बद्धमप्पीकयं पएसेहिं इति वचनात् विशेषणसमासश्च बद्धाश्च ते स्पृष्टाश्च बद्धस्पृष्टास्तान् इह स्पृष्टाः स्पर्श-
मात्रेणापि भवंति यथा शरीरे रेणवः ततः स्पर्शमात्रव्यवच्छेदनार्थं विशेषप्रतिपत्तिरव्याहता स्यादिति बद्धग्रहणं बद्धस्पृष्टानेव परिच्छिन-
त्ति नान्यानिति कस्मादेवमिति चेदुच्यते गंधादिद्रव्याणां बादरत्वात् अल्पत्वादभावकत्वाच्च घ्राणादींद्रियाणामपि च श्रोत्रेंद्रियापेक्षा- १२३

या जडत्वान्मंदशक्तिकत्वादिति संप्रति प्रविष्टविषयचिंतां कर्तुकाम आह पविट्ठाइं भंते सद्दाइं इत्यादि पाठसिद्धं नवरं स्पर्शमात्रेण
रेणुवापि न वति पुत्वाशासु रेवकेवलास्य अवतिबद्धार्थस्यातिविषयता स्पृष्टप्रविष्टसूत्राणामिति संप्रति विषयपरिमाणनिरूपणार्थमाह सो-
इंदियस्स णं भंते केवइए विसए पण्णत्ते इत्यादि इह श्रोत्रादीनि प्राप्तविषयपरिच्छेदकत्वात् अंगुलासंख्येयभागादप्यागतं शब्दादिद्रव्यं परि-
च्छिंदंति नयनं त्वप्राप्यकारीति ततो जघन्यतोऽंगुलसंख्येयभागादव्यवहितं परिच्छिनत्ति किमुक्तं भवति जघन्यतोऽंगुलसंख्येयभाग-
मात्रव्यवस्थितं पश्यति न तु ततोऽप्यर्वाक् अतिसन्निकृष्टमंजनरजोमलादिकं चक्षुः न पश्यतीति उक्तं च अवरमसं-
खंगुलभागा नयणवज्जाणं संखंगुलभागो नयणस्स इति । उत्कर्षतस्तु श्रोत्रेंद्रियं द्वादशयोजनेभ्य आगतान् अ-
च्छिन्नान् अव्यवहितान् नान्यैः शब्दांतरैर्वातादिभिर्वा प्रतिहतशक्तिकानित्यर्थः पुद्गलान् अनंतानपि ... शब्दानां
ब्दगुण इति प्रतिपादितं यथा च शब्दस्य पौद्गलिकता तथा तत्त्वार्थटीकायां प्रपंचितमिति न भूयः प्रपंच्यते स्पृ-
ष्टान् स्पृष्टमात्रान् शब्दान् प्रविष्टान् निर्वृत्तींद्रियमध्यप्रविष्टान् शृणोति न परतोऽप्यागतान् कस्मादिति चेदुच्यते परत
आगतानां तेषां मंदपरिणामत्वात् तथाहि परतः आगताः संतः शब्दपुद्गलाः स्वभावात् मंदपरिणामाः प्रजायंते तथ
न स्वविषयं श्रोत्रविज्ञानं जनयितुमीश्वराः श्रोत्रेंद्रियस्यापि तथाविधं अद्भुततरं बलं न विद्यते यद् परतोऽप्यागतान् शब्दान् श्रु-
णुयादिति चक्षुरिंद्रियमुत्कर्षतः सातिरेकात् योजनशतसहस्रादारभ्य अच्छिन्नान् कटकुड्यादिभिरव्यवहितान् पुद्गलान् अस्पृष्टान् इह अच्छि-
नान् अत एवाप्रविष्टान् रूपाणि इति रूपात्मकान् पश्यति परतोऽव्यवहितस्यापि परिच्छेदे चक्षुषः शक्त्यभावात् अत्रांगुलमिह त्रिधा तद्यथा
आत्मांगुलमुत्सेधांगुलं प्रमाणांगुलं च तत्र जे णं जया मणुस्सा तेसिं जं होइ माणरूवं तु तं भणियमिहायंगुलमणिययमाणं इमं तु इत्येवंरूपमात्मां-
गुलं परमाणू रहरेणू तसरेणू अग्गयं च वालस्स लिक्खा जूया य जवो अट्ठगुणविवड्ढिया कमसो इत्यादिरूपमुत्सेधांगुलं तदेव सहस्रगुलमं-

गंदवडप्रमाणंगुलंसहस्रगुणं तावदवगुणितंवत्तुवीरस्यात्मांगुलंप्रणियंमित्यर्थंप्रमाणांगुलंतत्रात्मांगुलेन मीयते तत्र कालवशात्पिरूपादिकं
वस्तुजातं भूयोंगुलेन नरतिर्यग्देवनैरयिकशरीराणि प्रमाणांगुलेन पृथिवीविमानादि उक्तंच आत्मांगुलेन वत्थुस्सेहपमाणाउ मिणसुदेहं नगपुढ
विविमाणाई मिणसुपमाणांगुलेणं तु तत्र यदिंद्रियविषयपरिमाणं किमात्मांगुलेनाहोस्वित् उत्सेधांगुलेन उच्यते आत्मांगुलेन यथा चक्षुरिं
द्रियविषयपरिमाणचिंतायां नाप्यहुत्तं अप्पत्तकारियाणं अणंतायवयणं सविसयपरिमाणं आयंगुलेणं नक्कं उक्कसंजायण्णाणं नव्वुदहप
माणस्य भूयोंगुलेन क्रियतां दिहाश्रिमानींद्रियाणि तत्तस्मिंविषयपरिमाणमपि उत्सेधांगुलेन कस्मात्नोच्यते आत्मांगुलेनेति निषेधा
यः यतएव हीनादिशरीराश्रितानींद्रियाणि तथापि तेषां विषयपरिमाणमात्मां गुलेनैवादहादव्याचष्टे विषयपरिमाणमस्यतथावाद्यमेवार्थमाह उ
पउरस्मैरंगामुहकुट्ठाद न्युत्तणियमुस्सेयंगुलपमाणतो जीवाद। हमाणाई देहपमाणंतचियनवइंदियविसयपरिमाणं उ
त्रदेहप्रमाणंतेचियइतियन्नउत्तभूयांगुलमियवनोक्तंततुदेह। प्रमाणमात्रमेवनविंद्रियविषयपरिमाणंतस्यात्मांगु
लप्रमेयत्वादिति अथयदिविषयपरिविषयपरिमाणमिंद्रियाणाभूयो। यांगुलेनस्यात्ततःकोदोषआपद्यतेउच्यते पंचधनुःशतादि
मनुष्याणांविषयव्यवहारविच्छेदप्रसक्तियतत्र तस्मात्मांगुलेनकिलप्रमाणं। गुलेनतत्प्रमाणांगुलमुत्सेधांगुलमहस्रगुणमवति ततस्मद्दंगुलमे
गंदवडप्रमाणंगुलं महस्सगुणमितिवचनात् तातो भरतसगरादिचक्रवर्त्तिनां याअयोध्यादयो नगर्योयेचस्कंधावाराआत्मांगुलेन महदायोजना
यामतयाप्रसिद्धा तत्रभिन्नास्सउत्सेधांगुलप्रमित्याअनेकानियोजनसहस्राणिस्युः तथाचसतितत्रआयुधशालादिषुताडितायांभेर्याविशेषश्रवणंनस
र्वेषामापद्यते वारमहिंज्ञायणाहिंसाटं अतितराएमहमितिवचनात् अथचसमग्रनगरव्यापीसमप्रस्कंधावारव्यापीचविजयढक्कादिशब्दआग
मप्रतिपादिततत्र एवंवत्ततद्व्यवहारस्तएवमागमप्रसिद्धःपंचधनुःशतादि मनुष्याणांविषयव्यवहाराभ्यवाछिदामाप्राप्तदित्यात्मांगुलेनेंद्रियाणांविषय
परिमाणमवसातव्यं नोभूयांगुलेनतथाचाप्युक्तं तणांपंचधणुसयनरादिविसयविवहारवोछेउप्पोचउसहस्सगुणियं जणप्रमाणंगुलेतत्तो १२८

अउत्तस्मादात्मांगुलेनेवेंद्रियाणांविषयपरिमाणंनाउत्सेधांगुलेनेतिनिउपसंहारवाक्यंमतःपविभावनीयं यदप्यक्तं प्राक्दहाश्रिमानीं
द्रियाणीतितेषांविषयपरिमाणमुत्सेधांगुलेनेति तदप्ययुक्तमिंद्रियाणामपिकेषांचित्पृथुत्वस्य आत्मांगुलेनमीयमानत्वात्पदपगमात् नावित
वितनप्रगादिइंद्रियप्रमाणमेवितियत्तणिन्यमित्यादिनाप्यकारवचनाद्भूलानितितस्माज्जवमिंद्रियविषयपरिमाणमात्मांगुलेनेवेतिस्थितं नन्व
नवनेत्रांगुलेनविषयपरिमाणंतथाप्युक्तनस्तोकंचक्षुरिंद्रियपरिमाणंनघटते अधिकस्यापितदिषयपरिमाणस्यागमांतरप्रतिपादना
ततथाहिपुष्करवरद्वीपार्द्धमानुषोत्तरपर्वतसमीपवर्तिनोमनुष्याः कर्कसंक्रांतोउत्कृष्टेदिवसेमातिरेकैरेकविंशतियोजनल
क्षैःपूर्वविभ्रितमादित्यमवलोकमानाःप्रतिपादितताश्चांतरेवंतदावकृत्। माडगवीसंखलुलक्खावउतीसंचवमहस्सा तरपंचसया
तणियासतीसाएअतिरिक्ता इइनयाणविसयमाणंपुक्खरदीव ड्वासिमणुयाणं पुत्वेणयअवरेणयपिहंपिहंहाइ
मणुयाणमित्यादि ततःकथमधिक्रुतसूत्रमात्मांगुलेनापिघटातेप माणांगुलेनापिव्यभिचारमावात् उक्तंच लक्खे हि
एक्कवीसाएसायरेगाहिंपुक्खरद्धंमि उदयेपेच्छंतिनरासूरंउक्कोसए। दिवसेणयगिंदियस्सेतदा विसयपमाणंजुरा जुएगति
यंआउस्सेहपमाणंगुलाणएक्केणविनजुत्तंसत्यमेततकेवलमिदंसूत्रं प्रकाश्यविषयइष्टव्यं नतु प्रकाशकविषयंततःप्रकाशकेवि
कतरमपिविषयपरिमाणं नविरुध्यतइतिनकश्चिदोषःकथमेतदवसीयतइतिचेत्उच्यते पूर्वसूरिकृतव्याख्यानात्सकलमपि
पिहिकालिकश्रुतंपूर्वसूरिकृतव्याख्यानानुसारेणैवव्याख्यानयंतियेनयथाक्षरमात्रमतिविरोधश्चसर्वगतसूत्रार्थसंग्रहपरतयाकालिकश्रु
तस्यकचितसंक्षिप्तस्यापिसूत्रस्यमहतापिप्रवचनेनविचिंतनीयत्वात्ततिसंक्षेपणानिध्यानतेअवसितःक्षमपियावद्वितार्थतयाज्ञातुमशक्यत्वादत
एवाह्रुमिदेमव्वउकंठेकालिकंसुत्तहवनइतेवियालणानविकिंकालियाणुयोगदिठादिठप्पहाणेहितस्मात्पूर्वसूरिकृतव्याख्याना
नाधिकृतगंथविलाधःआहचनाप्यहकुतसुज्ञानिप्पाहोदयंपयासयणिद्धतयंनतउपयासवरकाणाउविसेसोनदीसंदहा दिलखणया

इति तथा घ्राणेंद्रियजिह्वेंद्रियस्पर्शनेंद्रियाणि मंदशक्तीत्युक्तं ततो नवयोजनेभ्य आगतान् अच्छिन्नान् द्रव्यांतरैरप्रतिहतशक्तिकानुपरिच्छिंदंति न
परत आगतान् परत आगतानां मंदपरिणामत्वाद्भावात् घ्राणादींद्रियाणां तथारूपाणामपि तेषां परिच्छेदं कर्त्तुमशक्यत्वात् आह च लाघवकृत्वा रसहितास्
त्वास्समाणं नवहिं जोयणेहिं तो गंधं ति पत्तमद्धाणतो परतो नागिण्हंति दव्वाणं मंदपरिणामयाए परतो ते इंद्रियविषयाधिकास्त इदमपि सूत्रं अणगारस्स
णं भंते इत्यादि न विद्यते अगारं गृहं द्रव्यतो भावतश्च यस्यासावनगारः संयतस्तस्य णमिति वाक्यालंकारे भदंत भावियप्पणो इति भावितो वासितः
आत्मा ज्ञानदर्शनचारित्रैस्तपोविशेषैश्च येन स भावितात्मा तस्य मारणांतिकसमुद्घातेन समवहतस्य ये चरमाः शैलेशीकालांत्यसमय
भाविनो निर्जरापुद्गलाः अपगतकर्मभावाः परमाणवः सुहुमा णं ते पुद्ग ला इति णमिति निश्चये निपातानामनेकार्थत्वात् निश्चितमे
तत् सूक्ष्माः चक्षुरादींद्रियपथमतिक्रांतास्ते पुद्गलाः प्रज्ञप्ता नवहिः हे श्र मणा हे आयुष्मन् गौतम भगवतः संबोधनमेतत् तत
थाविस्थितमेतत् सर्वलोकमपि ते पुद्गलाः स्पृष्ट्वा णं वाक्यालंकृ तौ तिष्ठंति एवं गौतमेन प्रश्ने कृते भगवानाह हं
ता गोयमा हंतेति प्रत्ययवधारणे एवमेवैतत् गौतम अणगारस्स णं ता वियप्पणो इत्यादि तदेवं उत्तरपि प्रश्नः छउमत्थे णं भंते
इत्यादि अथ छद्मस्थस्यावकाशो यत इह प्रागुक्तं स्पृष्ट्वा निप्रविष्टानिव त्राह इमाणि सुणातीत्यादि निर्जरापुद्गला अपि सर्वलोकस्य
स्पर्शिन इति तेषामपि श्रोत्रादिभिः स्पर्शनप्रवेशो न स्यादिति संशयप्रश्नः छद्मस्थो न दंत मनुष्यः छद्मस्थ इह णं केवलिकृदा सार्थं केवली हि सर्वैरप्या
त्मप्रदेशैः सर्वं जानाति पश्यति चयोक्तं सव्वतो जाणइ केवली सव्वतो पासइ केवली इति का तेप्याह समततः सर्वतो णं निरुक्तमिति
छद्मस्थूणा पांगनामकर्मविशेषसंस्कृतावेंद्रियद्वारेण जानाति पश्यति वित्ति छद्मस्थग्रहणं अत एवेह छद्मस्थो विशिष्टावधिज्ञानविकलः परिगृह्यते
तेषां निर्जरापुद्गलानामेषां परस्परं भिन्नमिति भावः नानात्वं परस्परं विपक्षमेकास्येव वर्णादिकृतं वैचित्र्यं जानन् अवमताता नानात्वमिति यावत् पश्यंति सा
रतापुद्गलग्रहणप्रतीते भगवानाह नायमर्थः समर्थो नायमर्थो युक्त्युपपन्नः छद्मस्थमनुष्यस्तेषां निर्जरापुद्गलानामन्यत्वादिकं जानाति पश्यति वा

अथ केवलार्थं प्रश्नमाह से केणट्ठेणं भंते इत्यादि सुगमं भगवानाह देवे वियणमित्यादि देवोऽप्येककः कश्चित् कर्मपुद्गलविषयावधिज्ञानविक
लो यस्तेषां निर्जरापुद्गलानां न किंचिदप्यन्यत्वादिकं जानाति पश्यति वा किमुक्तं भवति देवा नाम किल मनुष्येभ्यः पटुतराणींद्रियाणि बिभ्रति
ततो देवोऽपि तावन्न जानाति पश्यति वा किमुत मनुष्य इति से एएणमित्याद्युपसंहारवाक्यं सुगमं एवं सुहुमाणं ते इत्यादि एवमिति एतावता
कारणेन सूक्ष्मास्ते पुद्गला निर्जरापुद्गलाः प्रज्ञप्ता हे श्रमण हे आयुष्मन् गौतम भगवता कृतं संबोधनमेतत् सर्वलोकमपि ते एवं रूपा अत्यंत
सूक्ष्माः पुद्गला अवगाह्य तिष्ठंति न तु बादररूपा अन्यथा सांव्यवहारिकप्रत्यक्षविरोधप्रसक्तेः सर्वलोकस्पर्शिनस्ते निर्जरापुद्गलास्ततः यम
पि प्रश्नः पुनरपि नेरइयाणं भंते इत्यादि नैरयिकास्तावन्मान् निर्जरापुद्गलाहा रयंतीति किं पुद्गलानां तत्र सामग्रीवशाल्लोके विचित्रपरिणमनस्व
भावत्वात् आहाररूपतयापि तेषां परिणमनसंभवात्केवलमेतत् दृष्टं व्यमिति नैरयिका जानंतीत्यादि प्राकृतत्वात् क्रियाहेतुत्वा
पि वर्तमानतालायमर्थः जानंतः पश्यंत आहारयंति उताजानंतो पश्यंत इति भगवानाह अजानंतोऽपश्यंत इ
ति कस्मादिति चेदुच्यते तेषामतिसूक्ष्मतया चक्षुरादिपथातीतत्वात् । नैरयिकाणां च कार्मणशरीरपुद्गलालंबनावधिज्ञान
विकलत्वात् एवमसुरादिविषयाण्यपि सूत्राणि तावद्वाच्यानि यावत् तिर्यक्पंचे ंद्रियसूत्रं मनुष्यसूत्रे सन्निहितायाय इति संज्ञिनाभूता संज्ञिभूताः
संज्ञित्वं प्राप्ता इत्यर्थः तद्व्यतिरिक्ता असंज्ञिभूताः संज्ञित्वं प्राप्ता इत्यर्थः तद्व्यतिरिक्ता असंज्ञिभूताः संज्ञी चेह विशिष्टावधिज्ञानी परिगृह्यते यस्य त
कार्मणशरीरपुद्गला विषयतां व्रजंति शेषं सुगमं वेमाणिया णं भंते मायी मिच्छादिट्ठी इत्यादि माया तृतीयः कषायः सा च शेषकषायाणामुपलक्ष
णं माया विद्यते येषां ते मायिनः उत्कटरागद्वेषा इत्यर्थः ते च ते मिथ्यादृष्टयश्च मायिमिथ्यादृष्टयस्तद्रूपा उपपन्नकास्तत्र मायिसम्यग्दृ
ष्ट्युपपन्नका इह मायिसम्यग्दृष्ट्युपपन्नकग्रहणेन नवमग्रैवेयकपर्यंताः परिगृह्यंते यद्यप्यारातीया अपि कल्पा ग्रैवेयकेषु च सम्यग्दृष्ट
यो देवाः संति तथापि तेषामवधिर्न कार्मणशरीरपुद्गलविषय इति मायिमिथ्यादृष्ट्युपपन्नका इत्युपमानतो मायिमिथ्यादृष्ट्युपपन्नकग्रहणेन

ज्यात् यद्व्रमायिसम्यग्दृष्ट्युपपन्नकास्ते उत्तरत्र गतास्तेपि द्विविधास्तद्यथा अनंतरोपपन्नकाश्च अनंतरमध्यवक्षानंतरोपपन्नकाः अनंतरोपपन्नकाः प्रथमसमयो
पपन्ने प्रथमसमयवर्त्तिन इत्यर्थः परंपरोपपन्नकाः परंपरोपपन्नकास्तु अनंतरं द्वित्र्यादिसमयवर्त्तिन इत्यर्थः तत्रानंतरोपपन्नका न जानंति न पश्यंति तथा
मेकसामायिकोपयोगसंभवाद पर्याप्तत्वाच्च परंपरोपपन्नका अपि द्विविधाः पर्याप्ताश्चापर्याप्ताश्च तत्रापर्याप्ता न जानंति न पश्यंति अपर्याप्तत्वेन सम्यगुपयोगा
संभवात् पर्याप्ता अपि द्विविधा उपयुक्ता अनुपयुक्ताश्च तत्रानुपयुक्ता न जानंति न पश्यंति सामान्यरूपतया वा विशेषरूपतया वा परिच्छेदस्याभावात् अनंतरोक्त
उपयुक्ता अनाकारोपयुक्ताः जानंति पश्यंति चेति वक्तव्यं यमित्युक्तं भवति इहावधिज्ञानविषयचिंतायामिदं सूत्रं संभवति यद्धि कस्मादव
लोकोपलक्षणं पलियं अस्याप्यर्थः कर्माद्याणि कर्म्मशरीरद्रव्याणि पश्यंतु ह्यवताल्लोकस्याप्यसंख्येयानि भागान्यपश्यंति अनुत्तर
सुराश्च संपूर्णां लोकनाडीं पश्यंति संभिन्नलोकनालिं पश्यंतीति अनुत्तर शदवाइ तिवचनात् तत्र उपयुक्ता जानंति तथावधिज्ञाने
नतान् निर्ज्जराणुद्गलानिति आहारयंतीति च सर्वत्रापि लोमाहारत एव तिप्रतिपन्नद्यंइंद्रियाधिकारादयमपिप्रश्नः त अद्दाय
पेहमाणइत्यादि अद्दायमिति आदर्शं पेहमाणइति प्रेक्षमाणाम् उप्यः किमादर्शं प्रेक्षते आत्मानं अत्मानंआत्मानं
आत्मवाच्य शरीरमिति प्रश्नयति तत्र पतिभागमिति प्रतिभागं प्रतिबिंबं भगवा नाह आदर्शं तावत्प्रेक्षते एव तत्र स्वरूपस्य यथावस्थिततया
तेनोपलंभात् आत्मानं आत्मशरीरं तु नैव पश्यति तस्य तत्राभावात् स्वशरीरं हि स्वात्मनि व्यवस्थितं नादर्शे ततः कथमात्मशरीरं तत्र पश्येदिति प्रतिभा
गं स्वशरीरस्य प्रतिबिंबं पश्यति अथ किमात्मकं प्रतिबिंबं उच्यते छायापुद्गलात्मकं तथाहि सर्वमेंद्रियकं वस्तु स्थूलं चयापचयधर्म्मकं रश्मिव
च्छायापुद्गलाः छायाक्रियांते तत्र छायापुद्गलाः प्रत्यक्षत एव सिद्धाः सर्वस्यापि स्थूलवस्तुनः छाया अध्यक्षतः प्रतिप्राणिप्रतीतेः अ
न्यच्चयदि स्थूलवस्तुव्यवहितं तयाऽनवस्थितं तथा वा तादर्शादिषु वगादरश्मिनवतितेन तत्रतन्नूच्यते तस्मादवसीयते संति छायापुद्गला इति ते
च छायापुद्गला प्रत्यक्षमपश्रीवशाद्विचित्रपरिणमनस्वभावास्ते यदा हि तेछायापुद्गलादिवावस्तुन्यनास्वरंप्रतिगताः संतः सूम्नंवं धिः ड्याकारमादिवशाणाः

श्यामरूपतया परिणमंत इति शिवरूपाणां पत्रवृक्षमरतिदिवा मस्सर्यकरनिकरनिशितवांशुखातप्रत्यक्षत एव सिद्धं नएवछायापरमा
णव आदर्शादि इव्यपुहुरइव्याप्रतिगताः संतः सूम्नंवंधि इव्याकारमादधानाः श्चांहरूप्पःसूम्नंवंधिनिझ इतिकृष्णोनीलःसितः पीतोवानदाताःपरि
णमंते पतदप्यादर्शादिषु प्रसक्तःसिद्धं ततो यः क्षतरूपत्वे पि प्रमत्तछायायापरमाणव आदर्शमुपसंकम्य स्वदेहवर्णन ताप्सदेहवर्ण्णतया
स्वदेहाकारतया च परिणमंते तेषां तत्रोपलब्धिर्न शरीरस्य तेन प्रतिबिंबशद्ववाच्या अत उक्तं न शरीरं पश्यति किंतु प्रतिभागमिति तेन चैतन्नं
नीषिकाविहुं लितं यतनं कमणगामसामान्यादिया छाया अत्रानुगता निसितुकालालाभावदवनाशुरगयामादह्वस्पाशुणयथाक आंवहि
संतताद्हावयवादह्वं तिसंकमता तत्मिनिनुवलहीपगामहिगानदयतः मिंम्नलटीकाकारोप्याह यस्माज्जर्वमेवहि ऐंद्रियकं स्थू
लद्रव्यं चयापचयधर्म्मकं रश्मिवच्च भवति यतश्चादर्शादिछायास्थूलस्य दृश्यते अवगाढ रश्मिनः न वादर्शनरगावगाढरश्मिनः
स्थूलद्रव्यस्यकस्यचिद्दर्शनं भवति न चांतरितं दृश्यते किंचित्तु अति इरस्त्यावासतः पलियागं प्रतिलागंदहतिप्रश्यतीं
तिएवमसिमणपादिविषयाण्यपिचहस्त्रत्राणिभावनीयानि सुगमत्वात् एवं असिंदहमाणेमपस्तइकिं असिंदहइअन्नाणं
दहइ पलिकागं दहइ गोयमा नोअसिंदहइ इत्यादि इहनिर्ज्जरापुद्गला वक्षनामिंद्रियविषयानवंति तेषामपीन्द्रियत्वादि
त्युक्तमतःमिंद्रियप्रस्तावादिदमप्यतीन्द्रियविषयं सूत्रमाह कंवलसाडएणंभंते इत्यादि कंवलशाटकःकंवलरूपंशाटकःकंवल
शाटक इति व्युत्पत्तेः आवेष्टितः परिवेष्टितोगाढतरं संवेष्टितः एवं भूतः सन् यावन्तमवकाशांतरं यावन्तं आकाशप्रदेशमित्यर्थःस्पृ
शट्ठवगाह्यतिष्ठति विरल्लिएवीति विरल्लितोपि विरलीकृतोपि तावदेवावकाशांतरं तावत एवाकाशप्रदेशान् स्पृष्ट्वा तिष्ठति भगवानाह हं
ता गोयमा इत्यादि हंतेति प्रत्यवधारणे एवमेवेतत् गोतमयत् कंवलसाडएणमित्यादिना तदेवं पाषंडसंस्कृपार्श्वःयावत एवाकाशप्रदेशान्
संवेष्टितः सन् कंवलशाटकोवगाह्यावतिष्ठतेतावतएवाकाशप्रदेशान् वितरीकृतोप्यवगाह्यावतिष्ठते तवलघनप्रतरमात्रताविशे

प्रज्ञाप० वृत्तिः॥

ष्टः प्रदेशासंख्यात्वात् यत्रापि तुल्यात्मकस्याय सर्वात्मनाऽपि तत्र पदमधिकृत्य ऊर्ध्वं लघुमध्यप्रमाणानन्तप्रदेशाकोडित्वमहत्त्वं मितं मिविता वि इ छिय
फुसइ एवमाइ इति एवं सूत्राणि सूत्रमपि भावनीयं आगासथिग्गलेणं भंते इत्यादि आकाशथिग्गलं लोकः स हि महतो बहिराकाशस्य वितत पट
स्य थिग्गलमिव प्रतिभाति तदंत केन स्पृष्टो व्याप्तः एतत् सामान्येन स्पृष्टमेतदेव विशेषतः प्रश्नयति कतिभिः कियत्संख्याकैः कायैः स्पृष्टः वा
व्याप्तः एकान्तरतो द्योतनार्थः प्रकारान्तरेण सामान्याद्विशेषतः तान् कायान् प्रत्येकं पृच्छति किं धम्मत्थिकाएणं फुडे इत्यादि भगवानाह
गोतम धर्मास्तिकायस्य सर्वात्मना तत्रावगाढत्वात् अत एव तेनाधर्मास्तिकायस्य देशेन स्पृष्टो यो हि येन सर्वात्मना व्याप्तो न स तस्यैव दे
शेन व्याप्तो भवति विरोधात् प्रदेशैश्च व्याप्तः सर्वेषामपि धर्मास्तिकायप्रदेशानां तत्रावगाढत्वात् एवमधर्मास्तिकायविषयेऽपि निर्वचनं वा
च्यं तथा आकाशास्तिकायेन न सकलेन स्पृष्टो आकाशास्तिकायदेशमात्रत्वाल्लोकस्य किंतु देशेन व्याप्तः प्रदे
शैश्च पृथिव्यादयोऽपि सूक्ष्माः सकललोकापन्ना वर्तन्ते ततस्तैरपि सर्वात्मना व्याप्तः तसकाएणं सिय फुडे इति यदा
केवली समुद्घातगतः सन् चतुर्थसमये वर्तते तदा त्रसप्रदेशैः सकललोकापूरणाय स्पृष्टः केवलिनस्त्रसकायत्वात्
शेषकालं तु न स्पृष्टः सर्वत्र त्रसकायानामसंभवात् एवं जंबूद्वीपादिविषयाण्यपि सूत्राणि भावनीया
नि नवरं बहिः पुष्करवरार्द्धचिंतायां अद्धासमएणं नो फुडे इति अद्धासमयो ह्यर्द्धतृतीयद्वीपसमुद्रान्तर्वर्त्ती न बहिरित्थं धर्मसंग्रहणिटीका
यां भावितं ततो बहिर्द्वीपसमुद्राणामद्धासमयस्पर्शनप्रतिषेधः जंबूद्दीवे लवणे गाहा सर्वद्वीपसमुद्राणामभ्यंतरवर्त्ती जंबूद्वीपस्तत्परिक्षे
पी लवणसमुद्रस्तदनन्तरं धातकीखंडाभिधानो द्वीपस्ततः कालोदः समुद्रः तदनन्तरं पुष्करवरो द्वीपः अत ऊर्ध्वं द्वीपसदृशनामानः समुद्राः ततः
पुष्करवरसमुद्रः तदनन्तरं वरुणवरो द्वीपो वरुणोदः समुद्रः क्षीरवरो द्वीपः क्षीरोदः समुद्रः घृतवरो द्वीपो घृतोदः समुद्रः इक्षुवरो द्वी
प इक्षुवरः समुद्रः नंदीश्वरसमुद्रः एते अष्टावपि समुद्रा एकप्रत्यवताराः एकैकरूपा इति भावः अत ऊर्ध्वं द्वीपाः समुद्राश्च त्रिप्रत्यवतारा १२७

स्तद्यथा अरुण इति अरुणवरोऽरुणवरावभासः कुंडलः कुंडलवरः कुंडलवरावभासः रुचको रुचकवरो रुचकवरावभासः इत्यादि एषवा
चकः नंदीश्वरसमुद्रानंतरमरुणो द्वीपोऽरुणः समुद्रस्ततोऽरुणवरो द्वीपोऽरुणवरः समुद्र इत्यादि कियंतः स्वभूनामग्राहं द्वीपकं शक्यंत
ततस्तन्नामसंग्रहमाह आभरणवत्थेत्यादि गाथाद्वयं यानि कानिचिदाभरणनामानि हारार्द्धहाररत्नावलिकनकावलिप्रभृतीनि यानि च वस्त्रनामा
नि चीनांशुकप्रभृतीनि यानि च गंधनामानि कोष्ठपुटादीनि यानि चोत्पलनामानि जलरुहचंद्रोद्योतप्रभृतीनि यानि च तिलकप्रभृतीनि वृक्षनामानि या
नि च पद्मनामानि शतपत्रसहस्रपत्रप्रभृतीनि यानि च पृथिवीनामानि पृथिवीशर्करावालुकादीनि यानि च नवानां निधीनां चतुर्दशा
नां च चक्रवर्तिरत्नानां क्षुल्लहिमवदादीनां वर्षधरपर्वतादीनां पद्मादीनां ह्रदानां गंगासिंधुप्रभृतीनां नदीनां कच्छादीनां विजयानां माल्यवदादी
नां वक्षस्कारपर्वतादीनां सौधर्मादीनां कल्पानां शक्रादीनामिंद्राणां देवकुरूत्तरकुरुमंदराणामावासानां शक्रादिसंबंधिनां मेर्वा
प्रत्यासन्नादीनां क्षुल्लहिमवदादिसंबंधिनां कूटानां कृत्तिकादीनां चंद्रादीनां च नामानि तानि सर्वाण्यपि द्वीपसमु
द्राणां त्रिप्रत्यवताराणि वक्तव्यानि तद्यथा हारो द्वीपो हारः समुद्रः हारवरो द्वीपो हारवरः समुद्रः हारवरावभासो द्वीपो हार
वरावभासः समुद्रः इत्यादिना प्रकारेण त्रिप्रत्यवतारा भावयितव्या यावत् सूर्यो द्वीपः सूर्यः समुद्रः सूर्यवरो द्वीपः सूर्यवरः समुद्रः सू
र्यवरावभासो द्वीपः सूर्यवरावभासः समुद्रः उक्तं च जीवाभिगमचूर्णौ अरुणादीद्वीपसमुद्रास्त्रिप्रत्यवताराः यावत् सूर्यवरावभासः समुद्रः
ततः सूर्यवरावभासमपरिक्षिप्य देवो द्वीपस्ततो देवः समुद्रः तदनन्तरं नागो द्वीपो नागः समुद्रः ततो यक्षो द्वीपो यक्षः समुद्रः ततो भूतो द्वीपो भू
तः समुद्रः स्वयंभूरमणो द्वीपः स्वयंभूरमणः समुद्रः एते पंच देवादयो द्वीपाः पंच देवादयः समुद्रा एकरूपा न तु त्रिप्रत्यवताराः उक्तं च जीवाभि
गमचूर्णौ एते पंच द्वीपाः पंच समुद्रा एकप्रकारा इति जीवाभिगमसूत्रेऽप्युक्तं देवे नागे जक्खे भूए य सयंभूरमणे य एक्केक्के चेव भाणियव्वे
तिपडोयारं नत्थि इति सर्वमाकाशथिग्गलशब्देन लोकः पृष्टोऽधुना लोकशब्देनैव तं पिपृच्छिषुराह लोएणं भंते किणा फुडे इत्यादि पाठ

सिद्धं नवरं से णं अजीवदव्वदेसे इति सूत्रं अलोकः एकोऽजीवद्रव्यदेश आकाशास्तिकायस्य देश इत्यर्थः परिशेषद्रव्यकायाभावतस्तु लोका-
काशान्नत्वात् अगुरुलघुकोऽमूर्तत्वात् अनंतैरगुरुलघुकगुणैः संयुक्तः प्रतिप्रदेशं स्वपरभेदभिन्नानामनंतानामगुरुलघुपर्या-
याणां भावात् किंप्रमाणः सोऽलोक इति विवदिते आह सर्वाकाशमनंतभागोनं लोकाकाशमात्रखंडहीनं सकलाकाशप्रमाण इति भावः
॥ इति श्रीमलयगिरिविरचितायां प्रज्ञापनाटीकायामिंद्रियपदस्याद्योद्देशकः प्रथमः समाप्तः ॥ ॥ व्याख्यातः प्रथमोद्देशकः सम्प्रति
द्वितीय आरभ्यते तत्रेदमादावर्थाधिकारसंग्राहकं गाथाद्वयं ॥ इंदियउवचय इत्यादि प्रथममिंद्रियाणामुपचयो वक्तव्यः उपचीयते
उपचयं नीयते इंद्रियमनेनेत्युपचयः इंद्रियप्रायोग्यपुद्गलग्रहणमिं- द्रियपर्याप्तिरित्यर्थः ततस्तदनंतरं निर्वर्तना वक्तव्या निर्वर्तना नाम
बाह्याभ्यंतररूपाया निर्वृत्तेराकारमात्रस्य निष्पादनं ततस्तदनंतरं सा निर्वर्तना कतिसमया भवतीति प्रश्ने असंख्येयाः समया अस्याः
निर्वृत्तेर्निर्वर्तनायां ततः इंद्रियाणां लब्धिस्तदावरणकर्मक्षयो- पशमरूपा वक्तव्या ततस्तदुपयोगाद्धा तदनंतरमल्प-
बहुत्वचिंतायामेतेषु सर्वस्तोका सर्वस्यावजघन्योपयोगाद्धा विशेषाधिका वक्तव्या ततः अवग्रहणा इत्यवग्रहणपरिच्छेदो वक्तव्यः
स च परिच्छेदोऽपायादिलक्षणोऽपि भवति तदनंतरमपायो वक्तव्यस्तत ईहा तदनंतरं व्यंजनावग्रहश्चार्थावग्रहश्च द्विविधोऽपि वक्तव्यस्तद्विश-
दश्च वक्तव्यः तदनंतरं द्रव्येंद्रियभावेंद्रियसूत्रं अतीतानागतबद्धपुरस्कृतानि द्रव्येंद्रियाणि तदनंतरं भावेंद्रियाणि च चिंतनीयानि तत्र यथोद्देशं
निर्देश इति न्यायात् प्रथममिंद्रियोपचयसूत्रमाह ॥ कइविहे णं भंते इंदियोवचए पण्णत्ते इत्यादि सुगमं नवरं नेरइयाणं कइ इंदिया इत्यादि य-
स्य नैरयिकादेर्यति यावंतीन्द्रियाणि संभवंति तस्य तति विधस्तावत्प्रकार इंद्रियोपचयो वक्तव्यः तत्र नैरयिकादीनां स्तनितकुमारपर्यवसानानां पंच-
विधः पृथिव्यप्तेजोवायुवनस्पतीनामेकविधः द्वींद्रियादीनां द्विविधस्त्रींद्रियादीनां त्रिविधश्चतुरिंद्रियाणां चतुर्विधः तिर्यक्पंचेंद्रियमनुष्यव्यंतर-
ज्योतिष्कवैमानिकानां पंचविधः क्रमश्चैवं स्पर्शनरसनघ्राणचक्षुःश्रोत्राणीति एवमिंद्रियनिर्वर्तनादिसूत्राण्यपि विवदितव्यानि प्रायः सुगमत्वात् नवरं

इंदियउवओगद्धा इति यावंतं कालमिंद्रियोपयुक्त आस्ते तावान् काल इंद्रियोपयोगाद्धा कतिविहे णं भंते इंदियओगाहणा पन्नत्ता इति कतिविधं
कतिप्रकारं भदंत इंद्रियैरवग्रहणं परिच्छेदः प्रज्ञप्तं एतच्च सामान्यतः पृष्टं सामान्यं च विशेषनिष्ठमतोऽपायादिविशेषविषयाणि सूत्राण्याह कति-
विहे णं भंते इंदियअवाए पण्णत्ते इत्यादि तत्रावग्रहज्ञानेनावगृहीतस्य ईहाज्ञानेन ईहितस्यार्थस्य निर्णयरूपो योऽध्यवसायः सोऽपायः
सोइंदियअवाए एववायं इत्यादि ह्यपायः अवधारणात्मको निर्णयो वा इति भावः ईहा इति ईहा विचारणा मीमांसा सद्भूतार्थपर्यालोचनरूपा चे-
ष्टा इत्यर्थः किमुक्तं भवति अवग्रहादुत्तरकालमपायात्पूर्वं सद्भूतार्थविशेषोपादानाभिमुखोऽसद्भूतार्थविशेषपरित्यागाभिमुखः प्रायो अत्र मधु-
रत्वादयः शंखादिशब्दधर्मा दृश्यंते न कर्कशनिष्ठुरतादयः शार्ङ्गा- दिशब्दधर्मा इत्येवंरूपो मतिविशेष ईहा आह च भाष्यकृत् भूयाभूयवि-
सेसादाणच्चायाभिमुहमीहा ॥ कइविहे णं भंते उग्गहे पण्णत्ते तंजहा वंजणो- ग्गहे अत्थोग्गहे य इति अवग्रहो द्विविधः अर्थावग्रहो व्यंजनावग्र-
हश्च तत्र अवग्रहः अर्थस्यावग्रहोऽर्थावग्रहः अनिर्देश्यसामान्य- मात्ररूपार्थग्रहणमिति भावः आह च नंद्यध्ययनचूर्णिकृ-
त् सामन्नस्स रूवाइविसेसणरहियस्स अनिद्देसस्स अवग्गहणं अवग्गहो इति तथा व्यज्यतेऽनेनार्थः प्रदीपेनेव घट इति व्यंजनं
तच्चोपकरणेंद्रियस्य शब्दादिपरिणतद्रव्याणां च यः परस्परं संबं- धः संबंधे सति सोऽर्थः श्रोत्रादीन्द्रियेण व्यंजितुं शक्यते नान्यथा ततः
संबंधो व्यंजनं आह च भाष्यकृत् वंजिज्जइ जेणत्थो घडो व्व दीवेण वंजणं तं च उवगरणिंदियसद्दाइपरिणयदव्वसंबंधो व्यंजनेन संबंध-
नावग्रहणं संबध्यमानस्य शब्दादिरूपस्यार्थस्याव्यक्तरूपः परिच्छेदो व्यंजनावग्रहः अथवा व्यज्यते इति व्यंजनानीति कृत्वा व्यंजनमिति वचनात् कर्म-
ण्यनट् व्यंजनानां शब्दादिरूपतया परिणतानां द्रव्याणामुपकरणेंद्रियसंप्राप्तानामवग्रहोऽव्यक्तरूपः परिच्छेदो व्यंजनावग्रहः आह प्रथमं व्यंज-
नावग्रहो भवति ततोऽर्थावग्रहस्ततः कस्मादिह प्रथममर्थावग्रह उपन्यस्तः उच्यते स्पष्टतयोपलभ्यमानत्वात् तथाह्यर्थावग्रहः स्पष्टरूपतया स-
र्वैरपि जंतुभिः संवेद्यते शीघ्रतरगमनादौ सकृदुपलब्धे किंचिद्दृष्टं न परिभावितं सम्यगिति व्यवहारदर्शनात् अपि चार्थावग्रहः सर्वे-

प्रज्ञाप०वृत्तिः॥

द्रियमनोभावी व्यंजनावग्रहस्य चरमसमयभाव्यर्थावग्रहरूपः संभवति व्यंजनावग्रहादूर्द्धमर्थावग्रह इति क्रमप्राप्तत्वात् प्रथमं व्यंजनावग्रहस्वरूपं प्रति
पिपादयिषुः प्रश्नं कारयति कतिविधो व्यंजनावग्रहः प्रज्ञप्त इति व्यंजनमुपकरणेंद्रियस्पर्शनादिपरिणतद्रव्याणां परस्परं संबंधस्तस्य
श्च प्राक्तनतनुर्व्याख्यातमेव श्रोत्रादीनामिंद्रियाणां व्यंजनावग्रहा नयनमनसोरप्राप्यकारित्वात् न प्राप्यकारिता नंदीटीकायां प्रदर्शि
तेति नेह प्रदर्श्यते अर्थावग्रहः षड्विधः सोइंदियअत्थोग्गहे इत्यादि श्रोत्रेंद्रियेणार्थावग्रहो व्यंजनावग्रहानंतरकालमेकसामायिक
मनिर्देश्यसामान्यमात्रार्थग्रहणं श्रोत्रेंद्रियार्थावग्रहः एवं घ्राणजिह्वास्पर्शनेंद्रियार्थावग्रहेष्वपि वाच्यं चक्षुर्मनसोस्तु व्यंजनावग्रहाभावा
त् तत्प्रथमतया प्रथममेव द्रव्यपर्यायोपेतार्थक्रियाकल्पनारहितमनि र्देश्यसामान्यमात्ररूपार्थग्रहणमर्थावग्रहो वाच्यः नोइंद्रिय
अर्थावग्रहो नाम नोइंद्रियं मनस्तच्च द्विविधं द्रव्यरूपं भावरूपं च तत्र मनःपर्याप्तिनामकर्मोदयतो यत् मनःप्रायोग्यवर्गणादलि
कमादाय मनस्त्वेन परिणमितं तत् द्रव्यरूपं मनस्तथा चाह चूर्णिकृत् मणपज्जत्तिनामकम्मोदयतो जोग्गे मण
णादव्वे घित्तुं मणत्तेण परिणामिया दव्वा दव्वमणो भण्णइ इति । भावमनो तु द्रव्यमनोवष्टंभतो जीवस्य यो मनःपरिणामः स भावमनस्तथा
चाह तद्यथापि चूर्णिकृत् जीवो दव्वमणपरिणामकिरियावं तो भावमणो किं भणियं होइ मणदव्वालंबणो जीवस्स मणवावारो
भावमणो भण्णइ इति तत्रेह भावमनसा प्रयोजनं तद्ग्रहणे द्रव्यमनसोपि ग्रहणं भवति द्रव्यमनोऽन्तरेण भावमनसोऽसंभवात् भा
वमनो विनापि च द्रव्यमनो भवति यथा भवस्थकेवलिनस्तत उक्तं भावमनसा प्रयोजनं तत्र नोइंद्रियेण भावमनसार्थावग्रहो द्रव्येंद्रियव्यापार
निरपेक्षो घटाद्यर्थस्वरूपपरिभावनाभिमुखः प्रथममेकसामायिको रूपाद्यर्थाकारादिविशेषचिंताविकलो निर्देश्यसामान्यमात्रचिंतात्म
को बोध इति नोइंद्रियार्थावग्रहः अवग्रहग्रहणं चोपलक्षणं तेन नोइंद्रियार्थावग्रहस्य साक्षादितरयोरपि उपलक्षणात् तदुपादाने विज्ञातव्यं
गतिरित्यदोषः कइविहा णं भंते इंदिया पण्णत्ता इत्यादि इंद्रियनाविंद्रियसंबंधेनागमपाठं भावितं चातुः कइ णं भंते दव्विंदिया पण्णत्ता इत्यादि इदं च १२९

द्रियसंख्याविषयं दंडकसूत्रं च पाठसिद्धं एकैकजीवविषयातीतबद्धपुरस्कृतद्रव्येंद्रियचिंतायां नैरयिकाद्यष्टावाष्टौ वा सप्तदश वा संख्येया वा
असंख्येया वा अनंता वा इति नैरयिकाः नंतरं नरकभवादुद्वर्त्य मनुष्यभवमवाप्य सेत्स्यति तस्य मानुषभवसंबंधीन्यष्टौ यः पुनरनंतरमुद्वर्त्य तिर्यक्पंचेंद्रियभ
वमवाप्य ततोनंतरं मनुष्यभवमवाप्य सेत्स्यति तस्याष्टौ तिर्यक्पंचेंद्रियभवसंबंधीन्यष्टौ मनुष्यभवसंबंधीनीति षोडश यः पुनरनंतरं नरकादुद्वृत्त्य तिर्यक्
पंचेंद्रियभवमवाप्य तदनंतरमेकं पृथिवीकायादिकभवं वा मनुष्यभवमागत्य सेत्स्यति तस्याष्टौ तिर्यक्पंचेंद्रियभवसंबंधीनि एकं पृथिवीका
यादिकभवसंबंधि अष्टौ मनुष्यभवसंबंधीनि संख्येयं कालं संसारावस्थायिनस्तु द्वींद्रियादिषु उत्पद्यमानाः पुनरसंख्येयमसंख्येयमनंतं वा कालं सं
सारे तानि तिष्ठंति ततः संख्येया असंख्येया वा अनंता वा इति सर्वार्थसिद्धसूत्रं तत्र नियमतः सिध्यति ततस्तस्याष्ट
प्याष्टौ पुरस्कृतान्यपि भवंति बद्धेंद्रियानुमानात् नैरयिकसूत्रं बद्धानि । द्वींद्रियादिप्रदेशासंख्येयकालं संसारावस्थायिनः संख्ये
यानि अनंतकालमनंतानि असुरकुमारसूत्रे पुरस्कृतान्यष्टौ वा नव वा इत्यादि तत्रासुरत्वादुद्वृत्त्यानंतरं मनुष्य
भवमवाप्य सेत्स्यतोऽष्टौ असुरकुमारादय ईशानपर्यंताः पृथिव्यादिषु तस्य तिष्ठतीति ततोऽनंतरं पृथिव्यादिषु आगतः
नंतरं पृथिव्यादिषु आगतस्तदनंतरं मनुष्यभवमवाप्य सेत्स्यति तस्य नव संख्येयादिभावना प्राग्वत् पृथिवीसूत्रे पुरस्कृतान्यष्टौ वा
नव वा इति पृथिव्यादिभ्यो यदनंतरमुद्वृत्त्य मनुष्यत्वमवाप्य सेत्स्यति तस्याष्टौ मनुष्यभवसंबंधीन्यष्टौ यस्तु अनंतरमेकं पृथिव्यादिभवम
वाप्य तदनंतरं मनुष्यभवमवाप्य सेत्स्यति तस्य नव तेजोवायवो अनंतरमुद्वृत्त्य मनुष्येषु नोत्पद्यंते ततो द्वित्रिचतुरिंद्रियाष्टनंतरं मनुष्यभवमवाप्तुमवं
तिपंचेंद्रियेषु तत्तत्रेषां पुरस्कृतान्यष्टौ नवादि तथा चाह वाचनामात्रकांतरं सार्ताण ... पुरस्कृतानि द्रव्येंद्रियाणि कस्या
पि संति कस्यापि न संतीति तत्र यस्य संति तस्यानंतमेति यस्यापि संति सोपि यस्तदनंतरभवमुद्वृत्त्य मनुष्यभवमवाप्य सेत्स्यति तस्याष्टौ यः पु
नः पुनः पृथिव्यादिकमेकं भवं तिरीतमनुष्यभवमवाप्य सिद्धिगामी तस्य नव शेषभावना प्राग्वत् सनत्कुमारादयो देवा अनंतरमुद्वृत्त्य पृथिव्यादिषु यांति किंतु

प्रज्ञाप० वृत्तिः॥

पंचेंदियत्तेतत्तानेरयिकवद्वक्तव्याः तथा वादरसणंकुमारमाहिंदबंभलोयलंतगसुक्कसहस्सारआणयपाणयआरणअच्चुयगेविज्जगदेव
स्स य जहा नेरयस्स विजयादिदेवचउष्टयस्य त्रयोः अनंतरमनंतरं मनुष्यभवमवाप्यासेत्स्यतीति तस्याप्येयः एक एव वारं मनुष्यत्वावाप्तावपि मनुष्यभवम
वाप्य सेत्स्यतीति तस्याष्टौ षोडश वा यः पुनस्तयालादेव मनुष्यत्वमनुष्यत्वं प्राप्याष्टौ मिद्विगामी तस्य चतुर्विंशतिमनुष्यत्वे अष्टौ देवत्वे अष्टौ पुनर्मनुष्यत्वेऽपि म
नुष्यत्वे अष्टाविति संख्येयानि यानि संख्येयानीति नेरयिकाणामसंख्यातत्वात् एवं वायुवनस्पतिद्वित्रिचतुरिंद्रियेष्वपि मनुष्यत्वे सियसंखेज्जा
इइ समूर्छिममनुष्याः कदाचित्सर्वथा न संति तदंतरस्य चतुर्विंशतिमुहूर्त्तप्रमाणस्य प्रागभिधानात् तत एव यदा इति समयास्त्वसद्भावेन संतिः तदा संख्येया
नि गर्भजमनुष्याणां संख्येयत्वात् यदा तु संमूर्छिमा अपि संतीति तदा असंख्येय रनिमर्वाभिमहाविमाना देवाः संख्येयाः बादराबमहाशरीर
त्वेवमतिपरिमितक्षेत्रवर्त्तित्वात् तेषां बहानिष्ठ रक्षन्तानि वातवाड्वाड़ि यानि संख्येयानि च एगमेगस्स णं भंते नेरइयस्स न
रइयत्ते इत्यादिकस्सइ अत्थि कस्सइ नत्थि इत्यादि नरकाइ द्रव्याणि नेरयिकत्वं नाभाव्यतीति तस्य नवं तियस्सु
व्यपि तथा संतीसा एपि यावह्यकवारमागामीता ताष्टो वा तोष्ट तत। शिषाद्वशाद्यदि नूवारान्नतत्र चतुर्विंशतिसंख्येयान्
वारान् आगामिनः संख्येयानीत्यादि मनुष्यत्वे चिंतायां कस्सइ अत्थि कस्सइ नत्थि इति नवक्तव्यं मनुष्यभागेन तस्यावश्यंभावित्वात् ताउ
घन्यपदे अष्टौ उत्कर्षतोऽनंतानीति वक्तव्यं विजयवैजयंतापराजितचिंतायामतीतानिंद्रियाणि न संतिकस्मादिति चेदुच्यते इह
विजयादिषु चतुर्षुगतो जीवो नियमात् नेरयिकादिषु पंचेंद्रियतिर्यग्पर्यवसानेषु तथायं तरक्षणैस्तिष्वचमध्यम
भागमिष्यतिः तथा स्वाभाव्यान्मनुष्येषु सोधर्मादिषु वाग्मिष्यतितथाविज्ञापयत्येकं वेरावानरुकर्षतः संख्येयान् अनंतानागतानि नेरयि
कस्य विजयादित्वेऽतीतानि द्रव्येंद्रियाणि न संतीत्युक्तं इत्युक्तानि अष्टौ षोडश वा विजयादिषु हि स्तनस्यानंतरतरलविनियमतो मोक्ष
गमनात् एवं यथा नेरयिकस्य नेरयिकत्वादिषु चतुर्विंशतिस्थानेषु चिंता कृता तथा असुरकुमारादीनामपि प्रत्येकं कर्त्तव्या सूत्रोक्तिसाव। १३०

नागसाधारणचमुक्षयपदर्शपरिहादवनीयालावेंद्रियसूत्राण्यपिसुगमान्येव केवलं द्रव्येंद्रियगतमालापवनामुसारेणतत्रालापवनालापयितव्या च
इति श्रीमलयगिरिविरचितायां प्रज्ञापनाटीकायां पंचदशमिंद्रियपदाख्यं पदं समाप्तं च तदेवं व्याख्यातं पंचदशमधुना षोडशमारभ्यते।
॥ ॥तस्य चायमभिसंबंधः इहानंतरपदे प्रधानबंधहेतुत्वादिंद्रियवतामेव लेश्यादिसद्भावात् विशेषत इंद्रियवतामेव लेश्यादिसद्भावा
त् विशेषत इंद्रियपरिणाम उक्तः संप्रति तु परिणामसामान्यात् प्रयोगपरिणामः प्रतिपाद्यते तत्र चेदमादिसूत्रं च कइविहे णं भंते इत्यादि
कतिविधं कतिप्रकारं णमिति वाक्यालंकारे भदंत प्रयोगः प्रकर्षः प्रयोग इत्यस्य घञंतस्य प्रयोगः परिस्पंदक्रिया आत्मव्यापार इत्यर्थः अथवा
प्रकर्षेण युज्यते व्यापार्यते क्रियासु संबध्यते वा सांपरायिकेर्यापथकर्मणा सहात्मा अनेनेति प्रयोगः पुनार्थी तिकरणे घञ् प्रत्ययः भगवा
न् इपंचदशविधः प्रज्ञप्तः पंचदशविधत्वं दर्शयति सच्चमणप्पओगे इत्यादि संतो मुनयः पदार्था वा तेषु यथासंख्यं मुक्तिप्रापक
त्वेन यथावस्थितवस्तुस्वरूपचिंतनेन च साधु सत्यं अस्ति जीवः सदसद्रूप इत्यादिरूपमाश्रयापीत्यादि तद्यथा यथावस्थितवस्तुवि
तनपरं सत्यं ततः मनश्च सत्यमनस्तस्य प्रयोगो व्यापारः सत्यमनः प्रयोगः असच्चमणप्पओगे इति सत्यविपरीतमसत्यं यथा नास्ति
जीव एकांतसद्रूपो वेत्यादि कुविकल्पनपरं तच्च तन्मनश्च तस्य प्रयोगोऽस त्यमनः प्रयोगः सच्चमोसमणप्पओगे इति सत्यमृषा सत्यास
त्यं यथा धवखदिरपलाशादिमिश्रेषु बहुष्वशोकवृक्षेषु अशोकवनमेवेदमिति विकल्पनपरं तत्र हि कतिपयाशोकवृक्षाणां सद्भावात् सत्यता
अन्येषामपि धवखदिरादीनां सद्भावादसत्यता व्यवहारनयमतापेक्षया चेयमुच्यते परमार्थतः पुनरिदमसत्यमेव यथा विकल्पितार्थायोगात्
तच्च तन्मनश्चेत्यादि प्राग्वत् तथा असच्चामोसमणप्पओगे इति यन्न सत्यं नापि मृषा तदसत्यामृषा इह विप्रतिपत्तौ सत्यां यद्वस्तुप्रतिष्ठाशया सर्वज्ञम
ताउसारेण विकल्प्यते यथा अस्ति जीवः सदसद्रूप इत्यादि तद्धि किल सत्यं परिभाषितमाराधकत्वात् यत्पुनर्विप्रतिपत्तौ सत्यां वस्तुप्रतिष्ठाशया सर्वज्ञम
तोत्तीर्णं विकल्प्यते यथा नास्ति जीव एकांतनित्यो वेत्यादि तदसत्यं विराधकत्वात् यत्पुनर्वस्तुप्रतिष्ठाशामंतरेण स्वरूपमात्रपर्यालोचनपरं यथा घटं

प्रज्ञाप०वृत्तिः॥ वक्तनात् घटस्तावत्तत्वात् गोर्यावितीयाइत्यादि चिंतनपरं तदसत्यामृषा इदं हि स्वरूपमात्रपर्यालोचनपरत्वात् न यथोक्तलक्षणं सत्यं नापि मृषेति
तदपि व्यवहारनयमतापेक्षया द्रष्टव्यमन्यथा विप्रतारणबुद्धिपूर्वकमसत्येऽन्तर्भवति अन्यथा तु सत्ये तथा तस्मात् तस्य प्रयोगः असत्यामृषामनःप्र-
योगः एवं वइपओगावि वत्तव्वा इति यथा मनःप्रयोगश्चतुर्द्धोक्तस्तथा वाक्प्रयोगोऽपि चतुर्द्धा तद्यथा सत्यवाक्प्रयोगो मृषावाक्प्रयोगः असत्यामृषावा-
क्प्रयोगः एतासु सत्यवागादयः सत्यमनःप्रवृत्तिवद्भावनीयाः प्रवृत्ता वितताइति उरालियसरीरकायप्पओगे इति औदारिकादिशब्दार्थमग्रे वक्ष्याम
औदारिकमेव शरीरं औदारिकशरीरं तदेव पुद्गलस्कन्धसमुदायरूपत्वात् उपचीयमानत्वाच्च कायः औदारिकशरीरकायस्तस्य प्रयोगः अयं च
तिरश्चो मनुष्यस्य च पर्याप्तस्य औदारिकमिश्रशरीरकायप्रयोग इति औदारिकं च तत् मिश्रं च औदारिकमिश्रं केन सह मिश्रमिति चेदुच्यते का-
र्मणेन तथा चाह निर्युक्तिकारः शस्त्रपरिज्ञाध्ययने जोएण कम्मएणं आहारेई अणंतरं जीवो तेण परं मिस्सेणं जाव सरीर-
निप्फत्ती तत्र मिश्रव्यवहारनयमिदं यद्यपि च यथा औदारिकं कार्मणेन मिश्रं तथा कार्मणमप्यौदारिकेण मिश्रं ततः कस्मा-
दौदारिकमिश्रमेवेत्युच्यते न कार्मणमिश्रमिति उच्यते इह व्यपदेशः सप्रवर्त्तनीयो येन विवक्षितार्थप्रतिपत्तिपटिष्ठा आत्रेणास्तु
पजायते अन्यथा सादृश्यापत्तितो विवक्षितार्थप्रतिपत्त्यन्ते पाश्रुपकारः कृतः स्यात् न कार्मणं च शरीरमासंसारमविच्छेदेनावस्थितत्वात् सकलसं-
सारिशरीरेषु भवति ततः कार्मणमिश्रमित्युक्ते न ज्ञायते किं तिर्यग्मनुष्याणामपर्याप्तावस्थायामभिविवक्षितमुत देवनारकाणामिति तत उत्पत्तिमाश्रि-
त्यौदारिकस्य प्रधानत्वात् कादाचित्कत्वाच्च प्रतिपक्ष विवक्षितार्थप्रतिपत्त्यर्थमौदारिकेण व्यपदिश्यते औदारिकमिश्रमिति तथा यदौदारिकशरीरी
वैक्रियलब्धिसंपन्नो मनुष्यस्तिर्यग्पंचेन्द्रियो पर्याप्तकबादरवायुकायिको वा वैक्रियं करोति तदा किलौदारिकशरीरप्रयोग एव वर्त्तमानः प्रदेशा-
न् विक्षिप्य वैक्रियशरीरयोग्यान् पुद्गलानुपादाय वैक्रियशरीरपर्याप्त्या यावन्न पर्याप्तिं गच्छति तावत् वैक्रियेण मिश्रता औदारिकस्यानयति
ष्ठानत्वा औदारिकस्य प्रारंभकतया प्रधानत्वात् व्यपदेश औदारिकमिश्रमिति न वैक्रियेणेति तथा आहारकमपि शरीरं यदा कश्चिदाहारकल- १३१

ब्धिमान् पूर्वधरः करोति तदा यद्यप्याहारकेण मिश्रत्वमौदारिकस्यापि तथाप्यौदारिकस्य प्रारम्भकतया प्रधानमिति तेन व्यपदेशप्रवृत्तिरौदा-
रिकमिश्रमिति नाहारकेणेति औदारिकमिश्रं च तत्शरीरं च तस्मादि पूर्ववत् वैक्रियशरीरकायप्रयोगो वैक्रियशरीरपर्याप्त्या पर्याप्तस्य
वैक्रियमिश्रशरीरकायप्रयोगो देवनारकाणामपर्याप्तावस्थायां मिश्रता तदानीं कार्मणेन सह वेदितव्या अत्राक्षेपपरिहारौ प्राग्वत् तथा य-
दा मनुष्यस्तिर्यग्पंचेन्द्रियो वायुकायिको वा वैक्रियशरीरी भूत्वा कृतकार्यो वैक्रियं परिजिहीर्षुरौदारिके प्रवेष्टुं यतते तदा किल वैक्रियशरीर-
बलेनौदारिकोपादानाय प्रवर्तते इति वैक्रियस्य प्रधानत्वात्तेन व्यपदेशो नौदारिकेणेति वैक्रियमिश्रमिति तथा आहारकशरीरकायप्रयो-
ग आहारकशरीरपर्याप्त्या पर्याप्तस्य आहारकमिश्रशरीरकायप्रयोग। आहारकादौदारिकं प्रविशतः एतदुक्तं भवति यदा आहारकश-
रीरी भूत्वा कृतकार्यः पुनरप्यौदारिकं गृह्णाति तदा यद्यपि मिश्रत्वमुभयनिष्ठं तथाप्यौदारिके प्रवेश आहारकबलेनेत्याहारक-
स्य प्रधानत्वात्तेन व्यपदेशो नौदारिकेणाहारकमिश्रमिति एतच्च सिद्धान्ताभिप्रायेणोक्तं कार्मग्रन्थिकाः पुनर्वैक्रिय-
स्य प्रारंभकाले परित्यागकाले च वैक्रियमिश्रमाहारकशरीरस्य प्रारंभकाले परित्यागकाले च आहारकमिश्रं न त्वेकस्यामप्य-
वस्थायामौदारिकमिश्रमिति प्रतिपन्नाः तैजसकार्मणशरीरप्रयो। गो विग्रहगतौ समुद्घातावस्थायां वा सयोगिकेवलिनस्तृतीयच-
तुर्थपञ्चमसमयेषु इह तैजसं कार्मणेन सदाव्यभिचारीति युगपत्तैजसकार्मणग्रहणं अधुना पञ्चदशप्रयोगान् जीवादिस्थानेषु चिंत-
यन्नाह जीवाणं भंते कतिविहे पओगे पन्नत्ते इत्यादि तत्र जीवपदे पञ्चदशापि प्रयोगा नानाजीवापेक्षया सदैव पञ्चदशानामपि योगानां लभ्यमान-
त्वात् नैरयिकपदे एकादश औदारिकौदारिकमिश्राहारकाहारकमिश्रप्रयोगाणां तेषामसंभवात् एवं सर्वेष्वपि भवनपतिव्यन्तरज्योतिष्कवैमानिकेषु
भावनीयं पृथिव्यादिषु वायुकायवर्जेषु एकेन्द्रियेषु प्रत्येकं त्रयस्त्रयः प्रयोगा औदारिकौदारिकमिश्रकार्मणलक्षणाः वायुकायिकेषु पञ्च वैक्रियवैक्रिय-
मिश्रयोरपि तेषां संभवात् द्वित्रिचतुरिन्द्रियाणां प्रत्येकं चत्वारः औदारिकौदारिकमिश्रकार्मणासत्यामृषाभाषा च शेषास्तु सत्यादयो भाषास्तेषां न संभवन्ति मले

षड्गाएवर्ति॥

शुश्रसत्यमोसवइतिवचनात् पंचेंद्रियतिर्यग्योनिकानां त्रयोदश आहारकाहारकमिश्रयोगद्वयमसंभवादसंयतदेशसंयमिमासंभवात् म
नुष्येषु पंचदशापि मनुष्याणां सर्वभावसंभवात् अथ तान् जीवादिषु पदेषु नियतप्रयोगतां विशिनष्टि मा२ जीवाणं नंतइत्यादि ३ प्रथम
नां नष्टत्वादिविघाततन्वतः किंचित्तत्र नास्ति अतोऽत्र नारकत्वप्रतिपातात् नारकत्वप्रतिपत्तिः अनारकेभ्यो नोपपद्यते नरकानारकेभ्यस्ततः किंचिद् एवमग्रे
इत्यादि एवं यावद्वैमानिकेऽपि इति एवं नैरयिकादिप्रकारेण तावद्वक्तव्यं यावद्वैमानिका वैमानिकविषयं सूत्रं तच्च साक्षात् सूत्रपरिभावनीयं अथ नारकउ
द्वर्तनाविषयं नैरयिकसूत्रमाह नेरइए णं भंते इत्यादि एतदपि ऋजुसूत्रनयदर्शनतावद्वेदितव्यं तथाहि परभवायुष्कोदयमागते तत्र उद्वर्त्तते इत्युच्यते

यमगातं तेन नारकत्वेनापदिश्यमानो नारकायुःप्रथमसमयादारभ्य नारकत्वेन नारक इति नतो नैरयिकेभ्यः नैरयिक इति एवं चतुर्विंशतिदंडकक्रमेण तावद्व
क्तव्यं यावद्वैमानिकविषयं नवरं ज्योतिष्कवैमानिकविषये च्यवंत इत्यभिलापः कर्तव्यः तस्य तद्वर्तनस्य च्यवनमिति प्रसिद्धेः नवाणवाः एवं जाव वेमा
णिए नवरमित्यादि अधुना कृष्णलेश्याविषयं सूत्रमाह से नूणं भंते इत्यादि सेत्यथशब्दार्थः स च प्रश्ने नूनं निश्चितमेतत् यदुत कृष्णल
श्यो नैरयिकः कृष्णलेश्येषु नैरयिकेषूत्पद्यते तस्मात् कृष्णलेश्येभ्यो नैरयिकेभ्य उद्वर्तते कृष्णलेश्य उद्वर्तते एतदेव निश्चयदा
र्ढ्यापादनार्थं प्रकारांतरेणाह यल्लेश्य उत्पद्यते तल्लेश्य उद्वर्तते न लेश्यांतरगत इति भगवानाह हंता गोयमेत्यादि हंतेत्यनुमतावनुमतमेतत् म
मापि तत् कण्हलेसे नेरइए इत्यादि अथ कथं कृष्णलेश्य एव नैरयिक उत्पद्यते न लेश्यांतरोपेतः उत्पद्यत इति तिर्यक्पंचेंद्रिया मनुष्या वा बद्धायुष्क
तया नारकत्वेनोत्पत्तुकामा आयुषः अंतर्मुहूर्ते तिर्यगायुषि मनुष्यायुषि वा शेषे कालयंतीत्ये णांतर्मुहूर्ते शेषे आयुषि यल्लेश्येषु नरकेषूत्पत्स्यते तल्लेश्या
परिणाममनुपरिणमंति तत्तल्लेश्याः तदवस्थितिपतिताः परिणाममनुपरिणामेन नारकाः तु प्रतिसमयमुदयात् तत्र च कृष्णलेश्याः कृष्णलेश्येषु नैर
यिकेषूत्पद्यंते न लेश्यांतरयुक्ताः अथ कथं कृष्णलेश्याः कृष्णलेश्या एवोद्वर्तंते उच्यते देवनैरयिकाणां हि लेश्यापरिणाम आभवक्षयाद्भवति एव
यथा प्रागेवोपपादितं एवं नीललेश्याविषयं कापोतलेश्याविषयं च सूत्रं वक्तव्यमेवमसुरकुमारादीनामपि स्तनितकुमारपर्यवसानानां वक्तव्यं न
वरं तेजोलेश्यासूत्रं तत्रायामधिकमभिधेयं तेजोलेश्याया अपि तेषां भावात् अधुना पृथिवीकायिकेषु कृष्णलेश्याविषयं सूत्रमाह से नूणं भंते इत्यादि
इह तिर्यग्मनुष्याणां लेश्यापरिणाम आंतर्मौहूर्तिकस्ततः कदाचिद्यल्लेश्य उद्वर्तते कदाचिदन्यलेश्यांतरपरिणतोऽप्युद्वर्तते एतदुक्तं नियमाद्यल्लेश्य उत्प
द्यते न नियमतस्तल्लेश्य एवोद्वर्तते अंतमुहुत्तंमि गए अंतमुहुत्तंमि सेसए चेव लेसाहिं परिणयाहिं जीवा वच्चंति परलोयं इति वचनात् तत उक्तं सिय
कण्हलेसे उव्वट्टइ सिय नीललेसे उव्वट्टइ सिय काउलेसे उव्वट्टइ इत्यादि एवं नीललेश्याविषयं कापोतलेश्याविषयं च सूत्रं वक्तव्यं
तथा यदा भवनपतिव्यंतरज्योतिष्कसौधर्मेशानदेवाः तेजोलेश्यावंतः स्वभावात् पृथ्वीकायिकेषूत्पद्यंते तदा कियत्कालमपर्याप्तावस्था

यां तेषु तेजोलेश्यापि लभ्यते तत इदमुक्तं भवति तथा तद्भवस्वभावतया तेजोलेश्यायामुपपद्यते न वा तस्या संभवात् तेजोलेश्यासूत्रं उक्तं तेउल
लेसे उववज्जइ नो चेव णं तेउलेसे उव्वट्टइ इति यतः पृथ्वीकायिका नोपरिष्टाच्चाप्यकाति तथा अप्कायिकवनस्पतिकायिकानामपि वक्तव्यानि तेषा
मप्यपर्याप्तावस्थायां तेजोलेश्या संभवात् तेजोवायुद्वित्रिचतुरिंद्रियविषयाणि प्रत्येकं त्रीणि सूत्राणि वक्तव्यानि तेषां तेजोलेश्याया असंभवात् पं
चेंद्रियतिर्यग्योनिकमनुष्याश्च यथा आद्यासु तिसृषु लेश्यासु पृथ्वीकायिकास्तथा षट्स्वपि लेश्यासु वक्तव्याः एषामप्यनवस्थितलेश्याया
तेषामुत्पत्तिसंभवादुत्पत्तिगते केकलेश्याविषये विवर्तनायाः षण्णां विकल्पानां संभवात् सूत्रपाठश्चैवं से नूणं भंते कण्हलेसे पंचेंद्रियतिरिक्ख
जोणिए कण्हलेसेसु पंचेंद्रियतिरिक्खजोणिएसु उववज्जइ कण्हलेसे। उव्वट्टइ यल्लेसे उववज्जइ तल्लेसे उव्वट्टइ हंता गोयमा कण्हल
लेसे पंचेंद्रियतिरिक्खजोणिए कण्हलेसेसु पंचेंद्रियतिरिक्खजोणिएसु उववज्जइ सिय कण्हलेसे उव्वट्टइ सिय नीललेसे
उव्वट्टइ सिय काउलेसे उव्वट्टइ सिय तेउलेसे उव्वट्टइ सिय पम्हलेसे उव्वट्टइ सिय सुक्कलेसे उव्वट्टइ सिय ज
ल्लेसे उववज्जइ तल्लेसे उव्वट्टइ एवं नीलकापोततेजःपद्मशुक्ललेश्याविषयाण्यपि सूत्राणि वक्तव्यानि वाणमंतरा जहा अ
सुरकुमारा इति जल्लेसे उववज्जइ तल्लेसे उव्वट्टइ इति वक्तव्या इति सर्वदेवानां लेश्यापरिणामस्याभवक्षयाद्भावात् एवं लेश्या
परिसंख्यानपरितो ज्योतिष्कवैमानिकविषयाण्यपि सूत्राणि वक्तव्यानि नवरं चयंतीत्यभिलपनीयं तदेवमेकैकलेश्याविषयाणि च
तुर्विंशतिदंडकक्रमेण नैरयिकादीनां सूत्राण्युक्तानि तत्र कश्चिदाशंकेत प्रविरले केकनारकादिविषयाण्येतानि सूत्रकदंबकं यदा समुदायेनाभि
न्नलेश्याकाः समुदायगता उत्पद्यंते तदान्यथापि वस्तुगतिर्भवेदिति केकगतधर्मापेक्षया समुदायधर्मस्य क्वचिदन्यथापि दर्शनात् तत एतदाशंकापनो
दाय द्विषयं यावत्यो लेश्याः संभवंति तेषां युगपदनावल्लेश्याविषयमेकैकं सूत्रमनंतरोदितमर्थमेव प्रतिपादयति से नूणं भंते कण्हलेसे नीलले
से काउलेसे नेरइए कण्हलेसेसु नीललेसेसु काउलेसेसु नेरइएसु उववज्जइ इत्यादि समस्तं सुगमं प्रति कृष्णलेश्यादि नैरयिकसकाव

प्रज्ञाप० वृ० ॥

ज्ञानदर्शनविषयक्षेत्रपरिमाणतारतम्यमाह ॥ कण्हलेसे णं भंते इत्यादि कृष्णलेश्यो भदन्त नैरयिकोऽपरं कृष्णलेश्याकं प्रणिधायावध्य-
वधिज्ञानेन सर्वतः सर्वासु दिक्षु समभिलोकमानो निरीक्षमाणः कियन्तं क्षेत्रं जानाति कियत् क्षेत्रमवधिदर्शनेन पश्यति भगवानाह गोत-
म नो बहुकं क्षेत्रं जानाति नापि बहुकं क्षेत्रं पश्यति किंतु स्तोकं भवति अपरं कृष्णलेश्याकं नैरयिकमपेक्ष्य न विवक्षितः कृष्णलेश्याको योग्यतानुसारेणापि विशुद्धो-
ऽपि नैरयिकोऽतिप्रभूतं क्षेत्रमवधिना जानाति पश्यति एतदेवाह नो दूरमपि विप्रकृष्टं क्षेत्रं जानाति नाप्यतिविप्रकृष्टं क्षेत्रं पश्यति किंचिदित्वरमेव स्वल्प-
मेवाधिकं क्षेत्रं जानाति इत्वरमेवाधिकं क्षेत्रं पश्यति एतच्च सूत्रं समाने पृथिवीके कृष्णलेश्यनैरयिकविषयमवसेयमन्यथा व्यभिचारसंभवात्तथाहि सप्त-
मपृथिवीगतः कृष्णलेश्याको नैरयिको जघन्यतो गव्यूतार्द्धं जानाति उत्कर्ष- तो गव्यूतं षष्ठपृथिवीगतः कृष्णलेश्याको जघन्यतो गव्यूतं उत्क-
र्षतः सार्द्धं पञ्चमपृथिवीगतः कृष्णलेश्याको जघन्यतः सार्द्धं गव्यूतमुत्कर्ष- तः किंचिदूनं द्विगव्यूतं ततो द्विगुणत्रिगुणाधिकक्षेत्रसंभ-
वाद्भवत्यधिकृतसूत्रस्याव्यभिचारः यथा समाने पृथिवीके अपरं कृष्णले- श्याकं नैरयिकमपेक्ष्यातिविशुद्धोऽपि कृष्णलेश्याको-
नैरयिको मनागधिकं पश्यति नातिप्रभूतं तथाह दृष्टान्तेनोपपादयितुमाह। से केणट्ठेणं भंते इत्यादि इयमत्र भावना यथा समभूमिभाग-
व्यवस्थितः पुरुषः किंचिद्विक्षितः सर्वतः चक्षुर्निर्मलत्वात् मनागधिकं पश्यति न प्रभूततरं तथा विवक्षितोऽपि कश्चित्कृष्णलेश्याको नैरयिकः
स्वस्थितिकानुसारेणातिविशुद्धोऽपि समानपृथिवी समानपृथिवीकमपरं कृष्णलेश्याकं नैरयिकमपेक्ष्य यदि परं मनागधिकं पश्यति न तु प्रभूततरं
अत्र समभूतलभागस्थानीया समानपृथिवीसमानाधिकृष्णलेश्याकत्वं चक्षुःस्थानीयमवधिज्ञानमेतावतैतदपि सिद्धमिति यथा समभूतलभागव्यवस्थितः समन्तादवलो-
कमानो नागतं प्रेक्षमाणः पश्यति प्रभूततरं पश्यति तथा पञ्चमपृथिवीगतः स्वस्थितिकानुसारेणातिविशुद्धः कृष्णलेश्याको विवक्षितो नैरयिकः सप्तमपृथि-
वीगतं कृष्णलेश्याकमतिमन्दानुभागावधिं नैरयिकमपेक्ष्यातिप्रभूतं पश्यति मनागधिकं द्विगुणक्षेत्रसंभवात् संप्रति नीललेश्याकविषयसूत्रमाह ॥ नी-
ललेसे णं भंते इयं पणिहाए इत्यादि अक्षरगमनिका सुगमा नवरं वितिमिरतरागं क्षेत्रं जाणइ इति विगतं तिमिरं तिमिरसद्भावो यस्मात्तत् वितिमिरं २४६

इदं वितिमिरमिदं वितिमिरमिदमनयोरतिशायने वितिमिरं वितिमिरं वितिमिरतरं द्वयोर्विभज्योपपदे तरप्प्रत्ययः ततः प्राकृतलक्षणात्स्वार्थिकप्र-
त्ययः पूर्वस्य च दीर्घत्वं अत एव विशुद्धतरं निर्मलतरमतीव स्फुटप्रतिभासमिति यावत् भावनाऽत्रेयं यथा धरणितलगतं पुरुषमपेक्ष्य पर्वतारूढपुरुषः सर्वतः
दूरं क्षेत्रं पश्यति तदपि प्रायः स्फुटप्रतिभासं तथा विवक्षितोऽपि नीललेश्याको नैरयिको योग्यतानुसारेण विशुद्धावधिः कृष्णलेश्याकं नैरयिकमपे-
क्ष्यातिदूरं वितिमिरतरं स्फुटप्रतिभासं च क्षेत्रं जानातीति अत्र पर्वतस्थानीया उपरितनी तृतीया पृथिवी अतिविशुद्धावस्थितिकानुसारेण नीललेश्या-
धरणितलस्थानीया अधस्तनी कृष्णलेश्या च चक्षुःस्थानीयमवधिज्ञानमिति संप्रति नीललेश्यानन्तरइयं पणिहाए इत्यादि अक्षरगमनिका सुगमा नवरं दावि-
पाणुग्रीवं इत्तिहावि पादौ द्वौ उच्चैः कृत्वा ऊर्ध्वग्रीवं अवलोक्य सर्वतः सावना क्षिप्तं यथा पर्वतस्योपरि वृक्षमारूढः सर्वतः समन्तादवलोकमा-
नो बहुतरं पश्यति स्पष्टतरं च तथा कापोतलेश्यो नैरयिकोऽपरं नीलले- श्याकमपेक्ष्य प्रभूतं क्षेत्रमवधिना जानाति पश्यति चैतदपि च
स्पष्टतरमिति इह वृक्षस्थानीया कापोतलेश्योपरितनीललेश्या तृतीया च पृथिवी चक्षुःस्थानीयमवधिज्ञानमिति संप्रति
कापोतलेश्याकतिषु ज्ञानेषु लभ्यन्त इति निरूपयितुकाम आह ॥ कण्हले- से णं भंते जीवे कइसु नाणेसु होज्जा इत्यादि सुगमं नवरं भगवाना-
ह दोसु वा तिसु वा चउसु वा नाणेसु होज्जा तत्र द्वयोराभिनिबोधिकश्रुतज्ञा- नयोस्त्रिषु आभिनिबोधिकश्रुतावधिज्ञानेषु यदि वाभिनिबो-
धिकश्रुतमनःपर्यायज्ञानेषु इहावधिरहितस्यापि मनःपर्यवज्ञानमुपजायते सिद्धप्राभृतादावनेकशः प्रतिपादनादन्यच्च विविधप्रतिज्ञानं
तदावरणक्षयोपशमसामग्रीतश्च कस्यापि चारित्रिणः प्रमत्तस्यामर्षौषध्यादिलब्धिमतः कस्यापि लब्ध्यतिशयसमुत्थितस्य मनःपर्यायज्ञानावरणक्षयोपश-
मनिमित्ता सामग्री तथा स्वरूपाध्यवसायादिलक्षणं संपद्यते न चावधिज्ञानावरणक्षयोपशमनिमित्ता ततस्तस्य मनःपर्यवज्ञानमेव भवति न तु मनःपर्य-
वज्ञानमतिविशुद्धस्योपजायते कृष्णलेश्या च संक्लिष्टाध्यवसायरूपा ततः कथं कृष्णलेश्याकस्य मनःपर्यायज्ञानसंभवः उच्यते इह लेश्यानां प्र-
त्येकमसंख्येयलोकाकाशप्रमाणान्यध्यवसायस्थानानि तत्र कानिचिन्मन्दानुभावान्यध्यवसायस्थानानि प्रमत्तसंयतस्यापि लभ्यन्ते अत एव

प्रज्ञा० वृत्तिः ॥ कृष्णनीलकापोतलेश्यासु अप्रमत्तसंयतानां गीयते मनःपर्यवज्ञानं च प्रथमतः अप्रमत्तसंयतस्योत्पद्यते ततः प्रमत्तसंयतस्यापि लभ्यत इति मन
वति कृष्णलेश्याकस्यापि मनःपर्यवज्ञानं चतुर्थं ज्ञानमिति त्रिषु वाभिनिबोधिकश्रुतावधिमनःपर्यवज्ञानेषु एवं जाव पम्हलेसे इति एवं कृष्णलेश्यावत् प्र
कारेण तावद्वक्तव्यं यावत् पद्मलेश्याः किमुक्तं भवति नीललेश्याः कापोतलेश्यास्तेजोलेश्याः पद्मलेश्याश्चोक्तप्रकारेण द्वयोस्त्रिषु चतुर्षु वा ज्ञा
नेषु भणनीयाः सव्वे वि नीललेस्से णं भंते जीवे कइसु नाणेसु होज्जा गोयमा दोसु वा तिसु वा चउसु वा नाणेसु होज्जा इत्यादि सुक्कलेस्से णं पुच्छा
तिसु वा चउसु वा केवलि सुक्कलेस्से णं भंते इत्यादि इह शुक्ललेश्यायामेव केवलज्ञानं न लेश्यांतरे ततः शुक्ललेश्याकस्यापि शुक्ललेश्यस्य वि
शेषः ३ ॥ ॥ इति श्रीमलयगिरिविरचितायां प्रज्ञापनाटीकायां लेश्यापदस्य तृतीयोद्देशकः ३ ॥ ॥ उक्तस्तृतीयोद्देशकः संप्रति च
तुर्थ आरभ्यते तत्रादावयमधिकारगाथा परिणामवण्णेत्यादि प्रथमः परिणामाधिकारो द्वितीयो वर्णाधिकारस्तृतीयो रसाधिकारश्च
तुर्थो गंधाधिकारः पंचमः शुद्धाशुद्धाधिकारः षष्ठः प्रशस्ताप्रशस्ताधिकारः सप्तमः संक्लिष्टाधिकारः अष्टम उष्णशीताधिकारो न
वमो गत्यधिकारः दशमः परिणामाधिकारः एकादशः प्रदेशप्ररूपणाधिकारो द्वादशोऽवगाहाधिकारस्त्रयोदशो वर्गणाधि
कारश्चतुर्दशः स्थानप्ररूपणाधिकारः पंचदशोऽल्पबहुत्वाधिकारः तत्र प्रथमं परिणामलक्षणमधिकारमभिधित्सुर्यथा परिणामो वक्ष्यमाणस्तथा लेश्या
प्रतिपादयति ३ कइ णं भंते सा उववन्ना उ इत्यादि इदं सूत्रं प्रागुक्तपरिणामार्थप्रतिपादनार्थं इह पुनः प्रसंगेन लेइत्यादि अथवा इदं तत्र कृष्ण
लेश्या कृष्णलेश्यायोग्यानि द्रव्याणि प्राप्य तान्यात्मावयवसंस्पर्शनासाधितद्रूपतया नीललेश्यारूपतया पुनः पुनः स्वभावतया नीललेश्या
स्वभावतयेत्यर्थः भूयो भूयः परिणमतीति योगः तत्र वर्णेन तद्रूपतया तद्वर्णतया तद्गंधतया तद्रसतया तत्स्पर्शतया सर्वथापि तत्स्वरूपतया न
नीललेश्यायोग्यानि द्रव्याणि परामृशति त्वदायोद्यातकवारं तिर्यग्मनुष्याणां ततः भवसंक्रांतौ वा कालेन वा परिणमति इदं च तिर्यग्मनुष्यानधि
कृत्य वेदितव्यं एवं गौतमेन प्रश्ने कृते भगवानाह हंता गोयमा इत्यादि हंत तत्रानुमतौ अत्र मतमेतत् गौतम कृष्णलेश्या नीललेश्यां प्राप्येत्यादि प्रा १५७

यत् इयमत्र भावना यदा कृष्णलेश्यापरिणतो जंतुस्तिर्यग्मनुष्यो वा भवांतरसंक्रांतिं चिकीर्षुर्नीललेश्यायोग्यानि द्रव्याणि गृह्णाति तदा नील
लेश्यायोग्यद्रव्यसंपर्कतस्तानि कृष्णलेश्यायोग्यानि द्रव्याणि तद्रूपतया परिणमंते लक्षणं सहकारिकारणमासाद्य नीललेश्याद्रव्यरूप
तया परिणमंते दुग्धमिव तक्रसंपर्कतस्तद्भावमापन्नास्ततः केवलनीललेश्यायोग्यद्रव्यसाचिव्यान्नीललेश्यापरिणतः सन् कालं करोति
यतो नरकसप्तत्वद्यते उक्तं च जल्लेसाइं दव्वाइं परियाइत्ता कालं करेइ तल्लेसेसु उववज्जइ इति तथा च एवं तिर्यग्मनुष्यो वा तस्मिन्नेव भवे वर्तमानो य
दा कृष्णलेश्यापरिणतः सन् नीललेश्यया भावेन परिणमते तदापि कृष्णलेश्यायोग्यानि द्रव्याणि तत्कालगृहीतनीललेश्यायोग्यद्रव्यसंपर्क-
तो नीललेश्यायोग्यद्रव्यरूपतया परिणमंते अत्रापि भवितव्यं दृष्टांतेन विभाव्य पितुः प्रथमं प्रश्नसूत्रमाह से केणट्ठेणं भंते इत्यादि सुगमं भ
गवानाह से जहानामए खीरे इत्यादि ततः लोकः प्रसिद्ध्यमानामकं गाहीमिज्जाहारं मदिरा सुरभिनाद्यादि नामकं द्रव्यं इति
देशीवचनात् तत्तं च मथितं तक्रं प्राप्य तान्यात्मावयवसंस्पर्शनाविना गंगादायमथो शुद्धं मलरहितं समालिंगिता संप्रद्यमा
नापि तथाहृपो लगाति ततः तत्रोक्तं शुद्धं च वस्त्रं विलोलं वा तद्वाने ग:करणे प्रयुक्ते मंजिष्ठादिकं प्राप्य तद्रूपतया मंजिष्ठादि
रागद्रव्यस्वभावतया एतदेव व्याचष्टे तद्वर्णतया इत्यादि सुगमं तथा कृष्णलेश्यायोग्यानि द्रव्याणि नीललेश्यायोग्यानि द्रव्याणि प्राप्य तद्रू
पतया परिणमंते इयमत्र भावना यथा क्षीरं तक्ररूपकारणमासाद्य तक्ररूपादिना भावं प्रतिपद्यते यथा वा शुद्धं वस्त्रं लक्षणकारणमासाद्य मा
मंजिष्ठादिरागद्रव्यरूपादिना भावं प्रतिपद्यते तथा कृष्णलेश्यायोग्यद्रव्यरूपकारणमासाद्य नीललेश्यायोग्यद्रव्यरूपादिना भावं प्रतिपद्यते
से एएणट्ठेणमित्याद्युपसंहारवाक्यं सुगमं एवं नीललेश्या कापोतलेश्यां प्राप्येत्यादीन्यपि चत्वारि सूत्राणि भावनीयानि नवरं सर्वस्या ले
श्याया उत्तरोत्तरा लेश्या प्रतीत्य तद्रूपतया परिणमनमुक्तमिदानीमेकैकस्या लेश्याया यावत्यो योगकर्मविशेषसमस्तलेश्यापरिणमनमाह
से नूणं भंते कण्हलेस्सा नीललेस्सं काउलेस्सं इत्यादि इदं सर्वं सुगमं नवरं इह कृष्णलेश्या नीललेश्यां वा यावत् शुक्ललेश्यां वा एकस्या लेश्यायाः

परस्परविरुद्धतया युगपदनेकलेश्यापरिणामासंभवात्, शेषाक्षरगमनिका प्राग्वत्, अत्रैवार्थे दृष्टान्तमभिधित्सुरिदमाह से केणट्ठेणं भंते इत्यादि
सुगमं नवरं यथा वैडूर्यमणिः कृष्णसूत्रउपाधिद्रव्यसंपर्कतस्तद्रूपतया परिणमते तथैव तान्यपि कृष्णलेश्याप्रायोग्याणि द्रव्याणि तत्तन्नीलादिलेश्या-
प्रायोग्यद्रव्यसंपर्कतस्तद्रूपतया परिणमन्त इत्येतावता अंशेन दृष्टान्तो न तु सर्वथा वैडूर्यमणिः स्वस्वरूपमजहानः सूत्रउपाधिद्रव्यसंबंधतस्तद्रूपा-
धिद्रव्यसंबंधतस्तदाकारमात्रतच्छायितया तद्रूपतया परिणमति तथैतान्यपि कृष्णलेश्याप्रायोग्याणि स्वस्वरूपमजहानान्येव द्रव्याणि तत्तन्नीलादिले-
श्याप्रायोग्यद्रव्यसंपर्कतस्तदाकारमात्रधारितया तद्रूपतया परिणमन्त इत्येतत्तात्पर्यं न तिरश्चां मनुष्याणां च लेश्याद्रव्याणां सामस्त्येन तद्रूपतया परिणा-
मस्यापगमात् अस्यपि नैरयिकदेवसकललेश्याद्रव्याणां मिव तिर्यग्मनुष्याणाम्   पि लेश्याद्रव्याणां सर्वथा स्वस्वरूपपरित्यागेन चिरकालमवस्थानसं-
भवात् यदुत्कर्षतोऽप्यन्तर्मुहूर्तं लेश्यापरिणामस्थितिपरिमाणं मनुष्याणामुक्तं तद्   रुद्धेत पल्योपमत्रयमपि भावतस्तद्रूपतः स्थितिसंभवात् तद-
वं तदन्यलेश्यापरिणामप्रतिषेधसूत्रं कृष्णलेश्याविषयं सत्रदृष्टम्।   मेवं नीलादिलेश्याविषयाण्यपि भावनीयानि तदन्यलेश्यां-
वक्रपरिणामप्रतिषेधसूत्राणि वक्तव्यानि तावद्यावच्छुक्ललेश्यायाणां न   वसंक्रान्तौ शेषकालं चैव लेश्याद्रव्यपरिणामं ... अधिकारादेवनैरयि-
कसंक्रान्तिरूपलेश्याद्रव्याणां न चान्यस्य स्वस्थितान्यपि तदन्यलेश्याद्रव्यसंपर्के   तदाकारमात्रं तदेवानुक्तमिति ततः उक्तः परिणामलक्षणाधिकारा-
द्धुना वर्णाधिकारमभिधित्सुराह कण्हलेसा णं भंते वण्णेणं केरिसिया पन्नत्ता इत्यादि कृष्णद्रव्यात्मिका लेश्या कृष्णलेश्याप्रायोग्यानि द्र-
व्याणीत्यर्थः तेषामेव वर्णादिसंभवात् न तु भावलेश्या तस्या अवर्णत्वात् कृष्णलेश्यातस्यापि योगान्तर्गतत्वात् तदन्तर्गता कीदृशी वर्णेन प्रज्ञप्ता भगवानाह गोय-
मा लोकप्रसिद्धा यथा नाम कोऽपि जीमूत इति वा जीमूतो बलाहकः स च वर्षाप्रारम्भसमये जलभृतो वेदितव्यः तस्यैव प्रायोऽतिकालि-
मसंभवात् इति शब्द उपमाननिर्देशवस्तुनामपरिसमाप्तिद्योतकः वा शब्द उपमानान्तरापेक्षया समुच्चये एवं सर्वत्र इति वा शब्दौ द्रष्टव्यौ अंजनं सौवीरांज-
नं रत्नविशेषो वा खंजनं दीपमल्लिकामलः स्नेहाभ्यक्तशकटाक्षघर्षणोद्भवमित्यपरे कज्जलं प्रतीतं गवलं महिषशृङ्गं तदपि त्वक्परित्यागेनान्तरे ग्राह्यं गोपसा। २४८

राणि द्रष्टव्यं तद्धि विशिष्टस्निग्धच्छविकं संभवात् जंबूफलं प्रतीतं अरिष्टकः फलविशेषः परपुष्टः कोकिलः भ्रमरः प्रतीतः भ्रमरावली भ्रमरपङ्क्तिः गज-
कलभः करिपोतः कृष्णकेसरः कृष्णबकुलः आकाशथिग्गलं शरदि मेघापान्तरालवर्त्याकाशखण्डं तद्धि अतीव कृष्णं प्रतिभासते कृष्णासो-
कः कृष्णकणवीरः कृष्णबन्धुजीवः कृष्णाशोककृष्णकणवीरकृष्णबन्धुजीवा वृक्षविशेषाः अशोकादयो हि जातिभेदेन पञ्चवर्णा भवन्ति ततः शेषवर्णव्यव-
च्छेदार्थं कृष्णग्रहणं एतावता उक्ते गौतम आह भवे एयारूवा कृष्णलेश्या वर्णेन प्रज्ञप्ता भगवानाह नायमर्थः समर्थः नायमर्थ उपपन्न इत्यर्थः कृष्ण-
लेश्या इतोऽपि किन्तु सा कृष्णलेश्या इतोऽनिष्टतरा दृष्टान्तेभ्यः अनिष्टतरिकैव वर्णेन प्रज्ञप्ता इह यस्मिन् अतिशयेन अनिष्टा अनिष्टतरा अनिष्टतरैव अनिष्टतरे-
वानिष्टतरिका अतीवानिष्टतरिकैवेति भावः इह किंचिदनिष्टमपि सुरूपतः   कान्तं भवति ततः कान्तत्वव्यवच्छेदार्थमाह अकान्ततरिकैव किंचिच्चे-
दनिष्टमपि सुरूपतया कान्तमप्यपरेषां प्रियं भवति ततः सर्वथा अप्रियत्वाभ्यु-   पगमार्थमाह अप्रियतरिकैव अत एवामनोज्ञतरिकैव वस्तुतः
स्वरूपज्ञाने मतिमनो न गच्छति अमनोज्ञानमनःप्रह्लादकत्वसंभवात्।   अमनोज्ञतरमपि किंचिन्मध्यमं भवति तत्प्रकृष्टप्रकर्षविवे-
चप्रतिपादनार्थमाह अमणामतरिकैव मनसा अम्यते गम्यते इति मणामं   यन्नेति मनआपं न मनआपं ततोऽतिशायने प्रत्ययः प्रकर्षविवक्षायां एवं-
वर्णेन प्रज्ञप्ता नीललेस्सा णं भंते इत्यादि अक्षरगमनिका प्राग्वत् नवरं भृङ्गः प-   क्षिविशेषः भृङ्गपत्रं तस्यैव पक्षिविशेषस्य पक्षः चासः
पक्षिविशेषः चासपिच्छं चासस्य पत्रं शुकस्य पत्रं श्यामा प्रियंगुः वनराजी प्रतीता उच्चंतगो दन्तरागः आह च मूलटीकाकारः उच्चंतगो दन्तरागो
अथ पारापतग्रीवा मयूरग्रीवा च प्रतीता हलधरवसनं बलदेवस्य वस्त्रं हलधरवसनं तद्धि नीलं नवतीं अतसीकुसुमं बाणकुसुमं अंजनके-
शीति अंजनकेशिका वनस्पतिविशेषः तस्याः कुसुमं अंजनकेशिकाकुसुमं नीलोत्पलं कुवलयं नीलाशोकनीलकणवीरनीलबन्धुजीवा अशो-
कादिविशेषाः काउलेसा णं भंते इत्यादि अत्राप्यक्षरगमनिका प्राग्वत् नवरं खदिरसारो धमासारो धमासस्य लोकप्रतीतः ताम्रं तंबकरोडं तम्बा-
छेवाडियाइ वा तिमस्यदायादवासतां वृन्ताकीकुसुमं प्रतीतं कोइलच्छदकुसुमं कोकिलच्छदस्तैलकण्टकः मूलटीकाकारः वस्त्रादिगमारजाए।

प्रज्ञा० वृत्तिः। न्धका इत्यन्ये। तथा सातिलकं तद् तनं इति तस्य कुसुमं प्रतीतं। तेउलेसा णं भंते इत्यादि शशोरभ्रवराहसंबरमनुष्यरुधिराणि शशोरभ्ररुधिरादीनि लोके
तदपेक्षया उत्कटानि भवंति तथा तेषामुपादानं बालेंद्रगोपकः सद्योजात इंद्रगोपकः स हि प्ररूढः सन्नीषत्पांडुरक्तो भवति ततो बालग्रहणं इंद्रगोप
कः प्रावृट्कालप्रथमसमयभावी कीटविशेषः बालदिवाकरः प्रथममुद्गच्छन् सूर्यः गुंजा लोकप्रतीता तस्याः अर्द्धरागो गुंजार्द्धरागः गुंजाया ह्यर्द्धमतिरक्तं
भवत्यर्द्धं चातिकृष्णमिति अर्द्धग्रहणं जात्यः प्रधानो हिंगुलकः प्रवालः तस्यांकुरः प्रवालांकुरः स हि प्रथममुद्गच्छन् अत्यंतरक्तो भवति ततस्तदुपादानं ला
क्षारसः प्रतीतः लोहिताक्षमणिः लोहिताक्षनामा रत्नविशेषः कृमिरागेण रक्तः कंबलः कृमिरागकंबलः शोकापगतवादिदर्शनात् मध्यपदलो
पी समासः गजतालु चीनपिष्टराशिः पारिजातकुसुमं जपाकुसुमं किंशुककुसु मराशिः रक्तोत्पलं रक्ताशोकः रक्तकणवीरः रक्तबंधुजीवा लोक
प्रतीता भावनीया एवं तावत् इति पदयोजना भगवानाह गोतमा इण ष्टतमा तेजोलेश्या इतः शशकरुधिरादिभ्यो लोहितवर्णे
न इष्टतरिकैव तत्र किंचिद् कांततमपि तेषां विशिष्टतरं भवति ततः कांत तरताप्रतिपादनार्थमाह कांततरिकैवाकषां विशिष्टतरम
पि स्यात् कांततरमप्यपरेषां प्रियं भवति ततः प्रियतरताप्रतिपादनार्थमाह प्रियतरिकैव अत एव मनोज्ञतरिका मनोज्ञतरमपि किंचिन्म
ध्यमं भवति ततः प्रकृष्टतरप्रकर्षविशेषप्रतिपादनार्थमाह मनआपतरिकैव पम्हलेसा णं भंते इत्यादि अक्षरगमनिका प्राग्वत् नवरं
चंपकः सामान्यतः सुवर्णचंपको वृक्षः चंपकछल्ली इवति सुवर्णचंपकत्वक् चंपकभेद इवाइति सुवर्णचंपकस्य छेदः छेदे हि भावाभिव्यक्तिवर्णप्रकर्षो
भवतीति ततो भेदग्रहणं हरिद्रा पिंडः हरिद्रागुटिका हरिद्राभिवर्त्तिता गुटिका हरिद्राभेदो हरिद्राया भेदो भवः हरितालो धातुविशेषः हरिताल
गुटिका हरितालगुटिकामयी गोलिका हरितालभेदो हरितालखंडः चिकुरः पीतद्रव्यविशेषः चिकुररागः मंजिष्ठादिना वस्त्रादौ रागः सुवर्णशिला
इवा इति सुवर्णमयी शुक्तिका वरप्रधानं यत्कनकं तस्य निकषः कषपट्टकारेखारूपः वरकनकनिकषः वरपुरुषो वासुदेवः तस्य वसनं वस्त्रं वरपुरुषवसनं
तद्धि पीतं भवतीत्युपादानं अल्लकीकुसुमं लोकतो वसेयं चंपककुसुमं सुवर्णचंपककुसुमं कूष्मांडिकायाः कुसुमं सेहिवाइति कोचनारकुसुमं कूष्मा १४८

डिकाकुसुमं पुष्पं कलिकाकुसुमं सुवर्णयूथिकाकुसुमं प्रतीतं सुहिरण्यकावनस्पतिविशेषस्तस्याः कुसुमं सुहिरण्यकाकुसुमं कोरंटमाल्यदा
मं पीताशोकपीतकणवीरपीतबंधुजीवाः प्रतीताः सुक्कलेसा णं भंते इत्यादि अक्षरगमनिका प्राग्वत् नवरं अंकरत्नविशेषः शंख
चंद्रो प्रतीतौ कुंदः कुसुमं दकं उदकं उदकरजः उदककणा अत्यंतशुक्ला इति तदुपात्ताः दधि प्रतीतं दधिघनो पिंडः क्षीरं प्रतीतं क्षीरपूरः
क्वथ्यमानमतितापादूर्ध्वं गच्छन् क्षीरपूरः सुक्कछिवाडियाइ वा इति छिवाडिः वल्लादिफलिका सा च शुष्का सती किल अतीव पांडुरा पेक्कुणमिंजियाइ वा इति पेक्कुण
मयूरपिच्छं तन्मध्यवर्त्तिनी मिंजा पेक्कुणमिंजा सा चातीव शुक्ला इत्युपलिहिता धंतधोयरुप्पपट्टे इवाइति ध्माताग्निसंपर्कात् निर्मलीकृतो धौतो श्री
खरंटितस्सम्मसमार्जनेनाति निर्मलीकृतो यो रूप्यमयः पट्टः स ध्मातधौत रूप्यपट्टः सारइयबलाहए इवाइति शारदिकः शारत्काल
भावी बलाहकः पुंडरीकं श्वेतांबुजं तस्य दलपत्रं पुंडरीकदलं शालिपिष्ट राशिः कुटजकुसुमराशिः सिंदुवारमाल्यदाम श्वेताशोक
श्वेतकणवीरश्वेतबंधुजीवाः प्रतीताः इह वर्णाः पंच भवंति तद्यथा कृ ष्णो नीलो लोहितो हारिद्रः शुक्लः लेश्याश्च षट् त
तत्उपमानतो वर्णनिर्देशे कृते विसंवादः कापोतलेश्या कस्मिन् वर्णे भवतीति तः प्रश्नति ॥ एयाणं भंते इत्यादि एताः अनंतरोदिता ल
दं तथा लेश्याः कइसु वण्णेसु निर्देशकृताः तृतीयार्थे सप्तमी यथा तिसृषु अलंक्रियासु अलंक्रिया प्रवीण इत्यत्र तृतीयार्थः कतिभि
र्वर्णैः साध्यंते कथ्यंते प्रज्ञाप्यंते इति यावत् भगवानाह गोतमा पंचसु वण्णेसु इति पंचभिर्वर्णैः शिष्यंते तद्यथेत्यादिना दर्शयति उक्तो वर्ण
परिणामः संप्रति रसपरिणाममभिधित्सुराह ॥ कण्हलेसा णं भंते इत्यादि प्रश्नसूत्रं सुगमं भगवानाह गोतमा सलोकप्रतीताय यथा नामका
निंबादयः कविशेषा निंबसारा निंबमध्यवर्त्ती अवयवविशेषः निंबछल्ली निंबत्वक् निंबफाणितं निंबक्वाथः कुटजो वृक्षविशेषः तस्यैव फलं कु
टजफलं कुटजफलं तस्यैव वल्कलं कुटजछल्ली तस्यैव क्वाथः कुटजफाणितं कटुतुंबी प्रसिद्धा तस्या एव फलं क्षारतऊसीति क्षारत्रपुषः क
टुकवालीतत्र गाम्य अतकथप्रसिद्धा ततः कड्डुका त्रपुषी क्षारत्रपुषी तस्या एव फलं क्षारत्रपुषीफलं देवदाली रोहिणी तस्या एव फलं क्षारत्रपुषी

प्रज्ञाप० वृत्तौ॥

फलं दंतवदालीता दिणी तस्या एव कुच्छं देवदालिकुच्छं देवदालीवदालिकुच्छं इगवालुंकी लोकतो वसेया तस्या एव फलं इगवालुंकीफलं घोषा
तकी प्रसिद्धा तस्या एव फलं कुष्मांडकं दावजकं दस्थानं तकायवनस्पतिविशेषो लोकतः प्रत्येतव्या एतावत्युक्ते गोतमः प्रब्रूते भगवन् एवं तावत् रस
तः कृष्णलेश्या एतद्रूपा निम्बादिरूपा भगवानाह गोतम नायमर्थः समर्थः यतः कृष्णलेश्या इतो निम्बादिरसेभ्योऽनिष्टतरकैवेत्यादि प्रा
ग्वत् नीललेश्याया इत्यादि भंगी वनस्पतिविशेषः तस्या एव रजो भंगीरजः पाठाविशेषः केलोकप्रतीता पिप्पली चूर्णं मरिचं मरिचचूर्णं शृंगबेरं शृंग
बेरचूर्णं स्यापि प्रसिद्धानि कापोतलेश्याया इत्यादि आम्राणां फलानामेवं सर्वत्रापि भावनीयं अंबाडगाण वा इति अम्बाटकफलविशेषः मातुलिंगबि
ल्वकपित्थफनसदाडिमानि प्रतीतानि पारापताः फलविशेषाः अक्खोडं बृहत्फल रनिअक्खोडानि बोरफलानि बदराणि तिंदुकानि च
प्रतीतानि च प्रतीतानि तेषां फलानामपक्वानामस्वाद्यपक्वफलं तत तत्राह अपरिपाकानां न विद्यते परिपाकः परिपूर्णः पा
कोऽयं येषां तान्यपरिपाकानि तेषामीषत्पक्वानामित्यर्थः एतादृशवर्णादि लिः कथयति वर्णेनातिविशिष्टेन गंधेन घ्राणेन्द्रियनि
र्वृत्तिकारणस्यातिविशिष्टपरिपाकादिनाभाविनाश्च उपेतानामसंप्राप्तानां यादृशो रसस्तत्र गोतमः प्रब्रूते एतद्रूपा एवंरूपरसा कापो
तलेश्या कापोतलेश्या भगवानाह गोतम नायमर्थः समर्थः किं त्वितः परिपा क्वाम्रफलादेरनिष्टतरकैवेत्यादि प्राग्वत् तेउलेस्सा णं भंते
इत्यादि तेषामेवाम्रफलादीनां पक्वानामीषदत्यक्तपरिपक्वं लोकश्चैव क्रियतेऽत आह पर्यायोपपन्नानां परिपूर्णपाकपर्यायप्राप्तानां एतादृशा
वर्णादिभिरुपयति वर्णेन प्रशस्तेन एकांततः प्रशस्तेन गंधेन प्रशस्तेन स्पर्शेनोपेतानां यादृशो रसस्तावत्युक्ते गोतम आह एवमपि स्यादेतद्रूपा पा
काम्रादिफलरूपा तेजोलेश्या भवेत् भगवानाह नायमर्थः समर्थः किं तु परिपक्वाम्रफलादेरिष्टतरकैवेत्यादि प्राग्वत् पद्मलेश्याया इत्यादि वर
नामनिका वा प्रागुक्तस्वरूपा नामा इति सा लोकप्रसिद्धा यथा येन प्रकारेण नामयस्याः सा यथानामिका उक्तं च प्राकृतलक्षणवशात् समकृत
दि शिवा मधिरा यदा तत्र रूपाणि तिः प्राकृतलक्षणलिंगव्यतिचार्यपीति चंद्रप्रभा इत्यादि चंद्रस्येव प्रभा आकारो यस्याः सा चंद्रप्रभा मणिशिलाको १५०

वरमणिशिलाका वरं च तत् सीधु च वरसीधु वरवारुणी च वरवारुणी वा विशेषेतकीपत्रनिर्यासा आसवपत्रासवः एवं पुष्पासवः फलासवश्च परि
भावनीयः चोयगंधद्रव्यं तन्निष्पन्न आसवः चोयासवः पत्रादिविशेषणव्यतिरिक्तः आसव आसव इति गीयते मधु मैरेयक कापिशायनानि मद्य
विशेषाः मूलदलखर्जूरसारनिष्पन्न आसवः खर्जूरसारः शृंगिकाद्राक्षारसारनिष्पन्ना मृद्वीकासारः सुपक्वेक्षुरसः मूलदलनिष्पन्नः सुपक्वेक्षुरसः
अष्टभिः शास्त्रप्रसिद्धैः पिष्टैर्निष्ठिता अष्टपिष्टनिष्ठिता जंबूफलवत् कालवका विकाजंबूफलकालिका वरवारुणी प्रसन्ना वरप्रसन्नाः एतस्याः
पि मद्यविशेषाः पूर्वकाले लोकप्रसिद्धा इदानीमपि तथाऽत्यंतरलोकतो वा यथा पूर्वदिमत्याः वरप्रसन्नाविशेषणान्याह मांस
लाउ पवितरसा पिसला मनोज्ञा मनोरमा स्वादवती ईषत् मनाक् ततः परे परमा स्वादतया कटित्यवाग्रतो गच्छतीत्युच्छे अवलंबा तिलगतीत्यवशीलाई
षदोषावलंबिनी तथा ईषत् मनाक् पानत्वावबद्ध मतिततः ऊर्ध्वं कटुका पल्लादिद्रव्यसंपर्कतो उपलक्षमाणाति क्षीर्यति भावः तथा ई
षत्मनाक् ताम्रे अक्षिणी क्रियेते अनया इति ईषत्ताम्राक्षिक रणी मद्यस्य प्रायः सर्वस्यापि तथा स्वभावत्वात् तथा उत्कर्षमा
यपत्ता इति उत्कर्षवती उत्कर्षः सना मोमदक्षु उत्कर्षमदस्य प्राप्ता उत्कर्ष मदप्राप्ता एतादृशवर्णादिभिः समर्थयति वर्णेन उत्कृष्टमदावि
नाभाविना प्रशस्तेन गंधेन घ्राणेन्द्रियनिर्वृत्तिकारणरसेन परमसुखासि कानुनाकेनस्य शेषमदपरिपाकाविना रिणा अत एवास्वादनीया
विशेषतः स्वादनीया विस्वादनीया प्रीणनीया बृंहणीया उपचितमिति वचनात् दर्पणीया प्रत्ययः एवं दर्पयतीति दर्पणीया मदनीया सर्वाणि इंद्रियाणि सर्वं
गात्रं प्रह्लादयतीति सर्वगात्रप्रह्लादनीया एतावत्युक्ते भगवान् गोतम आह तद्भवेदा भगवन् एतद्रूपा एवंरूपरसा तावत् पद्मलेश्या भवेत् भग
वानाह नो इणट्ठे इत्यादि प्राग्वत् सुक्कलेसा णं भंते इत्यादि गुड खंडे प्रसिद्धः शर्करा काशादिप्रभवा मत्स्यंडी खंडशर्करा पर्पटमोदकः संप्रदा
यादवसेयाः शेषं सुगमं तादृशे शुक्ललेश्यापाड्याणां रसः स प्रतिगंधमभिलिखितु राह कई णं भंते इत्यादि सुगमं नवरं कृष्णनीलकापोतले
श्यादुरभिगंधमृतगवादिकडेवरात्यापन्नतगुणदुरभिगंधापेतत्वात् तेजः पद्मशुक्ललेश्याः सुरभिगंधाः पिष्यमाणगंधवासपुरतिकुसुमादित्या

उत्तरा०वृत्ति॥ पि अनंतगुणपरमसुरभिगंधोपेतत्वात् उक्तं चोत्तराध्ययनेषु लेश्याध्ययने जह गोमडस्स गंधो सुणगमडस्स व जहा अहिमडस्स एत्तो उ अणंतगुणो लेसाणं
अप्पसत्थाणं जह सुरहिकुसुमगंधो गंधो वासाण पिस्समाणाणं एत्तो उ अणंतगुणो पसत्थलेसाणं तिण्हं पि उक्तो गंधपरिणामोऽधुना शुद्धाशुद्धत्वप्रतिपाद
नार्थमाह ४ एवं ताओ अविसुद्धाओ ताओ विसुद्धाओ इति एवमुक्तेन प्रकारेण आद्यास्तिस्रो लेश्या अविशुद्धा वक्तव्या अप्रशस्तवर्णगंधरसोपेतत्वात्
उत्तरास्तिस्रो लेश्या विशुद्धाः प्रशस्तवर्णगंधरसोपेतत्वात् तत्र चैवं वक्तव्या कइ णं भंते लेस्साओ अविसुद्धाओ पन्नत्ताओ गोयमा तओ लेसाओ अविसुद्धाओ पन्नत्ता
ओ तं जहा कण्हलेसा नीललेसा कइ णं भंते लेसाओ विसुद्धाओ पण्णत्ताओ गोयमा तओ लेस्साओ विसुद्धाओ पण्णत्ताओ तं जहा तेउलेस्सा पम्हलेस्सा सुक्कलेस्सा इति नु
क्तशुद्धाशुद्धत्वं संप्रति प्रशस्ताप्रशस्तत्वं प्रतिपादयति तओ अप्पसत्थाओ आद्यास्तिस्रो लेश्या अप्रशस्ता वक्तव्याः अप्रशस्तद्रव्यत्वेनाप्रशस्ताध्यवसायहेतु
त्वादुत्तरास्तिस्रो लेश्याः प्रशस्तद्रव्यतया प्रशस्ताध्यवसायहे कारणत्वात् सूत्रपाठः प्रायो दृश्यते कइ णं भंते लेस्साओ अप्प
सत्थाओ पण्णत्ताओ इत्यादि उक्ताः प्रशस्ताप्रशस्ता अपि अधुना संक्लिष्टा संक्लिष्टत्वं प्रतिपादयति ताओ संकिलिट्ठाओ इति आद्या
स्तिस्रो लेश्याः संक्लिष्टाः रौद्रध्यानाद्युपगताध्यवसायस्थानहेतुत्वात् उत्तरास्तिस्रो लेश्याः असंक्लिष्टा धर्मशुक्लध्याना
द्युपगताध्यवसायकारणत्वात् अत्रापि पाठः प्रायः कइ णं भंते लेस्साओ संकिलिट्ठाओ पण्णत्ताओ इत्यादि अथ कृता शीतोष्णस्पर्शप्रति
पादनार्थमाह ४ ताओ सीयलुक्खाओ ताओ णिद्धुण्हाओ इति आद्यास्तिस्रो लेश्याः शीतरूक्षाः शीतरूक्षस्पर्शोपेताः उत्तरास्तिस्रो लेश्याः स्निग्धोष्णस्पर्शाः
इहाप्युपलक्षणत्वात् कर्कशादयः स्पर्शाः संति यतः उक्तं लेश्याध्ययने जह करकयस्स फासो गोजिब्भाए व सागपत्ताणं एत्तो वि अणंतगुणो ले
स्साणं अप्पसत्थाणं जह बूरस्स व फासो नवनीयस्स व सिरीसकुसुमाणं एत्तो वि अणंतगुणो पसत्थलेस्साण तिण्हं पि इति तथापि शीतरूक्षोस्य वोद्या
द्यानां तिसृणां लेश्यानां परमसंतापोत्पादनसाधकतमावितितावद्दष्टव्यपृथक्सा काडुकावित्यदोषः सूत्रपाठः प्रायः कइ णं भंते लेस्साओ सी
यलुक्खाओ पन्नत्ताओ इत्यादि संप्रति गतिद्वारमभिधित्सुराह ४ ताओ दुग्गइगामिणीओ ताओ सुगइगामिणीओ इति आद्यास्तिस्रो लेश्या दुर्गतिगा २५१

मिन्यः दुर्गतिं गमयंतीत्येवंशीला दुर्गतिगामिन्यः संक्लिष्टाध्यवसायहेतुत्वादुत्तरास्तिस्रो लेश्याः सुगतिं गमयंतीत्येवंशीलाः सुगतिगामिन्यः
प्रशस्ताध्यवसायकारणत्वात् उत्तरत्रापि गमः स्पर्शादिन्यायः सूत्रपाठः प्रायः कइ णं भंते लेस्साओ दुग्गइगामिणीओ पण्णत्ताओ इत्यादि अधुना प
रिणामद्वारमभिधित्सुराह कण्हलेसा णं भंते इत्यादि अत्र कइविहपरिणाममित्यत्र प्राकृतत्वात् तृतीयार्थे द्वितीया द्रष्टव्या यमा आचारांगआणिउ
हा इत्यत्र तृतीयार्थः कृष्णलेश्या णं इति वाक्यालंकारे हे भदंत कतिविधेन परिणामेन परिणमति भगवानाह गोयमा तिविहं वा इत्यादि इह
त्रिविधाः जघन्यमध्यमोत्कृष्टभेदेन नवविधेषूद्देशमपि जघन्यादीनां स्वस्थानतारतम्यचिंतायां प्रत्येकं जघन्यादित्रयेण गुणनादेवं अतः उत
त्रिकगुणनया सप्तविंशतिविधत्वमेकाशीतिविधत्वं त्रिचत्वारिंशदधिक शतद्वयविधत्वं बहुविधत्वं वा भावनीयं सर्वत्र च तृतीयार्थे द्वितीया तत
त्रिविधेन वा परिणामेन परिणमति नवविधेन वेत्येवं पदानां योजना कर्तव्या एवं जाव सुक्कलेसा इति एवं कृष्णलेश्यागतेन
प्रकारेण नीलादयोऽपि लेश्या तावद्वक्तव्या यावत् शुक्ला लेश्या सूत्रपाठः सुगमत्वात् स्वयं परिभावनीयः संप्रति
प्रदेशद्वारमभिधित्सुराह ४ कण्हलेसा णं भंते कइपएसियाइ त्यादि सुगमं नवरं अणंतपएसियाओ त्ति अनंता अनंतसंख्योपे
ता प्रदेशाः परमाणवो यस्याः कृष्णलेश्यायाः कृष्णलेश्याद्रव्यसं घातस्य सा अनंतप्रदेशका अन्यथा अनंतप्रदेशव्यतिरेकेण स्कंध
स्य जीवग्रहणयोग्यतायोगो न भवति एवं नीलादयोऽपि लेश्या वक्तव्या इत्यभिप्रायवानाह एवं जाव सुक्कलेसा इति अवगाहद्वारमाह ४ कण्हलेसाणं
भंते इत्यादि इह प्रदेशाः क्षेत्रप्रदेशाः प्रतिपत्तव्याः असंख्येयावगाहप्रसिद्धेः तत्रानंतानामपि वर्गणानामाधारत्वेनासंख्येया एवं द्रष्टव्याः सकल
स्यापि लोकस्य प्रदेशानामसंख्यातत्वात् वर्गणाद्वारमाह ४ कण्हलेसाणं भंते केवइयाओ वग्गणाओ इत्यादि इह वर्गणा औदारिकादिशरीरप्रा
योग्यपरमाणुवर्गणावत् कृष्णलेश्यायोग्यद्रव्यपरमाणुवर्गणा द्रष्टव्या ततश्च वर्णादिभेदेन समानजातीयानेकसद्भावादनंताः प्रत्येतव्याः एवं
नीललेश्यादीनामपि वर्गणाः प्रत्येकं वक्तव्याः तथा चाह एवं जाव सुक्कलेसा इति अधुना स्थानद्वारमभिधित्सुराह ६ केवइया णं भंते क

ह्नालस्थानानि प्रज्ञप्तानि कियंति निरदंतं कृष्णलेश्यास्थानानि प्रकर्षापकर्षकृतानि स्वस्थाने तदा प्रकृष्टानि स्थानानि वर्णं प्राकृतत्वात् इह यदा तावत् क्षेत्रतः कृष्णाद्या
यो लेश्याः चिंत्यंते तदा एकैकस्या लेश्यायाः प्रकर्षापकर्षकृतानि स्थानानि कालतोऽसंख्येया उत्सर्पिण्यवसर्पिणी समयप्रमाणा-
नि क्षेत्रतोऽसंख्येयलोकाकाशप्रदेशप्रमाणानि उक्तं च असंखेज्जा णं उस्सप्पिणीओसप्पिणीणं समया संखाईया लोगा लेस्साणं हुं-
ति ठाणाइं तथा शुक्लानां संक्लेशरूपाणि शुक्लानां विशुद्धरूपाणि प्रतिपक्षलेश्यागतानां स्थानानां यानि कारणद्रव्याणि कृष्णादिद्रव्याणि तानि
तान्यपि स्थानानि उच्यंते तान्यपि तावत्प्रमाणान्येव द्रव्याणि भावस्थानोद्देशकवित्यमानत्वात् तानि प्रत्येकमसंख्येयानि तथाविधैकपरिणाम-
वंधनाम पिंडद्रव्याणाम् कथ्यते सा यदि उत्तरम् एकत्वात् तानि प्रत्येकं हि विशुद्ध्यन्यादि कृष्णानि विशुद्ध्यन्यलेश्यास्थानपरिणामकारण-
मिति उद्घन्यानि कृष्णलेश्यास्थानपरिणामकारणानि कृष्णानि यानि उमध्यमानि तानि तु उद्घन्यप्रत्यासन्नानि उद्घन्यं यतः तानि
कृष्णप्रत्यासन्नानि कृष्टानि एकैकानि स्थानपरिणामगुण लदतोऽसंख्येयानि अत्र दृष्टांतो यथा स्फटिकमणेः
लक्षकवर्णानामेकगुणालक्षकवर्णानेकगुणाधिकाद्य यापवमेकैकगुणवृद्ध्या उद्घन्याया एव रक्ततायाः असंख्ये-
यानि स्थानानि एवमेतानि व्यवहारतस्तोकगुणत्वात् सर्वाण्यपि उद्घ न्यान्युच्यंते एवमन्यान्यपि उद्घन्यान्येकगुणाधिकत्वेन द्वय-
प्रभृतयो लेश्यापरिणामविशेषा असंख्येया भवंति तत्र सर्वेऽपि व्यवहारतोऽल्पगुणत्वात् उद्घन्या प्रदर्शितं तत्कारणद्रव्याणि
द्रव्याणामपि स्थानानि उद्घन्यानि एवं उत्कृष्टान्यपि स्थानान्यसंख्येयानि भावनीयानि संप्रत्यल्पबहुत्वमाह ए एसि णं भंते इत्यादि इह त्रीण्यल्पबहु-
त्वानि तद्यथा उद्घन्यस्थानविषयमुत्कृष्टस्थानविषयमुभयविषयं च एकैकमपि त्रिविधं तद्यथा द्रव्यार्थतया प्रदेशार्थतया द्रव्यार्थप्रदेशार्थतया च उद्घन्यस्थान-
विषये द्रव्यार्थतायां प्रदेशार्थतायां प्रदेशार्थतायां च प्रत्येकं कापोतनीलकृष्णतेजःपद्मशुक्ललेश्यास्थानानि क्रमेण यथोत्तरमसंख्येयगुण-
त्वेन वक्तव्यानि उत्कृष्टार्थतायां प्रथमतो द्रव्यार्थतया कापोतनीलकृष्णतेजःपद्मशुक्ललेश्यास्थानानि क्रमेण यथोत्तरमसंख्येयगुणानि व- १५२

क्तव्यानि ततः शुक्ललेश्यास्थानानंतरं प्रदेशार्थतया कापोतलेश्यास्थानान्यनंतगुणानि वक्तव्यानि तदनंतरं नीलकृष्णतेजःपद्मशुक्ललेश्यास्था-
नानि क्रमेण प्रदेशार्थतया यथोत्तरमसंख्येयगुणानि एवमुत्कृष्टान्यपि स्थानानि द्रव्यार्थतया प्रदेशार्थतया द्रव्यार्थप्रदेशार्थतया च चिंतयितव्यानि तथा
द्रव्यार्थप्रदेशार्थतया नवरं क्रोसगादिनवरंकोसमित्रिअलिलावो इति उद्घन्यानामुत्कृष्टानां समुदायविषयं चाल्पबहुत्वं प्रथमतो उद्घन्या-
नि द्रव्यार्थतया कापोतनीलकृष्णतेजःपद्मशुक्ललेश्यास्थानानि क्रमेण यथोत्तरमसंख्येयगुणानि वक्तव्यानि तदनंतरं उद्घन्यशुक्ललेश्या-
स्थानेभ्य उत्कृष्टानि कापोतनीलकृष्णतेजःपद्मशुक्ललेश्यास्थानानि क्रमेण द्रव्यार्थतयैव यथोत्तरमसंख्येयगुणानि वाच्यानि एवं प्रदेशार्थत-
या उद्घन्योत्कृष्टस्थानविषयमल्पबहुत्वं भावनीयं तथा चाह एवं उद्घन्यस्थानविषयमल्पबहुत्वं द्रव्यार्थतया प्रदेशार्थतया च भावनीयं नवरं प्रदेसठयाए इति अलिलाव-
विसेसो इति द्रव्यार्थप्रदेशार्थतायां प्रथमतो द्रव्यार्थतया उद्घन्यानि कापोतनीलकृष्णतेजःपद्मशुक्ललेश्यास्थानानि क्रमे-
ण यथोत्तरमसंख्येयगुणानि वक्तव्यानि ततो उद्घन्येभ्यः शुक्ल-लेश्यास्थानेभ्यः उत्कृष्टक्रमेण उत्कृष्टानि स्थानानि द्रव्या-
र्थतया यथोत्तरमसंख्येयगुणानि वाच्यानि ततउत्कृष्टेभ्यः शुक्ललेश्यास्थानेभ्यो उद्घन्यानि कापोतलेश्यास्थानानि प्रदेशार्थत-
या अनंतगुणानि वक्तव्यानि ततः प्रदेशार्थतयैव उद्घन्यानि नीलकृष्णतेजःपद्मशुक्ललेश्यास्थानानि यथोत्तरमसंख्येयगुणानि वक्तव्यानी-
ति ॥ इति श्रीमलयगिरिविरचितायां प्रज्ञापनाटीकायां लेश्यापदस्य चतुर्थोद्देशकः परिसमाप्तः ॥ ॥ उक्तश्चतुर्थोद्देशकः संप्रति पंचम
आरभ्यते तस्य चेदमादिसूत्रं कइ णं भंते लेस्साओ पण्णत्ताओ इत्यादि चतुर्थोद्देशकवत् तावद्वक्तव्यं यावद्वेडूर्यमणिदृष्टांतो व्याख्यानं प्राग्वदे-
व निरवशेषाकर्तव्याः प्राग्गतश्च सूत्रस्यार्थ एतस्य सूत्रस्य तत्रोपन्यासो तेन न सूत्रं सविस्तरार्थः तदेव सूत्रमाह से नूणं भंते इत्यादि इह तिर्यङ्मनु-
ष्यविषयं सूत्रमनंतरोक्तं इदं तु देवनैरयिकविषयमवसेयं देवनैरयिका हि पूर्वभवगतचरमांतर्मुहूर्तादारभ्य यावत्परभवगतमाद्यमंतर्मुहू-
र्तं तावदवस्थितलेश्याकाः ततः मीषांकृष्णादिलेश्याद्रव्याणां परस्परसंपर्केऽपि न परिणम्यपरिणामकभावो घटते ततः सम्यगधिगमाय

प्रज्ञाप०वृत्तिः॥

पृच्छति से नूणं भंते इत्यादि सेशब्दोऽथशब्दार्थः स च प्रश्ने अथ नूनं निश्चितं भदंत कृष्णलेश्या कृष्णलेश्याद्रव्याणि नीललेश्यां नीललेश्याद्र-
व्याणि प्राप्य तद्रूपतया सम्बन्धमात्रं प्राप्य न तु परिणमय्य परिणामकस्वभावत्वात् संक्रमः तद्रूपतयेति तदेव नीललेश्याद्रव्यगतं रूपं स्वभावो यस्य
कृष्णलेश्याद्रव्यस्य तत्तद्रूपं तस्य भावस्तत्ता तया एवं तद्वर्णतया तद्गन्धतया तद्रसतया तत्स्पर्शतया भूयो भूयः परिणमते भग-
वानाह हंतेत्यादि हंत गोतम कृष्णलेश्या इत्यादि तदेव यदि तत्परिणमते तर्हि कथं सप्तमनरकपृथिव्यामपि सम्यक्त्वलाभः सम्मतस्तेजो-
लेश्यादिपरिणामे भवति सप्तमनरकपृथ्वि कथं च कृष्णलेश्या इति कथं वैतत्सर्वं घटते तत्राह परावर्त्तमाने एतदर्थप्रश्नसूत्रमाह एयाणि पि लेस्सा इति लेश्या-
न्तरद्रव्यसम्पर्कतस्तद्रूपतया परिणामासम्भवेन तत्तावपरावर्त्तिनियोगाद। तत एवं तद्विषयप्रश्ननिर्वचनसूत्रे आह से केणट्ठेणं भंते इ-
त्यादि तत्र प्रश्नसूत्रं सुगमं निर्वचनसूत्रे आगारभावमायाए इ: आकार। स्वभावः सत्ता आकारभावः स एव मात्रा आकारभावमात्रा त-
या आकारभावमात्रया मात्राशब्द आकारभावातिरिक्तपरिणामान्तर प्रतिपत्तिनिषेधार्थः से इति सा कृष्णलेश्या नीलले-
श्यारूपतया स्यात् यदि वा प्रतिभागः प्रतिबिम्बं आदर्शादाविव विशिष्टः प्रति- बिम्बवस्तुगतः आकारः प्रतिभागमात्रा तया अत्रापि मात्रात-
या अत्रापि मात्राशब्दः प्रतिबिम्बातिरिक्तपरिणामान्तरव्युदासार्थः स्यात् कृष्णलेश्या नीललेश्यारूपतया परमार्थतः पुनः कृष्णलेश्यैव नाव
त्तु नीललेश्या स्वस्वरूपापरित्यागात् यथा आदर्शादयो जपाकुसुमादिसंनिधानतस्तत्प्रतिबिम्बमात्रामादधाना नादर्शादय इति परिभावनीय-
मेतत् केवलं सा कृष्णलेश्या तत्र स्वस्वरूपे गता अवस्थिता सती उत्ष्वष्कते तदाकारभावमात्रधारणतस्तत्प्रतिबिम्बमात्रधारणतो वा उत्सर्पतीत्यर्थः कृष्णले-
श्यातो हि नीललेश्या विशुद्धा ततस्तदाकारभावं तत्प्रतिबिम्बमात्रं वा दधाना मनाक् विशुद्धा भवतीत्युत्सर्पतीति व्यपदिश्यते उपसंहारवाक्यमा-
ह से एएणट्ठेणं इत्यादि एवं नीललेश्यायाः कापोतलेश्यायास्तेजोलेश्यायाः पद्मलेश्यामधिकृत्य पद्मलेश्यायाः शुक्ललेश्यामधिकृत्य सूत्राणि भा-
वनीयानि संप्रति पद्मलेश्यामधिकृत्य शुक्ललेश्यामेवं तेजःकापोतनीलकृष्णलेश्याविषयाण्यपि सूत्राणि भावनीयानि पद्मलेश्यामधिकृत्य तेजः १५३

कापोतनीलकृष्णलेश्याविषयाणि तेजोलेश्यामधिकृत्य कापोतनीलकृष्णविषयाणि कापोतलेश्यामधिकृत्य नीलकृष्णलेश्याविषये नीलले-
श्यामधिकृत्य कृष्णलेश्याविषयमिति अमूनि च सूत्राणि साक्षात् पुस्तकेषु दृश्यन्ते विषयसूत्रमाह ॥ से नूणं भंते सुक्कलेस्सा पम्हलेसं पप्प इत्यादि एत-
त्सूत्रं भावनीयं शुक्ललेश्यापेक्षया पद्मलेश्या हीनपरिणामा ततः शुक्ललेश्या पद्मलेश्याया आकारभावं तत्प्रतिबिम्बमात्रं वा भजन्ती मनाग् विशु-
द्धा न भवतीति ततो अवष्वष्कते इति व्यपदिश्यते केवलमर्थतः प्रतिपत्तव्यानि तथा मूलटीकाकारेण व्याख्यानात् तदेवं यद्यपि देवनैरयिकाणा-
मवस्थितानि लेश्याद्रव्याणि तथापि तेषु उपादीयमाना नीललेश्यान्तरद्रव्यसम्पर्कतस्तन्मात्रापि तदाकारभावमात्रेण जात इति भावः परावर्त्तियोगतः षडपि ले-
श्या घटन्ते सप्तमनरकपृथिव्यामपि सम्यक्त्वलाभ इति न कश्चिद्दोषः ॥ इति श्रीम लयगिरिविरचितायां प्रज्ञापनाटीकायां लेश्यापदस्य पंच-
मोद्देशकः ॥ ॥ तदेवमुक्तः पंचमोद्देशकः संप्रति षष्ठ आरभ्यते तस्य चेदमादिसूत्रं ॥ कइ णं भंते लेस्साओ पण्णत्ताओ इत्यादि
सुगमं षष्ठोद्देशकपरिसमाप्तिं यावत् नवरं मनुष्यक्षेत्रमात्रा जीवा इत्यादि ॥ लेश्याद्रव्याण्यपाद्य योग्यानि तानि च कस्य चित्कस्या-
पि विचित्राणीति कृष्णलेश्यापरिणतोऽपि जनकः कृष्णस्य विचित्रलेश्या संजनयेत् । एवं शेषलेश्यापरिणतादिपि भावनीयं ॥ ॥ इति श्रीम
लयगिरिविरचितायां प्रज्ञापनाटीकायां सप्तदशं लेश्यापदं समाप्तं ॥ ॥ त देवमुक्तं सप्तदशपदमधुनाष्टादशमारभ्यते अस्य चायमभिसंब-
न्धः इहानन्तरपदे लेश्यापरिणाम उक्तः संप्रति परिणामसाम्यात् कायस्थितिपरिणाम उच्यते तत्र चेदमधिकारगाथाद्वयं ॥
जीवगइंदियकाए इत्यादि प्रथमं जीवपदं किमुक्तं भवति प्रथमं जीवपदमधिकृत्य कायस्थितिर्वक्तव्येति १ ततो गतिपदं २ तदनन्तरमिंद्रियपदं ३ ततः
कायपदं ४ ततो योगपदं ५ तदनन्तरं वेदपदं ६ ततः कषायपदं ७ ततो लेश्यापदं ८ तदनन्तरं सम्यक्त्वपदं ९ ततो ज्ञानपदं १० तदनन्तरं दर्शनपदं ११ ततः संयम
पदं १२ ततः उपयोगपदं १३ तदनन्तरमाहारपदं १४ ततो भाषकपदं १५ ततः परीत्तपदं १६ ततः पर्याप्तिपदं १७ ततो भवसिद्धिपदं २० तदनन्तरमस्तिकाय
पदं २१ ततश्चरमपदं २२ एतेषां द्वाविंशतिसंख्यानां पदानां कायस्थितिर्वक्तव्येति ज्ञातव्यान्यथायमुद्देशो निर्देशस्तत्र प्रथमं कायस्थितिरिति किं भावार्थः तु

प्रज्ञा०वृत्ति॥ च्यते कायश्च पर्यायः परिभाषितः काय इव कायः स च पर्यायो द्विधा सामान्यरूपो विशेषरूपश्च तत्र सामान्यरूपो निर्विशेषणो जीवत्वलक्षणो विशेषरूपो नैरयि
कत्वादिलक्षणः तस्य स्थितिरवस्थानं कायस्थितिः किमुक्तं भवति सामान्यरूपेण विशेषरूपेण वा पर्यायेण विशिष्टस्य जीवस्य यदव्यवच्छेदेन भवनं सा
कायस्थितिः ततः प्रथमतः सामान्यरूपेण पर्यायेण विशिष्टस्याव्यवच्छेदेन यद्भवनं तच्चिन्तयितुमाह जीवे णं भंते इत्यादि इह जीवनपर्यायविशि
ष्टो जीवो गृह्यते ततः प्रश्नयति जीवे णं भंते जीवेत्ति कालओ केवच्चिरं होइ जीव इति जीवनपर्यायविशिष्टतयेत्यर्थः कालतः कालमधिकृत्य कियच्चिरं किय
न्तं कालं यावद्भवति भगवानाह गोयमा सव्वद्धं सर्वकालं यावत् कथमिति चेत् उच्यते प्राणधारणं प्राणा भावप्राणा द्रव्यप्राणाश्च द्रव्यप्राणा इन्द्रियपञ्चकबलत्रि
कोच्छ्वासनिःश्वासायुःकर्मानुभवलक्षणा भावप्राणा ज्ञानादयः तत्र संसारिणा   मायुःकर्मानुभवलक्षणप्राणधारणं सदैवावस्थितं न हि सका
चिदवस्था संसारिणामस्ति यस्यामायुःकर्मानुभवनं न विद्यत इति मुक्तानां तु   ज्ञानादिरूपप्राणधारणमवस्थितं मुक्तानामपि हि ज्ञाना
दिरूपाः प्राणाः सन्ति यैर्मुक्ता अपि जीवन्तीति व्यपदिश्यन्ते ते च ज्ञानादयो।   मुक्तानां शाश्वतिकाः अतः संसार्यवस्थायां वा सर्वत्र जीव
नमस्तीति सर्वकालभावी जीवनपर्यायः संप्रति तस्यैव जीवस्य नैरयिकत्वादि।   पर्यायैर्विशिष्टस्य तैरेव पर्यायैर्विशिष्टस्य तैरेव पर्यायैरव्यव
च्छेदेनावस्थानं चिन्तयन्नाह नेरइए णं भंते इत्यादि सुगमं नवरं नैरयिकाधिकारे।   वस्थाभावात् स्वभावात् च्युत्वानन्तरं नैरयिकत्वानुत्प
त्तेर्यावदेव कायस्थितिरपि उपपद्यते तज्जघन्यत उत्कर्षतश्च यत्स्थितिपरिमाणं कायस्थितिरिति तिरिक्खजोणिए णं भंते इत्यादि तत्र यदा देवो मनुष्यो
नैरयिको वा तिर्यक्षूत्पद्य ततश्च्युतोऽन्तर्मुहूर्तं स्थित्वा भूयो गतिमन्यतरां संक्रामति तदा लभ्यतेऽन्तर्मुहूर्तप्रमाणा कायस्थितिः उत्कर्षतोऽनन्तं कालं याव
त् अस्य चानन्तस्य वा तस्य प्ररूपणा द्विविधा तद्यथा कालतः क्षेत्रतश्च कालतोऽनन्ता उत्सर्पिण्यवसर्पिण्यः उत्सर्पिण्यवसर्पिणीपरिमाणं च नन्द्यध्ययनटी
कायां स्वयं तत्र सविस्तरमभिहितत्वात् क्षेत्रतोऽनन्ता लोकाः किमुक्तं भवति अनन्तेषु लोकाकाशेषु प्रतिसमयमेकैकप्रदेशापहारे क्रियमाणे
यावत्योऽनन्ता उत्सर्पिण्यवसर्पिण्यो भवन्ति तावतीर्यावत् तिर्यक्त्वेनावतिष्ठते एतदेव कालपरिमाणं पुद्गलपरावर्तसंख्यया निरूपयति असंख्येयाः १५४

पुद्गलपरावर्ताः पुद्गलपरावर्तस्वरूपं च संग्रहणीटीकायां विस्तरतरकेणाभिहितमिति ततोऽवधार्यमिह तु नाभिधीयते ग्रन्थगौरवभयात् असंख्याता अपि
पुद्गलपरावर्ताः कियन्त इति विशेषसंख्यानिरूपणार्थमाह ते णमित्यादि ते पुद्गलपरावर्ता आवलिकाया असंख्येयभागः किमुक्तं भवति आ
वलिकाया असंख्येयतमे भागे यावन्तः समयास्तावत्प्रमाणा असंख्येयाः पुद्गलपरावर्ता इति एतच्चैवं कायस्थितिपरिमाणं वनस्पत्यपेक्षया द्रष्ट
व्यं न त्वशेषतिर्यगपेक्षया वनस्पतिव्यतिरेकेणाशेषतिरश्चामेतावत्कालप्रमाणकायस्थितेरसंभवात् तिरिक्खजोणिणी णं भंते इत्यादि इह उत्तर
च जघन्यतोऽन्तर्मुहूर्तं भावना प्रागुक्ता उत्कर्षभावना त्वेवं भावनीया उत्कर्षतस्त्रीणि पल्योपमानि पूर्वकोटीपृथक्त्वाभ्यधिकानि कथमि
ति चेत् उच्यते इह तिर्यङ्मनुष्याणां सविन्द्रियाणां संज्ञिपञ्चेन्द्रियाणामुक्ता   र्षतोऽप्यष्टौ भवाः कायस्थितिः नरतिरियाण सत्तट्ठ भवा इति वच
नात् तत्रोत्कर्षस्य चिन्त्यमानत्वात् अष्टावपि भवा यथासंभवमुत्कृष्टस्थिति   काः परिगृह्यन्ते असंख्येयवर्षायुषश्चोत्कृष्टा नियमाद्देवलो
केषूत्पद्यन्ते न तिर्यक्षु ततः सप्त भवाः पूर्वकोट्यायुषो विधेयाः।   अष्टमस्तु पर्यन्तवर्ती देवकुर्वादिषु त्रीणि पल्योपमानि
पूर्वकोटीपृथक्त्वाभ्यधिकानि भवन्ति एवं मणुस्से वि मणुस्सी वि इति एवं   तिर्यक्स्त्रीगतेन प्रकारेण मनुष्यो मानुष्यपि च वक्तव्या किमु
क्तं भवति मनुष्यस्य मानुष्याश्च जघन्यतोऽन्तर्मुहूर्तमुत्कर्षतस्त्रीणि पल्यो   पमानि पूर्वकोटीपृथक्त्वाभ्यधिकानि वक्तव्यानीति सूत्रपाठस्त्वेवं मणु
स्से णं भंते मणुस्सेत्ति कालओ केवच्चिरं होइ गोयमा जहन्नेणं अंतोमुहुत्तं उक्कोसेणं तिन्नि पलिओवमाइं पुव्वकोडिपुहुत्तमब्भहियाइं मणुस्सी णं भंते म
णुस्सित्ति कालओ इत्यादि देवे जहा नेरइए इति यथैव नैरयिकः प्रागुक्तस्तथैव देवोऽपि वक्तव्यो देवस्यापि जघन्यतो दशवर्षसहस्राणि उत्क
र्षतस्त्रयस्त्रिंशत्सागरोपमाणि वक्तव्यानि भावः देवा अपि हि मृत्वा नानन्तरं पुनर्देवत्वेनोत्पद्यन्ते नो देवो देवेसु उववज्जइ इति वचना
त् ततो यदेव देवानामवस्थितिः परिमाणं तदेव कायस्थितेरपि देवीसूत्रे उत्कर्षतः पंचपंचाशत्पल्योपमानीति देवदेवीनां भवस्थितावुत्कर्षता
प्येतावत्प्रमाणत्वात् एतच्चेशानदेव्यपेक्षया द्रष्टव्यमन्यत्र देवीनामेतावत्याः स्थितेरसंभवात् सिद्धसूत्रे साद्यपर्यवसित इति सिद्धस्य क्षयाभावा

न सिद्धत्वाद्विच्यावयिष्यन्ति रागादयो न च ते भगवतः सिद्धस्य संभवंति तन्निमित्तकर्मपरमाणूनामभावात् तदभावश्चाभावात् तदभावश्च तेषां निर्मूलकाषंकषि
तत्वात् सम्यक्त्वाद्यावता नैरयिकादीनपर्याप्तापर्याप्तत्वविशेषणद्वारेण चिंतयन्नाह ॥ नेरइए णं भंते नेरइयअपज्जत्तए इति अपर्याप्तत्वप
र्यायविशिष्टो विवक्षितः कालतः कियंतं कालं यावद्भवति भगवानाह गोतमेत्यादि इहापर्याप्तावस्था जघन्यत उत्कर्षतश्चांतर्मुहूर्तप्रमाणा तत ऊर्ध्वं
नैरयिकाणामवश्यं पर्याप्तावस्थाभावात् तत उक्तं जहन्नेण वि अंतोमुहुत्तं उक्कोसेण वि अंतोमुहुत्तं एवं जाव देवी अपज्जत्तिया इति एवं नैर
यिकाभिलापप्रकारेण पर्याप्तास्तिर्यगादयस्तावद्वक्तव्या यावद्देवी अपर्याप्ता देवीसूत्रं यावदित्यर्थः तत्र तिर्यग्मनुष्याश्च ये अपर्याप्तका एव सत्वा
त्वपर्याप्ता म्रियंते अपर्याप्तत्वानामपि तथापि तेषामपर्याप्तावस्था नैरंतर्येण का षामप्यंतर्मुहूर्तप्रमाणैव लभ्यते यदुक्तं अपज्जत्तए णं भंते अपज्ज
त्तए त्ति कालओ केवचिरं होइ गोयमा जहन्नेणं उक्कोसेण वि अंतोमु हुत्तमिति देवदेवीसूत्रे त्वंतर्मुहूर्तभावना नैरयिकवत् ॥ नेरइए प
ज्जत्तए णं भंते इत्यादि नैरयिकपर्याप्त इति पर्याप्तनैरयिकत्वेन अविच्छेदेन कालतः कियच्चिरं भवति भगवानाह गोतम
जघन्यतो दशवर्षसहस्राण्यंतर्मुहूर्तोनानि अंतर्मुहूर्तस्यापर्या प्तावस्थायां गतत्वात् एवमुत्कर्षतोपि त्रयस्त्रिंशत्सागरोपमाणि
अंतर्मुहूर्तोनानि तिर्यग्सूत्रे जघन्यतोंतर्मुहूर्तं भावना प्रागिव उत्कर्षतस्त्री णि पल्योपमाण्यंतर्मुहूर्तोनानि एतच्चोत्कर्षाद्देवकुर्वादिभाविनस्ति
रश्चोधिकृत्य वेदितव्यमन्येषामेतावत्कालप्रमाणपर्याप्तावस्थाया अविच्छेदेनाप्राप्यमाणत्वात् अत्राप्यंतर्मुहूर्तोनत्वमंतर्मुहूर्तस्यापर्याप्तावस्था
यां गतत्वात् एवं तिर्यक्स्त्रीमनुष्यसूत्रेष्वपि भावनीयं देवदेवीसूत्रयोस्तु जघन्यत उत्कर्षतश्च कायस्थिति परिमाणं प्रागुक्तमेवापर्याप्तावस्थाभाविनांत
र्मुहूर्तेन हीनं परिभावनीयं गतं गतिद्वारमिदानीमिंद्रियद्वारमभिधित्सुराह ॥ सइंदिए णं भंते इत्यादि सह इंद्रियं यस्यास्ति वासौ सेंद्रियः इंद्रियं च द्वि
धा लब्धींद्रियं द्रव्येंद्रियं चेति तत्रेह लब्धींद्रियमवसेयं तद्धि विग्रहगतावपि सेंद्रियापर्याप्तस्यापि च ततो निर्वचनमनवद्यमुपपद्यते अन्यथा तदघटमानकमेव
स्यात् निर्वचनसूत्रमाह गोयमेत्यादि इह यः संसारी स नियमात्सेंद्रियः संसारश्चानादिरित्यनादिः सेंद्रियस्तत्रापि यः कदाचिदपि न सेत्स्यति सोऽना १५५

द्यपर्यवसितः सेंद्रियत्वपर्यायस्य कदाचिदप्यव्यवच्छेदात् यस्तु सेत्स्यति सोऽनादिपर्यवसितो मुक्त्यवस्थायां सेंद्रियत्वपर्यायस्याभावात् एगेंदियसू
त्रे यदुक्तमुक्कोसेणं अणंतं कालमित्यादि तदेव अनंतं कालं सविशेषं निरूपयति वणस्सतिकालो इति यावान् वनस्पतिकालः एवमुक्तं तावंतं
कालं यावदित्यर्थः वनस्पतिकायस्यैकेंद्रियपदेन परिग्रहात् स च वनस्पतिकालः एवं प्रमाणः अणंताओ उस्सप्पिणिओसप्पिणीओ कालओ खेत्तओ अण
ताः नंता लोगा असंखेज्जा पोग्गलपरियट्टा ते णं पोग्गलपरियट्टा आवलियाए असंखेज्जइभागो इति बेइंदियसूत्रे संखेज्जं कालमिति संख्यातानि व
र्षसहस्राणीत्यर्थः विगलेंद्रियाणामेवमसहस्रमसंखेज्जइत्ति वचनात् एवं त्रींद्रियचतुरिंद्रियसूत्रे वक्तव्यं तत्रापि जघन्यतोंतर्मुहूर्तमुत्कर्षतः सं
ख्येयकालमिति वक्तव्यमिति भावः संख्येयश्च कालः संख्येयानि वर्ष सहस्राणि प्रत्येतव्यानि पंचेंद्रियसूत्रे उत्कर्षतः सातिरेकं सागरो
पमसहस्रं तच्च नैरयिकतिर्यक्पंचेंद्रियमनुष्यदेवभवभ्रमणेन द्रष्ट व्यमधिकं तु न भवति एतावत एव कालस्य केवलवेदसोपल
ब्धत्वात् अनिंद्रियो द्रव्यभावेंद्रियविकलः स च सिद्ध एव सिद्धश्च साद्यपर्यवसितस्तत उक्तं साइए अपज्जवसिए इति सइंदि
य अपज्जत्तए णमित्यादि इहापर्याप्तलब्धिमपेक्ष्य करणापेक्षया च द्रष्टव्याः न तु यथापि तत्पर्यायस्य जघन्यत उत्कर्षतश्चांतर्मुहूर्तप्र
माणत्वात् एवं तावद्वाच्यं यावत्पंचेंद्रियापर्याप्तकः पंचेंद्रियापर्याप्तकसू त्रं तच्च सुगमत्वात्स्वयं परिभावनीयं अनिंद्रियो न वक्तव्यस्तस्य
पर्याप्तापर्याप्तविशेषणरहितत्वात् सइंदियपज्जत्तए णं भंते इत्यादि इदं पर्याप्तलब्धिमपेक्ष्यावगंतव्यं सा हि विग्रहगतावपि संभवति करणैरपर्या
प्तस्यापि तत उत्कर्षतः सातिरेकं सागरोपमशतपृथक्त्वमिति यन्निर्वचनं तदुपपद्यते अन्यथा करणपर्याप्तस्योत्कर्षतोप्यंतर्मुहूर्तोनत्रयस्त्रिंशत्सा
गरोपमप्रमाणतया लभ्यमानत्वात् यथोक्तनिर्वचनं नोपपद्यते एवमुत्तरसूत्रेपि पर्याप्तत्वं लब्ध्यपेक्षया द्रष्टव्यमेकेंद्रियपर्याप्तसूत्रे संख्येयानि
वर्षसहस्राणीति एकेंद्रियस्य हि पृथिवीकायस्योत्कर्षतो द्वाविंशतिवर्षसहस्राणि अप्कायस्य सप्तवर्षसहस्राणि वातकायस्य त्रीणि वर्षस
हस्राणि वनस्पतिकायस्य दशवर्षसहस्राणि ततो निरंतरकतिपयपर्याप्तभवसंकलनया संख्येयानि वर्षसहस्राणि घटंत इति द्वींद्रियस्य पर्याप्तसूत्रे

प्रज्ञापनावृत्तिः॥

संख्यायानि वर्षाणि द्वींद्रियस्योत्कर्षतो नावस्थितिपरिमाणं यद्वा संवत्सराणि नव सर्वेष्वपि सर्वदेषु पि सर्वदेशस्य स्थितिसंभवमतः कतिपयानिरंतरप
र्याप्तभवसंकलनया पि संख्येयान्य निवर्षाण्यप्युपलभ्यंते तत्र वर्षशतानि वर्षसहस्राणि वा त्रींद्रियपर्याप्तस्य भवसंख्ययानि रात्रिंदिवानि तेषां नवस्थितेरुत्क
र्षतोप्येकोनपंचाशद्दिनमानतया कतिपयनिरंतरपर्याप्तभवसंकलनायामपि संख्येयानां रात्रिंदिवानामेव लभ्यमानत्वात् चतुरिंद्रियस्य त्रैमासं संख्ये
यामासा तेषां नवस्थितेरुत्कर्षतः षण्मासप्रमाणतया कतिपयनिरंतरपर्याप्तभवकालसंकलनायां संख्येयानां मासानां प्राप्यमाणत्वात् पंचेंद्रिय
सूत्रं सुगमं गतमिंद्रियद्वारमिदानीं कायद्वारमभिधित्सुराह ॥ सकाइए णं भंते इत्यादि सह कायेन वर्त्तत इति सकायः एवं सकायिक आर्षत्वा
त्स्वार्थिकः प्रत्ययः कायः शरीरं तच्चौदारिकवैक्रियाहारकतैजसका र्मणलक्षणं तत्र तैजसकार्मणे तैजसं संसारं यावदवश्यं भवतस्तेन तावत्संसा
रभावात् अन्यथा वियद्गतौ वर्त्तमानस्य शरीरपर्याप्त्यपर्याप्तस्य च विशेष शरीरासंभवात् सकायिकत्वं स्यात् तथा च सति निर्वचनसूत्रमा
ह ॥ सकाइए दुविहे पण्णत्ते इत्यादि तत्र यः संसारपारगामी भव विष्यति सोऽनाद्यपर्यवसितः कदाचिदपि तस्य कायव्य
वच्छेदासंभवात् यस्तु मोक्षमधिगंता सोऽनादिसपर्यवसितस्तस्य मुक्ता वस्थायां सर्वात्मना शरीरपरित्यागात् पृथिव्यप्तेजोवायुवन
स्पतिसूत्राणि सुगमानि नवरं यत्रापि तदर्थस्य पृथ्वीतेजोवायवाकं अस्मात्वा मपि तिणिमप्पिणी उ ओसप्पिणीओ कालओ खेत्तओ असंखेज्जा लोगा
एतद्बाधवानवायदि वनस्पतिकालप्रमाणमसंख्येयाः पुद्गलपरावर्त्तास्ता यदुक्तं सिद्धांतमत्वादवाक्षीवायावद्धीवनावनस्पतिरासीदिति तत्के
घस्मात्कथं वा वनस्पतीनामनादित्वप्रतिनियतकालप्रमाणतया वनस्पतिभावस्यानादित्वविरोधात् तत उच्यते असंख्येयाः पुद्गलपरावर्त्ता
मावंतनेण तावतिकालेतिक्रांते नियमात्पृथिवीकायपरावर्त्त अवर्त्ततयथा स्थितिकालो तत्स्वरादयः उक्तं च ॥ उडु पुद्गलपरियट्टासंखेज्जा वणस्सइकि
ल्लाता अवतवणस्सईणमणाइयत्तमतएवाह तं उ अ संख्या पुद्गलपरियट्टा तत्तो उव्वट्टणंकालेण वइएणं तत्ताकृ वतिकायप्रत्ययं सावि विवणस्सइ
णाविकालेतदुस्सुराईकिंत्विवयं वनस्पतीनां निर्लेपनमागमे प्रतिषिद्धं तदपीदानीं प्रसक्तं कथमितिचेत् उच्यते इह प्रतिसमयमसंख्येया वनस्पा

१५६

तिभ्यो जीवा उद्वर्त्तंते वनस्पतीनां च कायस्थितिपरिमाणमसंख्येयाः पुद्गलपरावर्त्तास्ततो यावंतः संख्येयेषु पुद्गलपरावर्त्तेषु समयास्तैरन्यत्रा
कसमयोद्वृत्ता जीवा यावंतो भवंति तावत्परिमाणमागतं वनस्पतीनां ततः प्रतिनियतपरिमाणतया सिद्धं निर्लेपनं प्रतिनियतपरिमाणत्वादेव चगा
नाकालेन सिद्धिप्रमितवर्षालक्ष्यानां प्रसक्तानत्यप्रसक्तोच मोक्षपथव्यवच्छेदोपि प्रसक्तः सर्वभव्यसिद्धिगमनानंतरं भव्यस्य सिद्धिगमनायोगा
त् आह च कायट्ठिईकालेणं ते असंखसमयाविहारेणा निल्लेवणमावन्नं सिद्धी वियसव्वभव्वाणं एगसमयम संखसाहा जेणुव्वट्टंति तोतदस
द्धा कायट्ठिईएसमयावणस्सईणपरीमाणेन चेतदिष्टं वनस्पतीनामनादित्वस्यादिर्लेपनप्रतिषेधस्य सर्वभव्यासिद्धिप्रसक्तिप्रसंगाच्चेदस्यातत्र
तउश्दाव्वासिद्धांतनिक्षानात् उच्यते इह द्विविधा जीवाः सांव्यवहारिका असां व्यवहारिकाश्च तत्र ये निगोदावस्थातउद्वृत्त्य पृथिवीकायिकादि
भावमवाप्नुवंतिते लोके पृथ्वीकायादिव्यवहारम उपतंतीति सांव्यवहारिका उच्यंते ते च यद्यपि भूयोपि नि
गोदावस्थामुपयांतितथापि ते सांव्यवहारिका एव संव्यवहारपतितत्वात्। तत्रात्वयपुनरनादिकालादारभ्य निगोदावस्थामुप
गता एवावतिष्ठंते ते व्यवहारपथातीतत्वादसांव्यवहारिकाः कथमेत दवसीयत इति चेदुच्यते जीवानां सांव्यवहारिकाश्च असांव्यवहारि
काश्चेति चेत् उच्यते इह प्रत्यक्षतानुवनस्पतीनामपि निर्लेपनमागमे प्रतिषिद्धं किंपुनः सकलवनस्पतीनां तस्माद्भव्यानामपि तत्र यद्य
सांव्यवहारिकराशिनिपतिता अनंतवनस्पतयानस्फुरतः कथमुपपद्यत तस्मादवसीयत अस्त्यसांव्यवहारिकराशिरपि यद्गतानां वनस्पती
नामनादिता किंचायमपि गाथा पुरूपदशादागता समयप्रसिद्धा अत्थि अणंता जीवा जेहिं न पत्तो तसाइपरिणामो ते वि अणंताणंता निगोयवा
वासं अणुवसंति ततइत्यायसांव्यवहारिकराशिः सिद्धेत्र उपपत्तेवणस्सईणनिल्लेवणवणानंतमाणं अनादाइनतं अवत्तव्वणस्सई
नअपवंचाणादिवणस्सईण अत्थि अणंता जीवा इत्यादिमाविगाहाउवएसागयासमयए अत्थि अणंताजीवा इत्यादि तावदंसव्वं सांव्यव
हारिकानधिकृत्यावसेयं नासांव्यवहारिकान् विशेषविषयत्वात्सूत्रस्य न त्वेतत्स्वमनीषिकाविजृंभितं यत आह जिनभद्रगणिक्षमाश्रमणः

प्रज्ञाप० वृत्तिः॥

स्थापादः तहकायद्विईकालादयो विमलपड्डवत्तिकरजीव नाणाईवणस्सइणाइ संववहारवाहिरयाश्चापि वाः स्पष्टमित्यादियदस्यामद
प्रज्ञापनायां वक्ष्यते प्रागुक्तं च तत्र स्थितिः तातानकाश्चिदोषः तस्मकायस्य त्रसत्वमतीतं पश्चात् तव सकायादीनू पर्याप्तापर्याप्तविशेषणविशिष्टान् चिंतय
न्नाह सकाइयअपज्जत्तएणं भंते इत्यादि सुगमं नवरं तेजस्कायसूत्रे उत्कर्षतः संख्ययानि रात्रिंदिवानीति तेजस्कायस्य हि नवस्थितिरुत्कर्षतो
त्रीणि रात्रिंदिवानि त्वबहुत्वे तत्र त्रवर्षाणि वर्षसहस्राणि वा संप्रति कायद्वारांतः प्रवेशात्सत्वा सूक्ष्मकायिकादीननिरूपयितुकाम आह सुहु
मेणं भंते इत्यादि सूक्ष्मः सूक्ष्मकायिको भदंत सूक्ष्म इति सूक्ष्मत्वपर्यायविशिष्टः सन्नव्यवच्छेदेन कालतः कियच्चिरं भवति भगवानाह गोयम
जहन्नेणमित्यादि एतदपि सूत्रं सांव्यवहारिकजीवविषयमवसातव्यम न्यथा उत्कर्षतोऽसंख्येयं कालमिति यन्निर्वचनमुक्तं तन्नोप
पद्येत सूक्ष्मनिगोदजीवानामसांव्यवहारिकराशिनिपतितानां मनादितायाः प्रागुपपादितत्वात् तत्र वर्त्तेताः संख्येया लो
गा इति असंख्येयलोकाकाशप्रतिसमयमेकैकप्रदे शापहारे यावत्य उत्सर्पिण्यवसर्पिण्यो भवंति
तावत्प्रमाणा असंख्येया उत्सर्पिण्य इत्यर्थः सूक्ष्मवनस्पतिकायस्त्र त्रमपि प्रागुक्तयुक्तिवशात् सांव्यवहारिकजीवविषयम
वसेयं तथा सूक्ष्माः सामान्यतः पृथिवीकायिकादिविशिष्टाश्च पर्याप्ताः अपर्याप्ताश्च निरंतरं भवंतो जघन्यत उत्कर्षतो वांतर्मुहूर्त्तंका
लं यावत् नपरमपि ततः सूक्ष्मविषयसूत्रकदंबकं सर्वमपि जघन्यत उत्कर्षतो वांतर्मुहूर्त्तं मुक्तं बादरसामान्यसूत्रे उत्कर्षमसंख्येयं कालं तस्यैव विशेष निर्द्धे
शेणाईमाह असंख्येया उत्सर्पिण्यवसर्पिण्यः इदं कालतः परिमाणमुक्तं क्षेत्रत आह अंगुलस्य असंख्येयभागः किमुक्तं भवति अंगुलस्या
संख्येयतमे भागे यावंत आकाशप्रदेशास्तेषां प्रतिसमयमेकैकप्रदेशापहारे यावत्यः संख्येया उत्सर्पिण्यवसर्पिण्यो भवंति तावत्यइ
ति अथ कथमंगुलासंख्येयभागमात्रस्यापि प्रतिसमयमेकैकप्रदेशापहारादसंख्येया उत्सर्पिण्यवसर्पिण्यो लगंति उच्यते क्षेत्रस्या
सूक्ष्मत्वात् उक्तं च सुहुमोय होइ कालो ततो सुहुमयरयं हवइ खेत्तं मित्यादि तत्र बादरवनस्पतिकायेऽपि एवं भावनीया असौ बादर १५७

स्येतावत्कायस्थितिरसंभवात् शेषसूत्राणि द्वारसमाप्तिं यावत् सुगमानि गतं कायद्वारमिदानीं योगद्वारमभिधित्सुराह सयोगी णं भंते इत्यादि योगा
मनोवाक्कायव्यापारास्ते योगा एषां संतीति योगिनो मनोवाक्कायाः सह योगिनो यस्य न वा सयोगी अत्र निर्वचनं सयोगी दुविहे पन्नत्ते इत्यादि
अनादिपर्यवसितो योऽनादि निर्वर्त्तितो भव्यः सोऽपि तथा कदापि नापि मोक्षं गंता सहि सर्वकालमवश्यमन्यतमेनायोगेन सयोगी ततो अनाद्यपर्यवसितो यस्तु यास्यति मोक्षं सोऽ
नादिसपर्यवसितो मुक्तिपर्यायप्रादुर्भावे योगस्य सर्वथापगमात् मनोयोगिसूत्रे जघन्यत एकं समयमिति यदा कश्चिदौदारिककाययोगेन प्रथ
मसमये मनोयोगिपुद्गलान् आदाय द्वितीयसमये मनस्त्वेन परिणमय्य मुंचति तृतीयसमये चोपरमते म्रियते वा तदा एकं समयं मनोयोगी लभ्यते उ
त्कर्षतोंऽतर्मुहूर्त्तं निरंतरं मनोयोग्यपुद्गलानां ग्रहणविसर्गौ कुर्वन् तत ऊर्ध्वं सोऽवश्यं जीवस्वाभाव्यादुपरमति वचो योपि ग्रहणविसर्गौ करोति
उत्कर्षतोंऽतर्मुहूर्त्तं परं कालं सोऽस्मात् कदाचित् सुयं वेदन परमायातितत्तउत्कर्षतोऽपि म नोयोगी तमुहूर्त्तमेव एवं वाग्योगी विद्यते एवं मनोयोगीव
वाग्योगोऽपि वक्तव्यः सद्यस्वावद्वयोगीणं भंते वइयोगीति का लतः केवच्चिरं होइ गोयमा जहन्नेणं एक्कं समयं उक्कोसे
णं अंतमुहुत्तमिति तत्र यः प्रथमसमये काययोगेन भाषायोग्या नि द्रव्याणि गृह्णाति द्वितीयसमये तानि भाषात्वेन परिणमय्य मुं
चति तृतीयसमये चोपरमते म्रियते वा स एकं समयं वाग्योगी लभ्यः तत आह मूलटीकाकारः प्रथमसमये काययोगेन गृहीत्वा
णं भासा दव्वाणं बिइयसमए वइयोगेणं निसिरंति कां कण्णं गं वरमं वस्समरंतस्स वा एगसमउ लब्भइ इति अंतर्मुहूर्त्तं निरंतरं ग्रहणविसर्गौ कुर्वन्
तदनंतरं चोपरमते ततः प्राजीवस्वाभाव्यात्काययोगी जघन्यतोंऽतर्मुहूर्त्तमिति इह द्वीन्द्रियादीनां वाग्योगो विलभ्यते संज्ञिपंचेंद्रियाणां मनो
योगोऽपि तत्तो यदा वाग्योगो भवति मनोयोगो वा तदा न काययोग प्राधान्यमिति सादिसपर्यवसितत्वात्तावात् जघन्यतोंऽतर्मुहूर्त्तं काय
योगी लभ्यते उत्कर्षतो वनस्पतिकालः स च प्रागेवोक्तः वनस्पतिकायिकस्तु हि काययोग एवाक्कचलनेन वाग्योगा मनोयोगा वा तन्न
शेषयोगासंभवात्तस्य काययोगस्थितिस्तत्र काययोगइति भावः अयोगी च सिद्धः स च साद्यपर्यवसित इत्ययोगी साद्यपर्यवसित उक्तः गतं योगद्वा

रमिदानीं वेदद्वारं प्रतिपिपादयिषुराह । स वेदए णं भंते इत्यादि सह वेदोदयेन वर्त्तत इति सवेदकः शेषाद्वेति कप्रत्ययः स च त्रिविधस्तद्यथा अनाद्यपर्य
वसितोऽनादिसपर्यवसितः सादिसपर्यवसितश्च तत्र य उपशमश्रेणिं क्षपकश्रेणिं वा न जातुचिदपि प्राप्स्यति सोऽनाद्यपर्यवसितः कदाचिदपि त
स्य वेदोदयव्यवच्छेदासंभवात् यस्तु प्राप्स्यत्युपशमश्रेणिं क्षपकश्रेणिं वा सोऽनादिसपर्यवसितः उपशमश्रेणिं प्रतिपन्नो क्षपकश्रेणिप्रतिपन्नो वा
वेदोदयव्यवच्छेदस्य भावित्वात् यस्तूपशमश्रेणिं प्रतिपद्यावेदको भूत्वा उपशमश्रेणीतः प्रतिपतन् सवेदको भवति स सादिसपर्यवसितः
स च जघन्येनान्तर्मुहूर्त्तं कथमिति चेदुच्यते इह यदा कोऽप्युपशमश्रेणिं प्रपन्नस्त्रिविधमपि वेदमुपशमय्य पुनरपि श्रेणीतः प्रतिपतन् सवेदक
त्वं प्राप्य झटित्युपशमश्रेणिं कर्मग्रन्थिकाभिप्रायेण क्षपकश्रेणिं वा प्रति पद्यते प्रतिपद्य च वेदत्रयमुपशमयति क्षपयति वा अन्तर्मुहूर्त्तानन्तरं तदा
जघन्येनान्तर्मुहूर्त्तं सवेदकः उत्कर्षतोऽनन्तमपार्द्धपुद्गलपरावर्त्तं देशोनं । अपगतमर्द्धं यस्य सोऽपार्द्धः अर्द्धमात्र देशोनः किञ्चिदूनः उप
शमश्रेणीतो हि प्रतिपतित एतावन्तं कालं संसारे पर्यटति मतः । यथोक्तस्योत्कर्षतः सादिसपर्यवसितस्य सवेदकस्य कालमान
मुपपद्यते स्त्रीवेदविषयं पंचादेशान् सामान्यतः क्रमेण निरूपयति एगे णं आदेसेणमित्यादि तत्र सर्वत्रापि जघन्यतः समयमात्रभावनीयं
काचित्युवतिरुपशमश्रेण्यां वेदत्रयोपशमेनावेदकत्वमनुभूय ततः श्रेणेः प्रतिपतन्ती स्त्रीवेदोदयमेकसमयमनुभूय द्वितीयसमये कालं
कृत्वा देवेषूत्पद्यते तत्र च तस्याः पुंस्त्वमेव न स्त्रीत्वं तत एवं जघन्यतः समयमात्रं स्त्रीवेदः उत्कर्षचिन्तायामियं प्रथमादेशभावना काचिन्नरतिर
श्ची भूत्वा पूर्वकोट्यायुष्कासु मध्ये पंच षड् वा भवाननुभूय ईशानकल्पे पंचपंचाशत्पल्योपमप्रमाणोत्कृष्टस्थितिषु परिगृहीतासु देवीषु मध्ये देवी
त्वेनोत्पन्ना ततः स्वायुःक्षये च्युत्वा भूयोऽपि नरतिरश्ची भूत्वा पूर्वकोट्यायुष्कासु मध्ये स्त्रीत्वेनोत्पन्ना ततो भूयोऽपि द्वितीयवारमीशानदेवलोके पंचपं
चाशत्पल्योपमप्रमाणोत्कृष्टायुष्कासु परिगृहीतदेवीषु मध्ये देवीत्वेनोत्पन्ना ततः परमवश्यं वेदान्तरमवगच्छतीति एवं दशोत्तरं पल्योपमशतं पूर्व
कोटिपृथक्त्वाभ्यधिकं प्राप्यते अत्र पर आह ननु यदि देवकुरूत्तरकुर्वादिषु पल्योपमत्रयस्थितिकासु स्त्रीषु मध्ये समुत्पद्यते ततोऽधिकापि स्त्रीवेदस्य २५८

। ॥

स्थितिरवाप्यते ततः किमित्येतावत्येवोपदिष्टा तदयुक्तमभिप्रायापरिज्ञानात् तथाहि इह तावद्देवीभ्यश्च्युत्वा असंख्येयवर्षायुष्कासु स्त्रीषु मध्ये
नोत्पद्यते देवयोनेरनन्तरमसंख्येयवर्षायुष्कमध्ये उत्पादप्रतिषेधात् नाप्यसंख्येयवर्षायुष्का मृता सती योषित् उत्कृष्टायुष्कासु देवीषु मध्ये जायते
यत उक्तं मूलटीकाकृता जाता असंखेज्जवासाउया उक्कोसठिइं न पावइ इति ततो यथोक्तप्रमाणैवोत्कृष्टा स्थितिः स्त्रीवेदस्यावाप्यते द्वितीयादेशवा
दिनः पुनरेवमाहुः नरतिरश्ची भूत्वा पूर्वकोट्यायुष्कासु मध्ये पंच षड् वा भवाननुभूय पूर्वप्रकारेण ईशानदेवलोके वारद्वयमुत्कृष्टस्थितिकासु देवी
षु मध्ये उत्पद्यमाना नियमतः परिगृहीतास्वेवोत्पद्यते नापरिगृहीतासु ततः सम्मीलितेनोत्कृष्टमवस्थानं स्त्रीवेदस्याष्टादशपल्योपमानि पूर्वकोटिपृथक्त्वं च तृ
तीयादेशवादिनां तु सौधर्मदेवलोके परिगृहीतासु सप्तपल्योपमप्रमाणोत्कृष्टायुष्कासु वारद्वयं समुत्पद्यते तस्मात्तन्मते चतुर्दशपल्योपमानि पूर्वको
टिपृथक्त्वाभ्यधिकानि स्त्रीवेदस्य स्थितिः चतुर्थादेशवादिनां तु मतेन सौधर्मदेवलोके पंचाशत्पल्योपमप्रमाणोत्कृष्टायुष्कास्वपरिगृहीतदेवीषु
पूर्वप्रकारेण वारद्वयं देवीत्वेनोत्पद्यते ततः सम्मीलितेन पल्योपमशतं पूर्वकोटिपृथक्त्वाभ्यधिकमवाप्यते पंचमादेशवादि
नां पुनरिदमाकूतं नानाभवभ्रमणद्वारेण यदि स्त्रीवेदस्योत्कृष्टमवस्थानं चिन्त्यते तर्हि पल्योपमपृथक्त्वमेव पूर्वकोटिपृथक्त्वाभ्यधिकं प्राप्य
ते न ततोऽधिकं कथमिति चेदुच्यते नारीभूत्वा पूर्वकोट्यायुष्कासु मध्ये सप्त भवाननुभूयाष्टमभवे देवकुर्वादिषु त्रिपल्योपमस्थितिषु मध्ये स्त्री
त्वेन समुत्पद्यते ततो मृत्वा सौधर्मदेवलोके जघन्यस्थितिकासु देवीषु मध्ये देवीत्वेनोपजायते तदनन्तरं चावश्यं वेदान्तरमधिगच्छतीति अमीषां च पंचा
नामादेशानामन्यतमादेशसमीचीनतानिर्णयोऽतिशयज्ञानिभिः सर्वोत्कृष्टश्रुतलब्धिसंपन्नैर्वा कर्तुं शक्यते ते च भगवदार्यश्यामप्रतिपत्तौ नासीरन्
केवलं तत्कालापेक्षया ये पूर्वप्रवर्तिताः सार्थप्रकालनाभिप्रायेण स्वपर्यालोचनया यथाभिमतं स्त्रीवेदस्य स्थितिं प्ररूपितवन्तः तेषां सर्वेषामपि प्रावच
निकसूरीणां मतानि भगवानार्यश्यामोऽनुपदिष्टवानिति प्रावचनिकसूरयः सूत्रमिति तत्सूत्रं पठन्तो गौतमप्रश्नभगवन्निर्वचनरूपतया प
ठितेन सूत्रे देवस्थान्यवस्त्राणि लिखितानि प्रायमाऽस्मत्कमत्या भगवता गौतमायेति निर्दिष्टमिति संवादं कथमनुपपद्यते भगवतः सकलसंशय

क्षपनसुपपद्यते भगवतः सकलसंज्ञायातीतत्वात् अवेदस्य जघन्यतोऽन्तर्मुहूर्त्तमिति यदा कश्चिदुपशान्तवेदो जीव उपशान्तहत्य सवेदवेदत्वं प्रतिपद्यते तत्रा
वान्तर्मुहूर्त्तं सर्वोपशान्तवेदो भूत्वा ततोऽन्यतरवेदेषु मध्ये अन्यतमं वेदमुपयाति तदा स वेदस्य जघन्यतोऽन्तर्मुहूर्त्तमानं कालं नपुंसकवेदसूत्रे जघन्यत एकः समयः
स्त्रीवेदस्येव भावनीय उत्कर्षतो वनस्पतिकालः स च प्रागेवोक्त एव सांव्यवहारिकजीवानधिकृत्य यदा असांव्यवहारिकजीवानधिकृत्य चिन्त्यते त-
दात तदा हि विशेषतो न सकलवेदो न केवलं कश्चिदधिकृत्यानाद्यपर्यवसानो यथा ज्ञातुं विदिषुः असांव्यवहारिकराशेरोप्युत्पत्ति कश्चिदुत्तिष्ठति कश्चिदुत्तिष्ठत्यपुनर
नादिसपर्यवसानाद्यअसांव्यवहारिकराशेर्विहरत्यसांव्यवहारिकराशौ वा गमिष्यति अवश्यं किम् असांव्यवहारिकराशेरविनिर्गतो यः सांव्यवहारिकम
गावागमिष्यतीति पयंते वप्रहृपणा क्रियते उच्यते अगमिष्यतीति कश्चिदेवासत्यमिति। विवतूच्यते सर्वेषामाचार्यपादानां समाचारदि: प्रमाद्यकारिति मन्त्रे
नदरवनप्रदीपा नामा वा तु ज्ञिनतन्त्रगणिक्षमाश्रमणः सिद्धसेनदिवाकर इत्यसांव्यवहारिकजीवराशीनां तिष्ठन्त्यानेवानास्त हरामीति
तिष्ठियातमपि अवेदको द्विधा साद्यपर्यवसितः सादिसपर्यवसितश्च तत्र यः क्षपकश्रेणिं प्रतिपन्नोऽवेदको न वर्तिष्यसाद्यपर्य
वसितः क्षपकश्रेणिः प्रतिपाताभाववान्स्य उपशमश्रेणिप्रतिपन्नोऽवेदको ज्ञायात समसादिः पर्यवसितः स च जघन्येनैकं समयं कथ-
मेकं समयमिति चेदुच्यते यदा एकं समयमवेदको भूत्वा द्वितीयसमये पंच वयमाणोऽवति तदा तस्मिन्नवयंचसमये देवत्वं प्राप्य सुरुषवेदी
दयान्सवेदको भवति ततं एवं जघन्यत एकसमयमवेदकः उत्कर्षतोऽन्तर्मुहूर्त्तं परतोऽवश्यं श्रेणीतः प्रतिपतनेन वेदोदयसद्भावात् गतं वेदद्वारमि-
दानीं कषायद्वारमभिधित्सुराह सकषाई णं भंते इत्यादि सह कषायैर्यो वर्तते स सकषायी जीवपरिणामविशेषाभिन्नं विद्यते यस्य स सकषायी इ-
दं सकलमपि सूत्रं सवेदसूत्रं सवेदसूत्रवद्भावनीयं समानभावनाकत्वात् कोहकसाई णं भंते इत्यादि जघन्यतोऽप्यन्तर्मुहूर्त्तमुत्कर्षतोऽप्यन्तर्मुहू-
र्त्तमिति क्रोधकषायोपयोगस्य जघन्यतोऽन्तर्मुहूर्त्तप्रमाणत्वात् तथाजीवस्वाभाव्यात् एवं सूत्रचतुष्टयमपि विशेषापयोगापेक्षमिति लाभकषा-
यी जघन्यत एकसमयमिति यदा कश्चिदुपशमकः उपशमश्रेणिपर्यवसाने उपशान्तवीतरागो भवश्रेणितः प्रतिपतन्लोभाणुप्रथमसमयसंवेदनएव

कालं कृत्वा देवलोके सम्पद्यते तत्रोत्पन्नः सन् क्रोधकषायी मानकषायी मायाकषायी वा भवति तदा एकं समयं लोभकषायी लभ्यते अथैवं क्रोधादिष्वप्येकस-
मयता कस्मान्न लभ्यते उच्यते स्वभावात् तथाहि श्रेणितः प्रतिपतन्मायाणुवेदनप्रथमसमये क्रोधाणुवेदनप्रथमसमये वा यदि कालं करोति कालं कृत्वा देवलोके समुत्पद्यते
तदापि तथास्वाभाव्यात्तेनैव कषायोदयेन कालेऽकृतवान् तमेव कषायोदयं तत्रापि गतः सन्नन्तर्मुहूर्त्तमनुवर्त्तयति एवं स्वभावसामर्थ्यात् अधिकृतसूत्रप्रामाण्यात् तथा अनेकसमु-
यता क्रोधादिष्विति उक्तं कषायसूत्रं सवेदसूत्रं सवेदसूत्रमिव भावनीयं गतं कषायद्वारमधुना लेश्याद्वारमभिधित्सुराह सलेसे णं भंते इत्यादि सह लेश्यया यस्य
येन वा स सलेश्यः स द्विविधस्तद्यथा अनादिरपर्यवसितो यो न जातुचिदपि संसारव्यवच्छेदं करिष्यति अनादिसपर्यवसितो यः संसारपारगामी कण्हलेसे णं
भंते इत्यादि इह तिर्यग्मनुष्याणां लेश्या इत्यन्तर्मुहूर्त्तिका ततः परमवश्यं लेश्यान्तरपरिणामभावात् देवनैरयिकाणां तु पूर्वभवचरमान्तर्मुहू-
र्त्तादारभ्य परभवगतमाद्यमन्तर्मुहूर्त्तं यावत् अवस्थिता ततः सर्वजघ- न्यमन्तर्मुहूर्त्तं तिर्यग्मनुष्यापेक्षया उत्कर्षमुत्कृष्टं देवनैरयिकापे-
क्षया तत्र चिन्त्यमिति भाव्यते तत्र यदुक्तं त्रयस्त्रिंशत्सागरोपमा- णि अन्तर्मुहूर्त्ताभ्यधिकानीति तत्सप्तमनरकपृथिव्यपेक्षया
या इष्टव्यं तत्र हि नैरयिकाः कृष्णलेश्याकाः तेषां च स्थितिरुत्कृष्टा त्र- यस्त्रिंशत्सागरोपमाणि यत्पुनः पूर्वोत्तरभवगतं यथाक्रमं चरमाद्य-
मन्तर्मुहूर्त्तं तदप्युत्कर्षमन्तर्मुहूर्त्तं मन्तर्मुहूर्त्तस्यासंख्यातभेदभिन्नत्वात् भावात् अत्राप्येकमेव मुहूर्त्तमवगन्तव्यमिति त्रयस्त्रिंशत्सागरोपमाण्यन्तर्मुहूर्त्ताभ्यधिका नीलले-
श्याधिकारे यो नैव गर्भकलले सामान्यं भगवता प्रतिकृता व्याख्यातमन्तर्मुहूर्त्ताधिकानि नीललेश्याभावतया दशसागरोपमाणि पल्योपमासंख्येयभागा-
भ्यधिकानि तानि पञ्चमपृथिव्यपेक्षयावसेयानि तत्र हि प्रथमप्रस्तटे नीललेश्या पञ्चमस्यामपीति वचनात् तस्मिंश्च प्रथमप्रस्तटे स्थितिरुत्कर्षत
एतावती यदुक्तं पूर्वोत्तरभवगतं अन्तर्मुहूर्त्तं तत्पल्योपमासंख्येयभागे प्रविष्टमिति न पृथग्विवक्षितं एवमुत्तरत्रापि द्रष्टव्यं कापोतलेश्या सूत्रेत्री-
णि सागरोपमाणि पल्योपमासंख्येयभागाभ्यधिकानि तृतीयनरकपृथिव्यपेक्षया वसातव्यानि तृतीयपृथिव्यामपि प्रथमप्रस्तटे कापोतलेश्यायाभावात् तृतीयपृथिव्यामपि या-
इति वचनात् तत्र चोत्कृष्टस्थितिरेतावती सन्नवा तेजोलेश्या सूत्रे द्वे सागरोपमे पल्योपमासंख्येयभागाभ्यधिके ईशानदेवलोकदेवापेक्षया वदितं।

ल्यानेरितरज्जालेश्याकोत्कर्षतएतावस्थितिकाश्चपद्मालेश्यासूत्रेदशसागरोपमाणिअंतर्मुहूर्ताभ्यधिकानिब्रह्मलोकापेक्षयाभावनीयानितत्रदेवानांहि स्थि
तिरुत्कृष्टादशसागरोपमाणिलेश्याचपद्मलेश्याएवंशरीरावसानेतत्रगतेअंतर्मुहूर्त्तंभवतिकिलेकमंतर्मुहूर्त्तमिति अंतर्मुहूर्त्ताभ्यधिकानीत्युक्तंशुक्ललेश्यप
१सूत्रे त्रयस्त्रिंशत्सागरोपमाणिअंतर्मुहूर्त्ताभ्यधिकानिअनुत्तरसुरापेक्षयातत्रोत्कर्षतः स्थितेस्त्रयस्त्रिंशत्सागरोपमप्रमाणत्वात् अंतर्मुहूर्त्ताभ्यधिकत्वं
चावतांभवाग्रत अलेश्यःअयोगिकेवलीसिद्धश्चतत्रोपमपदवस्थायामलेश्यत्वव्याघातइतिसाद्यपर्यवसितः गतंलेश्याद्वारमिदानींसम्यक्त्वद्वारं तदिदमा
दिसूत्रं ७ सम्मद्दिट्ठीणंभंतेइत्यादिसम्यगविपर्यस्तादृष्टिर्जिनप्रणीतवस्तुतत्वप्रतिपत्तिर्यस्यससम्यग्दृष्टिः संचांतरकरणकालेनाविनाऔपशमिकसम्य
क्त्वेनसास्वादनसम्यक्त्वेनविशुद्धदर्शनमोहपुंजोदयसंभविनाक्षायोपशमि कसम्यक्त्वेनसकलदर्शनमोहनीयक्षयसमुद्भवक्षायिकसम्यक्त्वेन
वाद्रष्टव्यः त्रिविधःसम्यग्दृष्टिर्द्विविधःप्रज्ञप्तः तद्यथासाद्यपर्यवसितएष क्षायिकसम्यक्त्वमुत्पादितस्यतिवेदितव्यः तस्यप्रतिपाताभावात्
सादिसपर्यवसितएषक्षायोपशमिकादिसम्यक्त्वापेक्षयातत्राया। स्तिमादिपर्यवसितसम्यग्दृष्टिः सजघन्यतोंतर्मुहूर्त्तंपर
तोमिथ्यात्वगमनात् उत्कर्षतःषट्षष्टिसागरोपमाणिसातिरेकाणितत्रयदि वारद्वयंविजयादिषुचतुर्षुप्रतिपतितसम्यक्त्वउत्कृष्टस्थितिकोदेव
उत्पद्यतेतत्रलात्रयंवाच्युतेदेवलोकेततोदेवभवेत्वषट्षष्टिसागरोपमाणि। परिशुद्धानिभवंति येतुमनुष्यभवाःसम्यक्त्वसहितास्तैरभ्यधिकाइतिते
सातिरेकाणीत्युक्तंच दोवारेविजयाइसुगयस्सतिन्नच्चुएअहवताइंअइरेगंनरभवियमितिमिच्छद्दिट्ठीणंभंतेइत्यादिमिथ्याविपर्यस्तादृष्टिर्जीवा
जीवादिवस्तुतत्वप्रतिपत्तिर्यस्यनक्षितइच्छसूत्रपदमपिनरोचतेप्रतिपत्तिवत्समिथ्यादृष्टिः सतुमिथ्यादृष्टिरपिकश्चित्तुमनस्वानस्यनयाज्ञानातिपर्यपयंतु
यामस्तुयमस्तुयतयापश्चात्पश्चातयाततः सकथंमिथ्यादृष्टिरुच्यतेभगवतिसर्वज्ञेतस्यप्रत्ययाभावात्तदुक्तंसूत्रोक्तस्यैकस्याप्यरोचनादक्षरस्यभवतिनरःमिथ्यादृष्टिः सूत्रंहितप्रमाणंजिनाभिहितंकिंपुनःशेषालगवदर्हदभिहितयथावस्थजीवाजीवादिवस्तुतत्वप्रतिपत्तिविकलःनतुसक

लप्रवचनार्थाभिरोचनार्थाभिरोचनात्तत्कतिपयार्थानांचारोचनातोदेषस्यायतःसम्यग्मिथ्यादृष्टिरेवसविस्तुमर्हतिकथंमिथ्यादृष्टिस्तदसत्वस्तुतत्वापरिज्ञा
नात्इहयदासकलवस्तुजिनप्रणीततयासम्यक्श्रद्धत्तेतदानीमसौसम्यग्दृष्टिःयदात्वेकस्मिन्नपिवस्तुनिपर्यायेवामतिदौर्बल्यादिनाएकांतेनसम्य
क्परिज्ञानमिथ्यापरिज्ञानाभावातोनसम्यक्श्रद्धत्तेनाप्येकांतेनविप्रतिपद्यतेतदासम्यग्मिथ्यादृष्टिरुक्तंच जातकहदत्तुस्सोऽन्नपानालिकेरदीववासि
स्सरलुहाइयस्सविइत्तमभागयस्सउविसस्सउयणाइएसुएगविहरादाइएतस्सआहारस्सउवरितरुईनयनिंदाजेणतेणसोउयणाइउआहा
रानकयाइदिहानाविसुयएवंसम्माभिच्छद्दिट्ठस्सजिजीवाइपयद्वाणंउवरितयरुईनाविनिंदंतियदापुनरेकस्मिन्नपिवस्तुनिपर्यायेवाएकांततोविप्रति
पद्यतेतदामिथ्यादृष्टिरेवत्यादोषःसचत्रिविधस्तद्यथाअनाद्यपर्यवसि। तोऽनादिपर्यवसितश्चतत्रयःकदाचनापिसम्यक्त्वंनावाप्स्यतिसोऽनाद्यप
र्यवसितःयस्त्वावाप्स्यतिसोनादिसपर्यवसितःयस्तुसम्यक्त्वमासाद्य भूयोपिमिथ्यात्वंयातिससादिसपर्यवसितःसजघन्येनांतर्मुहूर्त्तं
तदनंतरंकस्यापिभूयःसम्यक्त्वावाप्तेःउत्कर्षतोऽनंतंकालंत। मेवानंतंकालंद्विधाप्ररूपयतिकालतःक्षेत्रतश्च तत्रकालतो
ऽनंताउत्सर्पिण्यवसर्पिणीर्यावत्क्षेत्रतोऽपार्द्धपुद्गलपरावर्त्तंदे। शोनंअपार्द्धंवत्इतिनिर्देशात्क्षेत्रपुद्गलपरावर्त्तंपरियाद्योनंत
द्व्यपुद्गलपरावर्त्तादयःएवंभावार्त्तरत्रापिचभावनीयं सम्मामिच्छद्दि। ट्ठीणमित्यादिसम्यक्त्वमिथ्यात्वदृष्टिर्यस्यासौसम्यग्मिथ्यादृष्टिःसजघ
न्यतोत्कर्षतोवाअंतर्मुहूर्त्तंपरतोऽवश्यंतस्यपरिणामविध्वंसात्तथाजीवस्वाभाव्यान्गतंसम्यक्त्वद्वारमिदानींज्ञानद्वारंतदिदमादिसूत्रं ७ नाणीणंभं
तेइत्याज्ञानमस्यास्तीतिज्ञानीतत्केवलज्ञानापेक्षयासाद्यपर्यवसितःसादिपर्यवसितश्चतत्रकेवलज्ञानापेक्षयासाद्यपर्यवसितःप्रतिपाताभावा
त्शेषज्ञानापेक्षयासादिसपर्यवसितःशेषज्ञानानांप्रतिनियतकालभाविलात्सजघन्येनांतर्मुहूर्त्तंपरतोमिथ्यात्वगमनेनज्ञानपरिणामापग
मात्उत्कर्षतःषट्षष्टिसागरोपमाणिसातिरेकाणियावन्तोहिसम्यग्दृष्टेरवलोवनीयानिसम्यग्दृष्टेरवज्ञानित्वात् आभिनिबोधिकज्ञानिसूत्रे
एवंचवतिप्रथमामास्यादोज्ञानीसादिसपर्यवसितोजघन्येनोत्कर्षतश्चोक्तप्रमाणमितिबोधिकज्ञान्यपिवक्तव्यःसच्चेवंजहन्नेणंअंतोमुहुत्तंउ।

प्रज्ञा० ४०॥ कोसेणं छावट्ठी सागरोवमाइं साइरेगाइं एवं श्रुतज्ञान्यपि अवधिज्ञानी अवधिज्ञानी जघन्यत एकं समयं वक्तव्यः कथमेकसमयतावधिज्ञानस्ये-
ति इह तिर्यक्पंचेन्द्रियो मनुष्यो वा विभंगज्ञानी सन् सम्यक्त्वं प्रतिपद्यते तस्य च सम्यक्त्वप्रतिपत्तिसमय एव सम्यक्त्वप्रभावात् विभंगज्ञानमवधिज्ञानं जातं त-
च्च यदा देवस्य च्यवनेन मरणेनान्यस्यान्यथा वा तेनेतरसमये प्रतिपतति तदा स च अवधिज्ञानस्यैकसमयता उत्कर्षतः सातिरेकाणि षट्षष्टिसागरोप-
माणि यावत् तानि चाप्रतिपतितावधिज्ञानस्याच्युते द्वयं विजयादिषु गमनेन वा त्रयमच्युतदेवलोकगमनेन वा वेदितव्यानि मनःपर्यवज्ञानी एकस-
मयतां संयतस्याप्रमत्ताद्धायां वर्त्तमानस्य मनःपर्यायज्ञानमुत्पद्यानन्तरसमये कालं कुर्वतो भावनीया उत्कर्षतो देशोना पूर्वकोटी ततऊर्ध्वं संयमाभा-
वात् मनःपर्यवज्ञानस्याप्यभावात् केवलज्ञानी साद्यपर्यवसितः प्रति- पाताभावात् अज्ञानी त्रिविधस्तद्यथा अनाद्यपर्यवसितः अनादिसपर्य-
वसितः सादिसपर्यवसितस्तत्र यस्य न कदाचनापि ज्ञानलाभो भावी सोऽनाद्यपर्यवसितो यस्तु ज्ञानमासादयिष्यति सोऽनादिप-
र्यवसितः यः पुनः ज्ञानमासाद्य भूयो मिथ्यात्वगमनेनाज्ञानित्व- मधिगच्छति स सादिसपर्यवसितः स च जघन्येनांतर्मुहूर्त्तं परतः
सम्यक्त्वमासादयतो ज्ञानित्वपरिणामोपगमसंभवात् उत्कर्षतोऽनंतं। कालमित्यादि प्राग्वत् ततऊर्ध्वमवश्यं सम्यक्त्वावाप्त्या ज्ञानित्वोपगमात् ए-
वं मत्यज्ञानी श्रुताज्ञानी च त्रिविधो भावनीयः विभंगज्ञानी विभंगज्ञा- नी जघन्यत एकं समयं कथमिति चेत् उच्यते कश्चित् तिर्यक्पंचेन्द्रियो मनु-
ष्यो देवो वा सम्यग्दृष्टिर्वा देवावधिज्ञानी सन् मिथ्यात्वं गतस्तस्मिंश्च मिथ्यात्वप्रतिपत्तिसमये मिथ्यात्वप्रभावादवधिज्ञानं विभंगज्ञानीभूतं अथ च यमज्ञानमपि
नवति मिथ्यात्वसंयुक्तमिति वचनात् ततोऽनंतरसमये देवस्य मरणेनान्यस्यान्यथा वा तद्विभंगज्ञानं प्रतिपतति तत एवमेकसमयता विभंगज्ञानस्योत्कर्षतस्त्रय-
स्त्रिंशत्सागरोपमाणि देशोनपूर्वकोट्यभ्यधिकानि तथाहि यदि कश्चिन्मिथ्यादृष्टिस्तिर्यक्पंचेन्द्रियो मनुष्यो वा पूर्वकोट्यायुः कतिपयवर्षातिक्रमे विभंग-
ज्ञानी जायते जातश्च सन्नप्रतिपतितविभंगज्ञान एवाविग्रहगत्या सप्तमनरकपृथिव्यां त्रयस्त्रिंशत्सागरोपमस्थितिको नैरयिको जायते तदा भवति यथो-
क्तमुत्कृष्टमानं ततऊर्ध्वं तु सम्यक्त्वप्रतिपत्त्यावधिज्ञानभावतः सर्वथापगमाद्वा तद्विभंगज्ञानमपगच्छति गतं ज्ञानद्वारमिदानीं दर्शनद्वारं तत्रेदमादिसूत्रं च- २६१

चक्खुदंसणी णं भंते इत्यादि इह यदा त्रीन्द्रियादिभ्यश्चतुरिन्द्रियादिषूत्पद्यते तत्र चांतर्मुहूर्त्तं स्थित्वा भूयोऽपि त्रीन्द्रियादिषु मध्ये समुत्पद्यते तदा चक्षुर्दर्शनी अंतर्मुहूर्त्तं
लभ्यते उत्कर्षतः सातिरेकं सागरोपमसहस्रं तच्च चतुरिन्द्रियतिर्यक्पंचेन्द्रियनैरयिकादिभवभ्रमणेन भावनीयं अचक्षुर्दर्शनी अनाद्यपर्यवसितो यो न क-
दाचिदपि सिद्धिमवाप्स्यति यस्तु सेत्स्यति सोऽनादिसपर्यवसितः तथा तिर्यक्पंचेन्द्रियो मनुष्यो वा तथाविधाध्यवसायादवधिना अवधिदर्शनमुत्पाद्यानंतरस-
मये यदि कालं करोति तदावधिदर्शनं प्रतिपतति तदाऽवधिदर्शनिन एकसमयता उत्कर्षतोऽवधिदर्शनी द्वे षट्षष्टी सागरोपमाणां सातिरेके कथमि-
ति चेत् उच्यते इह कश्चिद्विभंगज्ञानी तिर्यक्पंचेन्द्रियो मनुष्यो वा अप्रतिपतितविभंगज्ञान एवाविग्रहगत्याऽधः सप्तमनरकपृथिव्यां त्रयस्त्रिंशत्सागरोपमस्थि-
तिको नैरयिको जातस्तत्र चावसाने तावत्प्रज्ञासम्भवात् कालं सम्यक्त्वमुत्पाद्य ततः परि- भ्रष्टस्ततः प्रतिपाते तेन विभंगज्ञानेन पूर्वकोट्यायुष्केषु तिर्यक्पं-
चेन्द्रियेषूत्पन्नस्तत्र च परिपूर्णमायुः परिपाल्याप्रतिपतितविभं- ग एवाधः सप्तमपृथिव्यां त्रयस्त्रिंशत्सागरोपमस्थितिको नैरयि-
को जातस्तत्रापि चान्ते सम्यक्त्वप्रत्यासत्तौ सम्यक्त्वमासाद्य परित्यजति ता न्यायुष्यप्रतिपतितविभंग एव पूर्वकोट्यायुष्केषु तिर्य-
क्पंचेन्द्रियेषु जातस्तदेवमेका षट्षष्टिः सागरोपमाणामभूत् सर्वत्रैव। तिर्यक्षूत्पद्यमानो विग्रहेणोत्पद्यते विग्रहे विभंगस्य तिर्य-
क्षु मनुष्येष्वपि च निषेधात् यद्वक्ष्यति विभंगनाणी पंचेंदियतिरिक्खजोणि। यामणूसा आहारगा णो अणाहारगा इति आह किं सम्यक्त्वमपा-
पांतराले प्रतिपद्यते उच्यते इह विभंगस्य स्थितिरुत्कर्षतोऽपि त्रयस्त्रिंशत्सागरोपमाणि देशोनपूर्वकोट्यधिकानि यथोक्तं प्राक् विभंगनाणी उक्को-
सेणं एक्कं समयं उक्कोसेणं तेत्तीसं सागरोवमाइं देसूणाए पुव्वकोडीए अब्भहियाइं इति ततः एतावन्तं कालमविच्छेदेन विभंगस्याप्राप्यमाणत्वात् अ-
पांतराले सम्यक्त्वं प्रतिपद्यते ततः प्रतिपतितविभंग एव मनुष्यभवमवाप्य संयमं पालयित्वा द्वौ वारौ विजयादिषूत्पद्यमानस्य द्वितीया षट्षष्टिः सा-
गरोपमाणामवधिदर्शनस्य अथ विभंगावस्थायामवधिदर्शनं कर्मप्रकृत्यादिषु प्रतिषिद्धं ततः कथमिह विभंगे तज्ज्ञापितेऽपि दोषः सूत्रे विभं-
गेऽप्यवधिदर्शनस्य प्रतिपादितत्वात् तथा चाहुः सूत्रेऽपि प्रायो विशेषविषयं विभंगज्ञानं सामान्यविषयमवधिदर्शनं यथा सम्यग्दृष्टेः विशेषवि-

धिज्ञानं सामान्यविषयमवधिदर्शनं केवलं विभंगज्ञानिनोप्यवधिदर्शनमनाकारमात्रत्वेनाविशिष्टत्वात् अवधिज्ञानिनोप्यवधिदर्शनमनाकारमात्रत्वेना
विशिष्टत्वात् अवधिदर्शनं तुल्यमिति तद्दर्शनमुच्यते न विभंगदर्शनमित्याद्यत्र मूलटीकाकारोप्यत एवावनायादं सम्यग्विभंगाद्भीणज्ञानात्तु इत्येवमु
तावदवसेयं सातिरेकाणि इति ततः स्मातिरेषि विभंगिनः अवधिदर्शनं तावितकामप्युत्कृष्टिका: उतराद्ध्ययंद्यपि नाकारतराविशेषनावनविभंगज्ञा
नमवधिदर्शनं च प्रथमप्राप्तिप्रतिसमयगतिद्वयोरंगज्ञानं तन्मिथ्यात्वाप्तत्वान्नाप्यवधिदर्शनं ततस्यानाकारमात्रत्वादतः किंतन्ष्टगु विवक्षितं तनापी
तितदतिशायेण न विभंगावस्थायामवधिदर्शनं न चैतत्स्वमनीषिकाकल्पितं यतः वृहत्परिनिराप्यवंमतविनागस्याव्यवस्थापितत्वात् तं त्रैव विशेषण
वत्यां जिनभद्रगणिक्षमाश्रमणप्रभृतयोमादेः सुत्रविभंगस्सविपढुवियं तहि दंसणं बहुलगाकीसरूवाणापडिसिद्धं कम्हा एगंतेण मिविभंगो विदसि
णं सामन्नविसेसविसयउ मनतं चवि सिद्धमणगारा सन्नाता विहिविनं। गाणं कम्हा एगडिमयं पुण सागारयरविसेससन्नाविवि नविभंग
नाणदंसणविसेसणमणिडियन्नणउ इति अत्यउन्नावन्नन्ते किं सम्मत्तरकपृथिवीनिवासिनारककल्पतयासामान्ये
देवनारकतिर्यङ्नरामरवदिषुपर्यवतः रवत्पुविधिविभंगावितावंतंकालं सवतस्ततऊर्ध्वमवश्यं इति केवलदर्शनइति सिवं केवलज्ञा
निवत्सनवशावनीयं गतं दर्शनद्वारमिदानीं संयतद्वारं तत्रेदमादिसूत्रं संजएणं भंते इत्यादि जघन्यत एकसमयं ता संयतस्य चास्त्रिपरिणामस
मयएवकस्यापि कालकरणात् असंयतस्त्रिविधः अनाद्यपर्यवसितः अनादिसपर्यवसितः सादिपर्यवसितश्च तत्रयः संयमं कदाचनापिनप्राप्स्यति सो
ऽनाद्यपर्यवसितोयस्तुप्राप्स्यति सोऽनादिपर्यवसितः यस्तु संयमं प्राप्य ततः परिभ्रष्टः स सादिसपर्यवसितः सजघन्यतोन्तर्मुहूर्त्तं ततः परं कस्यचित् ततः
पि संयमप्रतिपत्तिभावात् उत्कर्षतोऽनंतं कालमित्यादि प्राग्वत् ततः ऊर्ध्वमवश्यं संयमप्राप्तिः संयतासंयतो देशविरतः सजघन्यतोप्यंतर्मुहूर्त्तं देश
विरतिप्रतिपत्त्युपयोगस्य जघन्यतोप्यांतर्मौहूर्त्तिकत्वात् देशविरतिर्हि द्विविधत्रिविधादिभंगबहुलाततःप्रतिपत्तोजघन्यतोप्यंतर्मुहूर्त्तं लगति स
र्वविरतिसर्वविरतिश्च सर्वसावद्यमहं न करोमीत्येवं रूपा ततः प्रतिपत्त्युपयोगापेक्षा सामायिकोपि भवतीति प्राक्संयतस्यैकसमयताक्ता यस्तु १६२

नसंयतोनाप्यसंयतो नापि संयतासंयतः स सिद्ध इति गतं संयतद्वारमिदानीमुपयोगद्वारं तत्रेदमादिसूत्रं सागारोवउत्तेणं भंते इत्यादि इह सागारेणा
उपयोगः साकारोनाकारोवा जघन्यतोप्यांतर्मौहूर्त्तिकउत्कर्षतोपि तत: सूत्रद्वयेपि जघन्यतउत्कर्षतश्चांतर्मुहूर्त्तं उक्तं यत्तु केवलिनामुपयोगः एकसा
योगः स इह न विवक्षित इति गतमुपयोगद्वारमिदानीमाहारद्वारं तत्रेदं सूत्रं आहारएणं भंते इत्यादि छउमत्थआहारएणं जहन्नेणं खुड्डागभवग्गहणं दुसम
ऊणमिति इहयद्यपि वक्रः सामायिकः पंचसामायिकोपि च विग्रहगतिर्भवति आह च उज्जुयाएगवंका गतीविणिद्दिहाजहइति चउवंकाविना
म वक्रं पंचसमयान्तु इति तथापि बाहुल्येन हि सामायिकी त्रिसामायिकी वा प्रवर्त्तते न वक्रः सामायिकी पंचसामायिकी वा ततो नात्र विवक्षितेतत्राक्र
र्षतस्त्रिसामायिक्यां विग्रहगतौ द्वावाद्यौ समयावनाहारकाविति ताहारकत्वं। चिंतायां क्षुल्लकभवग्रहणं तास्यान्नमुक्तं जघन्यगतिरेकवक्रगा
तिश्चन विवक्षिता सर्वजघन्यस्यापि चिंत्यमानत्वात् उत्कर्षतोऽसंख्येयं। कालमित्यादि सुगमं एतावतः कालादूर्ध्वमवश्यं विग्रहगति
र्भवति तत्र चानाहारकत्वमित्यनंतं कालमिति नाक्रं केवलिसूत्रं सुगमं छद्मस्थानाहारकसूत्रे उत्कर्षेण दोसमयाइ
ति त्रिसामायिकी विग्रहगतिमधिकृत्य वक्रः सामायिकी विग्रहगतिम धिकृत्य वक्रः सामायिकी पंचसामायिकी वा विग्रहगतिर्न विव
क्षिता त्यक्षित मनंतरं संयोगिनः केवल्यनाहारकस्त्रयः समयाः अष्ट सामायिकस्य केवलिसमुद्घातस्य तृतीयचतुर्थपंचमरूपाः तथाच
दंडप्रथमसमये कपाटमथ द्वितीये मंथानमथ तृतीये लोकव्यापी चतुर्थे तु संहरति पंचमे त्वंतराणि मंथानमथ पुनः षष्ठे सप्तमे तु कपाट
संहरति ह्यष्टमे दंडं अदारिकप्रयोक्ता प्रथमाष्टमासमययोरसाविष्टः मिश्रौदारिकयोक्ता सप्तमषष्ठद्वितीयेषु कार्मणशरीरयोगी चतुर्थके पंचमे
तृतीये च समयत्रयेपि तस्मिन्ननाहारको नियमादिति गतमाहारद्वारमिदानीं भाषाद्वारमाह भासएणं भंते इत्यादि इह जघन्यत एकसमयता उ
त्कर्षतश्चांतर्मुहूर्त्तिकता वाग्योगिनइवावसातव्या अभाषकस्त्रिविधस्तद्यथा अनाद्यपर्यवसितः अनादिसपर्यवसितः सादिसपर्यवसितश्च तत्र यो न जातु
चिदपि भाषकत्वं लप्स्यते सोऽनाद्यपर्यवसितो यस्तु लप्स्यति सोऽनादिपर्यवसितः यस्तु भाषकोभूत्वा भूयोप्यभाषको भवति स सादिसपर्यवसितः सजघ

प्रज्ञाप०वृत्तिः॥

घात्यमांतर्मुहूर्त्तेनैवापि वा किंचित्कालमवस्थायोत्पन्नोपिकत्वापत्तेः अथवा द्वींद्रियादिर्नोपिकत्वं द्रियादिषु नापाकत्वयत्रवांतर्मुहूर्त्तेन संज्ञी विद्वाऽपर
पि यदी द्वींद्रियादिरित्वात्पद्यते तदा जघन्यतांतर्मुहूर्त्तमनोपिकः उत्कर्षतो वनस्पतिकालं सवप्रागिवोक्तमिति नापदर्शितं गतं नोपकद्वारमिदानीं
परीत्तद्वारं परीत्तो द्विविधः कायपरीत्तः संसारपरीत्तश्च तत्र यः प्रत्येकशरीरी स कायपरीत्तो यस्तु सम्यक्त्वादिना कृतपरिमितसंसारः स संसारपरीत्तः का
यपरीत्तो जघन्यतोंतर्मुहूर्त्तं स च यदा कश्चिन्निगोदादुद्वृत्य प्रत्येकशरीरेषु समुत्पद्यते तत्र चांतर्मुहूर्त्तं स्थित्वा भूयोपि निगोदेषूत्पद्यते तदा लभ्यते उत्कर्ष
तः संख्येयं कालं स चासंख्येयः कालः पृथ्वीकालो यावान् पृथिवीकायस्थितिकालस्तावान् वेदितव्य इत्यर्थः तमेव कालतो निरूपयति असंखेज्जाउ
सप्पिणिउसप्पिणीउ संसारपरीत्तो जघन्यतोंतर्मुहूर्त्तं तत ऊर्ध्वमंतकृत्के वलित्वयोगेन मुक्तिसद्भावात् उत्कर्षतोनंतं कालं तमेव निरूपयति
अणंताउ इत्यादि प्राग्वत् तत ऊर्द्धमवश्यं मुक्तिगमनात् कायापरीत्तः सम्यक् शरीरी अकृतपरिमितसंसारः कायापरीत्तो जघन्यतोंतर्मु
हूर्त्तं स च यदा कश्चित्प्रत्येकशरीरी निगोदेषूत्पद्य निगोदेषु समुत्पद्यते तत्र चांतर्मुहूर्त्तं स्थित्वा भूयोपि प्रत्येकशरीरिषूत्पद्यते तत
दावसातव्यः उत्कर्षतो वनस्पतिकालो वाच्यः स च प्रागिवोपदर्शितः त त ऊर्द्धं नियमात्तत उद्वर्त्तः संसारापरीत्तो द्विधा अनाद्यपर्यव
सितो यो न कदाचनापि संसारस्य व्यवच्छेदं करिष्यति यस्तु करिष्यति सोनादि सपर्यवसितः नोपरीत्तो नोअपरीतश्च सिद्धः स च साद्यपर्यवसितः
वपर्याप्तो जघन्यतोंतर्मुहूर्त्तं तत ऊर्द्धमपर्याप्तत्वप्रसक्तेः उत्कर्षतः सातिरेकं सागरोपमशतपृथक्त्वमेतावंतं कालं पर्याप्तलब्ध्यवस्थानसंभवात् अपर्याप्तो
जघन्यत उत्कर्षतश्चांतर्मुहूर्त्तं तत ऊर्द्धमवश्यमपर्याप्तलब्धिक्षतेः नोपर्याप्तोनोअपर्याप्तश्च सिद्धः स च साद्यपर्यवसितः सिद्धत्वस्याप्रच्युतेः सूक्ष्मद्वारे सूक्ष्म
स्ताव उत्कर्षतः पृथ्वीकालः इतियावान् पृथिवीकायिककायस्थितिकालस्तावद्वक्तव्यः बादरसूत्रं प्राग्भवनेनोक्तं तावतापि गतवक्तव्या नोसूक्ष्मानोबाद
रश्च सिद्धस्ततः साद्यपर्यवसितः संज्ञिद्वारे संज्ञी जघन्यतोंतर्मुहूर्त्तमिति यदा कश्चिदसंज्ञिभ्य उद्वृत्त्य संज्ञिषु समुत्पद्यते तत्र चांतर्मुहूर्त्तं संज्ञी
स्थित्वा भूयोपि असंज्ञिषूत्पद्यते तदा लभ्यते उत्कर्षतः प्रागुक्तं असंज्ञी जघन्यतोंतर्मुहूर्त्तं स चैवं कश्चिदसंज्ञिभ्य उद्वृत्य संज्ञिषूत्पद्यते तत्रांतर्मुहूर्त्तं स्थित्वा भूयो

पि संज्ञिषु समागच्छति उत्कर्षतो वनस्पतिकालः अस्य संग्रहणेन ग्रहणात् नोसंज्ञीनोअसंज्ञी च सिद्धः स च साद्यपर्यवसितः भवसिद्धिएणमित्यादि
भवसिद्धिर्यस्यासौ भवसिद्धिको भव्य इत्यर्थः स चानादिपर्यवसितः अन्यथा भव्यत्वायोगात् अभवसिद्धिकोभव्यः स चानाद्यपर्यवसितः अन्यथा
भव्यत्वायोगात् नोभव्यो नोअभव्यश्च सिद्धस्ततः साद्यपर्यवसितः अस्तिकायाः पंचापि सर्वकालमवस्थिताः अद्धासमयोपि प्रवाहापेक्षयेतदुक्तमेवं ज्ञाव अ
द्धासमयोपि चरमो भविष्यति यस्यासौ तदा भवसम्यग्दृष्टिपरीत्ताः चरमः स चाभव्यस्याचरमभवाभावात् सिद्धश्च तस्यापि चरमत्वा[illegible]त्
उ चरमोऽनादिसपर्यवसितः अन्यथा चरमत्वायोगात् अचरमो द्विधा अनाद्यपर्यवसितः साद्यपर्यवसितश्च अभव्यः साद्यपर्यवसितः सिद्धः ॥ ॥ इति श्रीम
लयगिरिविरचितायां प्रज्ञापनाटीकायामष्टादशं पदं समाप्तं छ ॥छ॥ एतदेवं व्याख्यातमष्टादशं पदं सांप्रतमेकोनविंशतितममारभ्यते
अस्य चायमभिसंबंधः इहानंतरपदे कायस्थितिरुक्ता अत्र तु का स्यां कायस्थितौ कतिविधः सम्यग्दृष्ट्यादिलाभ इति ज्ञानार्थं तं
ति चिंत्यते तत्रेदं सूत्रं छ जीवाणं भंते किं सम्मद्दिट्ठी इत्यादि सु गममापदपरिसमाप्तेः नवरं सास्वादनसम्यक्त्वयुक्ता अपि
वापि प्राप्यंते पृथिव्यादिषु तेनोत्पद्यंते नेनयासावाप्युद्वीइएसु इमासा। दनसम्यक्त्वयुक्ता उत्पद्यंते ततः पृथिव्यादयः सम्यग्दृष्टयः प्रति
षिद्धा द्वींद्रियादयो निर्दिष्टाः सम्यग्मिथ्यादृष्टिपरिणामः पुनः संज्ञिपंचेंद्रिया णामेव तिर्यग्मनुष्याणां तथास्वभावत्वात् अत एव ते एव सम्यग्मिथ्यादृष्ट
यः प्रतिषिद्धाः छ इति श्रीमलयगिरिविरचितायां प्रज्ञापनाटीकायामेकोनविंशतितमं पदं समाप्तं छ ॥ ॥ छ ॥ व्याख्यातमेकोनविंशतितमं प
दमधुना विंशतितममारभ्यते अस्य चायमभिसंबंधः इहानंतरपदे सम्यक्त्वपरिणाम उक्तः अत्र तु परिणामसाम्यात् गतिपरिणामविशेषः अंतक्रिया
भिधीयते तत्र चेदमादावधिकारद्वारगाथा नेरइयअंतकिरियाइत्यादि प्रथमतो नैरयिकोपलक्षितं चतुर्विंशतिस्थानेष्वंतक्रिया ततोऽनंतरागताः
किमंतक्रियां कुर्वंति परंपरागता वा तत एवमंतरं चिंतनीयं ततो नैरयिकादिस्थानेभ्यो नंतरमागताः कियंत एकसमयेनांतक्रियां कुर्वंतीति चिंत्यं ततः उद्वृत्ता इ
ति उद्वृत्ताः संतः कस्यां योनावुत्पद्यंते इति वक्तव्यं तथा यत उद्वृत्ताः तीर्थकराश्चक्रवर्तिनो बलदेवा वासुदेवा मांडलिका अश्वरत्नानि च तस्मात्पति

प्पुरवाणि लभंति ततस्तानि क्रमेण वक्ष्यामीति द्वारगाथासंक्षेपार्थः विस्तरार्थं तु सूत्रकृदेव वक्ष्यति तत्र प्रथमतोंतक्रियाद्वारमभिधित्सुराह जीवेणं भंते इ
त्यादि जीवो णमिति वाक्यालंकारे भदंत अंतक्रियामिति अंतो विनाशः स च प्रस्तावादिह कर्मणामवसातव्यः अन्यत्रासंभवात् अंतस्य क्रिया अंतक्रिया कृत्स्नकर्म-
क्षयक्रियाकारणं मंत क्रिया कर्माकरणं मोक्ष इति भावार्थः कृत्स्नकर्मक्षयान्मोक्ष इति वचनात् तां कुर्यादिति भगवानाह गोतम अस्त्येकः कोपि कुर्यात्
न अस्त्येकः कोपि न कुर्यात् इह यस्य तथाविधभव्यत्वपरिपाकवशतो मनुष्यत्वादिकामविकलां सामग्रीमवाप्य समुल्लसितप्रबल
वीर्योल्लासवशतः क्षपकश्रेणिसमारोहणेन केवलज्ञानमासाद्य घातीन्यपि कर्माणि क्षपयेत् स कुर्यात् अन्यस्तु न कुर्यादिति एवं
नैरयिकादिचतुर्विंशतिदंडकक्रमेण तावद्वक्तव्यं यावद्वैमानिकाः सूत्रपाठस्तु एवं नेरइयाणं भंते अंतकिरियं करेज्जा गोयमा अत्थे-
गइए करेज्जा इत्यादि इदानीं नैरयिको नैरयिकेषु मध्ये वर्तमानः। किमंतक्रियां करोति किंवा न करोतीति पिपृच्छिषुरिदमाह
नेरइए णं भंते नेरइएसु इत्यादि भगवानाह गोतम नायमर्थः समर्थः नायमर्थः नायमर्थो युक्त्युपपन्न इत्यर्थः कस्मादिति चेदुच्यते
इह कृत्स्नकर्मक्षयः प्रकर्षप्राप्तसम्यग्दर्शनज्ञानचारित्रसमुदायाद्भवति न च नैरयिकावस्थायां चारित्रपरिणामसंभवस्तथाभवस्वाभाव्या-
दिति एवमसुरकुमारादिषु वैमानिकपर्यवसानेषु प्रतिषेधः वक्तव्यः। मनुष्येषु मध्ये समागतः सन् कश्चिदंतक्रियां कुर्यात् यस्य परिपू-
र्णा सामग्री कश्चिन्न कुर्याद्यस्य विकलेति एवमसुरकुमारादयोपि वैमानिकपर्यवसानाः प्रत्येकं नैरयिकादिचतुर्विंशतिदंडकक्रमेण
वक्तव्याः ततः एवमेते चतुर्विंशतिदंडकाश्चतुर्विंशतिर्भवंति अथेमे नैरयिकादयः स्वस्वनैरयिकादिभवेभ्योऽनंतरमेव मनुष्यभवमागताः संतः
अंतक्रियां कुर्वंति किंवा तिर्यगादिभवव्यवधानेन परंपरागता इति निरूपयितुकाम आह नेरइया णं इत्यादि प्रश्नसूत्रं सुगमं भगवानाह गोतम अनंतरागता
अपि अंतक्रियां कुर्वंति परंपरागता अपि तत्र रत्नशर्करावालुकापंकप्रभाभ्योऽनंतरागता अपि परंपरागता अपि धूमप्रभाप्रभृतिभ्यः परंपरा-
गता एव तथाभावस्वाभाव्यादनंतरमेव विरोधं प्रति सिंपादयिषुः सूत्रसंक्षेपमाह एवं रयणप्पभापुढविनेरइया वि इत्यादि असुरकुमारादयः स्तनितकुमारपर्यवसा

नाः पृथिव्यब्वनस्पतयश्चानंतरागता अपि अंतक्रियां कुर्वंति परंपरागता अपि तथायोग्यतानां तेषामंतक्रियाकरणाविरोधात् तथा केवलचक्षुषो-
पलब्धेः तेजोवायुद्वित्रिचतुरिंद्रियाः परंपरागता एव न त्वनंतरागताः तेजोवायूनामानंतर्येण मनुष्यत्वस्यैवाप्राप्तेः द्वींद्रियादीनां तु तथाभव-
स्वाभाव्यादिति शेषाः तिर्यक्पंचेंद्रिया वैमानिकपर्यवसाना अनंतरागता अपि परंपरागता अपि संप्रति नैरयिकादिभवेभ्योऽनंतरमागताः किय-
त एकसमये अंतक्रियां कुर्वंतीत्येवं रूपं तृतीयद्वारमभिधित्सुराह अणंतरागया णं भंते इत्यादि नैरयिकभवादनंतरमव्यवधानेन मनुष्यभ-
वमागता अनंतरागताः नैरयिका इति प्राग्भवपर्यायेण व्यपदेशः सुरादिप्राग्भवपर्यायप्रतिपत्तिरप्युपदर्शितार्थः एवं शर्कराप्रभापृथिवीनैरयिकाः प्राग्भवपर्या-
येण व्यपदेशः आपादितः प्रयोजनं चिंतनीयं शेषं कंठ्यं संप्रति तृतीयद्वारम्। कस्मादागता कति उद्वृत्ता इति चतुर्थद्वारमभिधित्सुराह नेरइ-
याणं भंते इत्यादि सुगमं नवरं केवलिप्रज्ञप्तं धर्मं लभेत श्रवणाय केवलिना सर्वज्ञेन प्रज्ञप्तः प्रज्ञापितः केवलिप्रज्ञप्तो धर्म
श्रुतधर्मश्चारित्रधर्मश्च तं लभेत श्रवणतया श्रवणार्थमिति श्रवणे। तावदनंतरप्रत्ययः श्रवणस्य श्रवणशब्दस्य भावः
प्रवृत्तिनिमित्तं श्रुतिरवश्रवणतामश्रवणभावत्वार्थः तावद्वक्तव्या विभक्तिः नास्तीत्याह स्वरूपस्य भावः प्रवृत्तिनिमित्तमित्युपचारस्यानाम
मित्तया श्रवणतया भगवानाह अत्थेगइए इत्यादि तत्रापि प्रश्नयति यस्तु भदंत केवलिप्रज्ञप्तं धर्मं लभेत श्रवणतया स णं केवलं बोहिं बुज्झेज्जा
इति इह बोधिर्धर्मावाप्तिरुच्यते तस्या निमित्तभूतत्वात् शास्त्रसंदर्भः सोपि कारणे कार्योपचाराद्बोधिः स च केवलिना साक्षात्परंपरया वा उपदिष्ट इ-
ति कैवलिकः स च केवलिप्रज्ञप्तस्य धर्मस्य श्रवणानामिति श्रवणात् कैवलिकीं बोधिं बुध्येत अनुभवेत तदर्थज्ञानीयादित्यर्थः भगवानाह अत्थेगइए
इत्यादि पुनरपि प्रश्नयति यो भदंत कैवलिकीं बोधिं समर्थतया बुध्यते स किं श्रद्धां प्रतिपद्य बोधिविषयां कुर्यात् तथा प्रत्ययं तत्प्रतीतिविषयां कुर्यात् रोचयेत् विकल्प्य-
मीत्येवमध्यवस्यन् भगवानाह अत्थेगइए इत्यादि पुनः प्रश्नयति यस्तु भदंत श्रद्दधीत प्रतीयात् रोचयेत् स आभिनिबोधिकश्रुतज्ञाने उत्पादयेत् भगवा-
नाह हंता गोतम उत्पादयेत् केवलिप्रज्ञप्तधर्मश्रवणश्रद्धानादौ च वर्तमानयोरवश्यंभावात् प्रश्नयति यो भदंत आभिनिबोधिकश्रुतज्ञाने उत्पादयेति

ससंवायस्याशंकया तु यो लब्धस्तथर्यवृत्तं विविक्तं इत्यादि विषयं नियमरूपं गुणं उत्तरगुणं भावनादिरूपं विरमणं विरतिर्मतीतः स्थूलप्राणातिपातादेः प्रत्या
ख्यानं प्रत्याख्यानं तस्य स्थूलप्राणातिपातादेरेव पोषधं धर्मपोषं धत्ते इति कृत्वा पोषधः अष्टम्यादि पर्वदिनं तस्मिन्नुपवासः पोषधोपवासः तं प्रतिपत्तुं शक्नुयान्न
गवानादि शुद्धे गइ इत्यादि इह तिर्यङ्मनुष्याणां वचनं प्रत्ययानां अवधिर्नोपजायते किं तु गुणतो गुणाः शीलव्रतादयो अस्यापि विद्यन्ते ततः
किमस्यावधिज्ञानमुत्पद्यते किं वा नेति प्रश्नयति उ णं भंते इत्यादि यस्य शीलव्रतादिविषयप्रकृष्टपरिणामभावात् अवधिज्ञानावरणकर्मणः क्षयो
पशमस्तस्य उपजायते स उत्पादयेत् त्वाह स्यान्नत्वर्थः अवधिज्ञानानन्तरं मनःपर्यवज्ञानं मनःपर्यवज्ञानं चानगारस्य भवतीति तं संजयस्य सम्बन्धमाय राष्ट्रि
स्य विविक्तस्मिमतो इति वचनात् ततो अनगारतामेव प्रश्नयति उ णं भंते इत्यादि … मुण्डो भवित्वा तावत् केशापनयनेन भावतः सर्वसंगप
रित्यागेन ततो गृहवासतो मुण्डो भूत्वा परिगृह्य तमुण्डो भूत्वा अगारात् … तृतीया पञ्चम्यर्थे अगारात् विनिर्गत्य अविद्यमानं अविद्यमानागारं गृहं यस्य
तो भावतस्तस्य स्यात् सोऽनगारः प्रव्रजनं प्रव्रज्या तां प्रव्रजितुं शक्नुया … नुः भावानादि गाथार्थः तिर्यङ्मनुष्यस्य बाह्यरूपपरिणाम
रसंभवात् अनगारतायां जातायां मनःपर्यवज्ञानस्य भावः सिद्ध एव यथा … च तिर्यक्पञ्चेन्द्रियविषयसूत्रं कृतं एवं मनुष्यविषय
मपि वक्तव्यं नवरं मनुष्यस्य सर्वभावसंभवात् मनःपर्यवज्ञानं केवलज्ञानं सूत्रं । अधिकं प्रतिपादयति उ णं भंते संवाए … इत्यादि सु
गमं नवरं सिध्येदित्यादि सिध्येत् समस्तानि … लोकालोकस्वरूपपरिज्ञानमवगाह्य तथा … कर्मभि
रपि किं प्रकृतं भवति सर्वदुःखानामन्तं कुर्यात् च व्यन्तरज्योतिष्कवैमानिकप्रतिषेधं वक्तव्यः नैरयिकस्य भवस्वभावात् नैरयिकादेव भवा
गपार्थ्वभावसंभवात् तदेवं नैरयिका नैरयिकादिचतुर्विंशतिदण्डकक्रमेण चिंतिताः साम्प्रतमसुरकुमारान् नैरयिकादिचतुर्विंशतिदण्डकक्रमेण चिं
तयति च असुरकुमाराणं भंते इत्यादि सूत्रं नवरमेतत्पृथिव्यप्वनस्पतिषूत्पद्यन्ते ईशानान्तदेवानां तत्र गमनात् बोधितास्तत्र च केवलि
प्रज्ञप्तधर्मश्रवणता श्रवणेन्द्रियस्याभावात् शेषं सर्वं नैरयिकवत् एवं नागकुमारादयः इति एवमसुरकुमारोक्तेन प्रकारेण नागकु

रा यावत् स्तनितकुमाराः पृथिवीकायिका नैरयिकेषु देवेषु च प्रतिषिद्धं तेषां विशिष्टमनोद्रव्याभावात् तथा संक्लेशा विशुद्धस्वभावाभावात् शेषेषु
सर्वेष्वपि स्थानेषूत्पद्यन्ते तद्योग्याध्यवसायस्थानसंभवात् तत्रापि तिर्यक्पञ्चेन्द्रियेषु मनुष्येषु च नैरयिकवत् वक्तव्याः एवमप्कायिका वनस्पतिकायि
काश्च वक्तव्याः तेजस्कायिकाः मनुष्येष्वपि प्रतिषेधनीयाः तेषामानन्तर्येण मनुष्येष्वभ्युत्पादासंभवात् असंक्लिष्टपरिणामतया मनुष्यायुर्बन्धा
संभवात् तिर्यक्पञ्चेन्द्रियेषूत्पन्नाः केवलिप्रज्ञप्तधर्मश्रवणतया लभेरन् श्रवणेन्द्रियस्याभावात् पुनः केवलिकीं बोधिं नावबुध्येरन् संक्लि
ष्टपरिणामत्वात् द्वित्रिचतुरिन्द्रियाः पृथिवीकायिकवत् नवरं नैरयिकवर्जेषु सर्वेष्वपि स्थानेषु अनन्तरं पृथिवीकायिका मनुष्येषु आगता अन्तक्रियां कुर्वन्ति
तथा स्वभावत्वात् मनःपर्यवज्ञानं पुनर्नोत्पादयेयुः तिर्यक्पञ्चेन्द्रिया मनुष्याश्च । सर्वेष्वपि स्थानेषूत्पद्यन्ते … व्यन्तरज्योतिष्कवैमानिका असुरकुमारवद्भावनीयाः नवरं तीर्थकर
वैमानिका असुरकुमारवद्भावनीयाः नवरं तीर्थकरसिद्धा नीयं ये तीर्थक … र वक्तव्याः … णं भंते … रयणप्पभापुढवि
नेरयियाणं भंते इत्यादि सूत्रमगमं नवरं बलदेवादि … … ततः … तदनन्तरं
सकृत्कृतं हिंतम्बीकलापचतुःस्पृष्टानि … … सकृत्करणात् … तथा … कृतानि
कारितानि सकलकरणात् … पिता नात्यर्थः … गतिपञ्चेन्द्रियजातिः सबादरपर्याप्तमनुजादयः … कानि नाम
दयाबिन … पितानानि भावः निविष्टानि तानि … विशिष्टानि विशिष्टविशिष्टतराध्यवसायभावतो तानि … तमानुना
वरुन्ने … मलिसमत्वागतानि … दीप्तानि … पश्चात् … भावसमापन्ना
निनिकाचितानि … एवं शर्करप्रभा वालुकाप्रभा … एकत्ररपृथिवीनैरयि
काः … संस्थीर्थकरत्वं न लभन्ते अन्तक्रियां पुनः कुर्वन्ति धूमप्रभापृथिवीनैरयिकाः अन्तक्रियामपि न कुर्वन्ति विरतिं पुनर्लभन्ते तमःप्रभापृ
थिवीनैरयिका विरतिमपि न लभन्ते विरत्या विरतिं देशविरतिं पुनर्लभन्ते अधःसप्तमपृथिवीनैरयिकाः पुनस्तामपि देशविरतिं न लभन्ते यदि परं स

प्रज्ञापनावृत्तिः॥

पंकप्रभातो नरकादुद्धृता यावद्वनस्पतिकाया अनंतरमुद्धृतास्तीर्थकरत्वं न लभंते किंतु अंतक्रियां पुनः कुर्युः वसुदेवचरितप्रतीतगजसुकुमालवत्प्रभृतयो
ऽनंतरमेवाधोलोकेऽप्यसंख्येयानां सिद्धिश्रवणादिति तीर्थकरत्वप्रदर्शितमिदं तत्त्वं केवलिनो विदंति तेजोवायवोऽनंतरमुद्धृता अंतक्रिया
मपि न कुर्वंति मनुष्येष्वनुत्पादात् तेषामनंतरं तिर्यक्षूत्पन्नाः केवलिप्रज्ञप्तधर्मश्रवणतया लभंते न तु बोधमित्यर्थः सूक्ष्मप्राकृतवनस्प
तिकायिका अनंतरमुद्धृतास्तीर्थकरत्वं न लभंते किंतु अंतक्रियां पुनः कुर्युः पृथिव्युदकवनस्पतयोऽनंतरमुद्धृता मनःपर्यवज्ञानं पुनरुत्पादया
युः तिर्यक्पंचेंद्रियमनुष्यव्यंतरज्योतिष्का अनंतरमुद्धृतास्तीर्थकरत्वं न लभंते किंतु अंतक्रियां पुनः कुर्युः सौधर्मादयः सर्वार्थसिद्धपर्यवसाना वैमानिकदेवा
श्च्याः तीर्थकरत्वं संप्रति चक्रवर्तित्वादीनि स्थानानि प्रभवंति चक्रवर्ति त्वं रत्नप्रभातो नैरयिकभवनपतिव्यंतरज्योतिष्कवैमानिकेभ्यो नरा
भ्यां बलदेववासुदेवत्वं शर्करातो पि नरकेभ्यो देवेभ्यो वैमानिकेभ्यः उन्नतो पप्रातव माण्डलिकत्वमधः सप्तमतेजोवायुवर्जेभ्यः
शेषेभ्यः सेनापतिरत्नं वर्द्धकिरत्नं पुरोहित रत्नं च अधः सप्तमपृथिवीतेजोवायुवर्जेभ्यः प्रतिपन्नदेववर्जेभ्यः
शेषेभ्यः स्थानेभ्यः अश्वरत्नं हस्तिरत्नं प्रत्नात आरभ्य निरंतरं यावदास हस्रारात् चक्ररत्नं छत्ररत्नं चर्मरत्नं दंडरत्नं मणिरत्नं
काकिणीरत्नं वासुरकुमारादारभ्य निरंतरं यावदीशानात् सर्वत्र विधिर्वाच्यः। अद्धागाइ एतालत्थं अब्भागाइ एतालत्तणाइ ति वक्तव्यं प्रतिषेधे
नोइणट्ठे समट्ठे इति तदेवमुक्तानि स्थानानि संप्रत्युपपातमधिकृत्य किंचिद्वक्तव्यमस्तीति तद्दर्शयितुमाह अह भंते इत्यादि अथ भदंत असंजयभवि
यदव्वदेवा इति असंयताश्च ते भव्यद्रव्यदेवाश्च समासः अथवा असंयताश्च ते भव्यद्रव्यदेवा असंयतभव्यद्रव्य
देवाः तत्रैके प्राहुः इह किल असंयतसम्यग्दृष्ट्यादयो वा अणंतरं किल एवमागमे अणुव्वयमहव्वएहिं बालतवाकामनिज्जराए य देवाउयं निब
धइ सम्मद्दिट्ठी य जो जीवो त्ति तद्युक्तं तेषां अमीषां उक्तत्वे परितनग्रैवेयकेषूपपातो वक्ष्यते सम्यग्दृष्टीनां देशविरतानामपि नमताप्युपपाता
स्तदेशविरतश्रावकाणां मध्ये च्युतेरिहैव गमनात् न्यायानुपपत्तितः ... देवत्वादनाप्ति तस्मान्मिथ्यादृष्टय एवासंयतभव्या असमणगुणधारि

णानि रि ह्यलसामाचार्यनुष्ठानयुक्ताः द्रव्यलिंगधारिणोऽसंयतभव्यद्रव्यदेवाः प्रतिपत्तव्याः ते हि अखिलकेवलक्रियाप्रभावत एवोपरितनग्रैवेयकेषूत्पद्यं
त इति असंयता अपि सर्वप्रदेशतो विरतिपरिणामशून्यत्वात् अविराहियसंजमाणमिति प्रव्रज्याकालादारभ्य न भग्नचारित्रपरिणामानां संज्वलनकषा
यसामर्थ्यात् प्रमत्तगुणस्थानकसामर्थ्याद्वा स्वल्पमायादिदोषसंभवेऽपि अनाचरितसर्वथाचरणोपघातानामित्यर्थः तथा विराहियसंजमाणंति विराधित
सर्वात्मना खंडितो न तु प्रायश्चित्तप्रतिपत्त्या संयमो यैस्ते विराधितसंयमास्तेषां अविराहियसंजमासंजमाणंति प्रव्रज्याप्रतिपत्तिकालादार
भ्याखंडितदेशविरतिपरिणामानां श्रावकाणां विराहियसंजमासंजमाणमिति विराधितः सर्वात्मना खंडितो न पुनः प्रायश्चित्तप्रतिपत्त्या पुनर्न
वीकृतः संयमासंयमो यैस्ते विराधितसंयमासंयमास्तेषां असन्निनामनो लब्धिरहितानां अकामनिर्जरावतां तथाविधसामर्थ्यतः प्रतिपत्त्या विराहि
तपस्विनां बालतपस्विनां तथा कंदप्पियाणंति कंदर्पः प रिहासः स एषामस्तीति तेन वा चरंतीति कांदर्पिकाः कंद
र्पिका वा व्यवहारेण चरणवंत एव कंदर्पकौत्कुच्यादिकारकाः उक्तं च कंदप्पे कुक्कुइए दवसीले यावि हासणकरे य
विम्हाविंतो य परं कंदप्पं भावणं कुणइ कहकहकहस्स हसणं कंदप्पो। अणिहुया य उल्लावा कंदप्पकहाकहणं कंदप्पुवएस
संसा य भमुहनयणवयणदसणच्छदेहि करपायकन्नमाईहिं तं तं करेइ जह जह हसइ परो अत्तणा अहसं वाया कुक्कुइयं पुण तं भा
सइ जेण अन्नो हसइ तह दवसीलो सारीरवायकायचेट्ठाए दरिसियदप्पो कारी गच्छइ वहिनयदप्पेण
एइ सपणलोउ गाणं विरइ जीव कुक्कुइ समुहं कारणप्पवत्ता सइ उ य गागयए यद रिगगा विसमारण सव्व देवकारी कुहइव हिनयदप्पेण
वेसवयाण हिम्मसऊणायात अप्पणो पर सिंघ अहहासणा पिलम्फइयपणो बाबलिपिय अबाउरपालमाइ एहिं उविम्हयंतो ण इ तविहि
ज णस्स तह य विहइ य सयं आहरइ कादरण एवं कालमं इअउविएण सुइ एमं एवा सुना वणं कुणइ समातविहि सुगमइ उर सुतर इ चरणद्दी
णा तेषां कांदर्पिकाणां चरण परिव्राया गाणं तिचरकपरिव्राजकाः टि लिह्या पउ हि निः त्रिदंडिनः अथवा चरकः काछोटकादयः परिव्राज
काः कपिलमुनिसूनवः चरकाश्च परिव्राजकाश्च तेषां तथा किल्बिषिकाणां तदपि येषां ते किल्बिषिकास्ते व्यवहारश्चरणवंत एव ज्ञानाद्यवर्णवादिनः ज

प्रज्ञा० वृत्तौ॥ ऋव नाणस्स केवलीणं धम्मायरियाणं सव्वसाहूणं माई अवण्णवाई किव्विसियं भावणं कुणइ कायाइ तत्तिविपातावरणाय अप्पमायाय मोक्ष
रहिताविद्यायां जाइस्स जाणा हि किंकृष्ठ्य मतरसुप्पाप अप्पोप्पावरणायाउ वद्धेहिं किल्बिलं दंसणनाणाणं सम्मकालवण्णेह कवाईहिं अवण्ण
विहसइ वहइनयाविउ वचाए अहितेविहाय्य हीपमा सतोई अणाहकल्ला अविसहणोह विद्यायं अण्णपुवनीण अविहइणपिरवणमित्रपाइरो
साणि हिवद्धलमायमवइया गृहइ आयमत्ताव घायइउणपरस्समंतवि वोताह्वसहसंकी यदायातावितह्तासीतषांतरिक्तियाणंतितिस्त्वोम
वादीमादेशविरतितानाजा आजीवियाणंति आजीविकाः पाखंडविशेषाः पापवालभतानेसाविणः अथवा आजीवं तियत्र विवकतालविहवनारव्या
त्यादिलिखरणादीनाजीविकाः तेषां आभिओगियाणंति अभियोजनं विद्याम त्रादिभिः परवशीकरणादिअभियोगः सद्विधायदाह इहो
हा एव च अभिउगादव्वता विदव्वाइनायावादवमिहाति जागाविद्याम तायनावसिस्सामिविद्यातनवावंतियातअभियोगिका
आभियोगिकावातवव्यवहातन्नारणवतच्च मन्त्राद्विप्रावाक्कारः॥ तं चेव कोउयभूईकम्मे पसिणापसिणानिमित्ता
जीवी इढ्ढिरससायगुरू अभिओगं भावणं कुणइ कोउकमालागपाहृष्ठं। स्नपनकं भूतिकर्म ह्वरितादि हस्तिवानं प्रश्नाप्रश्नं प्रवि
द्यादि सलिंगीणमिति रजोहरणादि साधुलिंगमन्तो किं निह्नवा इत्याह दंसं। णवावन्नगाणं तिदर्शनं सम्यक्त्वं व्यापन्नं भ्रष्टं येषां ते तथा तेषां नि
ह्नवानामित्यर्थः देवलोएसु उववज्जमाणाणं ति आत्मनः देवत्वादन्नापियघाय्यवसायप्रत्यादानवतीति प्रतिपादितं विराहियसंजमाणं ऊर्ध्व
णं लवणवासीसु उक्कोसेणं सोहम्मे इति अत्र कश्चिदाह विराधितसंयमानामुत्कर्षेण सौधर्मकल्पे इति यदुक्तं तत्कथं घटते द्रौपद्याः सुकुमा
लिकाभवे विराधितसंयमायाः अपि ईशानकल्पे उत्पादश्रवणात् तेषां दोष: स्त्रियादिः संयमविराधनामात्रं तत्र विषयात्रकुशालमात्रका रिणी न मूल
गुणविराधना सौधर्मत्वादत्र च ततर संयमविराधनायां न वतियदिह विराधनामात्रं मपि सौधर्मत्वमिकाणं त्यादितदाव कु आदीनामुत्तरगु
णादिप्रतिसेवावतां कथमवकताहिश्यते निसण्णतेत कथं चिदिराधकत्वान्न ते पामित्रि असंज्ञी दवश त्यद्यातइत्यकं मत्वाद्यपाशतितदा इमिद्वाप्रयति १६७

॥ कइविहे णमित्यादि सुगमं नवरमसंज्ञि आयुरिति असंज्ञी सन् यत्परभवयोग्यमायुर्बध्नाति तदसंज्ञ्यायुः नैरइयअसन्नियाउइ नैरयिका
योग्यमसंज्ञ्यायुर्नैरयिकासंज्ञ्यायुरेवमन्यान्यपि द्रष्टव्यानि असंज्ञ्यायुःसंज्ञ्यप्यावसंज्ञ्यायुरपक्षत्वात नवरमत्र तत्त्वलक्षणसंबंधविशेषनिरूप
णार्थमाह असन्नीइत्यादि व्यक्तं नवरं प्रकटइ इति वध्नाति इसवा मसहस्साइं ति रत्नप्रभप्रथमप्रस्तटमधिकृत्य जघन्योत्पलितवमस्स असंख
इभागं इति एतत्तु रत्नप्रभावत्तुर्थप्रतरमध्यमस्थितिकं नारकमाश्रित्य प्रथमप्रस्तटे हि जघन्या स्थितिर्दशवर्षसहस्राणि उत्कृष्टा नवतिः सहस्राणि
द्वितीयद्वालक्षाणि जघन्या उत्कृष्टा नवतिर्लक्षाणि एष्वेव ततीये जघन्या उत्कृष्टा पूर्वकोटी एवेव च तुर्थे जघन्या उत्कृष्टा सागरोपमस्य दश
भागः ततोऽत्र पल्योपमासंख्येयभागो मध्यमा स्थितिर्भवति तिर्यक्सूत्रे पमासंख्येयभागो मिथुनकतिरश्चोऽधिकृत्य एवं मणुयाणवि
इति जघन्यान्तर्मुहूर्त्तमुत्कर्षतः पल्योपमासंख्येयभागमित्यर्थः अत्रापि पल्योपमासंख्येयभागो मिथुनकनरानाश्रित्य
प्रतिपत्तव्याः देवा जहा नेरइयाउमिति देवासंज्ञ्यायुर्यथा वक्त व्यं यथा नैरयिकासंज्ञ्यायुर्जघन्यतो दशवर्षसहस्रा
णि उत्कर्षतः पल्योपमासंख्येयभागप्रमाणं वक्तव्यमिति भावः ॥ एय स्स णं भंते इत्यादिना यदसंज्ञ्यायुषोऽल्पबहुत्वं तद
स्पष्टमुदीर्यव प्रतीत्य ॥ इति श्रीमलयगिरिविरचितायां प्रज्ञापनाटीकायां विंशतितमं पदं परिसमाप्तं ॥ ॥ ॥व्याख्यातं विंशति
तमपदमिदानीमेकविंशतितममारभ्यते अस्य चायमभिसंबंधः इहानन्तरपदे गतिपरिणामविशेषोऽन्तक्रियारूपः परिणाम उक्तः इहापि ग
तिपरिणामविशेष एव शरीरसंस्थानादि नरकादिगतिषु प्रतिपाद्यते इति तदिदमधिकारगाथा विहिसंठाणपमाणे इत्यादि प्रथमं विधि
र्वक्तव्यः शरीराणां वक्तव्यः तदनन्तरं संस्थानानि ततः प्रमाणानि तदनन्तरं कतिभ्यो दिग्भ्यः शरीराणां पुद्गलोपचयो भवतीत्येवं पुद्गलचयनं वक्तव्यं
ततः कस्मिन् शरीरे सति किं शरीरमवश्यंभावीत्येवंरूपः परस्परं संयोगो वाच्यः ततो द्रव्याणि च प्रदेशाश्च द्रव्यप्रदेशाः तेषु द्रव्याणि च प्रदे
शाश्च द्रव्यप्रदेशाश्च समाहारो द्वन्द्वः तेषामल्पबहुत्वं वक्तव्यं किमुक्तं भवति द्रव्यार्थतया प्रदेशार्थतया द्रव्यार्थप्रदेशार्थतया च।

तत्त्वा० वृ० त्रि॥

पंचानाम् अपि शरीराणाम् अल्पबहुत्वम् अभिधातव्यम् इति ततः पंचानाम् अपि शरीराणाम् अवगाहनाविषयम् अल्पबहुत्वं वाच्यम् इति गाथासंक्षेपार्थः तत्र यथोद्दे-
शं निर्देश इति प्रथमतो विधिद्वारम् अभिधित्सुर् आह ओरालियं लक्षणं प्रतिपादयति उ कइणं ते इत्यादि कति किंपरिमाणानि णामि ति वाक्य-
शेषं कात् समर्तशीर्यंते प्रतिक्षणं विशरारुभावं बिभ्रतीति शरीराणि शरीराण्य् एव शरीरकाणि स्वार्थिकप्रत्ययः भगवता आर्द्रगोतम पंच शरीरा-
णि प्रज्ञप्तानि मया अन्यैश्च तीर्थकृद्भिर् अन्यैर् वा नामत आह औदारिकम् उदारं प्रधानं प्राधान्यं चास्य तीर्थकरगणधरशरीराण्य् अधिकृत्य ततोऽन्यस्यानु-
त्तरशरीरस्याप्य् अनन्तगुणहीनत्वात् यद्वा उदारं सातिरेकयोजनसहस्रमानत्वात् शेषशरीरापेक्षया बृहत्प्रमाणं बृहत्ता वास्य वैक्रियं प्रतिनियतभवधारणी-
यमहत्तरशरीरापेक्षया द्रष्टव्या अन्यथा उत्तरवैक्रियं योजनलक्षमानम् अपि लभ्यते उदारम् एव औदारिकं विनयादिपाठाद् इकण् तथा विविध-
विशिष्टा वा क्रिया तस्यां भवं वैक्रियं तथा हि तद् एकं भूत्वा अनेकं भवति अनेकं भूत्वा एकं भवति अणु भूत्वा महद् भवति महद् भूत्वा अणु तथा
खचरं भूत्वा भूमिचरं भवति भूमिचरं भूत्वा खचरं भवति तथा दृश्यं भूत्वा अदृश्यं भवति अदृश्यं भूत्वा दृश्यम् इत्यादि तच् च द्विविधम् औपपाति-
कं लब्धिप्रत्ययं च तत्र औपपातिकम् उपपातजन्मनिमित्तं तच् च देवनारकाणां लब्धिप्रत्ययं तिर्यङ्मनुष्याणां तथा आहारकम् इति आहारकं
चतुर्दशपूर्वविदा तीर्थकरस्फातिदर्शनादिकतथाविधप्रयोजनोत्पत्तौ सत्यां विशिष्टलब्धिवशाद् आह्रियते निर्वर्त्यत इत्याहारकं कृतबहु-
लम् इति वचनात् कर्मणि अनुपधापाद् आहारकम् इत्य् उक्तं च कज्जंमि समुप्पन्ने सुयकेवलिणा विसिट्ठलद्धीए जं एत्थ आहरिज्जइ भणियं आहारगं तं तु
कार्यं चेदं पाणिदयरिद्धिदंसणसुहुमपयत्थावगाहणहेउं वा संसयवोच्छेयत्थं गमणं जिणपायमूलम्मि तच् च वैक्रियशरीरापेक्षया अत्यन्तशुभं
स्वच्छस्फटिकशिलेव शुभ्रपुद्गलसमूहघटनात्मकं तैजसम् इति तेजसां तेजःपुद्गलानां विकारस् तैजसं विकार इत्य् एतत् तज्जलिंगं चाह-
रपरिणमनकारणं तथा विशिष्टतपस्समुत्थलब्धिविशेषस्य पुंसः तेजोलेश्याविनिर्गमः उक्तं च सव्वस्स उण्हसिद्धं रसाइआहारपाकजणगं
च तेयगलद्धिनिमित्तं च तेयगं होइ नायव्वं कर्मण इति कर्मणां जातं कर्मजं किं तु उक्तं भवति कर्मपरमाणव एवात्मप्रदेशैः सह क्षीर- १६८

नीरवत् अन्योन्यानुगताः सन्तः शरीररूपतया परिणताः कर्मजं शरीरम् इति अतएवैतद् अन्यत्र कर्मणम् इत्युक्तं कर्मणां विकारः कार्मणम् इति तथा चो-
क्तं कम्मविवागो कम्मणम् अट्ठविहविचित्तकम्मनिप्फन्नं सव्वेसिं सरीराणं कारणभूतं मुणेयव्वं अत्र सर्वेषाम् इति सर्वेषाम् औदारिकादीनां शरीराणां
कारणभूतं बीजभूतं कार्मणं शरीरं न खलु मूलच्छिन्ने भवप्रपंचप्ररोहबीजभूते कार्मणवपुषि शेषशरीरप्रादुर्भावः इदं च कर्मजं शरीरं जन्तोर्ग-
त्यन्तरसंक्रान्तौ साधकतमं करणं तथा हि कर्मजेनैव वपुषा तैजससहितेन परिकरितो जन्तुर् मरणदेशम् अपहाय उत्पत्तिदेशम् अभिसर्पति ननु यदि
तैजससहितं कार्मणवपुः परिकरितो गत्यन्तरं संक्रामतीति तर्हि स गच्छन् आगच्छन् वा कस्मान् न दृष्टिपथम् अवतरति उच्यते कर्मपुद्गलानाम् अतिसूक्ष्मतया चक्षुरा-
दीन्द्रियाणाम् अगोचरत्वात् तथा चाह परतीर्थिकैर् अप्य् उक्तं अन्तराभवदेहोऽपि सूक्ष्मत्वान् नोपलभ्यते निःक्रामन् प्रविशन् वापि नाभावो वीक्षणाद् अपि इति सम्प्र-
त्य् औदारिकशरीरस्य जीवजातिभेदान् अभिधित्सुर् आह २ ७ उरालियम् ओरालियं तु इत्यादि औदारिकशरीरम् एके-
न्द्रियः पंचेन्द्रियभेदात् पंचधा एकेन्द्रियौदारिकशरीराणि पृथ्व्यप्तेजोवायुवनस्पतिभेदात् पंचविधं पृथिवी-
कायिकैकेन्द्रियौदारिकशरीरम् अपि सूक्ष्मेतरभेदात् द्विधा सूक्ष्मापर्याप्तापर्याप्तभेदात् एवम् अप्तेजोवायुवनस्पत्येकेन्द्रियौदारिकशरीरा-
ण्य् अपि प्रत्येकं चतुर्विधानीति सर्वसंख्यया एकेन्द्रियौदारिकशरीराणि विंशतिः एवं द्वित्रिचतुरिन्द्रियौदारिकशरीराणि प्रत्येकं पर्याप्तापर्याप्तभे-
दात् द्विभेदानि पंचेन्द्रियौदारिकशरीरं द्विविधं तिर्यङ्मनुष्यभेदात् तिर्यक्पंचेन्द्रियौदारिकशरीरं त्रिधा जलचरस्थलचरखचरभेदात् जलचर-
तिर्यक्पंचेन्द्रियौदारिकशरीरं द्विविधं संमूर्छिमगर्भव्युत्क्रान्तिकभेदात् एकैकम् अपि पुनर् द्विधा पर्याप्तापर्याप्तभेदात् स्थलचरतिर्यक्पंचेन्द्रियौदारि-
कशरीरम् अपि द्विधा चतुष्पदपरिसर्पभेदात् चतुष्पदस्थलचरतिर्यक्पंचेन्द्रियौदारिकशरीरम् अपि द्विधा संमूर्छिमगर्भव्युत्क्रान्तिकभेदात् पुनर् एकैकं
द्विधा पर्याप्तापर्याप्तभेदात् परिसर्पस्थलचरतिर्यक्पंचेन्द्रियौदारिकशरीरम् अपि उरःपरिसर्पभुजपरिसर्पभेदात् द्विधा पुनर् एकैकं द्विधा संमू-
र्छिमगर्भव्युत्क्रान्तिकभेदात् तेऽपि पुनः प्रत्येकं द्विधा पर्याप्तापर्याप्तभेदाद् इति सर्वसंख्यया अष्टभेदं परिसर्पस्थलचरतिर्यक्पंचेन्द्रियौदारिकशरीरं खचर

तिर्यक्पंचेंद्रियौदारिकशरीरं संमूर्छिमव्युत्क्रांतिकत्वाद्द्विविधं तत्रैकैकं द्विधा पर्याप्तापर्याप्तभेदादिति सर्वसंख्यया तिर्यक्पंचेंद्रियौदारिकश
रीरं विंशतिभेदं मनुष्यपंचेंद्रियौदारिकशरीरं संमूर्छिमगर्भव्युत्क्रांतिकभेदात् द्विभेदं तत्र गर्भव्युत्क्रांतिकं द्विधा पर्याप्तापर्याप्तभेदादेवमौदारिकस्यानेक
भेदा उक्ताः संप्रत्येतेषामेव यथाक्रमं संस्थानान्याह ओरालियसरीरे णं भंते इत्यादि नानासंस्थानसंस्थितं जीवजातिभेदतः संस्थानभेदभावात् एकेंद्रि
यौदारिकशरीरं नानासंस्थानसंस्थितं तथाहि पृथिव्यादि प्रत्येकं संस्थानभेदात् तत्र पृथिवीकायिकानां सूक्ष्माणां बादराणां पर्याप्तानामपर्याप्तानां चौदा
रिकशरीराणि मसूरचंद्रसंस्थानसंस्थितानि मसूरो धान्यविशेषस्तस्य चंद्र अर्द्धाकारं यद्दलं तस्येव यत्संस्थानं तेन संस्थितानि अप्कायिकानां सूक्ष्मा
दिभेदतश्चतुर्भेदानामौदारिकशरीराणि स्तिबुकबिंदुसंस्थानसंस्थितानि स्ति बुकाकारा ये बिंदवो न तु पवनेरिताः पतन्तो वातादिना विक्षिप्तः स्ति
बुकबिंदुस्तस्येव यत् संस्थानं तेन संस्थितानि तेजस्कायिकानां सूक्ष्मा। दिभेदतश्चतुर्भेदानामौदारिकशरीराणि सूचीकलाप
संस्थानसंस्थितानि वायुकायिकानां सूक्ष्मादिभेदतश्चतुर्भेदानामौ दारिकशरीराणि पताकासंस्थानसंस्थितानि वनस्पति
कायिकानां सूक्ष्माणां बादराणां पर्याप्तानामपर्याप्तानां च प्रत्येकमौदारिक शरीराणि नानासंस्थानसंस्थितानि देशकालजातिभेदतस्ते
षां संस्थानानामनेकभेदभिन्नत्वात् द्वित्रिचतुरिंद्रियाणां प्रत्येकं पर्याप्तानामपर्या प्तानामौदारिकशरीराणि हुंडसंस्थानसंस्थितानि तिर्यक्पंचेंद्रि
यौदारिकशरीरं सामान्यतः षड्विधसंस्थानसंस्थितं तदेवाह पदद्वयेनेति समचउरंससंठाणसंठिए इत्यादि यावत्करणात् णग्गोहपरिमंडलसंठाणसंठिए सा
इसंठिए खुज्जसंठाणसंठिए वामणसंठाणसंठिए इति परिग्रहः तत्र समाः सामुद्रिकशास्त्रोक्तप्रमाणलक्षणाविसंवादिन्यश्चतस्रोऽस्रयश्चतुर्दिग्विभा
गोपलक्षिताः शरीरावयवा यत्र तत्समचतुरस्रं समचतुरस्रं च तत्संस्थानं च समचतुरस्रसंस्थानं तेन संस्थितं समचतुरस्रसंस्थानसंस्थितं तथा न्यग्रोधवत्परिमंडलं यथा
न्यग्रोध उपरि मंडलं यथा न्यग्रोध उपरि संपूर्णप्रमाणोऽधस्तु हीनस्तथा यत् संस्थानं नाभेरुपरि संपूर्णं प्रमाणमधस्तु न तथा तत् न्यग्रोधपरिमंडलं तथा आ
दिरिहोत्सेधाख्यो नाभेरधस्तनो देहभागो गृह्यते ततः सह आदिना नाभेरधस्तनभागेन यथोक्तप्रमाणलक्षणेन वर्त्तत इति सादि यद्यपि च सर्वं

शरीरमादिना सह वर्त्तते तथापि सादित्वविशेषणान्यथानुपपत्त्या विशिष्ट एव प्रमाणलक्षणोपपन्न आदिरिह लभ्यते ततस्तत्संस्थानं यथोक्तप्रमाणलक्षणेनेति
इदमुक्तं भवति यत्संस्थानं नाभेरधः प्रमाणोपपन्नमुपरि च हीनं तत्सादीति अपरे तु साचीति पठंति तत्र साचीति प्रवचनवेदिनः शाल्मलीतरुमाचक्षते ततः साचीवद्यत्संस्थान
तत्साचि संस्थानं यथा शाल्मलीतरोः स्कंधः कांडमतिपुष्टमुपरि च न तदनुरूपा महाविशालता तद्वदस्यापि संस्थानस्याधोभागः परिपूर्णो भवत्युपरितनो भागस्तु
न तथा यत्र शिरोग्रीवं हस्तपादादिकं च यथोक्तप्रमाणलक्षणोपेतं उरउदरादि च मंडलं तत्कुब्जं संस्थानं यत्र तु उरउदरादि प्रमाणलक्षणोपे
तं हस्तपादादिकं हीनं तद्वामनं संस्थानं यत्र सर्वेऽप्यवयवाः प्रमाणलक्षणपरिभ्रष्टास्तद्धुंडसंस्थानं समासः सर्वत्रापि प्रवर्त्तते एवं पज्जत्तापज्जत्ताण वि इति
वमुक्तेन प्रकारेण सामान्यतस्तिर्यक्पंचेंद्रियाणामिव पर्याप्तानामपर्याप्तानां च प्रत्येकं सू त्रं वक्तव्यं तदेवमेतानि सूत्राणि एवमेव च सामान्यतः संमूर्छिमतिर्य
क्पंचेंद्रियाणामपि त्रीणि सूत्राणि वक्तव्यानि नवरं तत्र छव्विहसंठाणसंठिए इति स्थाने हुंड संस्थानसंस्थिता इति वक्तव्याः संमूर्छिमाणामविशेषेण सर्वे
षामपि हुंडसंस्थानमात्रत्वात् शेषाणि सामान्यतो गर्भजतिर्यक्पंचेंद्रिया। णामपि नवरं तत्र छव्विहसंठाणसंठिया इति वक्तव्यं गर्भजाणां सर्वेषामपि षण्णा
मपि संस्थानानां संभवात् एवमेव च एते सामान्यतस्तिर्यक्पंचेंद्रियविषया नव आलापका अने
नैव क्रमेण जलचरतिर्यक्पंचेंद्रियाणां सामान्यतः सूत्रत्रयं वक्तव्यं। स्थलचराणां चतुष्पदपरिसर्पोरःपरिसर्पभुजपरिसर्पस्थलचराणां
खचरतिर्यक्पंचेंद्रियाणां च प्रत्येकं नव नव सूत्राणि वक्तव्यानि सर्वसंख्यया तिर्यक्पंचेंद्रियाणां सूत्राणि षट्चत्वारिंशत् मनुष्याणां नवसमर्थत्र सं
मूर्छिमेषु हुंडसंस्थानं वक्तव्यमिति सर्वहुंडसंस्थानानीति देवमुक्तान्यौदारिकादीनां संस्थानानि संप्रत्यवगाहनामानमाह ओरालियसरीरस्स णं भं
ते इत्यादि औदारिकस्य जघन्यतोऽवगाहना अंगुलासंख्येयभागः सा चापर्याप्तसूक्ष्मपृथिवीकायिकादीनां वेदितव्या उत्कर्षतः सातिरेकं
योजनसहस्रं तच्च बादरवनस्पतिकायिकं पद्मनालादि प्रतीत्य वेदितव्या अत ऊर्ध्वं तावदौदारिकस्यासंभवात् एवमेकेंद्रियसूत्रेऽपि तथा
एकेंद्रियओरालियस्स णं भंते इति पृथिवीकायिकानां सूक्ष्माणां प्रत्येकं पर्याप्तानामपर्याप्तानामौदारिकशरीरस्य जघन्यतः

र्षतस्यावगाहनातुल्यासंख्येयभागः प्रत्येकवनस्पतीनां नवसूत्राणि तथा अधिकस्तत्र मोधिकापर्याप्तस्तत्र मोधिकापर्याप्तस्तत्र तथा सूक्ष्मस्तत्र सूक्ष्मापर्या-
प्तस्तत्र सूक्ष्मपर्याप्तकस्तत्र मेवं बादरस्यापि त्रिकमिति एवं वनस्पतिकायिकानामपि नवसूत्राणि नवरमोधिकवनस्पतिपर्याप्तस्तत्र अधिकवनस्पतिपर्याप्तकस्त-
त्र तथा बादरस्तत्र बादरपर्याप्तकस्तत्र बादरपर्याप्तस्तत्र वक्ष्यमाणतो अंगुलासंख्येयभाग उत्कर्षतः सातिरेकयोजनसहस्रं तत्र पद्मनालाद्यधि-
कृत्यावेदितव्यमेषु त्रिषु पदेषु सूत्रेषु जघन्यतस्तत्र उत्कर्षतो वा अंगुलासंख्येयभागः द्वित्रिचतुरिन्द्रियाणां प्रत्येकं त्रीणि त्रीणि सूत्राणि तथा अधिका-
स्तत्र अपर्याप्तस्तत्र पर्याप्तस्तत्र तत्रौधिकस्तत्र पर्याप्तस्तत्र द्वीन्द्रियाणामुत्कर्षतो द्वादशयोजनानि त्रीन्द्रियाणां त्रीणि गव्यूतानि चतुरिन्द्रियाणां च-
त्वारि गव्यूतानि अपर्याप्तस्तत्र जघन्यत उत्कर्षतश्चांगुलासंख्येयभागः॥ तथा सामान्यतस्तिर्यक्पंचेन्द्रियाणां जलचराणां सामान्यतः स्थलच-
राणां चतुष्पदानामुरःपरिसर्पाणां भुजपरिसर्पाणां खचरपंचेन्द्रिया- णां च प्रत्येकं नवनवसूत्राणि तथा यावत् त्रीणि अधिकानि त्री-
णि संमूर्छिमविषयाणि त्रीणि गर्भव्युत्क्रान्तिकविषयाणि तत्रापर्याप्त- सूत्रेषु सर्वेष्वपि जघन्यत उत्कर्षतो वांगुलासंख्ये-
यभागः शेषेषु जघन्यतोंगुलासंख्येयभाग उत्कर्षतः सामान्यतः तिर्यक्पंचेन्द्रियेषु जलचरेषु चोत्कर्षतो योजनसहस्रं सामान्य-
तः स्थलचरेषु चतुष्पदस्थलचरेषु चौधिकेषु गर्भव्युत्क्रान्तेषु षड्गव्यूतानि संमूर्छिमेषु गव्यूतपृथक्त्वं उरःपरिसर्पेष्वौधिकेषु गर्भव्युत्क्रान्ते-
षु योजनसहस्रं संमूर्छिमेषु योजनपृथक्त्वं भुजपरिसर्पेष्वौधिकेषु गर्भव्युत्क्रान्तेषु गव्यूतपृथक्त्वं संमूर्छिमेषु धनुःपृथक्त्वं खचरेष्वौधिकेषु गर्भव्यु-
त्क्रान्तेषु संमूर्छिमेषु च सर्वेष्वपि धनुःपृथक्त्वं उक्तं च जोयणसहस्समित्यादि गर्भव्युत्क्रान्तानां जलचराणामुत्कर्षतः शरीरावगाहनाया
मानं योजनसहस्रं चतुष्पदस्थलचराणां षड्गव्यूतानि उरःपरिसर्पस्थलचराणां योजनसहस्रं भुजपरिसर्पस्थलचराणां गव्यूतपृथक्त्वं पक्षिणां धनुःपृथ-
क्त्वं तथा संमूर्छिमानां जलचराणामुत्कर्षतः शरीरावगाहनायाः प्रमाणं योजनसहस्रं चतुष्पदस्थलचराणां गव्यूतपृथक्त्वं पक्षिणां धनुःपृथक्त्वं उरःपरिसर्प-
स्थलचराणां योजनपृथक्त्वं भुजपरिसर्पस्थलचराणां पक्षिणां च धनुःपृथक्त्वमिति तदुक्तमिति तिर्यक्पंचेन्द्रियौदारिकशरीरावगाहनामानमिदानीं मनुष्यपंचेन्द्रियौ- १३७

दारिकशरीरावगाहनामानमाह । मणुस्सोरालियसरीरस्स णमित्यादि उत्कर्षतस्त्रीणि गव्यूतानि देवकुर्वाद्यपेक्षया तदेवमौदारिकशरीर-
स्य विधिसंस्थानप्रमाणानि उक्तानि संप्रति तान्येव क्रमेण वैक्रियस्याभिधित्सुराह । वेउव्वियसरीरे णं भंते इत्यादि वैक्रियशरीरं मूलतो
द्वेधा एकेन्द्रियपंचेन्द्रियभेदात् तत्रैकेन्द्रियस्य वातकायस्य तत्रापि बादरस्य तत्रापि पर्याप्तस्य नान्यस्य वैक्रियलब्धिसंभवात् उक्तं च तिण्हं ताव रा-
सीणं वेउव्वियलद्धी चेव नत्थि बायरपज्जत्ताणं पि संखेज्जइभागमेत्ताणं अत्थि त्ति पंचेन्द्रियाणां पर्याप्तापर्याप्तसंख्यापर्याप्तबादरपाणं पंचेन्द्रियति-
र्यग्योनिकजलचरचतुष्पदोरःपरिसर्पभुजपरिसर्पखचराणां मनुष्याणां गर्भव्युत्क्रान्तिकानां संख्येयवर्षायुषां पर्याप्तानां शेषाणां तेषामपि न सर्वेषां
वैक्रियलब्धिसंभवात् उक्तं तदाः संस्थानान्यभिधित्सुराह वेउ- व्वियसरीरे णं भंते इत्यादि सुगमं नवरं नैरयिकाणां नवधार-
णीयमुत्तरवैक्रियं च हुंडसंस्थानमत्यन्तक्लिष्टकर्मोदयवशात् तथाहि । तेषां नवधारणीयं शरीरं लवनशूनां च तत् पक्षनिर्लूनं विलुप्त-
पक्षिवाह्यादि तत्सकलग्रीवादि तात्पंक्तिसंस्थानवदतीवबीभत्समुक्तं- उत्तरवैक्रियमपि यद्यपि शुभं करिष्या-
मः इत्यभिसंधिना कर्तुमारभन्ते तथापि तथाविधभवस्वभावतया अशुभनामकर्मोदयवशात् अतीवाशुभतरमुत्पद्यते इति हुंडसंस्थानं तिर्यक्पंचे-
न्द्रियाणां मनुष्याणां च वैक्रियं नानासंस्थानसंस्थितमिच्छावशात् प्रवृत्तेर्देवानां भवनपतिव्यन्तरज्योतिष्कसौधर्मादिकल्पोपपन्नवैमानि-
कानां नवधारणीयं नवधारणीयं तथा तथाविधशुभनामप्रत्ययतः सर्वेषां समचतुरस्रसंस्थानमुत्तरवैक्रियं इच्छावशतः प्रवृत्तेर्नानासंस्थानसंस्थितं ग्रै-
वेयकानामनुत्तरवैक्रियं नास्ति उत्तरवैक्रियं न कुर्वन्तीत्यर्थः शक्तिसद्भावे प्रयोजनाभावात् उत्तरवैक्रियं हि आगमनगमनपरिचारणादिनिमित्तं क्रियते न चैतेषाम-
मेवात्मतो नवधारणीयमेतेषां समचतुरस्रसंस्थानसंस्थितमिति उक्तानि संस्थानानि इदानीमवगाहनामानमाह । वेउव्वियसरीरस्स णमित्यादि ।
जघन्यतोंगुलासंख्येयभागः नैरयिकादीनां नवधारणीयस्यापर्याप्तावस्थायां वातकायस्य वा उत्कर्षतः सातिरेकं योजनशतसहस्रं देवानां उत्त-
रवैक्रियस्य मनुष्याणां वा एगिंदियवेउव्वियसरीरस्स णमित्यादि अत्रैकेन्द्रियो वातकायो न्यस्य वैक्रियलब्ध्यसंभवात् तस्य जघन्यतः उत्कर्ष-

तो वा वगाहनामानमंगुलासंख्येयभागप्रमाणमेतावत्प्रमाणं विकुर्वणाया मेवं तस्य शक्तिसंभवात् सामान्यतो नैरयिकसूत्रे भवधारणीयास्वाधार्यते
यया स्या भवधारणीयांगुलं निष्पन्नवनां करणं अतीयप्रत्ययः उत्कर्षतः पंचधनुःशतानि उत्तरवैक्रिया धनुःसहस्रं सप्तमनरकपृथिव्यपेक्षया
अस्यां तेनावस्था भवधारणीया या उत्तरवैक्रिया या चा शरीरावगाहना या आप्रमाणत्वात् अथ नात्र तिर्यग्विष्वगाह च रयणप्पभेत्यादि अंगुला
संख्येयभागप्रमाणता प्रथमात्य त्रिकालवर्तित्वात् उत्कर्षतः सप्तधनूंषि त्रयो हस्ताः षडंगुलानि पर्याप्तावस्थायां इदं चोत्कर्षतः शारीरावगाहनामा
नं त्रयोदशे प्रस्तटे इदं च शेषेषु प्रस्तटेषु स्तोकं स्तोकतरं तच्चेवं रत्नप्रभायाः प्रथमे प्रस्तटे त्रयो हस्ता उत्कर्षतः शरीरप्रमाणं द्वितीये प्र
स्तटे धनुरेकं हस्तोऽध्यर्धः सार्धानि चाष्टावंगुलानि तृतीये प्रस्तटे धनुरेकं त्रयो हस्ताः सप्तदश चांगुलानि चतुर्थे धनूंषि द्वौ हस्तौ सार्धमेक
मंगुलं पंचमे त्रीणि धनूंषि दशांगुलानि षष्ठे त्रीणि धनूंषि द्वौ हस्तौ सार्धानि अष्टादशांगुलानि सप्तमे चत्वारि धनूंषि एको हस्तः
स्त्रीणि चांगुलानि अष्टमे चत्वारि धनूंषि त्रयो हस्ताः सार्धान्येकादशा … नवमे पंच धनूंषि एको हस्तो विंशतिरंगुला
नि दशमे षड्धनूंषि सार्धानि चत्वारि अंगुलानि एकादशे षड्धनूंषि द्वौ हस्तौ त्रयोदशांगुलानि द्वादशे सप्तधनूंषि सार्धान्येकविंश
तिरंगुलानि त्रयोदशे सप्तधनूंषि त्रयो हस्ताः षडंगुलानि पर्यायं … तात्पर्यार्थः प्रथमे प्रस्तटे यच्छरीरावगाहनापरिमाणं त्रयो हस्ताः
तितस्योपरि प्रतिप्रस्तटं क्रमेण सार्धानि षट्पंचाशदंगुलानि प्रक्षिप्यन्ते ततस्तावद्यावदुक्तं प्रस्तटे शरीरावगाहपरिमाणं भवति उक्तं च रयणाए पढमप
यरे हत्थतियं देहउस्सेहं विणिद्दिट्ठं छप्पन्नंगुलसड्ढा पयरे पयरे हवइ वुड्ढी तदृणं सामानंतरवर्त्ति द्विधा इत्यादि जघन्यतोऽंगुलसंख्येयभागं प्रथमस
मयोत्पन्नस्य अंगुलसंख्येयभागप्रमाणायाः पवनावात् न तु संख्येयभागप्रमाणायाश्च आह च संग्रहणिमूलटीकाकारो हरिभद्रसूरिः उत्तरवैक्रिया
उत्तमा विधप्रथमानां बाह्याद्यसमये अंगुलसंख्येयभागमात्रेव उत्कर्षतः पंचधनूंषि अर्धतृतीया हस्ता इदं चोत्तरवैक्रियं शरीरावगाहनापरिमाणं त्रयोद
शे प्रस्तटे अवसातव्यं शेषेषु प्रस्तटेषु प्रागुक्तभवधारणीयमानापेक्षया द्विगुणं ज्ञातव्यं शर्कराप्रभायां भवधारणीया उत्कर्षतः पंचदश धनूंषि अर्ध १३१

तृतीया हस्ता इदं चोत्कर्षतो भवधारणीयावगाहनापरिमाणमेकादशे प्रस्तटे अवसातव्यं शेषेषु प्रस्तटेषु इदं शर्करायाः प्रथमे प्रस्तटे सप्त धनूंषि त्रयो ह
स्ताः षडंगुलानि द्वितीये प्रस्तटे अष्टौ धनूंषि द्वौ हस्तौ नव चांगुलानि तृतीये नव धनूंषि एको हस्तो द्वादश चांगुलानि चतुर्थे दश धनूंषि पंचदश चांगुलानि पं
चमे दश धनूंषि त्रयो हस्ता अष्टादश अंगुलानि षष्ठे एकादश धनूंषि द्वौ हस्तौ एकविंशतिरंगुलानि सप्तमे द्वादश धनूंषि द्वौ हस्तौ अष्टमे त्रयोदश धनूं
षि एको हस्तः त्रीणि अंगुलानि नवमे चतुर्दश धनूंषि षडंगुलानि दशमे चतुर्दश धनूंषि त्रयो हस्ता नव चांगुलानि एकादशे सूत्रोक्तमेव परिमाणं अत्रापीदं ता
त्पर्यं प्रथमे प्रस्तटे यत्परिमाणमुक्तं तस्योपरि प्रस्तटे क्रमेण त्रयो हस्ताः त्रीणि चांगुलानि प्रक्षेप्याणि तावद्यावदुक्तं प्रस्तटे परिमाणं भवति उक्तं च
सो चेव य बीयाए पढमे पयरंमि होइ उस्सेहो हत्थतियं तिन्नि अंगुल पयरे … रयणहीन एक्कारसमे पयरे पन्नरस धणूणि दोन्नि रयणीओ बा
रस य अंगुलाइं देहपमाणं तु विन्नेयं गाथाद्वयस्यापीयमक्षरगमनिका … य एव प्रथमपृथिव्यां त्रयोदशे प्रस्तटे उत्कर्षतः उत्सेधो
भणितः सप्त धनूंषि त्रयो हस्ताः षडंगुलानीति स एव द्वितीयस्यां … शर्कराप्रभायां पृथिव्यां प्रथमे प्रस्तटे उत्सेधो भवति
ज्ञातव्यः ततः प्रतरे प्रतरे वृद्धिर्वाच्या त्रयो हस्ताः त्रीणि चांगुलानि तत … यावदेकादशे प्रस्तटे उत्कर्षतो भवधारणीयशरीरप
रिमाणमायाति पंचदश धनूंषि द्वौ हस्तौ द्वादश चांगुलानीति उत्तरवैक्रियोक्त … परिमाणमाह एकत्रिंशद्धनूंषि एको हस्तः इदं चैकादशे
प्रस्तटे वेदितव्यं शेषेषु प्रस्तटेषु स्वस्वभवधारणीयापेक्षया द्विगुणमवसेयं तथा तृतीयस्यां वालुकाप्रभायां पृथिव्यामुत्कर्षतो भवधारणीया एक
त्रिंशद्धनूंषि एको हस्तः एतच्च नवमं प्रस्तटमधिकृत्योक्तमवसेयं शेषेषु तु प्रस्तटेष्विदं तत्र प्रथमप्रस्तटे भवधारणीया पंचदश धनूंषि द्वौ हस्तौ द्वादश चांगु
लानि द्वितीयप्रस्तटे सप्तदश धनूंषि द्वौ हस्तौ सार्धानि सप्तांगुलानि तृतीये एकोनविंशतिर्धनूंषि द्वौ हस्तौ त्रीण्यंगुलानि चतुर्थे एकविंशतिर्धनूंषि एको
हस्तः सार्धानि द्वाविंशतिरंगुलानि पंचमे त्रयोविंशतिर्धनूंषि एको हस्तः अष्टादशांगुलानि षष्ठे पंचविंशतिर्धनूंषि एको हस्तः सार्धानि त्रयोदशांगुला
नि सप्तमे सप्तविंशतिर्धनूंषि एको हस्तो नव चांगुलानि अष्टमे एकोनत्रिंशद्धनूंषि एको हस्तः सार्धानि चत्वार्यंगुलानि नवमे यथोक्तं परिमाणम्।

जापि विचार्यं तात्पर्यार्थः प्रथमप्रस्तटे यत्परिमाणमुक्तं तस्योपरि प्रस्तटे प्रस्तटे सप्त हस्ताः सार्द्धानि चैकोनविंशतिरंगुलानि क्रमेण प्रक्षेप्तव्यानि ततो यथोक्त
प्रस्तटे उपरिमाणं भवति उक्तं च सो चेव य तइयाए पढमपयरंमि होइ उस्सेहो सत्तरयणी उ अंगुल उणवीसं सत्तवुड्ढीय पयरे पयरे हावि नवमे पय
रंमि होइ उस्सेहो धणुयाणि एगतीसं एक्का रयणी य नायव्वा अस्यापि गाथाद्वयस्याक्षरगमनिका पूर्ववत् द्वितीयस्याः शर्कराप्रभायाः एकादशे
प्रस्तटे भवधारणीया या उत्कर्षत उत्सेध उक्तः पंचदशधनूंषि द्वौ हस्तौ द्वादशांगुलानि स एव तृतीयस्या वालुकाप्रभायाः पृथिव्याः प्रथमप्रस्तटे उत्क
र्षेण भवति ततः प्रतरे प्रतरे वृद्धिरेवं सप्त हस्ताः सार्द्धानि चैकोनविंशतिरंगुलानि तथा च सति नवमप्रस्तटे यथोक्तं भवधारणीयावगाहनामा
नं भवति एकत्रिंशद्धनूंषि एको हस्त इति उत्तरवैक्रियोत्कृष्टपरिमाणमाह । द्वाषष्टिर्धनूंषि द्वौ हस्तौ एतच्च नवमप्रस्तटापेक्षमवसेयं शेषेषु
प्रस्तटेषु निजनिजभवधारणीयप्रमाणापेक्षया द्विगुणद्विगुणमिति वक्तव्यं पंकप्रभायां पृथिव्यामुत्कर्षतो भवधारणीया द्वाषष्टिर्धनूंषि
द्वौ हस्तौ इदं च सप्तमप्रस्तटे प्रत्येयं शेषप्रस्तटेषु पंकप्रभायाः प्रथमप्रस्तटे एकत्रिंशद्धनूंषि एको हस्तः द्वितीये षट्त्रिं
शद्धनूंषि एको हस्तो विंशतिरंगुलानि तृतीये एकचत्वारिंशद्धनूंषि द्वौ हस्तौ षोडशांगुलानि चतुर्थे षट्चत्वारिंशद्धनूंषि त्रयो हस्
ताः द्वादशांगुलानि पंचमे द्विपंचाशद्धनूंषि अष्टावंगुलानि षष्ठे सप्तपंचाशद्धनूंषि एको हस्तः चत्वार्यंगुलानि सप्तमे यथोक्तरूपपरिमाणं अत्रा
पि चायं तात्पर्यार्थः प्रथमप्रस्तटे यत्परिमाणमुक्तं तस्योपरि प्रस्तटे प्रस्तटे क्रमेण पंचधनूंषि विंशतिरंगुलानीत्येवंरूपा वृद्धिरवगन्तव्याः ततः सप्तमप्रस्तटे य
थोक्तं परिमाणं भवति उक्तं च सो चेव चउत्थीए पढमपयरंमि होइ उस्सेहो पंचधणुवीसअंगुल पयरे पयरे य वुड्ढीय जा सत्तमए पयरे नेरइ
याणं बोद्धव्वो उस्सेहो बावट्ठी धणुयाइं दो य रयणीय बोद्धव्वा अस्यापि गाथाद्वयस्याक्षरगमनिका प्राग्वद्भावनीया उत्तरवैक्रियोत्कर्षप
रिमाणं पंचविंशं धनुःशतं तच्च सप्तमप्रस्तटे शेषेषु भवधारणीयापेक्षया द्विगुणमिति पंचम्यां पृथिव्यां भवधारणीया उत्कर्षतः पंचविंशं धनुः
शतं तच्च पंचमप्रस्तटमधिकृत्योक्तमवसेयं शेषप्रस्तटेषु प्रथमप्रस्तटे द्वाषष्टिर्धनूंषि द्वौ हस्तौ द्वितीये अष्टसप्ततिर्धनूंषि एका वितस्तिः तृतीये त्रिनवति

र्धनूंषि त्रयो हस्ताः चतुर्थे नवोत्तरं धनुःशतं एको हस्त एका वितस्तिः पंचमे यथोक्तं परिमाणं अत्रापि चायं तात्पर्यार्थः यत्प्रथमप्रस्तटे परिमाण
मुक्तं तदुपरि प्रस्तटे प्रस्तटे क्रमेण पंचदशधनूंषि सार्द्धहस्तद्वयाधिकानि प्रक्षेप्तव्यानि तथा च सति यथोक्तं पंचमप्रस्तटे परिमाणं भवति उक्तं च सो चे
व पंचमीए पढमपयरंमि होइ उस्सेहो पन्नरस धणूणि दो हत्था सड्ढा पयरेसु वुड्ढी य ता पंचमए पयरे उस्सेहो धणुसयं तु पणुवीसं अस्या गा
थाया अक्षरगमनिका प्राग्वत्कर्तव्या उत्तरवैक्रियोत्कर्षपरिमाणं अर्द्धतृतीयानि धनुःशतानि एतानि च पंचमप्रस्तटे वेदितव्यानि शेषेषु प्र
स्तटेषु स्वस्वभवधारणीयापेक्षया द्विगुणद्विगुणमिति षष्ठ्यां तमःप्रभायां पृथिव्यामुत्कर्षतो भवधारणीया अर्द्धतृतीयानि धनुःशतानि एतानि च तृतीये
प्रस्तटे प्रत्येतव्यानि प्रथमे तु प्रस्तटे प्रत्येतव्यानि प्रथमे सप्तायां पृथि गुणमिति षष्ठ्यां तमः तु प्रथमे तु प्रस्तटे पंचविंशं धनुःशतं द्वितीये
सार्द्धसप्ताशीत्यधिकं धनुःशतं तृतीये यथोक्तमेव परिमाणं अत्रापि च अयं तात्पर्यार्थः प्रथमप्रस्तटे यत्परिमाणमुक्तं तस्योपरि प्रस्त
टे सार्द्धानि द्वाषष्टिर्धनूंषि प्रक्षेप्तव्यानि तथा च सति तृतीयप्रस्तटे यथोक्तं परिमाणं भवति उक्तं च सो चेव य छट्ठीए पढ
मपयरंमि होइ उस्सेहो बावट्ठिं धणुय सड्ढा पयरे पयरे य होइ वुड्ढी उ छट्ठीए तइयपयरे दोसयपण्णासया होंति अस्याप्यक्षरार्थः प्राग्वदि
कार्या सप्तम्या गाथाया अक्षरगमनिका प्राग्वत्कर्तव्या उत्तरवैक्रियोत्कर्षपरिमाणं पंचधनुःशतानि एतानि च तृतीयप्रस्तटे वेदितव्यानि आद्ययोस्तु द्व
योः स्वस्वभवधारणीयापेक्षया द्विगुणं द्विगुणमवगन्तव्यं अथ सप्तम्यां पृथिव्यां भवधारणीया उत्कर्षतः पंचधनुःशतानि उत्तरवैक्रिया धनुःसह
स्रं भवधारणीया जघन्यतोऽङ्गुलासंख्येयभागप्रमाणा उत्तरवैक्रिया अंगुलसंख्येयभागप्रमाणा इति तिर्यक्पंचेन्द्रियस्य वैक्रियस्य वैक्रिय
शरीरावगाहनोत्कर्षतो योजनशतपृथक्त्वं ततऊर्द्धं करणशक्तेरभावात् मनुष्याणां सातिरेकं योजनशतसहस्रं विष्णुकुमारप्रभृतीनां तथाश्रव
णात् जघन्यात् द्वयोरप्यंगुलसंख्येयभागप्रमाणा न त्वसंख्येयभागमात्रा तथारूपप्रयत्नासंभवात् असुरकुमारादीनां स्तनितकुमारपर्यवसा
नानां व्यन्तराणां ज्योतिष्काणां सौधर्मेशानदेवानां प्रत्येकं जघन्यतो भवधारणीया वैक्रियशरीरावगाहनाऽङ्गुलासंख्येयभागप्रमाणा सा चो

समवा०वृत्ति॥

त्रिसमयविग्रहत्वादुत्कृष्टाः सप्त रत्नयः उत्तरवैक्रियाजघन्यतोऽङ्गुलसंख्येयभागमात्रमुत्कृष्टतो योजनशतसहस्रं उत्तरवैक्रियं तु ग्रैवेयकानुत्तर
ष्वाद्यन्तत्रिकेषु नास्ति तावदेककल्पयावदच्युतकल्पः परतस्तूत्तरवैक्रियसंभवात् एतच्च प्रागेवोक्तं सर्वेषु जघन्यतोऽङ्गुलसंख्येयभागो...
योजनलक्षं भवधारणीया तु द्विविधा अपि सौधर्मेशानदेवानां सप्त रत्नयः इत्यादि भवधारणीयाः इति विशेषः सनत्कुमारकल्पे जघन्यतोऽङ्गुलासं
ख्येयभागमुत्कृष्टतः षड् रत्नयः एवं माहेन्द्रेऽपि इति एवं ब्रह्मलोकलान्तकयोर्जघन्यतोऽङ्गुलासंख्येयभागमुत्कृष्टतो भवधारणीया माहेन्द्रकल्पोपरिवर्तिनां ... सागरोप
मस्थितिकानां देवानामधिकृत्योक्तमेव सर्वेषां द्विसागरोपमस्थितिरेवं येषां सनत्कुमारमाहेन्द्रकल्पयोर्द्विसागरोपमस्थितिस्तेषामुत्कृष्ट
तो भवधारणीयापरिमाणं सप्त हस्तप्रमाणा येषां त्रीणि सागरोपमाणि तेषां षड् हस्ताश्चतुरश्चैकादशभागा येषां चत्वारि साग
रोपमाणि तेषां षड् हस्तास्त्रयश्चैकादशभागा येषां पञ्च सा गरोपमाणि तेषां षड् हस्ता द्वौ चैकादशभागौ
येषां षट् सागरोपमाणि तेषां षड् हस्ता एकश्चैकादशभागः येषां तु परिपूर्णानि सप्त सागरोपमाणि स्थिति
स्तेषां परिपूर्णाः षड् हस्ता भवधारणीया उक्तं च छस्सनंकुमारमाहिंदे रयणीओ बंभलंतएसु पंच चउक्के महिं
द्विरया तत्तो अयरस्स एगुत्तरवुड्ढीए ओसहाइ पंचमसागरसमठिईणं रयणीओ कुणसु एक्कारस जघन्यतो भवधारणीया सर्वेषामप्यङ्गु
लासंख्येयभागप्रमाणा सा च प्रतीता तितामेव सर्वत्र पूर्वोत्कृष्टात् प्रतिपादयति बंभलोगलंतएसुपंच रयणीउ इह यद्यपि ब्रह्मलोकस्योपरि लान्त
कात् समस्तं पर्याप्तश्च वीर्यप्रमाणं चिन्तायामिदं किंचिद्विशेषात् किं पर्यन्तं पञ्च हस्ता उक्ता इति तथा लान्तकमानं ब्रह्मलोकसदृशमेव तावत्
दिपर्यन्तं कल्पनां चेति यदि ब्रह्मलोकलान्तकयोरुत्कृष्टतया भवधारणीया पञ्च रत्नयः एतच्च लान्तके चतुर्दशसागरोपमस्थितिकान् देवानधि
कृत्य प्रतिपादितमवसेयं तोऽष्टसागरोपमस्थितिश्च येषां ब्रह्मलोके सप्त सागरोपमाणि स्थितिस्तेषां षड् रत्नयः परिपूर्णा भवधारणीयाः येषां
मष्टौ सागरोपमाणि तेषां पञ्च हस्ताः षड्हस्तस्यैकादशभागास्तेषां पञ्च हस्ताः पञ्च हस्तस्यैकादशभागा येषां तु ... नव सागरोपमाणि तेषां पञ्च हस्ताश्चत्वारश्चैका १७३

दशभागा हस्तस्य लान्तकेऽपि येषां दश सागरोपमाणि स्थितिस्तेषामेतावती भवधारणीयोत्कर्षतो येषामेकादश सागरोपमाणि लान्तके स्थितिस्ते
षां पञ्च हस्ताश्चत्वारश्च हस्तस्यैकादशभागा येषां द्वादश सागरोपमाणि तेषां पञ्च हस्ता द्वौ च हस्तस्यैकादशभागौ येषां त्रयोदश सागरोपमाणि ते
षां पञ्च हस्ता एकश्च हस्तस्यैकादशभागः येषां चतुर्दश सागरोपमाणि स्थितिस्तेषां परिपूर्णाः पञ्च हस्ता भवधारणीया महाशुक्रसहस्रारयोश्चत
स्रो रत्नय उत्कर्षतो भवधारणीया परिपूर्णाः पञ्च हस्ता येषां पञ्चदश सागरोपमाणि तेषां चत्वारो हस्ताश्चत्वा
रश्च हस्तस्यैकादशभागाः येषां षोडश सागरोपमाणि तेषां चत्वारो हस्ता द्वौ च हस्तस्यैकादशभागौ येषां सप्तदश सागरोपमाणि तेषां चत्वारो
हस्ता एकश्च हस्तस्यैकादशभागः सहस्रारेऽपि येषां सप्तदश सागरोपमाणि तेषामेतावती भवधारणीया येषां तु पुनः सहस्रारे परिपूर्णा
न्यष्टादश सागरोपमाणि स्थितिः तेषां परिपूर्णाश्चत्वारो हस्ता भवधारणी। या आणयपाणयआरणअच्चुएसु तिन्नि रयणीउ इति ८
आनतप्राणतारणाच्युतेषु तिस्रो रत्नय उत्कृष्टा भवधारणीया एत च्चाच्युतकल्पे द्वाविंशतिसागरोपमस्थितिकान् देवा
नधिकृत्योक्तं द्रष्टव्यं ये अष्टादशसागरोपमस्थितिश्च येषामानतादिकल्पोपरि वर्त्तिनि किंचिदभ्यधिकानि वा अष्टादश सागरोपमाणि स्थिति
स्तेषां परिपूर्णाश्चत्वारो हस्ता उत्कृष्टा भवधारणीया येषां तु पुनरानतकल्पे विंशतिः सागरोपमाणि तेषां त्रयो हस्ताश्चत्वारश्च हस्तस्यैकादशभागाः आ
नतविकल्पे येषामेकोनविंशतिः सागरोपमाणि स्थितिस्तेषामेतावती भवधारणीया येषां पुनः प्राणतकल्पे विंशतिः सागरोपमाणि स्थितिस्तेषां
त्रयो हस्ता द्वौ च हस्तस्यैकादशभागौ येषामारणविकल्पे विंशतिः सागरोपमाणि स्थितिस्तेषामेतावती भवधारणीया येषां पुनरारणविकल्पे
एकविंशतिः सागरोपमाणि स्थितिस्तेषां त्रयो हस्ता एकश्च हस्तस्यैकादशभागो भवधारणीया अच्युतविकल्पे येषामेकविंशतिः सागरोपमाणि स्थि
तिस्तेषामेतावत्येव भवधारणीया येषां पुनरच्युतकल्पे द्वाविंशतिः सागरोपमाणि स्थितिस्तेषामुत्कर्षतो भवधारणीया परिपूर्णास्त्रयो हस्ताः ग्रै
वेयककल्पातीतादिनामवितं नवरं ग्रैवेयकेषु द्वावरत्नी उत्पत्त्यवसरे विविधेषु कल्पेषु सागरोपमस्थितिकान् देवान् प्रति द्रष्टव्यं ये सागरोप

प्रज्ञाप॰वृत्तिः॥

मध्यमस्थितिस्त्वेवं प्रथमे ग्रैवेयके येषां द्वाविंशतिसागरोपमाणि स्थितिस्तेषां त्रयोविंशत्या सहस्रैरनवधारणीया येषां तु जघन्येन त्रयोविंशतिसागरोपमाणि स्थितिस्ते
षां द्वाविंशत्या सहस्रैरुत्कर्षतः त्रयोविंशत्या गाः द्वितीये ग्रैवेयके येषां त्रयोविंशतिसागरोपमाणि स्थितिस्तेषामेतावत्यो नवधारणीया येषां तु जघन्येन चतुर्विंश
तिसागरोपमाणि स्थितिस्तेषां द्वाविंशत्या सहस्रैश्चतुर्विंशत्या गाः नवधारणीया तृतीये ग्रैवेयके येषां चतुर्विंशतिसागरोपमाणि स्थितिस्तेषामेतावत्य
नवधारणीया येषां तु जः पञ्चविंशतिसागरोपमाणि तत्र स्थितिः तेषां द्वाविंशत्या सहस्रैः पञ्चविंशत्या गाः नवधारणीया चतुर्थे ग्रैवेयके येषां पंच
विंशतिसागरोपमाणि स्थितिस्तेषामेतावत्यो नवधारणीया येषां तु जघन्येन षड्विंशतिसागरोपमाणि स्थितिस्तेषां द्वाविंशत्या सहस्रैः षड्विंशत्यैका
दशवारा गाः पञ्चमेऽपि ग्रैवेयके येषां षड्विंशतिसागरोपमाणि तेषामेतावती येषां तु जघन्येन सप्तविंशतिसागरोपमाणि तेषां द्वाविंशत्या सहस्रैः
स्यैकादशवारा गाः नवधारणीया षष्ठेऽपि ग्रैवेयके येषां सप्तविंशतिसाग। तोपमाणि तेषामेतावत्यो नवधारणीया येषां तु जघन्येन
ष्टाविंशतिसागरोपमाणि स्थितिस्तेषां द्वाविंशत्या सहस्रैः स्यैकादशवारा गाः नवधारणीया सप्तमेऽपि ग्रैवेयके येषामष्टाविंशतिसा
गरोपमाणि तेषामेतावती येषां तु जघन्येन एकोनत्रिंशत्सागरोपमाणि तेषां नवधारणीया द्वाविंशत्या सहस्रैः स्यैकादशवारा गाः
अष्टमेऽपि ग्रैवेयके येषां स्थितिरेकोनत्रिंशत्सागरोपमाणि तेषामेतावत्प्रमाणा येषां तु जघन्येन त्रिंशत्सागरोपमाणि स्थितिस्तेषां द्वाविंशत्या
सहस्रैः स्यैकादशवारा गाः नवधारणीयाः नवमेऽपि ग्रैवेयके येषां स्थितिस्त्रिंशत्सागरोपमाणि तेषां नवधारणीया एतावत्प्रमाणा येषां तु जघन्येनैका
त्रिंशत्सागरोपमाणि तत्र स्थितिस्तेषां परिशप्यो द्वाविंशत्या नवधारणीया एवं श्रुतेऽपि इत्यादि एवं ग्रैवेयकोक्तेन प्रकारेण अनुत्तरोपपातिकदेवा
नामपि संबन्धनीयं नवरमुत्कर्षतो नवधारणीया प्रकारत्रिविधोऽवक्तव्यः एतत्त्रयस्त्रिंशत्सागरोपमस्थितिकान्प्रतिज्ञातव्यं तेषां तु जघन्येन विजयादिषु च
तुर्षु विमानेषु एकत्रिंशत्सागरोपमाणि स्थितिस्तेषां परिशप्यो द्वाविंशत्या नवधारणीया येषां तु जघन्येन मध्यमा द्वात्रिंशत्सागरोपमाणि स्थितिस्तेषामेका
दशवारकस्त्रयस्त्रिंशत्यैकादशवारा गाः नवधारणीया येषां तूत्कर्षतः सर्वार्थसिद्धमहाविमाने त्रयस्त्रिंशत्सागरोपमाणि तेषामेकादशो नवधारणीया इत्य १३४

न्यासर्वजन्तुलासंरव्ययलागमा ज्ञातादेवमुक्तानि वैक्रियशरीरस्यापि विधिसंज्ञा नवगाहनाप्रमाणानि संप्रत्याहारकस्य प्रतिपादयितुमा
ह ० आहारगसरीरेणं भंते कइविहे पण्णत्ते इत्यादि सुगमं नवरं संजयनियमापरिमसंयह्वंतिस्म सर्वमावद्यात्योगात्यः सम्यगुपरिमंति
स्मेति संयताः सर्वनित्याकर्मकाविति कर्त्रिप्रत्ययः सकलचारित्रिणः असंयता अविरतसम्यग्दृष्टयः संयतासंयता देशविरतिमन्तः त
थापमत्ताः प्रमाद्यन्ति स्म मोहनीयादिकर्मोदयप्रभावतः संज्वलनकषायनिद्राद्यन्यतमप्रमादयोगतः संयमयोगेषु सीदन्ति स्म प्रमत्ताः पूर्ववत्
कर्तरिक्तप्रत्ययः ते च प्रायोगवासिनः तेषां कश्चिदनुपयोगसंभवात् तद्विपरीता अप्रमत्तास्ते च प्रायो जिनकल्पिकपरिहारविशुद्धिकयथा
लंदकल्पिकप्रतिमाप्रतिपन्नास्तेषां संततोपयोगसंभवात् इह ह्यज्ञिनकः। ल्पिकादयो लब्धिं नोपजीवन्ति तेषां तथा कल्पत्वात्ययेवगच्छवा
सिन आहारकशरीरं कुर्वन्ति तेषां तदानीं लब्ध्युपजीवनतो उत्सुकता। सावतः प्रमादवत्तात्प्रावर्तेऽपि च प्रमादवत्त्वं आत्मप्रदेशानामौ
दारिकशरीरे सर्वात्मनोपसंहरणेन व्याकुलीभावात् आहार कशरीरं चान्तर्मुहूर्तं विधाय तत्तो ग्रहयिष्यति प्रायोक्रिय।
कालमनाकविशुद्धिभावतः कार्यग्रंथिकेरप्रमत्तता एवं यत्तत्तथा पिसलब्ध्युपजीवनेन प्रमत्त एव त्वप्रमत्तस्यापि अप्रमत्तसंज्ञ
येत्यादिना प्रतिषेधः कृतः इह पत्निस्ध्दीरास्म्बर्षादिलक्षणाः प्रा सक्तद्विधाश्च ह्वि परीताः कृद्विप्राप्तः कृद्धीश्च प्राप्नोति प्रथमता वि
शिष्टसूत्रतोऽर्थतः सर्वार्थप्रतिपादकं श्रुतमवगाहमानः श्रुतसामर्थ्यतः प्रज्ञाता जतरश्रुतलब्धिमतामधिरोहत्वप्रमत्तः एतदुक्तं च अवगाहते च
सश्रुतं कुलधियापोलित्वाच्च बिज्ञानं मानसपर्यायज्ञानं कोष्ठादिबुद्धीवा चारणवैक्रियसर्वौषधिताद्याश्च लब्धयस्तस्य प्रादुर्भवन्ति गुणताबा
लीनिवामानसाद्यति अत्र मनःपर्ययमनःसयतः मानसपर्यायमिति मानसाः मनसः संबन्धिनः पर्याया विषयाय स्यतस्मान्मनःपर्यायं मनःपर्यायमा
नमित्यर्थः कोष्ठादिबुद्धीवाइत्यत्रादिशब्दात्पदानुसारिबीजपरिग्रहः तिस्रोऽपि बुद्धयः परमातिशयरूपाः प्रवचनप्रतिपाद्यातत्त्वतत्र कोष्ठबुद्धिः
परदानुसारिबुद्धिबीजबुद्धिश्च तत्र कोष्ठइव धान्ययासुत्रार्थयोर्व्याख्यातिर्गतोऽतदवस्थानोऽवग्रहस्यार्थपरयति तत्कियतिपितयोः कालान्तरेऽगलितसा

कोष्ठबुद्धिः या पुनरेकमपि सूत्रपदमवधार्य शेषमश्रुतमपि तदवस्थमेवावगाहते सा पदानुसारिणी या पुनरेकमर्थपदं तथाविधमनुसृत्य शे
षमश्रुतमपि यथावस्थितं प्रभूतमर्थमवगाहते सा बीजबुद्धिः सा च सर्वोत्तमप्रकर्षप्राप्ता भगवतां गणभृतां ते हि उत्पादादिपदत्रयमवधार्य सकलमपि
द्वादशांगात्मकं प्रवचनमभिसूत्रयंति तथा चारणाश्च विक्रियं समवाप्य स्वस्थानविक्रियसंविधितात्र चरणं गमनं तदतिशयवदस्ति येषां ते चार
णा ह्यश्चादित्वादिति मत्वर्थीयोऽण्प्रत्ययः तत्र गमनमन्येषामपि स्वतो नास्तीति ततो विशेषणान्यथानुपपत्त्या चरणमिह विशिष्टं गमनम
भिगृह्यते अत एवातिशायने मत्वर्थीयोपपत्तेः प्रत्ययः कत्वत्प्रत्ययता अयमर्थः अतिशायिचरणसमर्थाश्चारणाः आह च [illegible]
काये अतिशयचरणाच्चारणाः अतिशयगमनादित्यर्थः तत्र द्विभेदा जंघा चारणाश्च तत्र ये चारित्रतपोविशेषप्रभावतः समुद्भूतगमनवि
षयलब्धिविशेषास्ते जंघाचारणाः ये पुनर्विद्यावशतः समुत्पन्नगमन लब्ध्यतिशयास्ते विद्याचारणाः जंघाचारणाश्च रुचकवरद्वीपं याव
द्गंतुं समर्था विद्याचारणा नंदीश्वरं तत्र जंघाचारणा यद्यप्यत्रापि गंतुमिच्छवस्तत्र विक्रियान्तरपि परिश्रान्त्य गच्छन्ति विद्याचारणाश्च
वमेव जंघाचारणश्च रुचकवरद्वीपं गच्छन्नेकेनैवोत्पातेन गच्छति नि वर्त्तमानस्त्वेकेनोत्पातेन नंदीश्वरमायाति द्वितीयेन स्वस्थानं याद
उत मेरुशिखरं प्रति गच्छन्नेकेनैवोत्पातेन पंडकवनमभिरोहति प्रतिनिवर्त्तमानस्तु प्रथमोत्पातेन नंदनवनमागच्छति द्वितीयेन स्वस्थान
मिति जंघाचारणो हि चारित्रातिशयप्रभावतो लब्धिरूपजीवन्नौत्सुक्यभावतः प्रमादसंभवाच्चारित्रातिशयनिबंधना लब्धिरुपक्षीयते ततः प्रतिनिवर्त्त
मानो द्वाभ्यामुत्पाताभ्यां स्वस्थानमायाति विद्याचारणः पुनः प्रथमोत्पातेन मानुषोत्तरं पर्वतं गच्छति द्वितीयेन नंदीश्वरं प्रतिनिवर्त्तमानस्त्वेकेनो
त्पातेन स्वस्थानमायाति तथा मेरुशिखरं गच्छन् प्रथमोत्पातेन नंदनवनं गच्छति द्वितीयेन पंडकवनं प्रतिनिवर्त्तमानस्त्वेकेनोत्पातेन स्वस्थानमाया
तीति विद्याचारणो हि विद्यावशात् तथा विद्यावशीलनमानस्फुटस्फुटतरा विद्या यातयत इति निवर्त्तमानस्य शक्त्यतिशयसंभ
वाद्वेकेनोत्पातेन स्वस्थानागमनमिति उक्तं च अइसयचरणसमत्था जंघाविज्जाहिं चारणा मुणओ जंघाहि जाइ पढमो निस्सं काउं रविकरेवि एगुप्पाए १३५

ण गओ रुयगवरंमि तओ पडिनियत्तो बिइएणं नंदिस्सरंमि इह तओ एइ तइएणं पढमेणं पंडगवणं बिइउप्पाएण नंदणं एइ तइउप्पाएणं इह जंघाचार
णाणं पढमेण माणुसोत्तरनगं स नंदिस्सरं तु बिइएणं एइ तओ तइएणं कयविज्जाचरणो इह इहं पढमेण नंदणवणं बिइउप्पाएण पंडगवणंमि
एइ इहं तइएणं जो विज्जाचारणो होइ तथा सर्वविट्मूत्रादिकमौषधं यस्य स सर्वौषधः किमुक्तं भवति यस्य मूत्रविट्श्लेष्मशरीरमलो व्याधिगा
पनयनसमर्थो भवति स सर्वौषधः आमर्षौषध्यादिलब्धिपरिग्रहः एताश्च कश्चिदप्रमत्तः सन्नुत्पाद्य पश्चात्प्रमत्तो भवति ततो वह प्रायोऽनेन
तदुक्तं इड्ढिपत्तपमत्तसंजयेत्यादि आह मनुष्यस्याहारकशरीरमित्युक्ते सामर्थ्यादेव मनुष्यस्याहारकशरीरमित्यवसीयते ततः कस्माद्व्यतिरे
कमणुस्साहारगशरीरे इत्यादि निर्देशकरणात् उच्यते इह द्विविधा विनेया उद् घाटितज्ञा मध्यमबुद्धयः प्रपंचितज्ञाश्च तत्र ये उद्घटितज्ञा म
ध्यमबुद्धयो वा ते यथोक्तं सामर्थ्यमवबुध्यन्ते प्रवरशास्त्रोपकृतत्वात् न यथोक्तसमर्थविग्रमकशीलास्ते प्रपंचितमेवावगंतुमी
शा ते नात्यंततत्तेषामनुग्रहाय सामर्थ्यलब्धस्यापि विपक्षनिरोधस्या भिधानमन्यथा यो साहि परमकरुणापरीतचेता विशे
षसर्वेषामनुग्रहाय प्रवर्त्तते ततो न कश्चिद्दोषः जहन्नेणं देसूणा रयणी णा इति आहारकशरीरस्य जघन्यतोऽवगाहना देशोना
किंचिदूनारत्निप्रमाणा तथाविधप्रयत्नाभावतः प्रारंभसमयेऽपि तस्या एतावत्या एव संभवात् तदेवमुक्तान्याहारकशरीरस्य विधिसंस्थानावगाहनानि
संप्रति तैजसस्य ता अभिधित्सुराह तेयगसरीरे णं भंते इत्यादि इह तैजसशरीरं सर्वेषामविशेषेण भवति ततो यथा एकेंद्रियविकलेंद्रियपंचेंद्रियग
तिभेदादौदारिकशरीरं तदापि वक्तव्यं पंचेंद्रियतैजसशरीरचिंतायां च पंचेंद्रियतैजसशरीरं नैरयिकतिर्यग्मनुष्यदेवभेदात् तत्र नैरयिकाते
जसशरीरचिंतायां यथा प्राक् वैक्रियशरीरे पर्याप्तापर्याप्तविषयतया चिंतितं तथात्रापि वक्तव्यः स चैवं नेरइयपंचेंदियतेयगसरीरे किं
रयणप्पभापुढविनेरइयपंचेंदियतेयगसरीरे जाव अहेसत्तमापुढविनेरइयपंचेंदियतेयगसरीरे गोयमा रयणप्पभापुढविनेरइयपंचेंदिय
तेयगसरीरे वि जाव अहेसत्तमापुढविनेरइयपंचेंदियतेयगसरीरे वि जइ रयणप्पभापुढविनेरइयपंचेंदियतेयगसरीरे किं पज्जत्तगरयणप्पभा

त्यादि पंचेंदियतिर्यग्योनिकानां मनुष्याणां च यथायोगमोदारिकशरीरं तदंकुस्थानापि दक्षणः मा चेवं तिरिक्खजोणियपंचेंदियतेयगसरीरेणं भं
ते इत्यादि पदानि इत्यादि देवानां यथा वैक्रियशरीरं तदंकुस्थानादिति तत्र मनुष्यपंचेंदियतेयगसरीरे किं तव एणमासिद्धवपंचेंदियगसरीरे इत्यादि या
वस्मर्वार्थसिद्धदेवसूत्रं तु कालदः संप्रतिसंस्थानप्रतिपादनार्थमाह तेयगसरीरेणं भंते किं संठिए पण्णत्ते इत्यादि सुगमं इह जीवप्रदेशानुसारित्वात्तेजसं
शरीरं तत्तावदेवसंस्थानस्यायामोदारिकशरीरानुसारीत्युदारिकवैक्रियशरीरानुसारी तथा जीवप्रदेशानां संस्थानं तदेव तेजसशरीरस्यापीति प्राग्
मेकादिद्वित्रिचतुरिंद्रियतिर्यक्पंचेंद्रियमनुष्यगतमोदारिकसंस्थानं नैरयिकादिदेववैक्रियसंस्थानमिति दिष्टमिति गतं संस्थानमधुनावगाहनामानमाह
तु जीवस्मणं भंते इत्यादि जीवस्यानैरयिकत्वादिविशेषणाविवक्षायां सामान्य तः मारणांतिकसमुद्घातेन समवह
तस्य तैजसशरीरस्य भंते केमहालिया इति किंप्रमाणमहत्वा शरीराव गाहना शरीरमोदारिकादिकमपेक्ष्य तत्रातस्तैजसशरीर
स्य प्रज्ञप्ता गोतम शरीरप्रमाणमात्रा विष्कंभबाहल्येन वि कंभश्च बाहल्यं च विष्कंभबाहल्यं समाहारो द्वंद्वस्त
न विष्कंभेन बाहल्येन चेत्यर्थः तत्र विष्कंभ उदरादिविस्तारः बाहल्यमुरःपृष्ठस्थूलता आयामतो दैर्घ्यतो जघन्येनांगुलस्यासंख्येय
भागः उत्कर्षत आयामतो जघन्येनांगुलस्यासंख्येयभागमात्रमत्र चैकेंद्रियस्यैकेंद्रियेषूत्पद्यमा नस्य द्रष्टव्यमुत्कर्षतो लोकांता लोकांतः किमुक्तं भवति अधो
लोकांतादारभ्य यावदूर्ध्वलोकांतमूर्ध्वलोकांतादारभ्य यावदधोलोकांतं भवत्येतावत्प्रमाणं तच्चैवं संभवति सूक्ष्मस्य बादरस्य वा पृथिव्यादेरेकेंद्रियस्याधोलोकांते
वर्तमानस्य एकेंद्रियाणां सूक्ष्मबादराणां च यथायोगं सर्वत्र लोके वर्त्तमानत्वात् यदा सूक्ष्मो बादरो वा एकेंद्रियोऽधोलोकांते वर्त्तमानो ऊर्ध्वलोकांते
सूक्ष्मतया वा उत्पत्तुमिच्छति ऊर्ध्वलोकांते वा वर्त्तमानः सूक्ष्मो बादरो वा अधोलोकांते सूक्ष्मतया बादरतया वा उत्पत्तुमिच्छति तदा स मारणांतिकसमुद्घातेन
समवहतस्य यथोक्तप्रमाणा तैजसशरीरावगाहना भवति एतच्च एकेंद्रियस्य जीवस्य विविक्षितत्वात् सूत्रेण विवक्षितमिति भावः एवं सूक्ष्मपृथिवीकायिका
दधोलोकाद् ऊर्ध्वलोके वा वर्त्तमाना यदा सूक्ष्मपृथिवीकायिकादितया बादरवायुकायिकतया वा ऊर्ध्वलोके अधोलोके वा समुत्पत्तुमिच्छंति तदा वा।

तितस्य मारणांतिकसमुद्घातेन समवहतस्योत्कर्षतो लोकांतादालोकांतं यावत्तैजसशरीरावगाहना एवमप्कायिकादिष्वपि वाच्यं द्वीन्द्रियसूत्रे आयामे
न जघन्यतोंऽगुलासंख्येयभागप्रमाणा यदा द्वींद्रियोऽपर्याप्तो द्वींद्रियः अंगुलासंख्येयभागप्रमाणौदारिकशरीरः स्वप्रत्यासन्नप्रदेशे एकेंद्रियादितयोत्पद्य
ते तदा अवसेया अथवा योऽपि न्यूनशरीरस्थितः सन् मारणांतिकसमुद्घातं करोति तस्मान्न्यूनशरीरात्मारणांतिकसमुद्घातवशात् बहिर्विनिर्गततैजसशरी
रस्यायामविष्कंभविस्तारेवगाहनाचिंत्यते ततस्तत्र शरीरमहितस्य अन्यथा न च न प्राप्त्यादि यत्कर्णधम्यतांगुलासंख्येयभागवेदनाततः छिन्नध्वनय
त्वादि शरीराणां सर्वादिहस्तप्रमाणत्वानुत्ताम महाकायो द्वींद्रियो यदा स्वप्रत्यासन्नदेशे एकेंद्रियतयोत्पद्यते तदा स्युरंगुलासंख्येयभागप्रमाणा
वेदितव्यात् उत्कर्षतस्तिर्यग्लोकाल्लोकांतः किमुक्तं भवति तिर्यग्लोकादधो लोकांतमूर्ध्वलोकांतं वा यावत् नततिता वत्प्रमाणा इत्यर्थः क
थमेतावत्प्रमाणेति चेदुच्यते इह द्वींद्रिया एकेंद्रियेषूत्पद्य ते एकेंद्रियाश्च सकललोकव्यापिन स्तान्यदा तिर्यग्लो
कस्थितो द्वींद्रिय ऊर्ध्वलोकांते अधोलोकांते वा एकेंद्रियतयास मुत्पद्यते तदा स भवति तस्य मारणांतिकसमुद्घातेन समवहतस्य
यथोक्तप्रमाणा तैजसशरीरावगाहना तिर्यग्लोकग्रहणं च प्रायस्तेषां तिर्यग्लोकसंस्थानमिति कृतमन्यथा अधोलोके कादाचित्कत्वा
लोकिकग्रामादौ ऊर्ध्वलोके कदाचिदपि इत्यवमादौ द्वींद्रियः संभव तितदपेक्षया तिर्यग्लोकादितैजसशरीरावगाहनामाद्यप्रमाणं द्वित्रिच
तुरिंद्रियसूत्रे अपि भावनीया नैरयिकसूत्रे आयामेन जघन्यतो सातिरेकं योजनसहस्रं कुतस्तदंगु परिभावनीयं इह वलयामुखादयश्च
त्वारः पातालकलशा लक्षयोजनावगाहा योजनसहस्रबाहल्यविष्कंभिकाः तेषामधस्त्रिभागो वायुः पूर्णो मध्यस्त्रिभाग उदकवायुमिश्रः
त्रिभागो वायुदकयोः समरणापसरणधर्मा तत्र यदा कश्चित्सीमंतकादि नरकेंद्रके वर्त्तमानो नैरयिकः पातालकलशप्रत्यासन्नवा
सी पातालकलशभित्तिं योजनसहस्रबाहल्यां भित्त्वा पातालकलशस्य द्वितीये तृतीये वा त्रिभागे मत्स्यतयोत्पद्यते तदा
भवति सातिरेकयोजनसहस्रमात्रा नैरयिकस्य मारणांतिकसमुद्घातेन समवहतस्य जघन्यातैजसशरीरावगाहनोत्कर्षतो यावदधः स

तमःपृथिवी तिर्यक् यावत् स्वयंभूरमणसमुद्रपर्यंतम् ऊर्ध्वं यावत् पंडकवनं तावदुत्कर्षेण प्राप्नोतीत्याक्षिप्तकं नवति्रधः सप्तमपृथिव्या आरभ्य तिर्यक् याव
स्वयंभूरमणपर्यंतम् ऊर्ध्वं यावत् पंडकवनं तावदुत्कर्षेण प्राप्नोति तावत्प्रमाणा तावती च तदा लभ्यते यदाऽधः सप्तमपृथिवीनारकः स्वयंभूरमणसमुद्रपर्यंते मत्स्य
तयोत्पद्यते पंडकवने उत्कर्षेण भवतीति तिर्यक्पंचेंद्रियस्योत्कर्षतस्तिर्यग्लोकाल्लोकांतात् आपि तावता द्वीइंद्रियवक्तव्यतायां तिर्यक्पंचेंद्रियस्
त्यादसंभवात् मनुष्यस्योत्कर्षतः समयक्षेत्रात् समयप्रधानं क्षेत्रं समयक्षेत्रं मयूरव्यंसकादित्वान्मध्यपदलोपी समासः। यस्मिन्नूर्ध्ववर्तितय
द्वीपप्रमाणं सूर्यादिक्रियाभिव्यंग्यसमयो नाम कालश्चाभिव्यक्तः समयक्षेत्रं मनुष्यक्षेत्रमिति तावत् तस्मात् यावदधः ऊर्ध्वं वा लोकांतं तावद
माणमनुष्यस्यास्यापकेंद्रियत्वादसंभवात् समयक्षेत्रग्रहणं समयक्षे त्रादन्यत्र मनुष्याणां जन्मतः संहरणतो वा संभवति कायायाश्चावगाह
नाया असंभवात्। असुरकुमारादिभवनपतिकुमारपर्यवसानानां भवन व्यंतरज्योतिष्कसौधर्मेशानदेवानां जघन्यतोंगुलासंख्ये
यभागः कथमिति चेदुच्यते पतेऽस्यैकेंद्रियस्योत्पद्यमानत्वाद्यदा तथा तत्र भवनादिषु कुंडलादिषु वापीप्रमुखाः पद्मरागा
दयस्तेषु पृथ्वीषु तिष्ठत्सु स्वदर्पणवसायिनस्तेषु वैक्रियशरीरस्थेषु बालरत्नादिषु पृथिवीकायिकत्वेनोत्पद्यंते तदा भवति जघन्यतोंगुलासंख्ये
यभागप्रमाणा तैजसशरीरावगाहना अत्यैवं तत्र भावतिकानुवृत्ति। तावतां तिष्ठिपतिम लिखितानवद्धितासुकमार्येन हितित्वहेतुः उनम
नत्वावतीति न्यायात् संहरणात् उत्कर्षतो यावदधस्तनचरमांतः तिर्यक् यावत् स्वयंभूरमणसमुद्रस्य बाह्यावेदिकांत ऊर्ध्वं यावदीषत्प्राग्भारापृथिवीना
वदृष्टव्या कथमिति चेदुच्यते यदा भवनपत्यादिको देवस्तृतीयस्याः पृथिव्या अधस्तनचरमांते यावत् केनचित्प्रयोजनेन गतो भवति तत्र च गतः
सन् कथमपि आयुःक्षयात् मृत्वा तिर्यक् स्वयंभूरमणसमुद्रबाह्यवेदिकांते यदि वा ईषत्प्राग्भारापृथिवीपर्यंते पृथिवीकायिकतयोत्पद्यते तदा
सर्वोत्कर्षतो यथोक्तप्रमाणा तैजसशरीरावगाहना सनत्कुमारादीनां जघन्यतोंगुलासंख्येयभागप्रमाणा तैजसशरीरावगाहना कथमिति चेदुच्य
ते इह सनत्कुमारादय एकेंद्रियेषु विकलेंद्रियेषु वा नोत्पद्यंते तथा भवस्वाभाव्यात् किंतु तिर्यक्पंचेंद्रियेषु मनुष्येषु वा ततो यदा मंदरादिषु के पि १११

पि वापीषु जलावगाहं कुर्वंतः स्वायुःक्षयात् कृतात्प्रत्यासन्ने देशे मत्स्यतयोत्पद्यंते तदा अंगुलासंख्येयभागप्रमाणा इष्टव्या अथवा पूर्वसंबंधिनीम
नुष्यस्त्रियं मनुष्याणां पद्मकाशोपलक्ष्य गाढानुरागतोऽपदिश्य परिष्वज्य तत्परिष्वक्तवदेवाश्च प्रदेशावाल्य एककालं कृत्वा तस्या एव गर्भे शुक्रपुद्
जनमुत्पद्यते तदा लभ्यते उत्कर्षतोऽधः पातालकलशानां लक्षयोजनप्रमाणावगाहानां द्वितीयत्रिभागं यावत् स्वयंभूरमणपर्यंतम् ऊर्ध्वं यावदच्युतक
ल्पस्तावदीदृशी कथमिति चेदुच्यते इह सनत्कुमारादिदेवानां मनुष्यदेवस्त्रियाश्चाच्युतकल्पं यावत् गमनं भवति तत्र च गतावाप्यादिषु मत्स्यादयः स
तितत इह तिर्यग्मनुष्येषूत्पद्यंते यदा सनत्कुमारादिदेवा अन्यादेवस्त्रियाश्चाच्युतकल्पं गता भवंति तदा सन् स्वायुःक्षयात् कालं कृत्वा तिर्यक् स्वयंभूरमणस
मुद्रपर्यंते यदि वाधः पातालकलशानां द्वितीयत्रिभागे वा उदके कायोरूस रणापसरणतो वितिनिमस्याद्वितायोत्पद्यंते तदा भवति तस्या तिर्य
क्षेवायथोक्तप्रमाणा तैजसशरीरावगाहना तिएवं शुक्रमहस्रारादि वस्वापि एवं सनत्कुमारादेवगते वगते नरकात एतद्य।
न्यते उत्कर्षतश्च तैजसशरीरावगाहनात्तावदधो यावत्सहस्रा रादवस्य तावता पिव सर्वत्रापि व समानाश्रानतदेव
स्यापि जघन्यतोंगुलासंख्येयभागप्रमाणा तैजसशरीरावगाह नानवानततादयो देवा मनुष्येष्वेवोत्पद्यंते मनुष्याश्च म
नुष्यक्षेत्र एव तिकथमंगुलासंख्येयभागप्रमाणा उच्यते इह पूर्वसंबंधि नीमनुष्यस्त्रियमात्मनमनुष्येणोपभुज्यमानां ततो देवः कश्चनाप्य
वधिज्ञानेनोपलभ्यासवत्कृततया विपरीतवद्भावनात्समवस्तितविशेषात् कर्मगतेरचिंत्यत्वात् कामस्य तिलसलिलवात्रेरकत्वं सत्त्वानां च रितेविर
विचित्रा कर्मणां गतिः सलिलवंच कामानां ह्युत्तिः पर्यंतदारुणा इति गाढानुरागतो दिव्यगत्यन्तरकालापह्रदंतां परिषद्यते तदा वाच्य एवा तेषां वा
श्लिष्याती वसन्निः स्वायुःक्षयात्कालं कृत्वा यदा वा तस्या एव गर्भे मनुष्य तेनोत्पद्यते मनुष्यबीजं तु जघन्यतोंतर्मुहूर्तमुत्कर्षतो द्वादश मुहूर्ता
यावदवतिष्ठते उक्तं च मणुस्सवीएणं भंते कालतो केवचिरं होइ गोयमा जहन्नेणं अंतोमुहुत्तं उक्कोसेणं बारसमुहुत्ता इति ततो द्वादशमुहूर्ता
न्ततः परं उपभुक्तां परिष्वज्यतः तस्यातवेदात्यतिमंदत्वेन दृष्टव्यान्युत्कर्षतो धो यावदधोलौकिकग्रामास्तिर्यक् यावन्मनुष्यक्षेत्रम् ऊर्ध्वं यावदच्यु

३३. प०वृत्ति।।

तःकल्पस्थावादेवस्याप्येवमितिवक्तव्यात इहयदानतदेवःकस्याप्यन्यस्यनिश्रयाअच्युतकल्पंगतोभवति सचतत्रगतःसन्कालंकृत्वास्वस्थलौ
किकग्रामसत्रयदिवामनुष्यक्षेत्रपर्यंतमनुष्यक्षेत्रानात्पद्यतेतदासम्यातपवंग्रामणतारणाच्युतकल्पादेवानामपिभावनीयंतथाचाह एवंजावअणादेव
स्सउववायदेवस्सविएवंचेवनवरंउहंजावसयाइंविमाणाइंइति अच्युतदेवस्यापिजघन्यतउत्कर्षतस्थातिजससरीरावगाहनाएवमेवप्रमाणेन
परंस्वस्थानात्उहंजावसयाइंविमाणाइंइतिवक्तव्यंनवरंउहंजावअच्चुओकप्पोइति अच्युतदेवोवितिर्यक्ततदाकेवलंयावदच्युतःकल्पइतिघट
ततस्पतत्रविद्यमानत्वात्केवलमच्युतदेवापिकदाचिदीक्षविमानपर्यंतंयावद्गच्छतितत्रचगतःसन्कालमपिकरोति ततउक्तंउहंजावसया
इंविमाणाइंइतियेवियकाउत्तरवेरागतहदनादिकमपितत्रस्थाप्येवउक्तंभवति ततइहागमनासंभवादंगुलासंख्येयभागप्रमाणतानलभ्यतेकिंतु
यदावैताढ्यगतौविद्याधरश्रेणिषुत्पद्यतेतदाषष्ठानादारभ्याव द्विद्याधरश्रेणिपर्यंतमावर्तमाणपांजन्मादिजससरीरावगाहना
अतोपिमध्येजघन्यतरायाअसंभवात्उत्कर्षयावदधोलौकिक ग्रामाःतापथवत्यादीसंभवात्तिर्यक्यावन्मनुष्यक्षेत्र
पर्यंतमृतःपरंतिर्यगप्युत्पादाभावात्यद्यपिहिविद्याधराविद्याधरश्रुतं दीपपर्यंतयावद्गच्छंति अर्वाक्संतानामपिरुक्तंततितथापिमनुष्य
क्षेत्रात्परतोनामरणंसंभवतितस्मादुक्तंतिर्यग्यावन्मनुष्यक्षेत्रमितिउक्तंतद। वमुक्तानितैजसशरीरस्यविधिसंस्थानावगाहनमानानितिसंप्रतिका
र्मणस्यवक्तव्यानिकार्मणंचतैजससदाविनाभावितैजसवद्वक्तव्यंप्रदेशान्तराधिसंस्थानंततायावैवतैजसशरीरस्योक्तानितथैवकार्मणस्यापिव
क्तव्यानितथाचाह एवंकम्मगसरीरस्सविभाणियव्वंतिइत्यादिवक्तव्यंइतिरेवातिसंभवाणियवंजावअणुत्तरोववाइयत्ति उक्तानिपंचानाम
पिशरीराणांविधिसंस्थानावगाहनमानानिसंप्रतिसंप्रतिपुद्गलचयनमाह ओरालियसरीरस्सणंभंतेइत्यादिऔदारिकशरीरस्यणमितिवाक्यालंका
रेभदंतकइदिसिंतिएवमपरिच्छिन्नायावन्तोवनवेव्यंप्राकृतत्वात्कतिभ्यादिग्भ्यःसमागत्यपुद्गलाश्रायंतकर्मकर्तृयंप्रयोगःचयं
चयनमागच्छंतीत्यर्थः भगवानाह निर्व्याघातेनव्याघातस्याभावोनिर्व्याघातंमध्यपीलावन्तनवाइत्यादिविकल्पनाःत्रिधमनाश्रयत्वाः बहिर्म २७८

निर्व्याघातेन षड्भ्यो दिग्भ्यः किमुक्तं भवति यत्र सतानामप्यबहिर्वायवस्थितस्यौदारिकशारीरिणा नैकापि दिगलोकेनव्याहतावर्तते तत्र निर्व्याघातमवस्थितस्य
नियमात्षड्भ्यो दिग्भ्यः पुद्गलानामागमनं व्याघातमलोकेनप्रतिस्खलनं प्रतीत्य सियतिदिसिंति स्यात्कदाचित्तिसृभ्यो दिग्भ्यः स्याच्चतसृभ्यः स्यात्पंच
भ्यः कथमितिचेदुच्यते सूक्ष्मजीवस्यौदारिकशारीरिणोयदाऽल्पकाकाशेनविद्यते नापितिर्यक्सर्वदिशानापिदक्षिणदिशितस्मिन्नवस्थितस्य
तत्राधोऽलोकेनव्याहततिर्यग्लोकान्तवर्तितस्याधःपश्चिमायांअप्यलोकसत्वात्तिसृभ्योदिग्भ्यःपुद्गलचयःशेषदिक्त्रयस्यालोकेनव्याहतत्वात्पुनःसएवसूक्ष्मजी
वऔदारिकशारीरीपश्चिमांदिशमनुसृत्यतिष्ठतितदापूर्वादिगभ्यधिकाजातेतिचतसृभ्योदिग्भ्यःपुद्गलानामागमनंयदादक्षिणामेवाश्रयाधःप्रतरगतःप
श्चिमदिशमवलंब्यतिष्ठतितदाऊर्ध्वदिगप्यधिकाल्पलभ्यतेकेवलादिक्। णावदिगलोकेनव्याहतेतिपंचभ्योदिग्भ्यःपुद्गलागमनं वि
क्रियशरीरमाहारकशरीरमाहारकशरीरंचत्रसनाम्यामध्यएवसंभवति नान्यत्रेतितयोर्द्वयोरपिपुद्गलचयोनियमात्षड्भ्योदिग्भ्यःस्मि
जसकार्मणमेवसर्वसंसारिणांततोयथोदारिकस्यनिर्व्याघातेषड्भ्यो दिग्भ्योव्याघातंप्रतीत्यपुनःस्यात्त्रिदिग्भ्यःस्याच्चतुर्दिग्भ्यःस्यात्पंच
दिग्भ्यस्तथातैजसकार्मणयोरपिवक्तव्यःयथाचयस्तथोपचयोऽपच यःप्राग्व्याख्यातवयः। अपचयोनामःशरीरस्यःपुद्गलानांविघट
नमितियावत्तथचाह उवचयअवचयोऽपिशरीरसंयोगमाह ओरालियस्सणंभंतेइ त्यादियस्यौदारिकंतस्यावैक्रियंस्यात्अस्तिस्यान्नास्ति यऔदारिकश
रीरीसन्नवैक्रियलब्धिमान्वैक्रियमारभ्यतेवर्तते तस्यास्तिशेषस्यनास्तीतिभावःयस्यवैक्रियशरीरंतस्यौदारिकशरीरंस्यादस्तिस्यान्नास्तिदेवना
रकाणांवैक्रियशरीरवतामौदारिकशरीरंनास्तितिर्यग्मनुष्याणांतुवैक्रियशरीरवतामस्तीतिभावार्थः आहारकशरीरेणापिसहचिंतायांयस्यौदा
रिकशरीरंतस्याहारकशरीरंस्यादस्तिस्यान्नास्तियऔदारिकशरीरीचतुर्दशपूर्वधरआहारकलब्धिमान्आहारकशरीरमारभ्यवर्ततेतस्यास्तिशेषस्य
नास्तीत्यर्थः यस्यपुनराहारकशरीरंतस्यौदारिकशरीरंनियमादस्तिऔदारिकशरीरविरहेआहारकलब्धेरप्यसंभवात्तैजसशरीरेणसहचिंता
यांयस्यौदारिकशरीरंतस्यनियमात्तैजसशरीरंविरहेऔदारिकशरीरासंभवात्यस्यपुनस्तैजसशरीरंतस्यौदारिकंस्यादस्तिस्यान्नास्तिदेवनेरयि

काणां तापि तिर्यग्मनुष्याणामपीति भावः एवं कार्मणशरीरेणापि सह चिंता कर्त्तव्या तैजसकार्मणयोः सहचारित्वात् संप्रति वैक्रियशरीरस्याहारकशरीरे
णः सह संयोगचिंतामाह जस्स णं भंते इत्यादि यस्य वैक्रियशरीरं न तस्याहारकशरीरं यस्याहारकशरीरं न तस्य वैक्रियशरीरं समकालमनयोरे
कस्यासंभवात् तैजसकार्मणयोरौदारिकशरीरेण सह चिंतितत्वाद्वैक्रियशरीरेणापि सह चिंतयितव्ये आहारकशरीरेणापि सह तथैव तैजसकार्म
णयोश्च परस्परमविनाभावित्वात् यस्य तैजसं तस्य नियमात्कार्मणं यस्य कार्मणं तस्य नियमात्तैजसं गतं संयोगद्वारमिदानीं द्रव्यप्रदेशार्थतयाल्पब
हुत्वमभिधित्सुराह एएसि णं भंते इत्यादि सर्वस्तोकान्याहारकशरीराणि द्रव्यार्थतया शरीरमात्रद्रव्यसंख्यया इत्यर्थः उत्कर्षपदेऽपि तेषां सहस्रपृथक्
त्वप्राप्यमाणत्वात् उक्कोसेणं पुहुत्तं सहस्साणमिति वचनात् तेभ्यो पि वैक्रियशरीराणि द्रव्यार्थतया असंख्येयगुणानि सर्वेषां नैरयि
काणां सर्वेषां देवानां कतिपयतिर्यक्पंचेंद्रियमनुष्यबादरवायुका। यिकानां च वैक्रियशरीरसंभवात् तेभ्योऽप्यौदारिकशरीराणि
द्रव्यार्थतया असंख्येयगुणानि पृथिव्यप्तेजोवायुवनस्पतिद्वित्रि। चतुरिंद्रियतिर्यक्पंचेंद्रियमनुष्याणामौदारिकशरीरसद्भावा
त् पृथिव्यप्तेजोवायुवनस्पतिशरीराणां प्रत्येकमसंख्येयलोकाका। शप्रदेशप्रमाणत्वात् तेभ्योऽपि तैजसकार्मणशरीराणि द्रव्यार्थ
तयानंतगुणानीति सूक्ष्मबादरनिगोदजीवानामनंतानंतानां प्रत्येकं तैजसका र्मणशरीरभावात् स्वस्थाने तु परस्परं तुल्यानि परस्पराविनाभावित्वात् एकस्या
भावेऽन्यस्याप्यभावात् प्रदेशार्थतायां चिंतायां सर्वस्तोकान्याहारकशरीराणि सहस्रपृथक्त्वमात्रशरीरप्रदेशानामल्पत्वात् तेभ्योऽपि वैक्रियशरीराणि प्रदेशा
र्थतया असंख्येयगुणानि इह यद्यपि वैक्रियशरीरयोग्यवर्गणाभ्य आहारकशरीरवर्गणा परमाण्वपेक्षया अनंतगुणास्तथापि स्तोकानि वर्गणानि आहार
कशरीरं निष्पद्यते हस्तमात्रं वा इति प्रभूतानि वैक्रियशरीरवर्गणानि वैक्रियं तूत्कर्षतः सातिरेकयोजनलक्षप्रमाणत्वात् अतिस्तोकान्येवाहारकशरी
राणि सहस्रपृथक्त्वप्राप्यमाणत्वात् अतिप्रभूतानि वैक्रियशरीराणि असंख्येयश्रेणिगताकाशप्रदेशराशिप्रमाणत्वात् ततो युज्यंते आहारकशरीर
भ्यः प्रदेशार्थतया वैक्रियशरीराणि असंख्येयगुणानि तेभ्योऽप्यौदारिकशरीराणि प्रदेशार्थतया असंख्येयलोकाकाशप्रदेशप्रमाणतया तेषामल्प

मानवद्वनंतप्रदेशानामतिप्रभूतानां संभवात् तेभ्योऽपि तैजसशरीराणि प्रदेशार्थतया अनंतगुणानि द्रव्यार्थतयापि तेषामनंतगुणत्वात् तेभ्योऽपि कार्मण
शरीराणि प्रदेशार्थतया अनंतगुणानि तैजसवर्गणाभ्यः कार्मणवर्गणानां परमाण्वपेक्षया अनंतगुणत्वात् द्रव्यार्थप्रदेशार्थचिंतायां सर्वस्तोकान्याहारकशरीरा
दव्वट्ठयाए वेउव्वियसरीरा दव्वट्ठयाए असंखेज्जगुणा ओरालियसरीरा दव्वट्ठयाए असंखेज्जगुणा इत्यत्र भावना प्रागुक्ता अनुसर्तव्या तेभ्यो द्रव्यार्थतयौदारिक
शरीरेभ्य आहारकशरीराणि प्रदेशार्थतया अनंतगुणानि औदारिकशरीराणि सर्वसंख्ययाप्यसंख्येयलोकाकाशप्रमाणानि आहारकशरीरयोग्यवर्ग
णायां चैकैकस्यामप्यनंतानंताः परमाणव इति तेभ्योऽपि वैक्रियशरीराणि प्रदेशार्थतया असंख्येयगुणानि तेभ्योऽप्यौदारिकशरीराणि प्र
देशार्थतया असंख्येयगुणानि अत्र भावना प्रागेव कृता तेभ्योऽपि तैजस। कार्मणानि द्रव्यार्थतया अनंतगुणानि अतिप्रभूतानां संख्यापि
त्वात् तेभ्योऽपि तैजसशरीराणि प्रदेशार्थतया अनंतगुणानि अनंत परमाण्वात्मिकानि अनंतानि एकैकतैजसशरीरस्य निष्पादकत्वा
त् तेभ्योऽपि कार्मणशरीराणि प्रदेशार्थतया अनंतगुणानि उ क्तकारणं भावितं तदेवं पंचानामपि शरीराणां द्रव्यप्रदे
शार्थयोरल्पबहुत्वमुक्तमिदानीमवगाहनाविषयमल्पबहुत्वमाह। एएसि णमित्यादि सर्वस्तोका औदारिक
शरीरस्य जघन्यावगाहना अंगुलासंख्येयभागमात्रप्रमाणत्वात् तैजस। कार्मणयोर्जघन्यावगाहना द्वयोरपि परस्परं तुल्या औदारिकजघ
न्यावगाहनातो विशेषाधिका कथमिति चेत् उच्यते इह मारणांतिकसमुद्घातेन समवहतस्य पूर्वशरीरात् बहिर्विनिर्गतं तैजसं शरीरं त
स्यायामबाहल्यविस्तारेणावगाहना चिंत्यते इह एकेंद्रियस्यामृतस्य देहात् तस्यापि प्रदेशा औदारिकशरीरावगाहना अंगुलासंख्ये
यभागप्रमाणा यदाऽनंतरमतिशोकं तद विस्तारमित्यौदारिकजघन्यावगाहनातो विशेषाधिका तावपि वैक्रियशरीरस्य जघन्यावगाह
ना असंख्येयगुणा अंगुलासंख्येयभागस्यासंख्येयत्वात् तेभ्य आहारकशरीरस्य जघन्यावगाहनासंख्येयगुणा देशोनहस्तप्रमा
णत्वात् उत्कृष्टावगाहना विशेषाधिका सर्वस्तोका आहारकशरीरस्योत्कृष्टावगाहना हस्तमात्रत्वात् ततोऽप्यौदारिकशरीरस्योत्कृष्टावगाहना संख्येयगु

णासातिरेकयोजनसहस्रप्रमाणत्वात् तातापि वैक्रियशरीरस्योत्कृष्टावगाहनासंख्येयगुणा सातिरेकयोजनलक्षमानत्वात् तैजसकार्मण
योरुत्कृष्टावगाहना द्वयोरपि परस्परं तुल्या वैक्रियशरीरोत्कृष्टावगाहनातः संख्येयगुणा चतुर्दशरज्ज्वात्मकत्वात् जघन्योत्कृष्टावगाहनाचिंतायां
माहारकशरीरस्य जहन्निया हिंतो उग्गाहणा हिंतो तस्सेव उक्कोसिया उग्गाहणा विसेसाहिया इति देशोनहस्तमधिकत्वात् शेषसूत्रमनंतरम
वगाहितत्वात् ॥ इति श्रीमलयगिरिविरचितायां प्रज्ञापनाटीकायामेकविंशतितमं अवगाहनासंस्थानपदं समर्थितं ॥ ॥ ॥ एतदेव व्याख्यातमे
कविंशतितमं पदमधुना द्वाविंशतितममारभ्यते तस्य चायमभिसंबंधः इहानंतरपदे गतिपरिणामविशेषरूपं शरीरावगाहनादि चिंतितं इह
तु नारकादिगतिपरिणामपरिणतानां जीवानां प्राणातिपातादिरूपाः क्रियाविशेषाश्चिंत्यंते इति तदिदमादिसूत्रं ॥ कइ णं भंते किरि
याउ पन्नत्ताउ इत्यादि करणं क्रिया कर्मबंधनिबंधनं चेष्टा इत्यर्थः सा पंचधा तद्यथा काइया इत्यादिः चीयत इति कायः शरीरं
कायेन वा कायेन निर्वृत्ता वा कायिकी तथा अधिक्रियते स्था प्यते नरकादिष्वात्मा अनेन इत्यधिकरणमनुष्ठानविशेषो
बाह्यं वा वस्तु चक्रखड्गादि तत्र भवा तेन वा निर्वृत्ता आधिकरणिकी प्राद्वे षियाइति प्रद्वेषो मत्सरः कर्मबंधहेतुरकुशलो जीवपरिणा
म विशेष इत्यर्थः तत्र भवा तेन निर्वृत्ता स एव वा प्राद्वेषिकी पारियावणिया इति परितापः पीडाकरणमित्यर्थः तस्मिन् भवा तेन वा निर्वृत्ता परिताप
नमेव वा पारितापिकी पाणाइवायकिरियाइति प्राणा इंद्रियादयस्तेषामतिपातो विनाशस्तद्विषया प्राणातिपातक्रिया तत्र कायिकी द्विधा णं भंते किरिया तत्र
कायिकी दुविहा तद्यथा अणुवरतकायिकी इः पउत्तकायिकी च अनुपरताविरता तः सर्वतो वा सावद्ययोगात् विरतः न उपरतः अनुपरतः अनु तस्य इदमनिष्ट
मित्यर्थः तस्य कायिकी अनुपरतकायिकी क्रियेति वर्तते इयमविरतस्य भवति तथा नादेशविरतस्य सर्वविरतस्य वा तथा दुष्टं प्रयुक्तं प्रयोगः कायादीनां य
स्यासौ दुःप्रयुक्तस्तस्य कायिकी दुःप्रयुक्तकायिकी इयं प्रमत्तसंयतस्यापि भवति प्रमत्तमतिकायदुःप्रयोगसंभवात् आधिकरणिकी अपि द्विभेदा तद्यथा संयो
जनाधिकरणिकी निर्वर्तनाधिकरणिकी च तत्र संयोजनं पूर्वनिर्वर्तितानां हलगरविषकूटयंत्रादीनां मीलनं तदेव संसारहेतुत्वादाधिकरणिकी संयो

१८०

१२ब्बा५

जनाधिकरणिकी इयं हलाद्यंगानि पूर्वनिर्वर्तितानि संयोजयितुर्भवति तथा निर्वर्तनमसिशक्तितोमरादीनां मूलतो निष्पादनं तदेवाधिकर
णिकी पंचविधस्य वा शरीरस्य निष्पादनं निर्वर्तनाधिकरणिकी इदं स्यापि दुःप्रयुक्तस्य संसारहेतुहेतुत्वात् प्राद्वेषिकी त्रिविधा तद्यथा जेणं अप्पणो
इत्यादि येन कारणेन जीव आत्मनो वा परस्य वा आत्मव्यतिरिक्तस्य उभयस्य वा स्वपरलक्षणस्याशुभं मनः प्रधारयति करोति करणं प्रधारयति
प्रधारयति करोतीत्यर्थः तेन कारणेन विषयस्य त्रिविधा प्राद्वेषिकी क्रिया तथा हि कश्चित् कस्मिंश्चिदपायोऽनुभूयमाने खिन्नः पर्यंते विपाकदारुणमस
हमानः तितिक्षु विवेकादात्मनो वा परिज्वलनमनः संप्रधारयति एवं कश्चित् परस्य कश्चित् स्वपरयोः पारितापनिकी क्रिया त्रिविधा तद्यथा जेणं
अप्पणो इत्यादि येन कारणेन कश्चिज्जंतुः शरीरेतारविवेकतया आत्मन एवासातं दुःखरूपा वेदना मुत्पादयति कश्चित्परस्य कश्चिदुभ
यस्य ततः स्वपरतदुभयाभेदात् त्रिविधा पारितापनिकी क्रिया अ देवमतिलाघवकरणतया अष्टानां करणप्रसंगः यथा योगं स्वपरो
भयासातवेदनाहेतुत्वात् तदयुक्तं विपाकहितत्वेन चिकित्सा करणवत् लाघवकरणादसातवेदनाहेतुत्वायोगात् अत्र
करणपोत्थानप्रतिषेधार्थं उक्तं च सोऽनंतगोकायवोजणमणे मंगलं नविते जेणं नेइ दियस्स णो जेणयज्जणा न यायं तितव
का यामाकं वलयं षरिपावलनी उवसंसेर लेवं कंति विभिन्नवलालनीया चित्तं इयाणि नव रंतियाणां विश्ववत्तणा निय नवत्था चरितं नाना
निमित्त प्राणातिपातक्रियापि त्रिविधा तद्यथा जेणं अप्पणो इत्यादि येन कारणेन कश्चिद्विवेकी गिरिपतनादिना आत्मानं जीविताद्व्यपरोपय
ति कश्चित् बलयसमपीयतः प्राणातिपातक्रियापि त्रिविधा अत एव कारणं इमा वहिरकालमरणं प्रतिपत्तिविहं प्राणातिपातक्रिया दोषसंभवान्न दव
युक्ताः क्रियासप्रत्ययाः किमविशेषेण सर्वेषां जीवानां संति किं वा नेति जिज्ञासुरिदमाह ॥ जीवाणं भंते इत्यादि सुगमं नवरं संसारसमावन्नगा इ
ति संसारसमावन्नगा इति संसारं चतुर्गतिभ्रमणरूपं सम्यगेकीभावेनापन्नाः संसारसमापन्नकाः प्राकृतत्वाच्चास्वार्थिकप्रत्ययः तद्विपरीता असंसारस
मापन्नकाः तत्राद्योपाताः तावत् कालदष्टतरको नरके असंसारसमापन्नकास्ते सिद्धाः सिद्धाश्चादेहमनोविग्रहभावतो अक्रियाः ये तु संसारसमापन्नकास्ते द

भ॰श॰१॰वृत्ति॰ विमाः शैलेशीप्रतिपन्नकाश्च शैलेशी नाम योगनिरोधावस्था तां प्रतिपन्नाः शैलेशीप्रतिपन्नास्ततः सर्ववसुधार्थिकः कः प्रत्ययः शैलेशीप्रतिपन्नकाः न स्पृशन्ति क्रियाम्
शैलेशीप्रतिपन्नकानामयोगत्वात् शैलेशीप्रतिपन्नकाः सूक्ष्मबादरकायवाङ्मनोयोगनिरोधादक्रिया एव शैलेशीप्रतिपन्नकाः सयोगित्वात्सक्रि-
याः एएणमित्याद्युपसंहारवाक्यात्तदेवायं सक्रियायां क्रियायाः प्रस्तुतत्वात्संप्रति प्राणातिपातक्रियानिवर्तितवादं दर्शयति ८ अत्थिणं भंते
इत्यादि अस्त्येतत् णमिति वाक्यालंकारे भदन्त जीवानां प्राणातिपातेन प्राणातिपाताध्यवसायेन क्रिया सामर्थ्यात्प्राणातिपातक्रियेति कर्मकर्तर्यं प्र-
योगो भवतीत्यर्थः अनीतनयाभिप्रायात्कायप्रश्नः कृतमात्रनयाय ... साधारणमिति विवेकः उच्यते कज्जइ हवइ तथाहि कर्मसंस्कृतहिंसापरिण-
तिकाल एव प्राणातिपातक्रियोपजायते पापकर्मोपादानयोग्य... वसायोऽत्राधिकृतो नत्वपरिणतावितिनगवान् ... कज्जइ मन्यते य-
थिकृत्यप्रत्युत्तरमाह हंता अत्थि इत्यादि संप्रेषणप्रत्ययमरणविवादे ... प्रत्ययमरणे अत एव प्राणातिपाताध्यवसायेन प्राणातिपातक्रि-
या भवति परिणामित्यंपमाणं तिष्ठय भवलंबमाणमित्याशयः। ... वचनस्य ... मवचनमधिकृत्यावश्यकपीदं सूत्रं प्राव-
र्तिष्ट आया पवत्ते अहिंसा हिंसत्ति निच्छयमेसइ इति तदेवं यथा प्राणातिपा- तक्रिया भवति तथा कं संप्रति कस्मिन् विषये सा प्राणातिपातक्रि-
या भवतीत्येतद्विज्ञपयति क्षिणं भंते इत्यादि सुगमं नवरं मारणाध्यवसा- यो जीवविषयो भवति ता जीवविषयो यो विरहादो भवति तदुत्त(?)म-
रणाध्यवसायः सोऽपि सम्यग् मिति तु अप्रवृत्तमानत्वात् जीवविषय एव न रज्ज्वादौ रज्ज्वादितया परिच्छिन्ने कुत्रचित् विषये मारणाध्यवसायं विदधाति
तः प्राणातिपातक्रियाधिकृतजीवनिकायेष्वेव एतासु च प्राणातिपातक्रियासु प्रकान्तेषु रथिकादिकं चत्वारि उरिति दंडकमधिकृत्यापि तन्नयति
प अत्थिणं भंते इत्यादि सुगमं नवरं मेवं सूत्रपाठः अत्थिणं भंते नेरइयाणं पाणाइवाएणं किरिया कज्जइ हंता अत्थि कम्हिणं भंते पाणाइवाएणं किरिया
कज्जइ गोयमा छसु जीवनिकाएसु एवं जाव वेमाणियाणं विषयं सूत्रं तदेवं यथा प्राणातिपातक्रिया भवति तथा मृषावादादिभिरपि भवतीति संप्रत्यय मसवृषा-
वादादि विषयान्यपि सूत्राण्याह ८ अत्थिणं भंते मुसावाएणमित्यादि सुगमं नवरं किरिया कज्जइ इति प्रायोगिकी प्राणातिपातादिक्रिया भवतीत्यर्थः तथा १८१

सर्वलोके परमाणवः सर्ववस्तुविषयोऽपि घटते नन्वतस्त्रम् मृषावादः सर्वद्रव्येषु इति द्रव्यपरमाणु पर्यायलक्षणं तन्ना-
पर्यायविषयोऽपि विष्टव्यं यथा यतः सर्वद्रव्यपर्यायविषयमादानं भवति न चोक्तं विषयमात्रस्य दानादानं तत्रास्ति ...
इत्यर्क्षमेतन्नाध्यवसायोऽपि विचित्रलयकाष्ठादिकमर्थं तत्र उपमानं ... इत्येवं तथा ...
परिग्रहः मूर्च्छामिनालवितन्यमहामूर्च्छाप्रवृत्तिनाम विलक्षणा मुकलवस्तुविषयोऽपि परिग्रहो भवतीति ततः परिग्रहस्तत्र चेतसः सर्वद्रव्येषु अतइतिएवान्यत्रापि प्रश्न-
मतं सर्वजीवविषयमुक्तं दिताय वरमसर्ववस्तुविषयोऽयतोऽयं सर्वं वक्तव्ये ... दशविधविषय इति उक्तं च पुढमं मिसव्वजीवा बीए चरिमे सव्वद्व्वाइ सेसा
तादकादसमिनायसूत्रकाक्षद्रव्यैः सुप्रतीताः नवरं कलहो राटिः अभ्याख्यानं सप्तमहाभूतापर्यायं यथा अचोरपि चोरस्त्वं परदारिकस्त्वमि-
त्यादि इदं मृषावादेऽप्यन्तर्गतं परन्तु प्रकृष्टायं दोषः इति एवं सुगमानि पैशुन्यं तादृक् सचाहः सनावादो च स्पष्टहस्तपरपरिवादः प्रश्न-
वचनसमक्षं परोक्षं परदोषविकथनं अरतिरतिः प्रतीता इदं समकं समुदितं प- प्रजानमाया सा शणमितिमायाविषयाचस्याया
राहंदः इह केवलं वलतुसमकमितिक्तिविडति कर्मबंधे तु इदं समुदायो वि- वक्षितो मयाकर्मबंधहेतुत्वात् मृषावादमायास्या
यउपानं मिथ्यादर्शनं शल्यं इति मिथ्यादर्शनं मिथ्यात्वं तदेव शल्यं ततश्च अष्टादश एवं आइति एतत्तु च नरतादितपदोच्चारवापदर्शिताः सर्वस
त्ययाश्च पदं दंडको भवति प्राणातिपातादीनां पापस्थानानामष्टादशानां तत्राप्यष्टादशानां पापस्थानानामधिकृत्य जीवानां क्रियाक्रियाविषयस्थापद-
र्शितः साम्प्रतं तान्येवाधिकृत्य जीवानामेकत्वपृथक्त्वाभ्यां कर्मबंधकत्वमुपदिदर्शयिषुराह ८ जीवाणं भंते इत्यादि सुगमं नवरं सत्तविहबंधक
त्ति आयुर्बंधविरहकाले अष्टविधबंधकत्वं पृथक्त्वविताया सामान्यतो जीवपदे सप्तविधबंधकाश्च पि अष्टविधबंधकाश्चापि सदैव बहवो भवन्तीत्य-
तेनत्वतस्त्र अपि बहवः वचनमित्यादि हृएकपवलंगः नेरयिकसूत्रे सप्तविधबंधकाश्च पि अवस्थिताः एव हिंसापरिणामपरिणता नामसदैव बहवो भवन्ति।
भवन्ति नत्वमानानां सप्तविधबंधकत्वस्याव्यभिचारितामाभूततायदाप्यकाष्टविधबंधका न लभ्यन्ते तदैकभंगः सर्वेपि तावद्भवेयुः सप्तविधबंध-

कादाचित्कत्वात् कोष्टविधबंधकाः तथाः सर्वे सप्तविधबंधकास्तदा द्वितीयो भंगः सप्तविधबंधकाश्च अष्टविधबंधकाश्च इति भंगत्रयं ततदागमयग
नवज्ञवचनस्य तृतीयो भंगः सप्तविधबंधकाश्च अष्टविधबंधकाश्च एवं नैरयिकवदसुरकुमारादयोपि तावद्वक्तव्याः यावत्स्तनितकुमाराः पृथिव्यप्तेजोवा
युवनस्पतिकायिकाश्च सामान्यतो जीवा इव वक्तव्याः उक्तंयत्रापि बहुवचनेनेक एव भंगो वक्तव्य इति भावः पृथिव्यादीनां हिंसापरिण
तानां प्रत्येकं सप्तविधबंधकानामष्टविधबंधकानां च सदैव बहुत्वेन लभ्यमानत्वात् शेषा द्वित्रिचतुरिंद्रियतिर्यक्पंचेंद्रियमनुष्यव्यंतरज्योतिष्क
वैमानिकाश्च यथा नैरयिकास्तथा त्रिकभंगाः स्वभावेन वक्तव्याः यथा च प्राणातिपातेनेकवचनबहुवचनाभ्यां दंडकद्वयमुक्तमेवं सर्वपापस्थानेष्वपि प्रत्येकं
दंडकद्वयं वक्तव्यं तथा चाह जाव मिच्छादंसणसल्लेणं ति सर्वसंख्यया कि- यंतो दंडका भवंतीति चेत् उच्यते अष्टादश पापस्थानानि प्रत्येकं द्वि-
तीयदंडकभावादेतौ द्विदंडकत्वात् षट्त्रिंशदंडकाः जीवा णं भंते इत्यादि अथ बंधकाधिकारात्प्रसंगतो बंधस्योच्यते इह
प्राणातिपातं कुर्वन् जीवः प्राणातिपातेन सप्तविधमष्टविधं वा कर्म बध्नातीति तत्र तत्प्राणातिपातं ज्ञानावरणीयादिकर्म बध्नन्
ति ति क्रियाभिः समाप्यत इति प्रतिपादितं अपि च कार्ये ज्ञानावरणीय- रव्यतः कर्मणा कारणस्य प्राणातिपातारव्यस्य निरूपि-
तेदं प्रदर्श्यते तावत्प्राबल्यबंधविशेषापीति तत्र किंच तिसृभिश्चतसृभिः पंचभिश्च। पंचभिश्च हिंसासमाप्तिक्रमश्च बंधस्य विशिष्टः स्या इत्या
गत्वेहेषमास्थेव दितितमेव प्राणातिपातस्य निर्वृत्तिं उपदर्शयति सियतिकिरिय इत्यादि स्यात्कदाचित् त्रिक्रियः कदाचिच्चतुःक्रियः कदाचि
त्पंचक्रियः तत्र त्रिक्रियता कायिक्याधिकरणिकीप्राद्वेषिकीभिः क्रियाभिः कायिकी नाम स्वशरीरव्यापारणं आधिकरणिकी खड्गादिप्रगु
णीकरणं प्राद्वेषिकी मारयाम्येनमित्यशुभमनःसंप्रधारणमिति चतुःक्रियता कायिक्याधिकरणिकीप्राद्वेषिकीपारितापनिकीभिः पारितापनिकी
नाम खड्गादिघातेन पीडाकरणं पंचक्रियस्तु यदा प्राणातिपातक्रियापि पंचमी भवति प्राणातिपातक्रिया जीविताद्व्यपरोपणं एवं नैरयिकादारभ्य चतु
र्विंशतिदंडकक्रमेण तावद्वक्तव्यं यावद्वैमानिकसूत्रं सूत्रपाठस्त्वेवं नेरइए णं भंते नाणावरणिज्जं कम्मं बंधमाणे कइकिरिए पन्नत्ते इत्यादि तदेवम

कावनदंडकत्रकः संप्रति बहुत्वेनाह जीवा णं भंते इत्यादि प्रश्नसूत्रं सुगमं भगवानाह गोयमा जीवा सिय तिकिरिया अपि चउकिरिया अपि पंचकिरिया अपि कि
मुक्तं भवति जीवा ज्ञानावरणीयं कर्म बध्नंतः सदैव बहवः एव त्रिक्रिया अपि चतुःक्रिया अपि पंचक्रिया अपि लभ्यंत इत्येक एव भंगः यदा च सामान्य
तो जीवपदे अभंगकं तथा नैरयिकादिषु चतुर्विंशतौ स्थानेषु प्रत्येकमभंगकं इष्टव्यं नैरयिकादीनामपि ज्ञानावरणीयं कर्म बध्नतां सदैव त्रिक्रि
याणामपि चतुःक्रियाणामपि पंचक्रियाणामपि बहुत्वेन लभ्यमानत्वात् यथा च ज्ञानावरणीयं कर्माधिकृत्य एकवचनबहुवचनाभ्यां दंडकाबुक्तौ तथा
दर्शनावरणीयादीन्यपि कर्माण्यधिकृत्य प्रत्येकं द्वौ द्वौ दंडकौ वक्तव्यौ ततएवं सति सर्वसंख्यया षोडश दंडकाः जीवे णं भंते जीवाओ कइ
किरिए पन्नत्ते इति अथ बंधकाधिकारस्य प्रस्तुतस्य संबंधः उच्यते इह प्रागुक्तं केवलवर्त- मानभववर्तितो जीवस्य ज्ञानावरणीयादिकर्मबंधः सा च प्रकृतपण
कायिक्यादिक्रियाविशेषणः प्राणातिपातोपि भवति किं वर्तमानभव- कायं संबद्धकायिक्यादिक्रियाविशेषणो पि उत्त एतस्यार्थस्य प्रद
र्शनार्थमिदं सूत्रं अस्य व्याख्या पूर्वोक्तेन प्रकारेण दृष्टिता नाव ताइदं सं- साराभवीयपरिभ्रमति हि सर्वजीवविदितशुभाणास्य(?) ...
ताइगाणि विप्पमुक्कातिदियसमेत्तपरिसज्ज्यास्य दुवः परितावाप- रिनाशुणाइयाभवंति तयातस्सामि णाभवंतरंगयस्सवितंजति
ब्बत्वात् किरियासंभव इति अस्य हि सूत्रं तन्नभवति निहत्वात् उक्तंदार- रणं वसंतपुरनगरे अत्थि यसमणसारप्पापमिति व गाढ विकुल
उवगातेसु गोसमणसहाइयसमित्तहिठी अप्पया रणीपरप्पा तिस्सरं तंसंम उत्तं ताणं तसे याहगादुचाणं रद्धमापसढा महणउणकाला
हलउम पिउ मलहइ इयाएपच सिम किसप्पणल्लहि मुहुणं अहिगरणं तिकट्टु वासिरियं इयातवरवयगा हिणाव दिए हमार सिए हिलउगहि
य अणहिगायवाहाए पलायमाणणा वाइव्वत्तअरदिठ एहिम्माटकुण रायसमीव नीया हिउप्पनाताओ विरायागृ च्छियं वाण णकस्स इउप्पत हि
कहियं अणाहाकव्वेविय कप्पिया पउपत सुवल्ला कहिल हतिसुपिए हिक हिय पप्पिया इतितउमाम हिसेणपाललिणा वसहउ रियं सम अण
वहवेरिणि सरखुणामहापमन्नाणं किसिइमरवउ जित्तउतहिंति गगोवसिकुणं विप्पत्तंपासासिउ णवद बाल्लवं दामसितिता तारस्सापिह

ष्पिइं सद्दाव कूणं नलियालंह नियरवयेण क्कण्णाहियं उट्ठिउ रसाकहं तपणइंति तेण कहियं जहा विन्नं कीस न गविठं नणइ सामि तुज्झ पसाएण एहक्
सिन्नं सविगावसाणि सहाणं इइ रन्नाउट्ठिउ कीस न णए सि तेण लवियं सामि अज्ज झाणमेसठिइ द्विवनभिऊ समवासे हि इइ अहिगरणं नाणं तु परं संसमे
गांसयं तेण विनलइंति वासिरिउं अत्तानं कप्पइ समणे ष्णि तं तउ रसायमाए कारी अणुसासिउ इय रोविउ क्का एस दिठं ताइ सोयस्स आद्दावणे उज्झ
रसायमायाए जणे अवासिरिय दोसेण अवराहं पत्ताए वं जीवा विउज्झंतर अट्ठ देहा वन्हा इ अवासिरंता अणहसयन्ना वत्तो पाविइ दाते संघयत व
जातिस्मरणादिना विज्ञाय स्वं देहं समतिमासात् स्वर न हीयव्रत्य स्थिवा कला न निवर्तयंति तर्हि त्यती स्वश्या रव्वा जीवा तदंत जीव समधिकृत्य कति क्रियः प्र
ज्ञप्ते भगवानाह गोतम स्यात् कदाचित् त्रिक्रियः कायिक्याधिकरणि कीप्राद्वेषिकीनां भावात् तत्र वर्त्तमानभवमधिकृत्य तन्नावनाश्रयवन्नावना
या अतीतभवमधिकृत्य एवं कायिकी वक्तुं तत्संबंधिनः कायस्य कार्य कदेशस्य वा व्यापियमाणत्वात् आधिकरणिकी तत्संयोजितानां ह
लगरकूटयंत्रादीनां वा असिकुंततोमरादीनां पापप्रयोगाय व्यापियमाणत्वात् यदि वा देहोप्यधिकरणमेव्यादिकरणि
क्यपि प्राद्वेषिकी तद्विषयाकुशलपरिणामस्य हि त्वरत्यारम्भात्तत्वात् स्याच्चतुः क्रियः परितापनिक्या अपि कायेन कायिकदेहानां च
करणं ततः तत्संबंधिना क्रियमाणत्वात् स्यात् पंचक्रियः यदा तं तज्जीवि। तादपि व्यपरोपणमाधीयते स्यादक्रियायदा सर्वं कृत्स्नं तां विरीभ
धिकरणं वा त्रिविधं त्रिविधेन व्युत्सृष्टं भवति तदा पि तं कृत्स्ना विना वा शरीरेण कांचिदपि क्रियां करोति इदं चाक्रियत्वं मनुष्यापेक्षया इष्टव्यं तस्यैव।
सर्वविरतिभावात् सिद्धापेक्षया वा तस्य देहमनाइत्यलांबना क्रियत्वात् अत्र सर्वापंच त्रिविंशतिदंडकक्रमेण निरूपयति जीवेणं भंते नेरइया
उ कइ किरिए इत्यादि सुगमं नवरमयं भावार्थः देवनारकान्प्रति चतुःक्रिय एव तेषां जीविताद्व्यपरोपणस्यासंभवात् एवं व्याख्यानात् नारकदेवा इति व
वचनात् शेषान् संख्यान्व षाड्विप्रति पंचक्रिया अपि तेषामपि व्याष्टकं तया जीविताद्व्यपरोपणस्यापि संभवात् तदेवमेकस्यैकं जीवं प्रति
क्रियाश्चिंतिताः संप्रत्येकस्यैव जीवस्य बहून् जीवान् प्रति क्रियाश्चिंतयति जीवेणं भंते जीवहिंतो कइ किरिए इत्यादि एषापि दंडकः प्राग् १८३

ज्ञावनीयः अधुना बहूनां जीवानामेकं जीवमधिकृत्य क्रियाश्चिंतयति जीवाणं भंते जीवातो कइ किरियापण्णत्ता इत्यादि एषापि दंडकः प्र
थमदंडकवद्भावनीयः अधुना बहूनां जीवानां बहून् जीवानधिकृत्य सूत्रमाह जीवाणं भंते जीवहिंतो कइ किरियापण्णत्ता इत्यादि अत्र प्रश्नः
पाठसिद्धं निर्वचनमिदं गोतम त्रिक्रिया अपि चतुःक्रिया अपि पंचक्रिया अपि कस्यापि जीवस्य कमपि जीवं प्रति त्रिक्रियत्वात् कस्यापि चतुःक्रि
यत्वात् कस्यापि पंचक्रियत्वात् कस्यापि मनुष्यस्य सर्वविरतिभावाच्छैलेशिनः सिद्धस्य वा अशेषस्याक्रियत्वादिति सर्वत्र बहुवचनरूप एक एव भंगः एवं
नैरयिकादिकमपि तावद्दंडको यावद्वैमानिकसूत्रं नवरं नैरयिका हि वा अप्रति त्रिक्रिया अपि चतुःक्रिया अपि पंचक्रिया अपीति वक्तव्यं त्रोष
रन् संख्येयवर्षायुषः प्रति पंचक्रिया अपीति तदेवं सामान्यतो जीवप दमधिकृत्य दंडकचतुष्टयमुक्तं संप्रति नैरयिकपदमधिकृत्याह
उ नेरइएणं भंते जीवातो कि रिइ किरिए पमत्ते इत्यादि एवं जी वावसाणिपहिंतो इति अत्र यावत्करणात् नैरयिको जीवान्
प्रतीत्य कति क्रिय इति कति क्रिय इत्यादिरूपा द्वितीयोपि दंडकचतुष्टकः सर्वत्र अदारिकशरीरान् संख्ये
य वर्षायुषः प्रति स्यात्त्रिक्रियः स्याच्चतुःक्रियः स्यात्पंचक्रियः। तिवक्तव्यं नैरयिकदेवान्प्रति पंचमी जीविताद्व्यपरोप
णरूपा क्रिया नाभितेषामनपवर्त्यायुष्कत्वात् तस्मात्प्रति स्यात्त्रिक्रिय : स्याच्चतुःक्रिय इति वक्तव्यं नैरयिकादेवान्प्रति कथं चतुः।
क्रिय इति चेत् उच्यते इह उत्तरभवास्यादयो देवाः तृतीयां पृथिवीं यावत् गता गमिष्यंति च किं सर्वं गता गमिष्यंतीति चेत् उच्यते पूर्वसंगतिक
स्य वेदनाप्रशमयितुं पूर्ववैरिणो वेदनामुदीरयितुं तत्र गच्छंति तदानीमनंतकालादनंतरं पित्रवतितद्गताः संतानारकेव्वध्यां इति आह च सू
लटीकाकारो पितत्र गता नारकेव्वध्यां इत्यनंतकाल एव कथंचित् संभवमात्रमिति अत्रापरे आह ननु नारकस्य पीडियादीनधिकृत्य कथं का
यिक्यादिक्रियासंभव उच्यते इह नारकैर्यस्मात्पूर्वभवशरीरं नकृत्स्नं व्युत्सृष्टं विवकाभावात् ततस्तद्गतः अनवद्यत्याभावात् ततायावन्नत्तशरीरं तेन जीवे
न निवर्त्तितं स ततं शरीरपरिणाममर्वधानपरित्यक्तं तावद्व्यातीतं परिणामं नक्भानेपूर्वभावप्रज्ञापनयातिव्यपदिश्यते हेतघटवन्न्यायाद्

प्रज्ञा०वृत्ति॥

घातस्य सर्पो यदा घातेऽप्यगतोऽपि घातं घटते इति व्यपदिश्यते तस्मात् तदपि शरीरं तेन निर्वर्त्तितमिति तस्येति व्यपदेशमर्हतीति तस्य शरीरस्यैकदेशो
नाः स्यादि कायायः प्राणातिपातं कारितमतः एवं निर्वर्त्तितशरीरजीवापि कायिक्यादि क्रिया निर्दुष्यते न तस्याक्लिष्टत्वात् तत्र यथापि तान् अपि क्रि
याणां तावता तत्कायस्याश्रियमाणत्वात् कायिकी कायाधिकरणमपि भवतीत्यधिकरणिकी प्राद्वेषिक्यादय एव यथा तत्र शरी
रैकदेशः क्षितिघातादिसमर्थमतः कस्यचिदपि प्राणातिपाताद्धेतुरिति तस्मिन्नुपयामद्वीइयादौ सत्यनुकोऽभिसंधिकारणानि घातादिसमर्थमिदं शस्त्रमिति
चिंतयन् अतीवाकाशादिपरिणामं जनितं पीडां वा तदयं विज्ञविताख्यप्रतापयतीति तदा तद्विप्रद्वेषिक्यादिक्रियाकारणत्वात् तेन यानि शरीराणि
तस्यापि प्राद्वेषिकी पारितापनिकी प्राणातिपातक्रियाद्वयमपि भवतीत्येके ॥ दच्चानारादंडकोक्तक्रमः अत्र संक्रमितादिष्वपि शेषं अत्र यावद्
शातोऽस्मानेव चत्वारः स्थानादंडकावक्तव्यानवरं जीवपदमनुपपदे । वा क्रियाइत्यपि वक्तव्यं विरतिप्रतिपन्नो व्यक्लिष्टत्वेन तस्मिन्
क्रियाया असंभवात् शेषास्त्रक्रियास्तीत्यत विरत्यभावतः सूत्र रीरस्य भवांतरगतस्याक्लिष्टत्वेनावश्यं क्रियासंभवात् त
देवं सामान्यतो जीवपदमेकं शेषाणि नैरयिकादीनि स्थानानि चतु । विंशतिरिति सर्वसंख्यया पंचविंशतिरेकैकस्मिंश्च स्थानेऽनेवा
नादंडकाइतिसर्वसंकलनया दशात् अधाक्षयं जीवानां कति क्रियाइ । तितिस्तूपणाथं प्रागुक्तमेवसूत्रं पठति कइ णं भंते किरियाउ पण्णत्ताउ इ
त्यादि प्राग्वत् एता एव क्रियाश्चतुर्विंशतिदंडकक्रमेण चिंतयति ७ नेरईयाणं भंते इत्यादि पाठसिद्धं संप्रत्यासामेव क्रियाणामेकजीवाश्रयेण
परस्परमविनाभावं चिंतयति ८ जस्स णं भंते इत्यादि इह कायिकी क्रिया अदारिकायाश्रिता प्राणातिपातनिर्वर्त्तनसमर्था प्रतिविशिष्टा परिग्रह
तनया कार्मणकायाश्रिता वा ततश्चाद्यानां तिसृणां क्रियाणां परस्परं नियमान्नियामकभावः कथमिति चेदुच्यते कायोऽधिकरणमपि भवतीत्यधिकरणिकी प्रा
कृततः कायस्याधिकरणत्वात् कायिक्यां सत्यामवश्यमाधिकरणिकी आधिकरणिक्यामवश्यं कायिकी सा च प्रतिविशिष्टा कायिकी क्रिया प्रद्वेषमंतरे
णेन भवतीति तत: प्राद्वेषिकीमहपरस्परमविनाभावः प्रद्वेषापि कायस्फुटलिंगएव वक्तुं स्फुटवादमदविनाभावितः प्रत्यक्षतएवोपलब्धत्वान्नुक्तं वक्तव्य । १८४

यतिक्लृप्ततानुचावक्रं स्त्रियस्येतिवरधातयुक्तः अदारिकापि दह्यतावद्यत्परिणामत्वं परितापनस्य प्राणातिपातस्य चाद्य क्रियात्रयसंभवे नियमः
कथमिति चेदुच्यते यदासौ घातीत्मृगादिर्घातकेन धनुषाक्षिप्तेन बाणादिना विध्यते ततस्तस्य परितापनं मरणं वा भवति नान्यथा ततो निय
माभावः परितापनस्य प्राणातिपातस्य च नावश्यं क्रियाणामवश्यं तावन्मात्रसाम्यभावतयोः सतावात् ततः तास्तु मध्ये प्रसिद्धा यस्य कायिकी शेषा निश्चित
चिह्निता क्रियाभिः सह आधिकरणिकीति सूत्रैः प्राद्वेषिकीहास्याः सूत्रतः समस्तं चिंतनीया पारितापनिकी प्राणातिपातक्रिययोस्तु सूत्रे संभाव्यादाह
जस्स णं भंते जीवस्स पारियावणिया किरिया कज्जइ इत्यादि पारितापनिक्याः सत्त्वे प्राणातिपातक्रिया स्याद्भवति स्यान्न भवति यदा बाणादिघा
तेन जीवितान्न व्यपरोप्यते तदा न भवति शेषकालं तु भवतीत्यर्थः यस्य पुनः प्रा णातिपातक्रिया तस्य नियमात् पारितापनिकी परितापनमंतरेण
प्राणव्यपरोपणासंभवात् संप्रति नैरयिकादिचतुर्विंशतिदंडकक्रमे णपरस्परमविनाभावं चिंतयति जस्स णं भंते नेरइयस्स काइया
किरिया कज्जइ इत्यादि प्रतीतं भावितत्वात् तदेवमाकादंडकक्र क: संप्रति कालमधिकृत्याभिप्रायेणोदितायं दंड
कमाह ९ जं समयं णं भंते जीवस्स काइया किरिया कज्जइ तं समयं अ हिगरणिया कज्जइ इत्यादि ऽऽरभ्य सर्वं प्राग्वत् किं तद्वक्तव्यं तावत्क
थं यावद्वैमानिकसूत्रं तथा चाह एवं जाव वैमाणि यस्स इति समयग्रहणं नाविह सामान्यतः का
लो ग्राह्यस्तत्र पुनः परमनिकृष्टो यथोक्तसूक्ष्म्यपातेष्वयोगिकः समयः परितापनस्य प्राणातिपातस्य वा बाणादि क्षेपणघनत्व तया कायिक्याः प्र
थमसमय एवासंभवात् एष द्वितीयो दंडकः संप्रति तृतीयं दंडकमधिकृत्याह ९ जं देसं णं भंते जीवस्स इत्यादि अत्रापि सूत्रं प्राग्वत् किं तद्
वक्तव्यं तावदिह्यं यावद्वैमानिकसूत्रं तथा चाह एवं जाव वेमाणियस्स एष तृतीयो दंडकः जं पएसं णं भंते जीवस्स काइया किरिया कज्जइ इत्यादि क
रणार्थः अत्रापि सूत्रं प्राक्क्रमेण तावद्वक्तव्यं यावद्वैमानिकसूत्रं तथा चाह एवं तावद्वैमाणियस्स इति दंडकसंकलनामाह एवमेते इत्यादि
एताश्च यथा ज्ञानावरणीयादिकर्मबंधस्य संसारकारणत्वात् पापत्वात् तथा चाह १० कइ णं भंते आओजियाउ किरियाउ पण्णत्ताउ इत्यादि आयोजयंति

प्रज्ञा०वृत्ति॥

जीवं संसारस्थायाक्रिका: पिक्यादिका: त्रायं सर्वं सुगमं सूत्रपाठ स्क सूत्रविक्रप्रकारेण तावदक्रव्याख्यायावत्यास्यति यं समयमिति यं देशमिति यं
प्रदेशमिति परस्परस्पृष्टास्त्रावारादंडका: यं समयमित्यादिकालाध्वनोर्व्याप्ताविति विषयाधिकरणाद्वितीयाततो यस्मिन्समये यस्मिन्देशे यस्मिन्प्रदेशे
इतिव्याख्येयं जीवेनातेन संक्रमयकाइयाए अहिगरणियाए इत्यादि अत्रापि समययद्दणेन सामान्यत: कालोऽवसीयते अत्र सूत्रे सुगमं नवरं
नसूत्रेतं गजवीकं वितं जीवमधिकृत्यकस्मिन्जीवायस्मिन्समयकालक्रियाउयेणस्पृष्टस्तस्मिन्समये पारितापनिक्यापि स्पृष्ट: प्राणातिपातक्रि
क्रियया वात्या कालेन: पारितापनिक्या स्पृष्ट: प्राणातिपातेनास्पृष्ट इति द्वितीय: पारितापनिक्या प्राणातिपातक्रियया वास्पृष्ट इति तृतीय: एवमेव
नीयालं गाबाणादलक्षात्पारितापनादयातस्य प्रमादपरितापनाद्यसंभव वितिभ: यत्तु यस्मिन्समये जीवमधिकृत्याद्यक्रियात्रयेणा
स्पृष्ट: स त: स्मिन्समये तमधिकृत्य नियमात्पारितापनिक्या प्राणातिपा। तक्रियया वा स्पृष्ट: कायिक्याद्यभावे परितापनादेरभावात्
तदेवमुक्ता: क्रिया: साम्प्रतं प्रकारान्तरेण क्रिया निरूपयति ठ कइ णं भंते इत्यादि आरंभ: पृथिव्याद्युपमर्द: उक्तं च संका
प्पो संरंभो परितावकरो भवे समारंभो । आरंभो उद्दवओ सुद्धनयाणं। उ सम्बन्धिआरंभ: प्रयोजनं कारणं यस्या सा आरंभिकी पा
रिग्रहिकीयन्निपरिग्रहाधर्म्मोपकरणवर्ज्जवस्तुस्वीकार: धर्मोपकरणमूर्च्छा। स एव परिग्रह एव पारिग्रहिकी तत्र भवा पारिग्रहिकी मायावत्तिया इति
माया अनृजुता उपलक्षणत्वात्क्रोधादेरपि परिग्रह: माया प्रत्यय: कारणं यस्या: सा मायाप्रत्यया अपच्चक्खाण किरियाइति अप्रत्याख्यानेन मना
गपि विरतिपरिणामाभावरूपेण क्रिया अप्रत्याख्यान क्रिया मिच्छादंसणवत्तियाइति मिथ्यादर्शनं प्रत्यय: हेतुर्यस्या: सा मिथ्यादर्शनप्रत्यया एतासां
क्रियाणां मध्ये यस्य या संभवति तस्य तां निरूपयति ठ आरंभियाणं भंते इत्यादि अन्नयरस्सावि पमत्तसंजयस्स इति अत्रापि शब्दो भिन्नक्रम: प्रमत्तसंयतस्याप्ये
कतरस्य कस्यचित्प्रमादसतिकाय दुःप्रयोगभावत: पृथिव्यादरूपमर्दसंभवात् अपिशब्दो रत्नपाठे प्रमत्तवर्जितो नियमपदर्शनार्थ: अप्रमत्तसंयत
स्याप्यारंभिकी क्रिया भवति किंतु न: शेषाणां देशविरतप्रभृतीनामविरतप्रभृतीनामिति एवमुत्तरत्रापि यथायोगमपिशब्दभावनाभावनीया पारिग्रहिकी संयतासं १८५

यतस्यापि देशविरतस्यापीत्यर्थ: तस्यापि परिग्रहधारणात् मायाप्रत्यया अप्रमत्तसंयतस्यापि कथमिति चेत् उच्यते प्रवचनोड्डाहप्रच्छादनार्थं व
ल्लीकरस्मृदृश्यादि अप्रत्याख्यानक्रिया अन्यतरस्याप्यप्रत्याख्यानिन: अन्यतरदपि न किंचिदपीत्यर्थ: प्रत्याख्यातीति तस्येति भाव: मि
थ्यादर्शनक्रिया अन्यतरस्यापि सावाकमेकमप्यक्षरमरोचयमानस्येत्यर्थ: मिथ्यादृष्टेर्भवति एता एव क्रिया अधुना चतुर्विंशतिदण्डकक्रमेण निरूपय
ति नेरइयाणं भंते इत्यादि सुगमं संप्रत्यासां क्रियाणां परस्परमविनाभावं चिंतयति यस्यारंभिकी क्रिया तस्य पारिग्रहिकी स्यादभवति प्रमत्तसं
यतस्य नभवति शेषस्य भवतीत्यर्थ: तथा यस्यारंभिकी क्रिया स्यादभवति स्याद्भवति प्रमत्तसंयतस्य देशविरतस्य च न भवति शेषस्य अविरतस
म्यग्दृष्ट्यादेर्भवतीति भाव: यस्य पुनरप्रत्याख्यानक्रिया तस्यारंभिकी नियमात् अप्रत्याख्यानिनोऽवश्यमारंभसंभवात् एवं मिथ्यादर्शनप्र
त्यययापि सहाविनाभावो भावनीय: तथा हि यस्यारंभिकी क्रि। या तस्य मिथ्यादर्शनप्रत्यया स्याद्भवति स्यान्नभवति मिथ्यादृष्टेर्भव
ति शेषस्य न भवतीत्यर्थ: यस्य तु मिथ्यादर्शनक्रिया तस्य। नियमादारंभिकी मिथ्यादृष्टेरविरतत्वादवश्यमारंभस
भवात् तदेवमारंभिकी क्रिया पारिग्रहिक्यादिभिस्तत सृभि रुपरितनीभि: क्रियाभि: सह परस्परमविनाभावि
न चिंतिता एवं पारिग्रहिकी मिथ्याभिर्मायाप्रत्ययाद्याभिरप्रत्याख्यान। क्रियादिका मिथ्यादर्शनप्रत्ययया तमावाह एवं पारिग्रहिया वि
तिदिं उवरिल्लाहिं समं संचारेयव्वा इत्यादि सुगमं भावनीया: सुप्रतीतत्वात् अधुनामेवार्थं चतुर्विंशतिदंडकक्रमेण निरूपयति नेरइयस्स आर
म्भिया वक्तारि इत्यादि नैरयिकस्यायक्रमेताप्यविरतसम्यग्दृष्टिगुणस्थानकं यावद्भवनात् नैरयिकाणामाद्या: चतस्र: क्रिया: परस्परम
विनाभाविन्यो मिथ्यादर्शनक्रिया पुन: स्याद्भवति स्यान्न भवति तथा चाह जस्सपुणनेरइयस्सेत्यादि मिच्छादिट्ठिमिच्छादंसणकिरिया भवति शेषस्य न भवतीति
भाव: यस्य पुनर्मिथ्यादर्शनक्रिया तस्याधस्तना अपि नियमात् मिथ्यादर्शने सत्यारंभिक्यादीनामवश्यंभावात् एवं तावद्वक्तव्यं यावत्स्तनितकुमारा
स्पृष्ट पृथिव्यादीनां चतुरिंद्रियपर्यवसानानां पंचक्रिया: परस्परमविनाभाविन्यो वक्तव्या: पृथिव्यादीनां मिथ्यादर्शनक्रियाया अवश्यंभावात् तिर्य

प्रज्ञा०वृत्तिः॥

कृपांचेंद्रियस्याद्यासिद्धः परस्परमविनाभावादथ विरतियावदासामवश्यंभावात्तत्राल्पांत्याभ्यां स्याद्वादः त सेव दर्शयितुं सूत्रमाह जस्स णं भंते
इत्यादि इदं च विरतस्य न भवतिः न च स्य न वत इति भावः यस्य पुनरप्रत्याख्यानक्रियेत्यस्याद्या मिश्रा नियमात् भवति उपरितनौ द्विक्रियेऽप्र
त्याख्यानक्रिया मिथ्यादर्शनप्रत्यया च तत्राप्रत्याख्यानक्रिया अविरतस्य सम्यग्दृष्टिं यावत् मिथ्यादर्शनक्रिया मिथ्यादृष्टेरायाश्चत्वाद्याद्वा विरतिया
वत् अनंतरोपरितन्यो र्नाविः स्वयमाशयानो तिष्ठन्ना भावः सप्रत्यप्रत्याख्यान क्रिययां मिथ्यादर्शनक्रियायाश्चियंपांचेंद्रियस्य परस्परमविनाभावं चिंत
यति जस्स णं भंते कारणं किरियाइत्यादि भावितं सत्र च यस्य प्राणीजीवपदे तत्र एवं सूत्रं वा तत्राद्यानिकवैमानिकानामपि यथा देश्यिकस्य एवमेव पाणाकादं
कः एवमेव जं समयं प्रभृति जीवस्मात्यादिको द्वितीयः जं देसं प्रति त्यादिकस्तृतीयः जं पएसं प्रतिन्यादिकश्चतुर्थः अथ षट् कायाः प्राणा
तिपातादिक्रियाश्च तत्र एव भवति किं वा न किरमाणं हत्वा पीति ।। अत्थि णं भंते जीवाणं पाणाइवायातो विरमणे कज्जंति इत्यादि सर्वत्र क्रियत कर्मकर्मक इति प्रत्या
गः तातानवती तिष्ठत्यप्राणातिपातादिविरमणं विषयासूत्र इ कायादयः प्राणवंता विता इति भावः योऽप्राणातिपातविरति
अप्राणातिपातादीनां मायामृषापर्यंतानां जीवपदे मनुष्यपदे च कज्जति जो छसु जीवनिकायेसु नात्यर्थः समर्थ इति वक्तव्यं तेषां न च प्र
त्ययतः सर्वविरत्यसंभवात् मिथ्यादर्शनविषयविता यासर्वद्रव्येषु इति । अपलक्षणमेतत् सर्वपर्यायेषु अपि मृषापरमेकस्मिन् द्रव्यपर्याये वा
मिथ्यात्वना मिथ्यादर्शनविरमणं संभवात् सम्यक्त्वात् स्याप्यात वनादुक्तरस्य भवति नरः मिथ्यादृष्टिः सम्यग्दृष्टिः प्राणिनां जिनानिहितमितिवचनात्
मिथ्यादर्शनशल्यविरमणं च एकेंद्रियवर्जं शेषाणां पृच्छानीपुणकेंद्रियादिषु तत्र भवति कस्मादिति चेत् उच्यते एष मिथ्यादृष्टित्वातयापि
उदयितवचनात्द्वीन्द्रियादीनां चयद्यपि करणपर्याप्तावस्थायां केषांचित्सास्वादनसम्यक्त्वं भवति तथापि तत् मिथ्यात्वाभिमुखत्वानानं तत्प्रतिक्रूलतानां
मतास्तेषामपि मिथ्यादर्शनशल्पविरमणप्रतिषेधः अत्थि णं भंते जीवाणं मिच्छादंसणसल्लवेरमणेणं इत्यादि अथ प्राणातिपातविरतस्य
कर्मबंधो भवति किं वा न इति तद्वत्तत्र भवत्यपि न भवत्यपि तत्र भावेन तदेव प्रश्न सूत्र पूर्वकमाह पाणाइवायविरएणं भंते जीवे इत्यादि सुगमं च ज्ञपच

न्तः पिप्रश्नसूत्रं सुगमं निर्वचनसूत्रमपि पितावजनावंशः सप्तविधबंधकाः अष्ट प्रमत्ताप्रमत्तापूर्वकरणानिवृत्तिबादरायाः सप्तविधबंधकाः प्रमत्ता
अप्रमत्ताश्चायुर्बंधकाले अष्टविधबंधकाः आयुषोपि बंधनात् आयुर्बंधस्य कादाचित्कत्वात् इति कदाचित् सर्वमानमलत्वात् अपि प्रमत्ताश्चाप्रमत्ताश्च सदैव
बहुवचनं लभ्यते अपि हि तिबादरसूक्ष्म कदाचित्र भवत्यपि विरहस्यापि तत्प्राप्त्याभावात् प्रतिपादनात् एकविधबंधका उपशांतमोहक्षीणमोहसयो
गिकेवलिनस्तत्र उपशांतमोहाः क्षीणमोहाश्च कदाचित्र लभ्यंते तेषामंतरस्य स्थितिभावात् सयोगिकेवलिनस्तु सदा प्राप्यंते अत्यान्यत्राप्येवमेव
पाभयवचनात् ततः सप्तविधबंधका एकविधबंधकाश्चावस्थिताः इत्यष्टविधकाभ्यना एकोऽभंगः अथवा सप्तविधबंधकाश्च अष्टविधबंध
क इति द्वितीयः अष्टविधबंधकानां बहुत्वे तृतीयः षड्विधबंधकाः अपि कदाचित्र लभ्यंते कदाचित्र लभ्यंते कद्वतः षड्मासविरहः एकविधबंधका एणमास
विरहभावात् यदापि लभ्यंते तदापि जघन्यपदे एको द्वौ वा उत्कर्षपदे शतपृथक्त्वं ततो अष्टविधबंधकपदानां षड्विधबंधकपदे
नापि द्वौ भंगौ अबंधकाश्च अयोगिकेवलिनः ते अपि कदाचित् कदाचित्र लभ्यंते तेषामपि उत्कर्षतः षण्मासविरहभावात्
यदाप्यवाप्यंते तदापि जघन्यपदे एको द्वौ वा उत्कर्षतः अष्टाधिकं शतं ततोऽष्टविधबंधकपदानां बंधकपदेनापि द्वौ भंगौ तदे
वमेक आद्यो भंग एककसंयोगा च षडिति सप्त भंगा इदानीं द्विकसंयोग भंगा दर्शयति तत्र सप्तविधबंधका एकविधबंधकाश्चावस्थि
ताभुवना सामपि सदा बहुत्वेन लभ्यमानत्वात् ततोऽष्टविधकपदे षड्विधबंधकपदे च प्रत्येकवचनमित्येको भंगः अष्टविधबंधकपदे बंधका
एकवचनं षड्विधबंधकपदे बहुवचनमिति द्वितीयः एतौ भंगौ अष्टविधबंधकपदस्यैकवचनेन लब्धौ एतावेव द्वौ भंगौ बहुवचनेनेति
चत्वारः एवमेव चत्वारो भंगा अष्टविधबंधका बंधकपदाभ्यामेवमेव चत्वारः षड्विधबंधका बंधकपदाभ्यामिति सर्वसंख्यया द्विकसंयोगे
द्वादश भंगाः त्रयाणामष्टविधबंधकषड्विधबंधकरूपाणां पदानां संयोग प्रत्येकमेकवचनबहुवचनाभ्यामष्टौ भंगाः सर्वसंकलनया सप्त
विंशतिर्भंगाः अथ परमाह नत्तु विरतस्य कर्मबंधः न हि विरतिबंधहेतुर्भवति यदि तु न विरतिः पि बंधहेतुः स्यात्तो निर्मोक्ष प्रसंगतः पाया न

वान् प्रत्याख्यानविरतिं बध्नाति तुः किं तु रतस्य प्रत्याख्यानकषायोदयात् तस्य बंधकारणं तथाहि सामायिकच्छेदोपस्थापनपरिहारविशुद्धिकेषु प्रसंयतस्य उ
पि संयमस्य कषायाः संज्वलनकषायोदयवशात् सति योगाश्रवे ततो विरतस्यापि देवायुष्कादीनां सत्त्वात् तस्यायोगबंधः यथा च प्राणातिपात
विरतस्य सप्तविंशतिर्भंगाः एवं मृषावादविरतस्य यावन्मायामृषाविरतस्य मिथ्यादर्शनशल्यविरतस्य विशेषमाह मिच्छादंसणसल्लविरए
णं भंते इत्यादि सुगमं नवरं सप्तविधबंधकश्च अष्टविधबंधकश्च षड्विधबंधकश्च एकविधबंधकश्च अबंधकश्च मिथ्यादर्शनशल्यविरतिः विरतसम्यग्दृष्टे
रारभ्य अयोगिकेवलिनं यावद्भवति नैरयिकादिचतुर्विंशतिदंडकचिंतायां मनुष्यवर्जेषु सर्वेष्वपि स्थानेषु प्रथमः सप्तविधबंधकश्चाष्टविधबंधको वा
न षड्विधबंधकश्चाविरतिप्रतिपत्तेः संभवात् मनुष्यपदे च यथा जीवपदे तथा वक्तव्यं मनुष्यपदे सर्वभावात् बहुत्ववचनेन विशेषमाह
मिच्छादंसणसल्लविरयाणं भंते जीवा इत्यादि जीवपदे सर्वत्रापि सप्तविंशतिर्भंगा नैरयिकपदे भंगत्रिकं तत्र सर्वेऽपि तावद्भव
तुः सप्तविधबंधका इत्येको भंगः अथवा सप्तविधबंधकाश्चाष्टविधः कदाचिल्लभ्यते तदा भवति यदा च नरकेऽष्टविधबंधको लभ्य
ते तदा द्वितीयो भंगः सप्तविधबंधकाश्चाष्टविधबंधकश्च यदा च नरकेऽष्टविधबंधका अपि बहवो लभ्यन्ते तदा तृतीयः सप्तविधबंध
काश्चाष्टविधबंधकाश्च एवं भंगत्रिकं तावद्वाच्यं यावद्वैमानिकः नवरं मनुष्यपदे सप्तविंशतिर्भंगका यथा जीवपदे इति अथ आरंभिक्यादी
नां क्रियाणां मध्ये काचित् प्राणातिपातविरतस्य भवतीति चिंत्यते ८ पाणाइवायविरयस्स णं भंते इत्यादि आरंभिकी क्रिया स्याद्भवति प्रमत्तसं
यतस्य भवति अप्रमत्तस्य न भवतीति भावः पारिग्रहिकी तु निषिध्या सर्वथा परिग्रहनिवृत्तत्वात् अन्यथा सम्यक् प्राणातिपातविरतत्वानुपपत्तेर्मायाप्रत्यया स्या
द्भवति स्यान्न भवति अप्रमत्तस्यापि हि कदाचित् प्रवचनमालिन्यरक्षणार्थं भवति नाप्यकाले न भवति अप्रत्याख्यानक्रिया मिथ्यादर्शनप्रत्यया च सर्व
था निषिध्यते तदभावप्राणातिपातविरत्या योगात् प्राणातिपातविरतस्य पदे यथा जीवो मनुष्यस्तत्र यथा सामान्यतो जीवमधिकृत्योक्तं त
था मनुष्यमधिकृत्य वक्तव्यं तथा चाह एवं पाणाइवायविरयस्स मणुस्सस्सवि इति एवं तावद्वाच्यं यावत् मायामृषाविरतस्य जीवस्य मनुष्यस्य च मिथ्याद

र्शनशल्यविरतमधिकृत्य सूत्रं मिच्छादंसणसल्लविरयस्स णं भंते जीवस्स इत्यादि आरंभिकी स्याद्भवति स्यान्न भवति प्रमत्तसंयतस्य भवति अप्र
मत्तस्य न भवतीति भावार्थः पारिग्रहिकी देशविरतिं यावद्भवति परतो न भवति मायाप्रत्यया अपि हि निवादरसंपरायं यावद्भवति परतो न भवति अप्र
त्याख्यानक्रिया अविरतसम्यग्दृष्टिं यावद्भवति परतः न तत एतासु पंचसु क्रियासु अधिकृत्य सिय कज्जइ सिय नो कज्जइ इति वक्तव्यं तथा चाह एवं जाव अप्प
च्चक्खाणकिरिया इति मिथ्यादर्शनविरतस्य तस्या असंभवात् चतुर्विंशतिदंडकचिंतायां नैरयिकादीनां भवनपत्यादिव्यंतरवैमानिकानां च तिस्रः क्रि
या वक्तव्या मिथ्यादर्शनप्रत्यया निषेध्या तिर्यक्पंचेंद्रियस्याद्यास्तिस्रः क्रिया नियमतो वक्तव्या अप्रत्याख्यानक्रिया भाज्या देशविरतस्य न भवति
शेषस्य भवतीत्यर्थः मिथ्यादर्शनप्रत्यया निषेध्या मनुष्यस्य यथा सामान्यतो जीवस्य व्यंतरादीनां यथा नैरयिकस्य संप्रति सामर्थ्यादारंभिक्यादी
नां क्रियाणां परस्परमल्पबहुत्वमाह ८ एयासि णं भंते इत्यादि सर्वस्तोका मिथ्यादर्शनप्रत्ययाः क्रियाः मिथ्यादृष्टीनामेव भावा
त् ताभ्यः अप्रत्याख्यानक्रिया विशेषाधिका अविरतसम्यग्दृष्टीनामपि मिथ्यादृष्टीनां च भावात् ताभ्यः पारिग्रहिक्यो विशेषाधि
काः देशविरतानामपि तद्भावात् आरंभिक्यो विशेषाधिकाः प्रमत्तसंयतानां पूर्वेषां च भावात् ताभ्यः मायाप्रत्यया विशेषाधि
का अप्रमत्तसंयतानामपि भावात् ८ ॥ ॥ इति श्रीमलयगिरिविरचितायां प्रज्ञापनाटीकायां द्वाविंशतितमं क्रियापदं समाप्तं ८
तदेवमुक्तं द्वाविंशतितमं पदं संप्रति त्रयोविंशतितममारभ्यते अस्य चायमभिसंबंधः इहानंतरपदे नारकादिगतिपरिणामपरिणतानां जीवा
नां प्राणातिपातादिक्रियाविशेष उक्तः इति संप्रति तु तः कर्मबंधादिपरिणामविशेष उच्यते तत्र चेयमधिकारसंग्रहगाथा कइ पयडी इत्यादि क
ति प्रकृतयो नवेत्यादि प्रथमोऽधिकारः तथा कथं केन प्रकारेण ताः प्रकृतीर्बध्नातीति द्वितीयः कतिभिः स्थानैर्बध्नातीति तृतीयः अपि प्रकृ
तीर्वेदयते इति चतुर्थः कस्य कर्मणः कतिविधोऽनुभागः पंचमः तत्र प्रथमाधिकारनिरूपणार्थमाह कइ णं भंते पयडीओ पण्णत्ताओ इति तत्र क्रमेणैव क्रि
यापदे कति कर्मप्रकृतय इति ततः किमर्थमिह प्रकृतिसंख्याप्रश्नः उच्यते विशेषप्रतिपादनार्थं संज्ञायां विशेषः पूर्वं ज्ञानावरणीयादिकर्मब

प्रत्युक्तिरिति: क्रियानिर्देशात् कर्तृ-क्रियाश्च प्राणातिपातादयस्तत: प्राणातिपातस्य बाह्यं ज्ञानावरणीयादिकर्मबंधकारणं कर्मबंध: कार्यमिह
ज्ञानावरणीयादिकर्मणो वा तेरं कर्मबंधकारणं प्रतिपाद्य मिति भगवान् निर्वचनमाह गोतम: अट्ठ कम्मपगडीओ पण्णत्ताओ पण्णवणाए इद
उपयिति ज्ञानावरणीयं दर्शनावरणीयं तत्र विशेषाववबोधनं ज्ञानं सामान्यविशेषात्मके वस्तुनि विशेषग्रहणात्मको बोध: आवियते आच्छाद्य
ते अनेनेत्यावरणीयं कृत्यबहुलमिति वचनात् करणेऽनीयप्रत्यय: ज्ञानस्यावरणीयं ज्ञानावरणीयं दृश्यते ऽनेनेति दर्शनं सामान्यविशेषात्म
केवस्तुनि सामान्यग्रहणात्मको बोध: उक्तं च जं सामन्नग्गहणं भावाणं नेय कट्टु आगारं अविसेसिऊण अत्थे दंसणमिइ वुच्चए समए
तस्यावरणीयं दर्शनावरणीयं तथा वेद्यत आह्लादादिरूपेण यत्तद्वेद्यत इति वेदनीयं अत्र कर्मण्यनीय: यद्यपि च सर्वं कर्म वेद्यते तथापि पंक
जादिशब्दवत् वेदनीयशब्दस्य रूढिविषयत्वात् सातासातरूपमेव कर्म वेदनीयमित्युच्यते न शेषं तथा मोहयति सदसद्विवेक
विकलं करोत्यात्मानमिति मोहनीयं अत्र बहुलवचनात् कर्तर्यनीय: तथा एति आगच्छति प्रतिबंधकतां स्वकृतक
र्मावाप्तनरकादिकुगतिनिःक्रमितुमनसो जंतोरित्यायु: अथवा आसमंतादेति गच्छति भवाद्भवांतरसंक्रांतौ विपाकोदयमित्यायु:
उभयत्रापि उणादिकउस्प्रत्यय: तथा नामयति गत्यादिपर्यायानुभवनं प्रति प्रवणयति प्रवणयति जीवमिति नाम तथा गूयते शब्द्यते उ
च्चावचैः शब्दैर्यत्तत् गोत्रं उच्चनीचकुलोत्पत्तिलक्षण: पर्यायविशेष: तद्विपाकवेद्यं कर्मापि गोत्रं कारणे कार्योपचारात् यद्वा कर्मणो
ऽपादानविवक्षा गूयते शब्द्यते उच्चावचै: शब्दैरात्मा यस्मात् कर्मण उदयात्तत् गोत्रं तथा जीवं दानादिकं चांतरा व्यवधानापादनायैति गच्छ
तीत्यंतरायं जीवस्य दानादिकं कर्तुं प्रवृत्तस्य विघ्नहेतुर्भवतीत्यर्थ: अत्राह ननु किं ज्ञानावरणीयाद्यनुपन्यासे किं चिदस्ति प्रयोजनमुताऽयथा कथंचिद
पत्तनमिति अस्तीति ब्रूम: किं तदिति चेत्तदुच्यते इह ज्ञानदर्शने जीवस्य तत्त्वभूते लक्षणे तदभावे जीवत्वस्यैवायोगात् चेतनालक्षणो हि जीवस्तत: सक
लज्ञानदर्शनानां मध्ये ज्ञानदर्शनावारपि च मध्ये प्रधानं तद्वशादेव सकलशास्त्रादिविषयविचारसंततिप्रवर्तनं अपि च सर्वा अपि लब्धयो जीवस्य सा

कारोपयोगोपयुक्तस्योपजायंते न दर्शनोपयोगोपयुक्तस्य सव्वाओ लद्धीओ सागारोवओगोवउत्तस्स नो अणागारोवउत्तस्सेति वचना
त्प्रामाण्यात् अन्यच्च यस्मिन् समये सकलकर्मविनिर्मुक्त: स्याज्जीव: स प्रथमेऽपि समये ज्ञानोपयोगोपयुक्त एव दर्शनोपयोगस्तु द्विती
ये समये ततो ज्ञानं प्रधानं तदावारकं च ज्ञानावरणीयं कर्म ततः प्रथममुक्तं तदनंतरं दर्शनावरणीयं ज्ञानोपयोगाच्च्युतस्य दर्शनोप
योगे व्यवस्थानात् एते च ज्ञानावरणीयदर्शनावरणीये यथायोगमवश्यं स्वविपाकं प्रयच्छतः सुखदुःखरूपवेदनीयकर्मविपाकोदयनिमित्ते भवतः तथाहि ज्ञानावरणप्रप
चयो ऽपि सूक्ष्मबुद्धिकं विपाकतो ऽनुभवन् सूक्ष्मसूक्ष्मतरवस्तुविचारासमर्थमात्मानं जानानः खिद्यते ईशीलकः ज्ञानावरणकर्मक्षयोपशमपटीया
नेतस्तु सूक्ष्मसूक्ष्मतराणि वस्तूनि निजप्रज्ञया निर्दोषं जानातीति भावयन् मोदते ततोऽयं सुखमुदयते तथा निबिडदर्शनावरणविपा
कोदयात् जात्यंधादिरनुभवति दुःखमसुखं दर्शनावरणकर्मक्षयोपशमपटिष्ठतापरिकरितस्तु स्पष्टचक्षुरादिभावात् प्रमोदम
नुभवन् वेदयति सुखमतोऽनंतरं एतदर्थप्रतिपत्त्यर्थं दर्शनावरणीयानंतरं वेदनीयग्रहणं वेदनीयं च सुखदुःखरूपं तद्व
इष्टानिष्टविषयसंबंधात् इष्टानिष्टविषयसंबंधश्च संसारिणां रागद्वेषौ तौ च मोहनीयं हेतुकौ तत एतदर्थप्रतिपत्त्यर्थं
वेदनीयानंतरं मोहनीयग्रहणं मोहनीयमूढाश्च जंतवो महारंभपरिग्रहाद्यासक्ता नरकाद्यायुर्बध्नंति ततो मोहनीयानंतरमा
युष्कग्रहणं नरकाद्यायुष्कोदये चावश्यं नरकगत्यादीनि नामान्युदयमायांतीति तत आयुष्कानंतरं नामग्रहणं नामकर्मोदये च नियमा
दुच्चैर्नीचान्यतरगोत्रकर्मविपाकोदयेन भवितव्यमतो नामग्रहणानंतरं गोत्रग्रहणं गोत्रोदये चोच्चैः कुलोत्पन्नस्य प्रायो दानलाभांतराया
दिक्षयोपशमो भवति नीचकुलोत्पन्नस्य तु प्रायो दानलाभादिदर्शनात् जीवि: कुलोत्पन्नस्य तु दानलाभांतरायोदयात् ऽत्यज्ञतीनां तथा द
र्शनात् तत एतदर्थप्रतिपत्त्यर्थं गोत्रानंतरमंतरायग्रहणं सदेव मुक्तं प्रथमं द्वारमधुना कइविहं बंधातीति द्वारप्रतिपादनार्थमाह कहं णं भंते इत्यादि
कथं केन प्रकारेण णमिति वाक्यालंकारे जीवोऽष्टौ प्रकृतीर्बध्नातीति भगवानाह गोतम ज्ञानावरणीयस्य कर्मण उदयेन दर्शनावरणीयं क

प्रज्ञा०वृत्ति॥

र्मेति यदुक्तं तन्निश्चयेन गच्छति विशिष्टोदयावस्थामासादयति किमुक्तं भवति ज्ञानावरणीयमुक्तरूपं स्वोदयेनागतं सद् दर्शनावरणीयमुदयमवे
दयति तद्विपाकं हि खलु सूक्ष्मवादिप्रभृतयः कुवादिनः कुज्ञानवासितान्तःकरणा विपरीतं पश्यन्तीति दर्शनावरणीयस्यैव कर्मण उदयेन दर्श
नमोहनीयं कर्म निगच्छति विपाकावस्थामुदयेन प्राप्यत इति भावः तस्य च दर्शनमोहनीयस्य कर्मण उदयेन मिथ्यात्वं निगच्छति अतत्त्वे तत्त्वा
भिनिवेशरूपमतत्त्वं वा तत्त्वमिति भावः तत एव मिथ्यात्वोदयेन जीवोऽष्टप्रकृतीर्बध्नाति खलु शब्दः प्रायो हि निश्चयवचनार्थः प्रायः सास्वादनमन्यथास
म्यग्दृष्टिरपि कश्चिदष्टौ प्रकृतीर्बध्नाति केवलं कश्चिन्न बध्नाति यथा सूक्ष्मसंपरायादिरिति संप्रकारान्तराण्यपि च भावनीयानि तात्पर्यार्थः पूर्वकर्मपरि
णामस्य तथाविधस्य कर्मणः संसारावस्थायां जीवादेकरूपत्वेनाऽऽदीनामुक्तं च जीव परिणामहेउं कम्मत्ता पुग्गला परिणमंति पुग्गलकम्मनिमित्तं
जीवो वि तहेव परिणमइ इति उक्तमिदानीमेव चतुर्विंशतिदण्डकक्रमेण निरूप यति ८ कहण्णं भंते नेरइए इत्यादि सुगमं नवरमेवमुक्तक
मेनैव दण्डकः संप्रति बहुत्वे नारकदण्डकं कहण्णं भंते नेरइया इत्यादि पाठसिद्धं। उक्तं द्वितीयं द्वारमधुना कतिभिः स्थानैर्बध्नातीति तृ
तीयं द्वारमभिधित्सुराह जीवे णं भंते इत्यादि प्रश्नसूत्रं सुगमं निर्वचनमाह द्वा भ्यां स्थानाभ्यामर्थात् समर्थाभ्यामाह तद्यथा रागेण द्वेषेण च अ
त्र कोपो रागः क्रोधरूपः द्वेष इति व्याप्तिप्रीतिलक्षणो रागोऽप्रीत्यात्मकश्च द्वेषः। ष एतौ च प्रीत्यप्रीत्यात्मकौ रागद्वेषौ नान्यत्र क्रोधादिभ्यो व्यति
रिच्यते किंतु तेष्वेवान्तर्भवतः सर्वान्तर्भावनयत्वं तदाहिंडि इति विनेयजनानुग्रहाय प्रदर्श्यते तत्र संग्रहनयमतेन क्रोधमानावप्रीत्यात्मकः प्रतीतमेव
मानो ऽपि परगुणासहनात्मकत्वादप्रीत्यात्मकस्ततः अप्रीत्यात्मकत्वाद्द्वेषोऽपि द्वेषः लोभो निर्गताभिष्वङ्गात्मकत्वात्प्रीतिरूपः सप्रतिलोमा मायापि प
रवञ्चनात्मिका किंचिदभिलषन् प्रयुङ्क्ते अभिलाषश्च प्रीतिरूपो भवतीति सापि प्रीत्यात्मिका ततो माया लोभौ प्रीत्यात्मकत्वाद्रागः उक्तं च कोहं
माणं वा पीइ जाइ ता बेइ संगहो दोसं मायालोभे य सपीइजाइसामन्नतो रागं व्यवहारनयमतेन मायायामपि लोभेन सह प्रीतिजातिसा
मान्यात् समानप्रीतिजातित्वाद् माया लोभौ समग्रौ रागमावहे इति व्यवहारः उत नत्युक्तं मायास्वरूपं परोपघातायेति उपघातपरोपघातपरि। १८७

णामरूपत्वात् द्वेष इति माया अपि द्वेषेऽन्तर्भवति यानुष्ठानानुष्ठानार्थसंभवोऽसपरोपघातरहितः स्वार्थलोभ इति रागः एवं व्यवहारनयमतेन वस्तु
व्यवस्थितं क्रोधमानमायाहर्षलोभा लोभा रागद्वेष इति आह च माया वि दोसमिट्ठा इवनहारा पुरोवघायाए न्यायेन लोभेण मुच्छा लोभो नि
रागो ऋजुसूत्रः पुनराह क्रोधो नियमादप्रीत्यात्मकः ततः सपरोपघातात्मकत्वात् द्वेषस्तद्मानमायालोभास्तु भाज्याः सम्भवन्तीति प्रीत्यात्मका स्
वथाहि मानः स्वाहंकारोपयोगकाले प्रीत्यात्मकः स्वगुणबहुमाननात् परगुणद्वेषोपयोगवेलायामप्रीत्यात्मकः मा भवत्विति सा वा तु माया वि
परवञ्चनोपयोगप्रवृत्तः परोपघातरूपत्वादप्रीत्यात्मिका परगतद्रव्यापादानचिन्तायां तु लिप्सात्मकत्वात्प्रीतिरूपा लोभोऽपि स्वक्रियादौ तत्पर वि
त्यमानः प्रीत्यप्रीत्यात्मकः स्वप्रतीतमत्वादिक्रियाकरणे मम्मत्वेऽपरविषयोपहारः स्मा कं न्यायो वीरस्यो व्याघस्वर्धरति च वचनात् मत्तायदापर विष
योपहारायतो मत्सरमलितोगम्यतो लोभः प्रीत्यात्मकः परोपघातहेतुत्वा न्यदा तु परविषयकृत्याक्षाक्षोपयोगस्तदा सा लिप्सात्मक
त्वात् प्रीत्यात्मकः अत एव मानमायालोभास्तु नयरूपाण्यपि संवर्तते। यदा च प्रीत्युपयोगा मतदाऽप्रीत्युपयोगास्तत
प्रीत्युपयोग एकस्मिन् समये तयोगहयालावात ततो मानमायालो भाः प्रीत्युपयोगकाले रागोऽप्रीत्युपयोगकाले द्वेषः
उक्तं च उज्जुसुयमयं कोहो दोसो सेसाण मयमेणगं तोरागो त्ति व दो सो त्ति य परिणामवसेण अविसेसो रागो तिमउ साहंका
रोपयोगकालेऽपि स्यादेवबोह इदा तो परगुणदोसोवयोगंपि मायालोभा वि व पराणवयायं च उग्गतादोसो सुच्छा वा योगकालेरागो
त्ति स्वगलिप्सानिमिह्यादयः स्वयः उनरेवमाज रिहज्जा वि व कषायो क्रोध लोभोत्थायेऽमानमायाः तत्क्रोधलोभयो रंतर्भवतः तथाहि मा
नमायायोर्व्ययपरोपघातरहितावाः अवमायामक्रोधः प्रीत्मकत्वात् स्वगुणोत्कर्षपरद्वेषपूर्वात्मिकाम लोभः लिप्सारूपत्वात्सलोभोऽपि
व लोभ प्रमिश्राविधपरोपघातात्मकात् प्रवर्तात्मकस्तत्र परोपघातात्मकोऽयमाक्रियायां परराजपदार्थसंकल्पात्मकोऽन्यायोपात्तनिकृ इत्येत
त्रयः परोपघातात्मकः स क्रोधो भवति क्रोधश्च मात्सर्येयभाक् परपापेषो प्रीत्यात्मकत्वात् केवलमूर्च्छात्मकोऽथ मायालोभः स च रागम॥

ना

प्र.क. ०३ त्रि॥

आबाधांकसद्दाइमद्यमाणमायाएयसउणावगारायाउवउगालाहाविय ऊउमतावउवमत्थामेसंसाकाराहाविअमपतावघायमइउनिमादा
त्मातमूरकाणायलाला अद्रसुआकवलारागाइतिउमयग्रहनयमातनाहरागाइविहपणाहइत्यादि उगामंताविनद्यातउपसंहारमाह ॥ पक्व
हिंबउद्धिगाणहिंइत्यादि एवंवउइत्यतेनंतराक्तेश्रुउसिः स्मातिः कथंमतेत्याहवीर्यपरिहाविजीववीर्यविघ्नापितेत्यर्थः ज्ञानावरणी
यकर्मजीवावध्नाति अशुभमेवार्थचउविंशतिदंडकक्रमेणचिंतयति एवंनेरइएजावमाणिएउगामेनवरमेवसूत्रपाठः नेरइएणंतनाणा
वरणिज्जंकम्मंकइहिंठाणेहिंबंधइइत्यादितदेवमेकत्वेनचिंताकृतामंप्रतिबहुत्वेनताकुर्वन्नाह जीवाणंनंतइत्यादिउगामंयथाज्ञानावर
णीयमेकत्वबहुत्वाभ्यांदंडकद्वयेनचिंतितंतथादर्शनावरणीयादीन्यपिचिंत नीयानिसप्तप्यावाषाइवादंडकाः तदेवमुक्तंद्वतीयद्वारंसंप्रति
कतिप्रकृतीर्वेदयतइतिद्वैतीयद्वारमभिधित्सुराह ॥ जीवेणंनंतइत्यादि आह्मीकं कः कश्चित्पुनर्वेदयति आह्मीकः कश्चिन्नवे
दयतेअक्षीणघातिकर्मावेदयतेक्षीणघातिकर्मातुनवेदयतइति भावः अशुभमेवार्थंचउविंशतिदंडकक्रमेणचिंतयति
नेरइएणंनंतइत्यादिउगामंमनुष्यवर्जाणामेवमेवनियमाद्वे दयतइतिवक्तव्यं सर्वेषामक्षीणघातिकर्मत्वात् मनुष्यप
दजीवपदविभिनतथाभिधानतव्यं क्षीणघातिकर्मणामपिमनुष्याणांसंभवात् एवमेषएकत्वेनदंडकस्तेनैवंबहुत्वेनापिवक्तव्यः नवाच
ज्ञानावरणीयमेकत्वपृथक्त्वदंडकाभ्यांभावितमेवंदर्शनावरणीयमोहनीयांतरायाण्यपिभावनीयानिवेदनीयायुर्नामगोत्राणिजीवपदेदंडक
योतियतमिंद्रानवेदयतेनाभावादयतइतिवाच्यानेरयिकादयोमनुष्याअपिचनियमाद्वेदयतेअसमावरमममयमवउपममोघात्वेदयसंसत्या
वाप्तिमणिकादएकवउपृथक्त्वाभ्यांषोडशदंडकाभवंति गतंतृतीयंद्वारमिदानींचतुर्थंकस्यकतिविधइतिएवमहारमभिधित्सुराह ॥ नाणावरणिज्ज
स्सणंनंतइत्यादिज्ञानावरणीयस्यणमितिवाक्यालंकारेनदंतजीवेनबद्धस्यरागद्वेषपरिणामवशात्कर्मरूपतयापरिणमितस्यस्पृष्टस्यात्मप्रदेशै
ः सहसंश्लेषमुपगतस्यबद्धफासपुट्ठस्सेतिउमयपिपादिटेनबद्धस्यातीवस्पर्शेनस्पृष्टस्यबद्धिगाढंबद्धस्यातिआवेष्टनपरिवेष्टनरूपतयातीवलोपवयंगा १९०

दतंसंचयद्दस्यतिसंचितस्यआबाधाकालातिक्रमेणोत्तरकालवेदनायामपतयानिषिक्तस्यचितस्यउत्तरोत्तरस्थितिषुप्रदेशहान्यारसवृद्ध्यावस्था
पितस्यउपचितस्यसमानजातीयप्रकृत्यंतरदलिकसंक्रमणेनपवयंतीतस्यआपाकप्राप्तस्यईषत्पाकाभिमुखीभूतस्यविपाकप्राप्तस्यविशि
ष्टपाकमुपगतस्यअतएवफलप्राप्तस्यफलदानाभिमुखीभूतस्यततः सामग्रीवशादुदयप्राप्तस्यपरिणतेवापाकप्राप्तत्वादयः कर्मधर्मायथाआम्रफ
लस्यतथायाम्रफलंप्रथममतईषत्पाकाभिमुखंभवतिततोविशिष्टपाकमुपगतंतदनंतरंतृप्तिप्रमोदादिफलदानाभिमुखंभवितंततः सामग्रीवशादुपलोगप्र
सं भवतिएवंकर्मापीतितत्त्वजीवेनकर्मबंधमित्यतआह जीवेणकडस्सजीवेनकर्मबंधनबद्धेनेतिगम्यतेकृतस्यजीवोह्युपयोगस्वभाव
स्ततोसौरागादिपरिणतोभवति नचान्योरागादिपरिणतस्यसतूकर्मक ःतिसावरागादिपरिणतिः कर्मबंधनबद्धस्यभवतिनतद्वियो
गेनयथामुक्तानामथवीतरागाणामतः कर्मबंधनबद्धेनमताजीव नकृतस्येतिइत्यथ उक्तंच जीवस्तुकर्मबंधनबद्धोवीर
स्यभगवतः कर्तासंततयानाद्यंचमदिष्टंकर्मात्मनः कर्तृत्वितितथाजी वेननिर्वर्तितस्यइहबंधसमयेजीवः प्रथमताप्रवि
शिष्टामकर्मवर्गणांततः पातितः पुद्गलान्गृह्णनुअनाभोगिकेनवीर्येण तस्मिंश्चबंधसमयेज्ञानावरणीयादितयाव्यवस्थाप
नंतस्त्रिवेधमेनसिष्फन्नस्यतथाजीवेनपरिणामितस्यविशेषप्रत्ययैः प्रद्वेषनि ह्नवादिभिस्तंतरोत्तरपरिणामंप्रापितस्यअथवावाविपाकप्रा
प्ततयापरनिरपेक्षमुदीर्णस्यउदयप्राप्तस्यपरेणवामुदीरितस्यउदयमुपनीतस्यतइत्युक्तेनपरस्परमुपपादनमुदीर्णस्यउदयमुपनीतस्यतस्य
गतिप्राप्यकिंचिदिहकर्मकाचित्गतिप्राप्यकिंचिदिहकर्मकाचितगतिप्राप्यतीव्रानुभावंभवति यथानरकगतिप्राप्यासातवेदनीयंअसातादयोहि
यथानारकाणांतीव्राभवति नतथातिर्यगादीनामिति तथास्थितिप्राप्यसर्वोत्कृष्टामितिशेषः सर्वोत्कृष्टांस्थितिमुपगतस्याशुभकर्मतीव्रानुभावंभव
तियथामिथ्यात्वंभवंप्राप्यइहकिंचिदपिकर्मकिंचिद्भवमाश्रित्यस्वविपाकप्रदर्शनसमर्थंयथानिद्रामनुष्यभवंतीर्यग्भवंवाप्राप्यस्वफलं एतावताकिलस्वतउद
यस्यकारणानिदर्शितानिकर्महितानागतिस्थितिभवप्राप्यस्वयमुदयमागच्छतीतिसंप्रतिपरतउदयमाह पुद्गलंकाष्ठलेष्टुखड्गादिलक्षणंप्राप्यतथाहिपरे

प्रज्ञा० वृत्तौ ॥

णं किं प्रकाष्ठलेष्टुखड्गादिकमासाद्य तथाभ्यवह्रियमाणं वेदनीयकामादीनामुदयप्रभावपुद्गलपरिणामं प्राप्य इह किंचित्कर्मकमपि पुद्गलमाश्रित्य विपाकमा
यातियथाभ्यवहृतस्याहारस्याजीर्णत्वपरिणाममाश्रित्य असातवेदनीयं ज्ञानावरणीयं च प्रापानमिति ततः पुद्गलपरिणामं प्राप्य स्वकर्मणः तितिक्षितुरावश्
इह इत्यर्थः अत्र निर्वचनं दर्शयति अथ उत्तरः प्रकृतमधिकृत्य दशविधमनुभावं दर्शयति सोयावरणे इत्यादि इह श्रोत्रशब्देन श्रोत्रेन्द्रियविषयः क्षयो
पशमः परिगृह्यते सोयविन्नाणावरणे इति श्रोत्रविज्ञानशब्देन श्रोत्रेन्द्रियोपयोगस्तु निर्वृत्युपकरणलक्षणं द्रव्येन्द्रियं तदंगोपांगनामकर्मनिर्वर्त्यं न ज्ञाना
वरणविषयमिति श्रोत्रशब्देन स्यात् एवं नेत्रावरणे इत्यादि भावनीयं तत्रैकेन्द्रियाणां रसनघ्राणचक्षुःश्रोत्रविषयाणां लब्ध्युपयोगानां प्राय
आवरणं प्राय इह एवं बकुलादीनां बदरीवंबकुलादीनां द्वीन्द्रियाणां घ्राणचक्षुःश्रोत्रविषयाणां लब्ध्युपयोगानां   मपीन्द्रियाणां लब्ध्युपयोगाः फलतः स्पष्टोपलक्ष्यन्ते आगमेव
श्रोत्राणां पंचेन्द्रियाणां वकुलानां तावत्प्रवेन्द्रियाणां तु भागं नरविन्नरइंपवं   द्रियाणि वक्तिद्रियाणां वा तथा जन्मतः पुद्गलमन्तर्विद्वेन्द्रियनामा
त्रीन्द्रियाणां नाहवि दवश्रुयानाविमिविनावश्यपविवादमिति   नःश्रायस्फूर्क द्वीन्द्रियाणां घ्राणचक्षुः श्रोत्रेन्द्रियवि
षयाणां लब्ध्युपयोगानां त्रीन्द्रियाणां चक्षुःश्रोत्रविषयाणां चतुरिन्द्रिया।   णां श्रोत्रेन्द्रियलब्ध्युपयोगावरणं जात्यादिव्यपदिश्यपद
तादृशस्य दृष्ट्यपंचेन्द्रियाणामपि जात्यन्धादीनां चक्षुरादिबधिरीभूतानां चक्षु   रादीन्द्रियलब्ध्युपयोगावरणं तावन्नीयं कर्मसमपीन्द्रियाणां ल
ब्ध्युपयोगावरणमिति वक्तव्यता यत्रयत्र दीर्घत्वमुपरतं वा वदतीति तस्य ज्ञानावरणीयस्य कर्मणः उदयेन तत्प्रभावाद्भवतीति यत्तु इयात परिणाम्यं प्रकाश
खड्गादिलक्षणं पुद्गलं तेन निपातितेन तस्य मर्मप्रदेशपुद्गलवाइतिया वतद्वहून् पुद्गलान् काष्ठादिलक्षणान् परिणामं सामान्यतया तेषां निपातं जानतस
मर्थः पुद्गलपरिणाममभ्यवहृताहारपरिणाममुपनीयरसादिकमतिदुःखजनकं वेदयति तेन ज्ञानपरिणतिमुपहन्ति मातृत्समावी समानां पुद्गला
नां परिणाममिति विस्रसया पुद्गलानां परिणामः शीतोष्णातपादिलक्षणो वदयतीति तदा ततेन्द्रियोपघातं जनयति तेन ज्ञानपरिणतावुपहता ना
यद्यज्ञानाद्यमपीन्द्रियकर्मप्रसिद्धं वस्तु न जानाति ज्ञानपरिणतेरुपहतत्वात् अयं सापेक्षउदय उक्तो निरपेक्षस्य तु विपाकस्य त्विदं तस्सिंवा उदएणं तितस्यं ४७१

॥

यज्ज्ञानावरणीयकर्मपुद्गलानां विपाकप्राप्तानामुदयेन ज्ञातव्यं न जानाति जाणिउकामेनयाणइ इति ज्ञानपरिणामेन परिणतं अभिन्नं पि ज्ञानपरि
णतमुपघातात् ज्ञातिज्ञाणिज्जविनयाणइ इति प्राक् ज्ञातमपि पश्चान्न जानाति तत उत्सन्नावरणीयकर्मपुद्गलानामुदयात् उन्नमनाणीयावि इत्यादि
ज्ञानावरणीयस्य कर्मणः उदयेन जीवजन्तुज्ञाना पिनवति बन्धनं ज्ञानतदस्यामीति बहुज्ञानी सर्वथा विपाकरूपं मासादिनायाव संज्ञास्थि
बादितज्ञानापि नवतीत्यर्थः एमणगोयमानाणावरणिज्जे कम्मे इत्याद्युपसंहारवाक्यं कं ये दरिसणावरणिज्जस्सणं भंते इत्यादि प्रश्नसूत्रं निर्वचनं
वेनमाह गोतमः नवविधः प्रज्ञप्तस्तदेव नवविधत्वं दर्शयति निद्दा इत्यादि निद्राशाब्दार्थं पश्चात्तरदेवक्ष्यामो नावार्थस्तूच्यते पडिबोहासामित्यादि परमिदं
सादेनिद्दनिद्दा पयला पयलापयला इति यस्य पयलपयला यं च कम्मताघ्राणदीपुण   अपरं किंचित्कर्मणो विपाकात् मर्हनिद्दादिणविति
यवावरणसाहणिपाय चक्खुदरिसणावरणे चक्खुः सामान्योपयोगावरणं एव   ज्ञायवेदनीयं कंवएइत्यादि यं वेदयति पुद्गलं
पुत्तरायणीयादिकं पुद्गलं वा इति यान् पुद्गलान् बहून् मृदुत्वायणीयादी   नवेदयति यं वा वेदयति पुद्गलपरिणाममाहिषद
ध्याध्यभ्यवहृताहारपरिणाममित्यर्थः वीससावा पोग्गलाणं परिणाममिति   वर्षासु सम्मूर्च्छनजलरूपं धारोपनिपातरूपं वा यं वेदयति
तेन निद्राद्युदयात् उपघाताद्दर्शनपरिणत्युपघातः एतावता परतश्चक्षुः संप्रतिस्वत   उदयमाह तसिंवा उदएणं तेषां वा दर्शनावरणीयकर्मपुद्
लानामुदयेन दर्शनपरिणतिविघातः इह पासियव्वं न पासइ ततिथा तस्थित् दर्शनपरिणामेन परिणतं अपि ब्रह्मपिज्ञात्यधक्कादिना दर्शनपरिणत्युपघातात् उप
नपतिप्रागृहष्टमपि पश्चान्न पश्यतिदर्शनावरणीयस्य कर्मण उदयेन जीवन्नपि दर्शनापिपापावत्यपि यावत्किंचन्नादितदर्शनापि नवति एस णं गो
यमादरिसणावरणिज्जे कम्मे इत्याद्युपसंहारवाक्यं साया वेयणिज्जस्स णं भंते कम्मस्स इत्यादि प्रश्नसूत्रं निर्वचनमाह गोतम अट्ठविधो
नावः प्रज्ञप्तः अष्टविधत्वमेव दर्शयति मणुन्ना सद्दा इत्यादि मनोज्ञाः शब्दा आत्मनो वेणुवीणादिसंबंधिनः अन्ये आत्मीया इत्यादि स्वदयुक्त
मात्मीयशब्दानां वा कुसुमवान्तयोर्न तिष्ठ वदीतवतात् मनोज्ञारसा इक्षुरसप्रभृतयः मनोज्ञा गंधाः कर्पूरादिसंबंधिनः मनोज्ञानि रूपाणि

सुगतमुपगीतवित्रादिगतानि मनोज्ञाः स्पर्शा हंसतूल्यादिगता मनसि सुखयतीति मनःसुखं तद्वेद्यं यस्मात्सो मनःसुखस्तस्य भावो मनःसुखता सुखितं
मन इत्यर्थः वाचि सुखं वेद्यं यस्मात्सो वाक्सुखस्तस्य भावो वाक्सुखता सर्वेषां श्रोत्रमनःप्रह्लादकारिणी वागिति तात्पर्यार्थः कायसुखं वेद्यं यस्मात्सो काय
सुखस्तद्भावः कायसुखिता सुखितः काय इत्यर्थः एते चाष्टौ पदार्थाः सातावेदनीयस्योदयेन प्राणिनामुपतिष्ठंते ततोक्तोष्टविधः सातावेदनी
यस्यानुभावः परतः सातावेदनीयस्योदयमुपदर्शयति जं वेएइ पुग्गलमित्यादि यं वेदयते पुद्गलं स्रक्चंदनादि यान्वा वेदयते पुद्गलान् स्रक्चं
दनादीन् यं वा वेदयते पुद्गलपरिणामं देशकालवयोवस्थानुरूपाहारपरिणामं वीससा वा यं पुद्गलानां परिणामं विस्रसया वा पुद्गलानां परिणामं
कालेभिलषितं शीतोष्णादि वेदनाप्रतीकाररूपं तेन मनसः समाधानसंपा दनात्सातावेदनीयं कर्मानुभवति सातावेदनीयकर्मफलं
सातं वेदयत इत्यर्थः उक्तः परत उदयः संप्रति स्वत उदयमाह तेसिं वा उदए णं ति तेषां वा सातवेदनीयपुद्गलानामुदयेन मनोज्ञा
द्यादिव्यतिरेकेणापि कदाचित्सुखं वेदयति यथा नैरयिकास्तीर्थंकरज न्मादिकाले एस णं गोयमा इत्याद्युपसंहारवाक्यं
असायावेयणिज्जस्स णं भंते इत्यादि प्रश्नसूत्रं सुगमं निर्वचनं पूर्ववत्तथा चाह हे अट्ठविहे अणुभावे पन्नत्ते इत्यादि नामग्राहं स्वविपाकमु
पदर्शयति अमणुण्णा सद्दा इत्यादि अमनोज्ञाः शब्दाः खरादयः श्रोत्रेन्द्रियसंबंधिनश्च गंधकाश्च अमनोज्ञा रसाः स्वरूपप्रतिकूला विनाशः स्वरूपेण का
अमनोज्ञाः गंधाः गवादिशबादिगताः कटुकफलादिगताः अमनोज्ञानि रूपाणि अशुभगतानि अमनोज्ञाः स्पर्शाः कर्कशादयः मणो दुहया इति दुःखितम
न इति दुःखितं आह इति आत्मा वाक्दुःखितेति भावार्थः कायदुहया इति कायेन दुःखं वेद्यं यस्मात्सो कायदुःखस्तद्भावः कायदुःखता दुःखितकाय इत्यर्थः
जं वेएइ इत्यादि यं वेदयते पुद्गलं विषशस्त्रकंटकादि पुद्गलान्वा इति यान्वा पुद्गलान् बहून् विषशस्त्रकंटकादीन् वेदयते यं वा वेदयते पुद्गलप
रिणाममपथ्याहारपरिणामलक्षणं विस्रसया वा यं वेदयते पुद्गलपरिणाममकालेभिलषितशीतोष्णादि परिणामं तेन मनसोऽसमाधानसंपाद
नात् सातावेदनीयं कर्मानुभवति असातावेदनीयकर्मफलमसातं वेदयत इति भावः एतत्परत उदय उक्तः संप्रति स्वत उदयमाह तेसिं वा उदएणं १७२

तितेषां वा असातावेदनीयकर्मपुद्गलानामुदयेनासातं वेदयते एस णं गोयमा इत्याद्युपसंहारवाक्यं मोहणिज्जस्स णं भंते इत्यादि प्रश्नसूत्रं प्राग्वत् निर्वचनं
पंचविधोनुभावः प्रज्ञप्तः तदेव पंचविधत्वं दर्शयति सम्मत्तवेयणिज्जे इत्यादि सम्यक्त्वरूपेण यद्वेद्यते सम्यक्त्ववेदनीयं एवं शेषपदेष्वपि भावना वेदनीयमिति भाव
नीयः नवरं यत्प्रशमादिपरिणामकारि तत्सम्यक्त्ववेदनीयं यत्पुनरदेवादिषु देवादिबुद्धिकारि तन्मिथ्यात्ववेदनीयं यत्पुनरुभयस्वभाव मिश्रपरिणामकारि
तन्मिश्रवेदनीयं क्रोधादिपरिणामकारणं कषायवेदनीयं हास्यादिपरिणामकारणं नोकषायवेदनीयं जं वेएइ पुग्गलमित्यादि यं वेदयते पुद्
गलं प्रतिमादिकं पुद्गलान्वा यान् वेदयते बहून्प्रतिमादीन् यं वा पुद्गलपरिणामं देशाद्यनुरूपाहारपरिणामकर्मपुद्गलविशेषोपादानसमर्थं भवति
आहारपरिणामविशेषादपि कदाचित्कर्मपुद्गलविशेषोपादानाद्यथा ब्राह्म्यौ प्रज्ञाद्याहारपरिणामात् ज्ञानावरणीयकर्मपुद्गलानां प्रतिविशिष्टः
क्षयोपशमः उक्तं च उदयक्खयखओवसमोवसमा वि य जं च कम्मुणो भणिया दव्वं खित्तं कालं भवं च भावं च संपप्प विस्रसया वा यं पुद्
गलानां परिणामं अभ्रविकारादिकं यद्दर्शनादेवं विवेकमुत्पद्यते आउं खिज्जइ कालेण धरइ पतिमं नराण संपत्तयः कुसुमि
तकमसारतुल्याः स्वप्नोपलब्धा सदृशा विषयोपभोगाः संकल्पमात्ररमणीयमिदं हि सर्वमित्यादि परिणामनिबंधनं यं वेदयते त
माम्यति मोहनीयं सम्यक्त्वादिकं वेदयते सम्यक्त्वादिवेदनीयादिकं वेदयते सम्यक्त्ववेदनीयादिकर्मफलं प्रशमादि वेदयत इति भावः
एतावता परत उदय उक्तः संप्रति स्वत उदयमाह तेसिं वा उदए णं ति तेषां सम्यक्त्ववेदनीयादिकर्मपुद्गलानामुदयेन प्रशमादि वेदयते एस णं मित्याद्युपसं
हारवाक्यं आउस्स णं भंते इत्यादि प्रश्नसूत्रं प्राग्वत् निर्वचनं चतुर्विधोनुभावः प्रज्ञप्तः तदेव चतुर्विधत्वं दर्शयति नेरइयाउए इत्यादि सुगमं जं वेएइ पुग्ग
लं वा इत्यादि यं वेदयते पुद्गलं शस्त्रादिकमायुरपवर्तनसमर्थं बहून् शस्त्रादिरूपान् वेदयते यं वा पुद्गलपरिणामं विषान्नादिपरिणामरूपं विस्रसया
वा यं पुद्गलपरिणामं शीतादिकमायुरपवर्तनक्षमं तापयुद्धमानेन वायुषोऽपवर्तनात् नारकाद्यायुः कर्म वेदयते निहितः स्वत उदयस्य सूत्रमिदं
तेसिं वा उदए णं ति तेषां वा नारकाद्यायुःपुद्गलानामुदयेन नारकाद्यायुर्वेदयते एस णमित्याद्युपसंहारवाक्यं नामकर्म द्विधा शुभनामकर्म अशुभना

प्रज्ञाप०टी०॥ मकर्मवितत्र शुभनामकर्माधिकृत्य सूत्रमाह सुभनामस्स णं भंते इत्यादि प्रश्नसूत्रं प्राग्वत् निर्वचनं चतुर्दशविधोनुभावः तदेव चतुर्दशविधं दर्शयति इ
ट्ठा सद्दा इत्यादि एते चेष्टादय आत्मीया एव परिद्रष्टव्यास्तनामकर्मविपाकस्य चिंत्यमानत्वात् तेष्वाद्यत्वादितो इत्येके तदयुक्तं तेषामन्यकर्मोदयनिष्पाद्य
त्वात् इष्टा गतिः मन्दवारणादिगुणकारिणी शिबिकाद्यारोहणस्य लोकइष्टा स्थितिः सहजा सिंहासनादौ वा लोकइष्टलावण्यं छायाविशेषलक्षणं कुं
माद्युद्वेपनतप्तमित्यपरे इष्टा यशःकीर्तिः यशसा युक्ता कीर्तिर्यशःकीर्तिः स्थायि विशेषः दानपुण्यकृता कीर्तिः पराक्रमकृतं यशः इट्ठउट्ठाणबलवीरि
यपुरिसक्कारपरक्कमे इति तत्रोत्थानं देहचेष्टाविशेषः कर्म भ्रमणादि बलं शारीरं सामर्थ्यविशेषः वीर्यं जीवप्रभवः स एव पुरुषकारोऽभिमान
विशेषः स एव निष्पादितस्वविषयः पराक्रमः इट्ठस्सरता कंतस्सरता तत्र इष्टा। शब्दा इति सामान्यात्काविषयविशेषाक्षिप्तदन्यवज्जमतवापेक्षा
वगंतव्या कांतस्वरतेति कांतः कमनीयः सामान्यतो भिलषणीय इ। त्यर्थः कांतः स्वरो यस्य स तथा तद्भावः कांतस्वरता प्रियस्वरतेति
प्रियात्स्त्यात्स्वरयो भिलषणीयः प्रियः स्वरो यस्य स तथा तद्भावः। प्रियस्वरता मणुन्नस्सरयाइ इति उपरतेनापि भावेनापि स्वालंब
नप्रीतिकरन कामितार्थः स्वरो यस्य स मनोज्ञस्वरस्तद्भावो मनो ज्ञस्वरता जं वेएइ इत्यादि यं वेदयति पुद्गलं वीणावर्णकगंध
तांबूलपट्टशिबिकासिंहासनकुंकुमदानराजयोगगुलिकादिलक्षणं तथा च वीणादिसंबंधात् नवं तीष्टाः शब्दादय इति परिभावनीयमतत्सु
स्रग्धियामागंतुसारिणा पुद्गलं वा इति यावद् बहून् पुद्गलान् वेणुवीणादिकान् वेदयति यं पुद्गलपरिणामं कुलपरिणामं ब्राह्मीद्राक्षाहारपरिणामं
विश्रसया वा यं पुद्गलानां परिणामं शुभं जलदादिकं तत्प्रभावात्तान् कंठकलमसउलानभिधानावलोकमपि उपप्रमनासो गायंति मन्नचुवतयोरच्छकातिष्टु
रानित्यादि तत्स्वभावात् शुभनामकर्म वेदयते शुभनामकर्मफलमिष्टस्वरतादिकमनुभवतीति एतावता परत उदय उक्तः इदानीं स्वतस्तमाह तेसिं वा उदएणं ति
तेषां वा शुभनामकर्मपुद्गलानामुदयेन इष्टशब्दादिकं वेदयते एस णं गोयमा इत्याद्युपसंहारवाक्यं दुहनामस्स णं भंते इत्यादि प्रश्नसूत्रं प्राग्वत् निर्वचनसू
चप्रयुक्तार्थविपरीतत्वेन भावनीयं गोत्रं द्विधा उच्चैर्गोत्रं नीचैर्गोत्रं च तत्र उच्चैर्गोत्रविषयं सूत्रमाह उच्चागोयस्स णं भंते इत्यादि प्रश्नसूत्रं प्राग्वत् निर्वचनमष्टविधोनुभावः १९३

प्रज्ञप्ताः तदेवाष्टविधं दर्शयति जाइविसिट्ठया इत्यादयः सुप्रतीताः नवरमेवं जात्यादिविशिष्टा जातिविशिष्टस्य भावो जातिविशिष्टता इत्यादि जं
वेएइ पुग्गलं वा इत्यादि यं वेदयते पुद्गलं बाह्यं द्रव्यादिलक्षणं तथाहि द्रव्यसंबंधाद्राजादिविशिष्टपुरुषसंपरिग्रहाद्वा नीचजातिकुलोत्पन्नोपि ज
त्यादिसंपन्न इव जनस्य मान्य उपजायते बलविशिष्टताऽपि मल्लानामिव लकुटिभ्रमणाद्वा तद्रूपविशिष्टतापि विशिष्टवस्त्रालंकारसंबंधात् त
पोविशिष्टतापि गिरिकंदराद्यारोहणतालापनाकुर्वतः श्रुतविशिष्टतामनोज्ञभूदेशसंबंधात् स्वाध्यायं कुर्वतः लाभविशिष्टतापि विशिष्टरत्ना
दियोगात् ऐश्वर्यविशिष्टतापि धनकनकादिसंबंधादिति पुग्गले वा इति यावद् बहून् पुद्गलान् वेदयते पुद्गलपरिणामं दिव्यफलाद्याहारपरिणामरूपं
विश्रसया वा यं पुद्गलानां परिणामं अकस्मादभिहितजलदागमसंवादादि। लक्षणं तत्प्रभावादुच्चैर्गोत्रं वेदयते उच्चैर्गोत्रकर्मफलं जाति
विशिष्टत्वादिकं तत्रवर्त्तिपरं न वेदयति एतेन परत उदय उक्तः संप्रति स्वतस्तमाह तेसिं वा उदएणं ति तेषां वा उच्चैर्गोत्रकर्मपुद्गला
नामुदयेन जातिविशिष्टत्वादिकं तत्रवर्त्ति एस णं गोयमा इत्याद्य। उपसंहारवाक्यं नीयागोयस्स णं भंते इत्यादि प्रश्नसूत्रं प्रा
ग्वत् निर्वचनमष्टविधोनुभावः तमेवाष्टविधमनुभावं दर्शयति जाइ विहीणया इत्यादि सुप्रतीतं जं वेएइ पुग्गलमित्यादि यं वेदया
ति पुद्गलं नीचकर्मसमासेवनरूपं नीचपुरुषसंबंधलक्षणं वा तथाहि। उत्तमजातिसंपन्नोपि यदि नीचैः कर्म करोति अथवा शीलविका
रूपमासेवते चांडालादि वा गच्छति तदा भवति चांडालादिविजनस्य निंद्यः बलहीनता सुखशयनीयादिसंबंधतः रूपविहीनता कुत्सितवस्त्रादिसं
बंधात् तपोविहीनता पार्श्वस्थादिसंसर्गात् श्रुतविहीनता विकथापरसाध्वाभासादिसंसर्गात् लाभविहीनता देशकालानुचितकुक्रयाणकसंप
र्कतः ऐश्वर्यविहीनता कुगृहकुकलत्रादिसंपर्कत इति पुग्गले वा इति यावद् बहून् पुद्गलान् वेदयते यं वा पुद्गलपरिणामं वृंताकीफलाद्या
हारपरिणामरूपं वृंताकीफलं ह्यवकृतं कंडूमुत्पादयति तद्रूपविहीनतामापादयतीत्यादि विश्रसया वा पुद्गलानां परिणामं अभिहितजलदागम
विसंवादलक्षणं वेदयते तत्प्रभावात् नीचैः कर्म वेदयते नीचकर्मफलं जात्यादिविहीनतारूपं वेदयत इत्यर्थः एतावता परत उदय उक्तः संप्रा

प्रज्ञा० वृत्ति॥ निश्चितं नोदयमागच्छति सिंवा उदएणंति तेषां वा नीचैर्गोत्रकर्मपुद्गलानामुदयेन ज्ञात्यादिविहीनतामनुभवति एस णं गोयमा इत्याद्युपसंहारवाक्यं अं
तरायस्स णं भंते इत्यादि प्रश्नसूत्रं प्राग्वत् निर्वचनं पंचविधं दर्शयति दाणंतराए इत्यादि दानस्यान्तरायो विघ्नः दानान्तरायः एवं सर्वत्र भावनीयं तत्र दाना
न्तरायादानान्तरायस्य कर्मणः फलं लाभान्तरायादयो लाभान्तरायादिकर्मणामिति जं वेएइ पुग्गलं वा इत्यादि यं वेदयति पुद्गलं तथाविधं विशिष्टर
त्नादि संबंधं सूत्रपाततः तद्विषय एव दानान्तरायोदयः संधिच्छेदनाद्युपकरणसंबंधाद्वा लाभान्तरायकर्मोदयः प्रतिविशिष्टाहारसंबंधादनर्घवस्तुसंबंधा
द्वा लाभान्तरायोदयः एवमुपभोगान्तरायकर्मोदयोऽपि भावनीयः तथा लकुटाद्यभिघाताद्वीर्यान्तरायकर्मोदय इति पुद्गलान् वा बहून् त
थाविधान् यान् पुद्गलान् वेदयते यं वा पुद्गलपरिणामं तथाविधाहारौषधादि परिणामरूपं तथा विश्रसातोऽपरिणामरूपं वीर्यान्तरायकर्मोदयः
मंत्राभिसिक्तवासादिगंधपुद्गलपरिणामात् लाभान्तरायोदयो यथा सुवं भुमदिवस्य विश्रसया वा यं पुद्गलानां परिणामं चित्रं शीतादि
लक्षणं तथा हि दृश्यन्ते वस्त्रादिकं दातुकामा अपि शीतादि निपतंत मालाक्य दानान्तरायोदयात् तस्याऽदातार इति तस्य भावात्
पुद्गलपरिणामस्य स्वतस्स मा हाति सिंवा उदएणं ति तेषां वा अन्तरायकर्मपुद्गलानामुदयेनान्तरायकर्मफलं दानान्तरायादिकं वेदयति ए
स णमित्याद्युपसंहारवाक्यं ॥ ॥ इति श्रीमलयगिरिविरचितायां प्रज्ञापनाटीकायां त्रयोविंशतितमस्य कर्मप्रकृतिपदस्य प्रथमोद्देशकः
॥ ॥ व्याख्यातः प्रथमोद्देशकः इदानीं द्वितीयो व्याख्यायते तस्य चायमभिसंबंधः इहानंतरोद्देशके ज्ञानावरणीयादीनामनुभाव उक्तः इह तु ते
षामेव ज्ञानावरणीयादीनामुत्तरप्रकृतिविभाग उच्यते तत्र विनेयानामपरिज्ञातानां प्रश्नयोरपि मूलप्रकृतिविषयप्रश्ननिर्वचनसूत्रमाह ॥ कइ णं भंते इत्यादि सू
गमं संप्रति यथोद्देशं निर्देश इति न्यायात् ज्ञानावरणीयोत्तरप्रकृतिविषयं सूत्रमाह ॥ नाणावरणिज्जे णं भंते इत्यादि इह आभिनिबोधिकादि इत्यादि ज्ञा
नपंचकप्रयोगपदव्युत्पत्तिविग्रहो भावनीयः आभिनिबोधिकज्ञानस्यावरणीयं आभिनिबोधिकज्ञानावरणीयं एवं श्रुतज्ञानावरणीयमित्यादिष्वपि
भावनीयं दर्शनावरणीयोत्तरप्रकृतीराह ॥ दरिसणावरणिज्जे णं भंते इत्यादि अपि भावनीयं दर्शनावरणीयोत्तरप्रकृतीराह ॥ दरिसणावरणिज्जे णं भंते इ १७४

त्यादि इह कृत्स्नायां नियतं द्राति कुत्सितत्वमविस्पष्टत्वं गच्छति चैतन्यं यस्यां स्वापावस्थायां सा निद्रा यदि वा ईषत्सुप्ते निद्रानखच्छोटिकामात्रेण यस्यां प्रबोध
उपजायते सा स्वापावस्था निद्रा तद्विपाकवेद्या कर्मप्रकृतिरपि कारणे कार्योपचारात् निद्रा निद्रातोऽतिशायिनी निद्रानिद्रा निद्राशाकपार्थिवादि दर्शना
त् मध्यपदलोपी समासः तस्यां हि चैतन्यस्यात्यंतमस्फुटीभूतत्वात् बहुभिर्घोलनाप्रकारैः प्रबोधो भवति ततः दुःखप्रबोधत्वे
न निद्रातोऽतिशायिनीत्वं तद्विपाकवेद्या कर्मप्रकृतिरपि निद्रानिद्रा उपचारात् तथा उपविष्ट ऊर्ध्वस्थितो वा प्रचलति घूर्णति यस्यां स्वापावस्थायां सा
प्रचला तद्विपाकवेद्या कर्मप्रकृतिरपि प्रचला पटला इति प्रचलातोऽतिशायिनी प्रचला प्रचलाप्रचला पूर्ववन्मध्यपदलोपी समासः सा हि चंक्रमणादि क
मपि कुर्वत उदयमागच्छति ततः स्थानस्थितस्य प्रचलाप्रकृत्या अस्या अ तिशायिनीत्वं घीणद्धी इति स्त्याना पिंडीभूता ऋद्धिरात्मशक्तिरूपा यस्यां
स्वापावस्थायां सा स्त्यानर्द्धिः सत्यां हि विप्रथमसंहननस्य केशवार्द्धबलसम द्धर्द्धात्मशक्तिरुपजायते प्रवचने किल प्रदेशः क्वापि ग्रामः क्षुल्ल
कः स्त्यानर्द्धिनिद्रासहितो द्विरददर्शनं दिवा चलीकृतमतस्मि नु द्विरदं हस्तिनमवधार्य रजन्यामुत्थाय दंतयुगलमानः स्व
वायतनद्वारे तमुद्दालमुत्पाट्य स्वापावस्थामुपागतः प्रसुप्तो वा निद्रादि तथा चक्षुषा दर्शनं चक्षुर्दर्शनं तस्यावरणीयं चक्षुर्दर्श
नावरणीयमचक्षुर्दर्शनं शेषेन्द्रियमनोभिर्दर्शनमचक्षुर्दर्शनं तस्या चाव रणीयमचक्षुर्दर्शनावरणीयमवधिरेव दर्शनं तस्यावरणीयमव
धिदर्शनावरणीयं केवलमेव दर्शनं तस्यावरणीयं केवलदर्शनावरणीयं इह निद्रापंचकं प्राप्तायाः दर्शनलब्धेरुपघातकृत् दर्शनावरणचतुष्टयं
तु मूलत एव दर्शनलब्धिमुपहंति तथाहि निद्रोदयः समधिगताया दर्शनलब्धेरुपघातकृत् दर्शनावरणचतुष्टयं तु उद्गमोच्छेदित्वात्
समूलघातं हंति दर्शनलब्धिमिति वेदनीयं द्विधा सातवेदनीयमसातवेदनीयं च सातं सुखं तद्रूपेण यद्वेद्यते तत्सातवेदनीयं तद्विपरीतमसातवेदनीयं
किमुक्तं भवति यस्योदयात् शारीरमानसं सुखमनुभवति तत्सातवेदनीयं यस्योदयात्पुनः शारीरमानसं दुःखमनुभवति तदसातवेदनीयमिति।
कमष्टविधमज्ञानादि विषयभेदात् मोहनीयं द्विधा दर्शनमोहनीयं चारित्रमोहनीयं च दर्शनं सम्यक्त्वं तन्मोहयतीति दर्शनमोहनीयं चारित्रमो

पु. १०८ द्वि॥ वाद्यतरायोगप्रवृत्तिनिवृत्तिनिमित्तं शुद्धात्मपरिणामरूपं तत्स्याद्यतीति वा रिव मोहनीयं यच्छास्त्रे भगवतानकालदेशवको दर्शनमोहनीयं त्रिविधं तद्यथा
सम्यक्त्ववेदनीयं मिथ्यात्ववेदनीयं मिश्रवेदनीयं चेति तत्र जिनप्रणीततत्त्वश्रद्धानात्मकेन सम्यक्त्वरूपेण यद्वेद्यते तत्सम्यक्त्ववेदनीयं यत्पुनर्जिनप्रणीत
तत्त्वाश्रद्धानात्मकेन मिथ्यात्वरूपेण वेद्यते तन्मिथ्यात्ववेदनीयं यत्तु मिश्ररूपेण जिनप्रणीततत्त्वेषु न श्रद्धानं नापि निंदा तद्रूपेण वेद्यते तन्मिश्रवे
दनीयं कथं दर्शनमोहनीयं न हि तत् दर्शनं मोहयति तस्य शुद्धात्मादिपरिणामरूपत्वात् इह सम्यक्त्ववेदनीयं मिथ्यात्वप्रकृतिः तत्ताऽतिवा
स्तं नवात् अपशमिकक्षायिकदर्शनमोहनीवेदं दर्शनमोहनीयमित्युच्यते चारित्रमोहनीयं द्विविधं कषायवेदनीयं नोकषायवेदनीयं च
तत्र यत् क्रोधादिकषायरूपेण वेद्यते तत्कषायवेदनीयं यत्पुनः स्त्रीवे   दादिनोकषायरूपेण वेद्यते तन्नोकषायवेदनीयं यच्छास्त्रे भगवता
कालदेशवको तत्र कषायवेदनीयं षोडशविधं क्रोधमानमायालो   भानां प्रत्येकमनंतानुबंधप्रत्याख्यानाप्रत्याख्यानावरणसंज्वल
नरूपत्वात् तत्रानंतं संसारमनुबध्नंतीत्येवंशीला अनंतानुबंधिन   : उक्तं च अनंतान्यनुबध्नंति यतो जन्मानि भूतये ततोऽनंतानुबं
धसंज्ञा क्रोधाद्येषु नियोजिता एषामुदयाद् न तादृश दिनातमपि ना।   मतत्रयमवर्धः संबुद्धांत संबध्यमानत्वेन तस्मात्तेषां वेदनंतानुवाये
योजना: उक्तं च नायाडयति यन्न स्वमनतनसात्येनवि: कषायास्तेसयाड्   नतानंतानुबंधिनो वाप्यत स्पष्टांत भावसर्वप्रत्याख्यानं तदेशप्रत्याख्यानं च त
एषामुदयात् न लभ्यते तत अप्रत्याख्याना: सर्वनिषेधवचनाय नञ् उक्तं च स्वल्पमपि नोत्सहेद्येषां प्रत्याख्यानसंज्ञा तादृशी एषु निवेशिता तस्माद प्र
त्याख्यानसंज्ञा तादृशी एषु निवेशिता ततः प्रत्याख्यानं सर्वविरतिरूपमावियते यैस्ते प्रत्याख्यानावरणा: आदेव सर्वसावद्यविरतिः प्रत्याख्यानमुदाहृतं
तदावरणसंज्ञा ततस्तृतीयेषु निवेशिता तात्पर्यां परीषहोपसर्गनिपाते सति चारित्रमपि सम्यक् ईषत्ज्वलयंतीति संज्वलना उक्तं च संज्वलयंति यतिं यत्संविग्नं सर्व
पापविरममितिरतस्मात् संज्वलनाड त्यप्रशमकरा तिरम्यान्त अन्यत्रापि कृशाक्षादीन् विषयान् प्राप्य संज्वलयंति यतो मुहु: तत: संज्वलनाड्ना नैव ... ना मिदाः
ध्यातह्र रूपं च एष पंच पूर्वपरिसीमा मिदं ऊर्ध्व लातपुनरावृत्ति विपरीत यराईसतिमोवर्त्तविहोकोहातणेसलयाकठठियसेलत्थंतावमोमाणो मायावलेहगोमुत्ति १७५

मिंढसिंगघणवंसिमूलसमा लोहादालिहवंजणकद्दमकिमिरागसारिच्छा पवरकचलमासवरसरजावज्जीवाणुगामिणोकममाइ देवनरतिरियनार
यगइसाहणा हेयवातणियाइत्थीवेयइतिवेदउतस्तातिवेदः स्त्रियाः पुमांसं प्रत्यभिलाषइत्यर्थः तद्विपाकवेद्यं कर्मापि स्त्रीवेदः पुरुषस्य वेदः पुरुष
स्य स्त्रियं प्रत्यभिलाषइत्यर्थः तद्विपाकवेद्यं कर्मापि पुरुषवेदो नपुंसकवेदः नपुंसकस्य स्त्रियं पुरुषं च प्रत्यभिलाषइत्यर्थः तद्विपाकवेद्यं कर्मापि नपुं
सकवेदः तथा यदुदयाज्जंतिमित्तमंतिनित्तं वाहसति स्मयते वा तत् हास्यमोहनीयं यदुदयात् हास्याय तत् रेषु वस्तुषु प्रमादमाधत्ते तत् रतिमोहनीयं
यदुदयवशात् पुनर्बाह्यांतरेषु वस्तुषु अप्रीतिं करोति मोहनीयं यदुदयात् प्रियविप्रयोगादौ उरस्ताडमाक्रंदति परिदेवते भूमौ विलुठति दी
र्घं निश्वसिति तत् शोकमोहनीयं यदुदयवशात् निमित्तमनिमित्तं वा तथारूप   स्वसंकल्पात् बिभेति तत् भयमोहनीयं यदुदयवशात् पुन:
शुभमशुभं वा वस्तु जुगुप्सते तत् जुगुप्सामोहनीयं जुगुप्सा कुत्सेत्यर्थः ।   नीयं जुगुप्सामोहनीयं एवं सर्वपदेष्वपि विग्रहो नोकषा
यः नोकषायता चामीषां हास्यादीनां कषायसहचारित्वात् केऽपि क।   षायैः सह संचीर्यंते त्वेतानुच्यते आद्यैर्द्वादशभि
मिश्रमादिभिर्षोडशकषायैपुक्ती हास्यादीनामवस्थानं तेनेवभावेद   नंतरायमेव तेषामपि प्ररूपणाय प्रवृत्तिः अथवा एते प्रादुर्भवं
तः अवश्यं कषायानुद्दीपयंति ततः कषायसहचारिणः एवं वा नोशब्दः साहचा   र्यइष्टव्यः कषायैः सहचारिणो नोकषाया इति उक्तं च कषा
यसहवर्त्तित्वात् कषायप्रेरणादपि हास्यादिनवकस्योक्ता नोकषायकषायता आयु: कर्मचतुःप्रकारं नाम कर्म द्विचत्वारिंशद्विधं तत्र चत्वारिंशत्
लदानाद गतिनामेत्यादि गम्यते तथाविधकर्मसचिवैः प्राप्यते इति गतिः नारकत्वादिपर्यायपरिणतिः सा चतुर्धा तद्यथा नरकगतिः तिर्यग्गतिः तिर्यग्ग
तिर्मनुष्यगतिर्देवगतिश्च तन्निबंधनं नाम गतिनाम तदपि चतुर्धा नरकगतिनामेत्यादि तथा एकेंद्रियादीनामेकेंद्रियत्वादिरूपसमानपरिणामलक्षणमे
केंद्रियादिशब्दव्यपदेशभाक् यत्सामान्यं सा जातिः तन्निबंधनं नाम जातिनाम इदमत्र तात्पर्यं द्रव्यरूपमिंद्रियमंगोपांगनामनिंद्रियपर्याप्तिनामसामर्थ्या
५ भिहितं भावरूपं तु स्पर्शनादींद्रियावरणक्षयोपशमसामर्थ्यात् क्षायोपशमिकानींद्रियाणि इति वचनात् यत् पुनरेकेंद्रियादिशब्दप्रवृत्तिनिबंधनं तथा

प्रक्रा०वृत्ति॥

स्वरूपसमानपरिणतिलक्षणसामान्यं तदनन्यसाधारणं जातिनामेति विवक्षितत्वं जातिनाम पंचधा तद्यथा एकेंद्रियजातिनाम यावत् पंचेंद्रियजातिनाम त
थाशीर्यत इति शरीरं तत्पंचधा तद्यथा औदारिकं वैक्रियमाहारकं तैजसं कार्मणं एतानि प्रागेव व्याख्यातानीति तन्निबंधननामापि पंचधा तद्यथा औदारिक
नाम वैक्रियनाम इत्यादि तत्र यदुदयादौदारिकशरीरयोग्यान् पुद्गलानादाय औदारिकशरीररूपतया परिणमयति परिणमय्य च जीवप्रदेशैः
सह परस्परानुगमरूपतया संबंधयति तदौदारिकशरीरनामान्यथापि भावनीया शिरांसि शरीरस्यांगान्यष्टौ शिरःप्रभृतीनि तदुक्तं च सीसमुरोयरपिट्ठी दो
बाहू ऊरुया य अट्ठंगा इति उपांगानि अंगावयवभूतान्यंगुल्यादीनि शेषाणि तत्प्रत्यवयवभूतान्यंगुलिपर्वरेखादीनि अंगोपांगानि अंगानि च उपांगा
नि च अंगोपांगानि अंगोपांगानि चेत्यादावेकशेषस्त्वयमित्यकारा काराथः तन्निमित्तं नाम शरीरांगोपांगनाम तत्त्रिविधं तद्यथा औदा
रिकांगोपांगनाम वैक्रियांगोपांगनाम आहारकांगोपांगनाम तत्र यदु दयवशादौदारिकशरीरत्वेन परिणतानां पुद्गलानामंगो
पांगविभागपरिणतिरूपजायते तदौदारिकांगोपांगनाम एवं वै क्रियाहारकांगोपांगनामापि भाव्यं तैजसकार्म
णयोस्तु जीवप्रदेशसंस्थानानुरोधित्वान्नास्त्युपांगसंभवः नवाबध्यात इति तिबंधनं यदौदारिकपुद्गलानां गृहीतानां गृह्यमाणानां
च परस्परं तैजसादिपुद्गलैर्वा सह संबंधजनकं तद्बंधननाम आह च मूलटीका कारः विद्यते तत्कर्म यन्निमित्तादि संयोगापत्तिराविर्भवति यथा
काष्ठद्वयानिर्देकास्यकरणं जतुकारणमिति तत्पंचधा तद्यथा औदारिकबंधननाम वैक्रियबंधननाम आहारकबंधननाम तैजसबंधननाम का
र्मणबंधननाम तत्र यदुदयवशादौदारिकपुद्गलानां गृहीतानां गृह्यमाणानां च परस्परं तैजसादिपुद्गलैश्च सह संबंध उपजायते तदौदारिकबंधनं यदुद
याद्वैक्रियपुद्गलानां गृहीतानां गृह्यमाणानां च परस्परं तैजसकार्मणपुद्गलैश्च सह संबंधस्तद्वैक्रियबंधनं यदुदयादाहारकपुद्गलानां गृहीतानां गृह्य
माणानां च परस्परं तैजसकार्मणपुद्गलैश्च सह संबंधस्तदाहारकबंधनं यदुदयात्तैजसपुद्गलानां गृहीतानां च परस्परं कार्मणपुद्गलैश्च सह संबंधस्त
त्तैजसबंधननाम यदुदयात्कार्मणपुद्गलानां गृहीतानां गृह्यमाणानां च परस्परं संबंधस्तत्कार्मणबंधननाम तथा संघात्यंते औदारिकादिपुद्गला येन १९६

तत्संघातं तच्च तन्नाम च संघातनाम तदपि पंचधा तद्यथा औदारिकसंघातनाम वैक्रियसंघातनाम आहारकसंघातनाम तैजससंघातनाम कार्मण
संघातनाम तत्र यदुदयवशादौदारिकपुद्गला औदारिकशरीररचनानुकारिसंघातरूपा जायंते तदौदारिकसंघातनाम एवं वैक्रियादिशरीरसंघात
नामस्वपि भावनीयं संघयणनामेति संहनननाम संहननमस्थिरचनाविशेषः आह च मूलटीकाकारः संहननमस्थिरचनाविशेष इति तत्तयः शाह सूत्रे
शक्तिविशेष एव संहननमिति तथा चतुर्थः सूत्रमतिविमलसंहननमिति सप्रांतः मूलटीकाकारेणापि सूत्रानुयायिना संहननस्यास्थिरचनाविशेषा
त्मकस्य प्रतिपादितत्वादिति यत एकेंद्रियाणां सेवार्तसंहननमत्र न्याकृतं तट्टीकाकारेण समाहितमौदारिकशरीरत्वादुपचारत इदमुक्तमिष्टं न तु तत्त्व
ह्यतिष्य इति तत्र शक्तिविशेषः स्यात्ततो देवानां नैरयिकाणां च संहननेषु। स्यात् अथवत्तत्रसाक्षात्संहननं तु कास्यात् तं सूत्रस्वरूपका
विसंवादित्वं सर्वास्थिरचनाविशेष औदारिकशरीर एव नान्येषु शरीरेषु तेषामस्थिरहितत्वात् तच्च षोढा तद्यथा वज्रऋषभनाराचं नाराचं अ
र्द्धनाराचं कीलिका सेवार्तं च तत्र वज्रं कीलिका ऋषभः परिवेष्टनप ट्टः नाराचमुभयतो मर्कटबंधः उक्तं च रिसयाहायदा
इयपट्टं वज्रं पुण कीलिया मुणेयव्वा उभओ मक्कडबंधो नारायं तं वि। याणाहि तत्र द्वयोरस्थ्नोरुभयतो मर्कटबंधेन बद्धयोः प
ट्टाकृतिना तृतीयेनास्थ्ना परिवेष्टितयोरुपरि तदस्थित्रयभेदि कीलिका। ख्यं वज्रनामकमस्थि यत्र भवति तद्वज्रऋषभनाराचसंहननं यत्र
तु कीलिकारहितं संहननं तद्ऋषभनाराचं यत्र त्वस्थ्नां मर्कटबंध एव केवलो भवति तत्संहननं नाराचं यत्र त्वेकपार्श्वे मर्कटबंधो द्वितीयपार्श्वे च
कीलिका तदर्द्धनाराचं संहननं यत्रास्थीनि कीलिकामात्रबद्धान्येव भवंति तत्संहननं कीलिकाख्यं यत्र पुनः परस्परपर्यंतमात्रसंस्पर्शलक्षणां से
वामागतानि अस्थीनि नित्यमेव स्नेहाभ्यंगादिरूपां परिशीलनामाकांक्षंति तत्सेवार्तं संहननमेतन्निबंधनं संहनननामापि षोढा तद्यथा वज्रऋष
भनाराचसंहनननाम ऋषभनाराचनाम नाराचनाम अर्द्धनाराचनाम कीलिकानाम सेवार्तनाम तत्र यदुदयाद्वज्रऋषभनाराचसंहननं भवति
तद्वज्रऋषभनाराचसंहनननाम एवं शेषसंहनननामस्वपि भावनीयं तथा संस्थानमाकारविशेषस्तेष्वेव

प्रज्ञा० वृत्तिः ।।

दीतसंघातनिबन्धस्य औदारिकादिपुद्गलरूपसंस्थानविशेषस्य कर्मणउदयाद्भवति तत्संस्थाननाम तच्च षोढा तद्यथा समचतुरस्रसंस्थाननाम न्यग्रोधपरि
मंडलसंस्थाननाम सादिसंस्थाननाम वामनसंस्थाननाम कुब्जसंस्थाननाम हुंडसंस्थाननाम तत्र यदुदयात्समता समचतुरस्रसंस्थानमुपजायते तत्समचतु
रस्रसंस्थाननाम यदुदयात्पुनर्न्यग्रोधपरिमंडलसंस्थाननाम एवं शेषाण्यपि वाच्यानि तथा वर्ण्यते अलंक्रियते शरीरमनेनेति वर्णः स च पंचप्रकारः श्वेत
पीतरक्तनीलकृष्णभेदात्तन्निबंधनं वर्णनामापि पंचधा तद्यथा श्वेतवर्णनाम पीतवर्णनाम नीलवर्णनाम रक्तवर्णनाम कृष्णवर्णनाम तत्र यदुदयाज्जंतु
शरीरेषु श्वेतवर्णप्रादुर्भावो यथा बिसकंदिकादीनां तत् श्वेतवर्णनाम एवं शेषवर्णनामान्यपि भावनीयानि तथा गंध्यते आघ्रायते इति गंधः
सुरभिगंधो दुरभिगंधश्च तन्निबंधनं गंधनामापि द्विधा तद्यथा सुरभिगंधनाम दुरभिगंधनाम तत्र यदुदयाज्जंतुशरीरेषु सुरभिगंध उप
जायते यथा शतपत्रमालतीकुसुमादीनां तत् सुरभिगंधनाम यदुदयात् दुरभिगंधः शरीरेषु उपजायते यथा लसुनादीनां तत् दु
रभिगंधनाम तथा रस्यते आस्वाद्यते इति रसः स पंचधा तिक्तकटुकषायाम्लमधुरभेदात्तन्निबंधनं रसना
मापि पंचधा तद्यथा तिक्तनाम कटुनाम कषायनाम अम्लनाम मधुरनाम तत्र यदुदयाज्जंतुशरीरेषु तिक्तो रसो भवति यथा मरिचादी
नां तत् तिक्तरसनाम एवं शेषाण्यपि रसनामानि भावनीयानि तथा स्पृश्यते इति स्पर्शः स च कर्कशमृदु
लघुगुरुस्निग्धरूक्षशीतोष्णभेदादष्टप्रकारः तन्निबंधनं स्पर्शनामाप्यष्टप्रकारं तत्र यदुदयाज्जंतुशरीरेषु कर्कशः स्पर्शो भवति यथा पाषाणविशे
षादीनां तत् कर्कशस्पर्शनाम एवं शेषाण्यपि स्पर्शनामानि भावनीयानि तथा यदुदयात् प्राणिनां शरीराणि न गुरूणि नापि लघूनि किंत्वगुरुलघु
रूपाणि भवंति तदगुरुलघुनाम तथा यदुदयात् स्वशरीरावयवैरेव शरीरांतःपरिवर्द्धमानैः प्रतिजिह्वागलवृंदलंबकचोरदंतादिभिरुपहन्यते यद्वा स्वयं
कृतोद्बंधनभैरवप्रपातादिभिरुपघातस्तदुपघातनाम तथा यदुदयाद्दर्शनमात्रेणैव वाक्सौष्ठवेन वा महानृपसभामपि गतः सभ्यानामपि त्रासमा
पादयति प्रतिवादिनश्च प्रतिभाविघातं करोति तत्पराघातनाम तथा कूर्परलांगलगोमूत्रिकाकारेण यथाक्रमं द्वित्रिचतुःसमयप्रमाणेन विग्र १५७

हेण गच्छतो जीवस्यानुश्रेणि नियतगमनपरिपाटी आनुपूर्वी तद्विपाकवेद्यं नामकर्मापि कारणे कार्योपचारादानुपूर्वीनाम तच्च
तुर्धा तद्यथा नैरयिकानुपूर्वीनाम तिर्यगानुपूर्वीनाम मनुष्यानुपूर्वीनाम देवानुपूर्वीनाम तथा यदुदयवशादात्मनः उच्छ्वासनिःश्वासलब्धिरुपजायते
तदुच्छ्वासनाम आह यद्येवमुच्छ्वासपर्याप्तिनाम्नः कोऽपयोगः उच्यते उच्छ्वासनाम्न उच्छ्वासनिःश्वासयोग्यपुद्गलग्रहणमोक्षविषया लब्धिरुप
जायते सा च लब्धिर्निःश्वासपर्याप्तिमंतरेण स्वफलं साधयितुं न खलु उच्छ्वासादिपुद्गलग्रहणशक्तिसामर्थ्ये शक्तिमंतरेण स्वफलसमर्थात्तत उच्छ्वासपर्याप्ति
निष्पादनार्थमुच्छ्वासपर्याप्तिनाम्न उपयोगः एवमन्यत्रापि पर्याप्तौ लब्धौ च विषयविभागो भावनीयः तथा यदुदयाज्जंतुशरीराणि स्वरूपे
णानुष्णान्यपि उष्णप्रकाशलक्षणमातपं कुर्वंति तदातपनाम तद्विपाकश्च। सूर्यमंडलगतेषु पृथिवीकायिकेष्वेव न वह्निकायिकेषु प्रवचनेन निषेधात्तत्रो
ष्णस्पर्शनामोदयात् उत्कटलोहितवर्णनामोदयाच्च प्रका शकत्वमिति तथा यदुदयाज्जंतुशरीराण्यनुष्णप्रकाशरूपमुद्
द्योतं कुर्वंति यथा यतिदेवोत्तरवैक्रियचंद्रनक्षत्रतारकावि मानरत्नौषधयश्च तदुद्योतनाम तथा विहायसा गतिर्गम
नं विहायोगतिः ननु सर्वगतत्वात् विहायसः संभवान्यया गतिर्न संभ वतीति किमर्थं विशेषणं व्यवच्छेद्याभावात् सत्यमेतत् किंतु
द्विगतिरिति नामद्वयमस्तीति पौनरुक्त्याशंका स्या दतः स्यात्तदपोहार्थं विहायसा विशेषणं विहायसा गतिर्नतु ना
रकादिपर्यायपरिणतिरूपा गतिरिति विहायोगतिः सा द्विधा प्रशस्ता अप्रशस्ता च तत्र प्रशस्ता हंसगजवृषभादीनां अप्रशस्ता खरोष्ट्रमहिषादीनां तद्वि
पाकवेद्यं विहायोगतिनामकर्म द्विधा प्रशस्तविहायोगतिनाम अप्रशस्तविहायोगतिनाम चेति तथा त्रसंति उष्णाद्यभितप्ताः संतो विवक्षित
स्थानादुद्विजंते गच्छंति च छायाद्यासेवनार्थं स्थानांतरमिति त्रसा द्वीन्द्रियादयस्तत्पर्यायपरिणतिवेद्यं नामकर्मापि त्रसनाम तथा यदुदयादुष्णा
द्यभितापेऽपि तत्स्थानपरिहारासमर्थाः पृथिव्यप्तेजोवायुवनस्पतयः स्थावरास्तेषां यत्तत्स्थावरनाम तथा बादरनाम यदुदयाज्जीवा बादरा भ
वंति बादरत्वं परिणामविशेषः यद्वशात् पृथिव्यादेरेकैकस्य जंतुशरीरस्य चक्षुर्ग्राह्यत्वं नापि बहूनां समुदाये चक्षुषा ग्रहणं भवति तद्वि

प्रज्ञाप० वृत्तिः॥

रीतं सूक्ष्मनामापि समुदितानामनेकशरीराणां चक्षुर्ग्राह्यता न भवति उक्तं च आवश्यकचूर्णौ मूलटीकायां सूक्ष्मनामोदयात्सूक्ष्मो भवति अत्यंतसू
क्ष्मो ऽतींद्रिय इत्यर्थः इति पर्याप्तकनामोदयात् स्वयोग्यपर्याप्तिनिर्वर्त्तनसमर्थो भवति पर्याप्तिर्नाम आहारादिपुद्गलग्रहणपरिणमनहेतुरात्मनः श
क्तिविशेषः एतच्च प्रागेवोक्तमिति तद्विपरीतमपर्याप्तकनाम तथा यदुदयात् जीवं जीवं प्रति भिन्नं शरीरं तत्प्रत्येकनाम यदुदयवशात् पुनरनंतानां जी
वानामेकं शरीरं भवति तत्साधारणनाम तथा यदुदयवशात् शरीरावयवानां शिरोऽस्थिदंतादीनां स्थिरता भवति तत्स्थिरनाम तद्विपरीतमस्थिरनाम यदुदयव
शात् जिह्वादीनामवयवानामस्थिरता भवति तदस्थिरनाम तथा यदुदयान्नाभेरुपरितना अवयवाः शुभा जायंते तत् शुभनाम यदुदयवशान्नाभेरधस्त
नाः पादादयोऽवयवा अशुभा भवंति तदशुभनाम तथाहि शिरसा स्पृष्टस्तु ष्यति पादेन तु रुष्यति कामिन्याः पादेनापि स्पृष्टो नायकस्तुष्यतीति ततो
व्यभिचार इति चेत् न तस्य प्रीतिः स्यादुपचारादनीयनिबंधनत्वात् वस्तु स्थितिस्तु यथोक्तरूपैवेत्यदोषः तथा यदुदयवशादनुपकृदपि
सर्वस्य मनःप्रियो भवति तत्सुभगनाम तद्विपरीतं दुर्भगनाम। यदुदयादुपकारकृदपि जनस्य द्वेष्यो भवति उक्तं च अ
णुवकए वि बहूणं जो होइ पिओ तस्स सुभगनामुदओ उवगारकारगो वि जणस्स वेसो दुभगनामुदए सुभगुदए वि जओ कोइ किंचि वा जस्स दुट्ठो
सुभगोदये वि जायइ तद्दोसा अभव्वाणं तित्थयरो यथा यदुदय वशाज्जीवस्य स्वरः श्रोतॄणां प्रीतिहेतुरुपजायते तत् सुस्वरनाम तद्वि
परीतं दुःस्वरनाम यदुदयात्स्वरः श्रोतॄणामप्रीतये भवति तथा यदुदयवशात् यच्चेष्टते भाषते वा तत्सर्वं लोकः प्रमाणीकरोति दर्शनसमनं
तरमेव ज्ञात्वाभ्युत्थानादि समाचरति तदादेयनाम तद्विपरीतमनादेयनाम यदुदयवशादुपपन्नमपि ब्रुवाणो नोपादेयवचनो भवति ना
भ्युपक्रियमाणोऽपि जनस्तस्याभ्युत्थानादि समाचरति तथा तपःशौर्यत्यागादिना समुपार्जितेन यशसा कीर्त्तनं संशब्दनं यशःकीर्त्तिः संशब्दनं यशः
कीर्त्तिः यद्वा यशः सामान्येन ख्यातिः कीर्त्तिर्गुणोत्कीर्त्तनरूपा प्रशंसा अथवा सर्वदिग्गामिनी पराक्रमकृता वा सर्वजनोत्कीर्त्तनीयगुणता
यशः एकदिग्गामिनी पुण्यकृता वा कीर्त्तिः तदुदयवशाद्भवतस्तद्यशःकीर्त्तिनाम यदुद १९८

॥

यवशान्मध्यस्थस्यापि जनस्याप्रशस्यो भवति तदयशःकीर्त्तिनाम तथा यदुदयाज्जंतुशरीरेषु स्वस्वजातौ अंगप्रत्यंगानां प्रतिनियतस्थानवर्त्ति
ता भवति तन्निर्माणनाम तच्च सूत्रधारकल्पं तदभावे हि तद्भृतककल्पैः अंगोपांगनामादिभिर्निवर्त्तितानामपि शिरउदरादीनां स्थानव्यतिनियमः स्यात् तथा यदु
दयवशात् अष्टमहाप्रातिहार्यप्रमुखाश्चतुस्त्रिंशदतिशयाः प्रादुःष्यंति तत्तीर्थकरनाम तदेवमुक्ता नामकर्मणो द्विचत्वारिंशद्भेदाः संप्रत्येतेषामे
व गत्यादीनामवांतरभेदप्रतिपादनार्थमाह गइनामे णं भंते कम्मे कइविहे पन्नत्ते इत्यादि सममपि निगदसिद्धं उक्ता नामकर्मणो भेदाः
संप्रति गोत्रकर्मभेदानाह उच्चागोए णं भंते इत्यादि यदुदयवशादुत्तमजातिकुलबलतपोरूपैश्वर्यश्रुतसत्काराभ्युत्थानासनप्रदानांजलिप्रग
हादिसंभवस्तदुच्चैर्गोत्रं यदुदयवशात्तु ज्ञानादिसंपन्नोऽपि निंदां लभते हीन। तज्जात्यादिसंभवं नीचैर्गोत्रमुक्ता गोत्रभेदाः संप्रत्यंत
रायभेदानाह उच्चागोए णं भंते कम्मे कइविहे पन्नत्ते इत्यादि सुगमं संप्रति तरायभेदानाह अंतराए णं भंते कम्मे कइविहे इत्या
दि तत्र यदुदयवशात् सति विभवे समागते च गुणवति पात्रे दत्तम। स्मै महाफलमिति जानन्नपि दातुं नोत्सहते तद्दानांत
रायं तथा यदुदयवशाद्दानगुणेन प्रसिद्धादपि दातुर्गृहे विद्यमानमपि देय मर्थजातं याञ्चाकुशलोऽपि गुणवानपि याचको न लभते त
ल्लाभांतरायं तथा यदुदयवशात् सत्यपि विशिष्टाहारादिसंभवे असति च प्रत्या। ख्याने परिणामे वैराग्ये वा केवलकार्पण्यान्नोत्सहते भोक्तुं
तद्भोगांतरायं एवमुपभोगांतरायमपि भावनीयं नवरं भोगोपभोगयोरयं विशेषः सकृद्भुज्यत इति भोगः आहारमाल्यादि पुनः पुनर्भुज्य
त इत्युपभोगो वस्त्रालंकारादिः उक्तं च सइ भुज्जइत्ति भोगो सो पुण आहारपुप्फमाईओ उवभोगो उ पुणो पुण उवभुज्जइ वत्थवलयाई तथा
यदुदयात् सत्यपि नीरुजि शरीरे यौवनिकायामपि वर्त्तमानोऽल्पप्राणो भवति यथावा बलवत्यपि शरीरे साध्येऽपि प्रयोजने हीनसत्त्वतया न प्रव
र्त्तते तद्वीर्यांतरायं उक्ता मूलोत्तरप्रकृतिभेदाः संप्रति उत्तरप्रकृतीनां यथाक्रमं स्थितिप्रतिपादनं विवक्षुः प्रथमतो ज्ञानावरणीयस्य पंचप्रका
रस्यापि विषये प्रश्नसूत्रमाह णाणावरणिज्जस्स णं भंते कम्मस्स केवइ कालं ठिई पन्नत्ता इति ज्ञानावरणीयस्य मतिश्रुतावधिमनःपर्यायके

वलावरणानंदतः एवंप्रकारस्य कर्मणो भदंत कियंतं कालं यावत् स्थितिः प्रज्ञप्ता एवमुक्ते भगवानाह गोतम जघन्येनांतर्मुहूर्तं तच्च सर्वलघु सूक्ष्म
संपरायस्योत्कृष्टकस्य गुणस्थानकचरमसमयवर्तमानस्यावसेयम् उत्कर्षतस्त्रिंशत्सागरोपमकोटीकोट्यः सा च मिथ्यादृष्टेरुत्कृष्टसंक्लिष्टस्य वर्त
मानस्यावसातव्या तादृक्षप्रियतापाउक्तस्य वश्यास्यां तर सिद्धं इदमष्टव्याकरणं त्रीणि वर्षसहस्राणि आबाधोनाकर्मस्थितिः कर्मदलिकनिषेक
इति किमुक्तं भवति उत्कृष्टस्थितिर्द्विविधा प्रज्ञप्ता तद्यथा द्विविधा स्थितिः कर्मरूपतावस्थानलक्षणा अनुभवयोग्या च तत्र कर्मरूपतावस्थानलक्षणां स्थिति
मधिकृत्येदमुक्तं त्रिंशत्सागरोपमकोटीकोट्यः इति अनुभवयोग्या च वर्षसहस्रत्रयोना यत आह त्रीणि वर्षसहस्राणि आबाधा किमुक्तं भवति ज्ञानाव
रणीयं कर्मोत्कृष्टस्थितिकं बद्धं सत् बंधसमयादारभ्य त्रीणि वर्षसहस्राणि यावत् न किंचिदपि स्वोदयतो जीवस्य बाधा
मुत्पादयति तावत्कालमध्ये दलिकनिषेकस्याभावात् तत ऊर्ध्वं दलि कनिषेकः तथा चाह अबाधोना अबाधाकालपरिहीना अनु
भवयोग्या कर्मस्थितिः किमुक्तं भवति कर्मनिषेकः स चैवं प्रथम स्थितौ प्रभूतं द्वितीयस्थितौ विशेषहीनः तृतीयस्थितौ
विशेषहीनः एवं विशेषहीनो विशेषहीनस्तावद्वक्तव्यो यावदुत्कृष्टस्थितिचरमसमयः एतावता च यदुक्तमपर्याप्त(?)
यात्वद्धितापि सर्वकर्मप्रकृतिप्राभृतबंधस्थानप्ररूपणा अबाधाकंडकप्ररूपणा नि षेकप्ररूपणा अल्पबहुत्वप्ररूपणा चेति तत्रोत्कृष्टाबाधाकंडक
प्ररूपणा उत्कृष्टनिषेकप्ररूपणा च दर्शिता भवति अबाधाकालपरिहीना प्रायस्थापयितव्या यस्य यावत्यः सागरोपमकोटीकोट्यः तस्य तावंति वर्ष
शतान्यबाधा यस्य पुनरंतःसागरोपमकोटीकोट्या मध्ये स्थितिस्तस्यांतर्मुहूर्तमात्रा एवं जघन्यतोऽन्तर्मुहूर्तमबाधा उत्कर्षतः इत्यादि कोटीत्रि
नाभ्यां तत एवमबाधाविषयाणि सूत्राणि यथा भावनीयानि निद्रापंचकविषयं सूत्रमाह निद्रापंचकस्स णं भंते इत्यादि अत्र जघन्यतः स्थितिस्त्रयः सागरोप
मस्य सप्तभागाः पल्योपमासंख्येयभागोनाः कथमेतावती चेदुच्यते पंचानां ज्ञानावरणप्रकृतीनां चतसृणां दर्शनावरणप्रकृतीनां चक्षुर्दर्शना
वरणादीनां संज्वलनलोभस्य पंचानामंतरायप्रकृतीनां जघन्या स्थितिरंतर्मुहूर्तं सातावेदनीयस्य काषायिकस्य द्वादश मुहूर्ता इतरस्य द्वौ समयौ प्र

समयौ बंधो द्वितीयसमये वेदनं तृतीयसमये चाकर्मीभवनमिति यशःकीर्त्युच्चैर्गोत्रयोरष्टौ मुहूर्ताः पुरुषवेदस्याष्टौ संवत्सराणि संज्वलनक्रोधस्य
द्वौ मासौ संज्वलनमानस्यैको मासः संज्वलनमायाया अर्द्धमासः शेषाणां तु प्रकृतीनां या यासां स्वकीया उत्कृष्टा स्थितिस्तस्या उत्कृष्टया सप्ततिसागरोपमकोटी
कोटीप्रमाणया मिथ्यात्वस्थित्या भागे हृते यल्लभ्यते तत्पल्योपमासंख्येयभागहीनं जघन्यस्थितिपरिमाणं तत्र निद्रापंचकस्योत्कृष्टा स्थितिस्त्रिंशत्सागरो
पमकोटीकोट्यस्तासां मिथ्यात्वस्थित्या सप्ततिसागरोपमकोटीकोटीप्रमाणया भागो ह्रियमाणे शून्यं शून्येन पातयेदिति वचनाल्लब्धास्त्रयः सागरोप
मस्य सप्तभागाः ते पल्योपमासंख्येयभागहीनाः क्रियंते ततो भवति यथोक्तं जघन्यस्थितिपरिमाणमिति सा या वयणिस्स इति यावत् इरियावहियबंधगं पडुच्च अ
द्वसमयठितिएणं दो समया संपराइयबंधगं पडुच्च जहण्णेणं बारस मुहुत्ता इति प्राग्भावितं असातावेदनीयस्य जघन्यतस्त्रयः सप्तभागाः प
ल्योपमासंख्येयभागोना निद्रापंचकवद्भावनीयाः अस्य उत्कर्षतः स्थिति स्त्रिंशत्सागरोपमकोटीकोटीप्रमाणा तत्र सम्यक्त्ववेद
नीयस्य जघन्यतः स्थितिपरिमाणमंतर्मुहूर्तमुत्कर्षतः षट्षष्टिसागरो पमाणि सातिरेकाणि तच्च वेदनमधिकृत्यावसातव्यं न बं
धमाश्रित्य सम्यग्मिथ्यात्वयोर्बंधाभावात् मिथ्यात्वपुद्गला एव हि जीवेन सम्य क्त्वगुणविशोधिबलतस्त्रिधा क्रियंते तद्यथा सर्वविशुद्धा अ
र्द्धविशुद्धा अविशुद्धाश्च तत्र ये सर्वविशुद्धास्ते सम्यक्त्ववेदनीयव्यपदेशं लभं ते ये अर्द्धविशुद्धास्ते सम्यग्मिथ्यात्ववेदनीयव्यपदेशमाताना त
त्या बंधसंबंधस्तु तेषां सम्यक्त्वसम्यग्मिथ्यात्वपुद्गलानां संक्रमतः स्थितिस्थितात् तदा अंतर्मुहूर्तोना सप्ततिसागरोपमकोटीकोटीप्रमाणा वे
दितव्या सा च तावती यथा भवति तथा कर्मप्रकृतिटीकायां संक्रमकरणे भावितमिति नातीव भाव्यते मिथ्यात्ववेदनीयस्य जघन्या स्थितिरेकं सा
गरोपमं पल्योपमासंख्येयभागोनमुत्कर्षतः सप्ततिः तस्योत्कृष्टस्थितेः सप्ततिसागरोपमकोटीकोटीप्रमाणत्वात् सम्यग्मिथ्यात्ववेदनीयस्य जघ
न्यत उत्कर्षतो वान्तर्मुहूर्तं वेदनापेक्षया पुद्गलानां च स्थानं उत्कर्षतः प्राग्भावितं कषायद्वादशकस्यानंतानुबंधिचतुष्टयाप्रत्याख्यानाव
रणचतुष्टयरूपस्य प्रत्येकं जघन्या स्थितिश्चत्वारः सागरोपमसप्तभागाः पल्योपमासंख्येयभागोना उत्कर्षतस्तेषां

प्रज्ञाप०वृत्तिः।

स्थितेस्त्रिंशत्सागरोपमकोटीप्रमाणत्वात् संज्वलनानां च जघन्या स्थितिर्मासद्वयादिप्रमाणा क्षपकस्य स्वबंधचरमसमये च सा तथा
स्त्रीवेदस्य जघन्या स्थितिः सार्द्धसागरोपमस्य सप्त भागाः पल्योपमासंख्येयभागोनाः कथमिति चेत् उच्यते त्रैराशिककरणवशात् तथाहि य
दि दशानां सागरोपमकोटीकोटीनामेकः सागरोपमसप्तभागो लभ्यते ततः पंचदशभिः सागरोपमकोटीकोटीभिः किं लभ्यते त्रै
राशिकस्थापना १० । १ । १५ अत्रांत्येन राशिना पंचदशलक्षणेन मध्यस्य राशेरेकलक्षणस्य गुणने जाता पंचदशैव एकस्य गुणितस्य तदेव भव
तीति वचनात् तेषामाद्येन राशिना दशकलक्षणेन भागहरणे लब्धः सार्द्धः सप्तभाग इति हासरइअरयसोगदुगंछाणं जहन्नुक्कोसमभिई
माणियव्वा इति हास्यरत्योः स्थितिविषय आलापकः सुगमः नवरं जघन्या उत्कृष्टा च स्थिति र्वक्तव्या सा च सुप्रसिद्धत्वान्नोक्ता कथं वक्तव्येति चेदुच्यते
हासरईणं जहन्नेणं सागरोवमस्स एगं सत्तभागं पलि ओवमस्स असंखेज्जइभागेणं ऊणगं उक्कोसेणं दस सा
गरोवमकोडाकोडीओ दस वाससयाइं अबाहा अबाहूणिया कम्मनिसेगो अरइ भयसोगदुगंछाणं जहन्नेणं सागरोवमस्स
दो सत्तभागा पलिओवमस्स असंखेज्जइभागेणं ऊणगा उक्कोसेणं वी सं सागरोवमकोडाकोडीओ वीस य वाससयाइं अबाहा जाव नि
सेगो इति तिर्यगायुष उत्कृष्टा स्थितिस्त्रीणि पल्योपमानि पूर्वकोटित्रिभागा। भ्यधिकानीति यदुक्तं तत्पूर्वकोट्यायुष्कापे
क्षया मनुष्यायुर्बंधकानधिकृत्यावसेयं अन्यथा त्वेतावत्याः स्थितेः पूर्वकोटित्रिभागस्यापायाऽबाधायाऽभावलभ्यमानत्वात् तिरियाउनामाए जहान
पुमगावेयस्स इति जघन्या त्वेका सागरोपमस्य सप्तभागो पल्योपमासंख्येयभागहीनो उत्कर्षतो विंशतिसागरोपमकोटीकोट्यः इत्यर्थः मनु
ष्यगतिनाम्नि जहन्नेणं सागरोवमस्स दिवड्ढं सत्तभागं पलिओवमस्स असंखेज्जइभागेणं ऊणगं इति अत्र भावना स्त्रीवेदवद् भावनीया दिवड्ढसत्तभागमि
त्यादौ तु नपुंसकनिर्देशः प्राकृतत्वात् नरकगतिनाम्नो जघन्यतः सागरोपमसहस्रस्य द्वौ सप्तभागौ किमुक्तं भवति सागरोपमस्य द्वौ सप्तभागौ स
हस्रगुणितौ भवत इत्युत्कृष्टा स्थितिर्विंशतिसागरोपमकोटीकोटीप्रमाणत्वात् तद्बंधस्य च सर्वजघन्यस्यासंज्ञिपंचेन्द्रियादावात् असंज्ञिपंचेन्द्रियक २८०

र्मबंधस्य जघन्यस्य एकेंद्रियजघन्यकर्मबंधापेक्षया सहस्रगुणत्वात् तावद्यथास्थितश्चायमर्थो वैक्रियषट्कं यदेवगतिनाम्नो जघन्यतः साग
रोपमसहस्रस्यैकः सप्तभागः सहस्रगुणित इति भावः एवमुत्कृष्टा स्थितिर्दश सागरोपमकोटीकोट्यः ततः प्राकृतकरणवशादेकः सागरोपमस्य
सप्तभागो लब्धः तं च पुनरसंज्ञिपंचेन्द्रियस्यैति सहस्रगुणितः देवगतिनामस्स उक्कोसेणं जहा पुरिसवेयस्स इति दश सागरो
पमकोडीओ दस वाससयाइं अबाहा अबाहूणिया कम्मनिसेगो इति वक्तव्यमिति भावः द्वीन्द्रियजातिनामस्स जहन्नेणं नव पणतीसइभा
गा पलिओवमस्स असंखेज्जइभागेणं ऊणगा इति द्वीन्द्रियजातिनाम्न उत्कृष्टा स्थितिरष्टादश सागरोपमकोटीकोट्यः अष्टादशसूक्ष्मवि
गलत्रिकादिति वचनात् ततोऽष्टादशानां सागरोपमकोटीकोटीनां मिथ्या त्वस्योत्कृष्टया स्थित्या सप्ततिसागरोपमकोटीकोटीप्रमाण
या भागो ह्रियते लब्धाश्च न लभ्यते ततः शून्यं शून्येन पातयेत् जाता उप रि अष्टादश अधस्तात् सप्ततिस्तयोरर्द्धेनापवर्तना लब्धा न
व पंचत्रिंशद्भागास्ते पल्योपमासंख्येयभागोनाः क्रियंते आगतं भवत्या रूपपरिमाणमिति एवं त्रिचतुरिंद्रियजातिनामस्स वि अ
पि भावनीयं वैक्रियशरीरनामस्स जहन्नेणं सागरोवमसहस्सस्स दो। सत्तभागा पलिओवमस्स असंखेज्जइभागेणं ऊणगाइ
ति इह वैक्रियशरीरनाम्न उत्कृष्टा विंशतिसागरोपमकोटीकोट्यः स्थितिस्ततः प्राकृतकरणवशेन जघन्या स्थितिर्विंशत्या तस्या द्वौ सागरोपम
स्य सप्तभागौ लभ्येते परं वैक्रियषट्कमेकेंद्रियविकलेन्द्रिया न बध्नन्ति किं त्वसंज्ञिपंचेन्द्रियादयः असंज्ञिपंचेन्द्रियाश्च जघन्यतोऽपि बंधकर्वा
णा एकेंद्रियबंधापेक्षया सहस्रगुणं बध्नंति पणवीसा पन्नासा सयं सहस्सं च गुणकारा इति वचनात् ततो द्वौ सागरोपमस्य सप्तभागौ प्राकृतकर
णवशाल्लब्धौ तौ सहस्रेण गुण्येते ततः सूत्रोक्तपरिमाणं भवति सागरोपमस्य द्वौ सहस्रौ सप्तभागानां सागरोपमसहस्रस्य द्वौ सप्तभागाविति तियको
र्थः आहारकशरीरनाम्नो जघन्यतोऽन्तःसागरोपमकोटीकोटी उत्कर्षतोऽप्यन्तःसागरोपमकोटीकोटी नवरं जघन्यादुत्कृष्टं संख्येयगुणं द्रष्टव्यमन्ये
त्वाहारकचतुष्कस्य जघन्यतोऽन्तर्मुहूर्त्तमिच्छंति तदयुक्तं यतः पुव्वय अट्ठवा सा अट्ठमजुत्ता उ सुहुमगाथायां साया बारस आहारविग्घवरणाणं किंचूणं

अवकिंचूर्णमिति अंतर्मुहूर्त्तमित्यर्थः तदेवं तावत्केवलिनाविदितं तथा शरीरपंचकस्य जघन्यतः उत्कर्षतश्च स्थितिपरिमाणमुक्तं तेनैव क्रमेण शरीरबंधन
पंचकस्य शरीरसंघातपंचकस्य च वक्तव्यं तथा चाह शरीरबंधननामापि पंचविधं च शरीरसंघातनामापि विज्ञेयं इति वज्रर्षभनाराचसंघयणनामाप
ऋषभनाराचनामापि इति वज्रर्षभनाराचसंहनननाम्नो यथा प्रकृतिनाम्नो मोहनीयतुल्या उत्कृष्टा यथावज्रर्षभनाराचसंघयणनाम्नो
कर्मस्थितिः स्वकाले अपि पंचदशसागरोपमा जघन्यतः पल्योपमासंख्येयभागेनोनं अंतर्मुहूर्त्तं ऋषभनाराचसंहनननाम्नः दशसागरोपमकोटाकोटी
इति ऋषभनाराचस्य द्वादशसागरोपमस्य पल्योपमासंख्येयभागेन ऊना जघन्या स्थितिः ऋषभनाराचसंहननस्य उत्कृष्टा स्थितिः द्वादश
सागरोपमकोटीकोटयः सा मिथ्यात्वस्थित्या सप्ततिसागरोपमकोटीकोटी प्रमाणया भागे हृते यल्लब्धं तत्र नाराचसंहननात् शून्यं शून्येनापात
यित्वा छेद्यच्छेदकराशिभ्यां नाराचसंहनननाम्नः षट् सागरोपमस्य पंचत्रिंशद्भागाः ६/३५ पल्योपमासंख्येयभागहीनाः क्रियंते
एवं नाराचसंहनननाम्नो जघन्या स्थितिः सागरोपमस्य पंचत्रिंशद्भागाः ७/३५ पल्योपमासंख्येयभागहीनाः उत्कृष्टा स्थितिः
अर्द्धनाराचस्य सागरोपमकोटीकोटीप्रमाणत्वात् अर्द्धनाराचसंहनननाम्नः ७/३५ सप्त पंचत्रिंशद्भागाः ८/३५ पल्योपमासंख्येयभागोना उत्
कृष्टस्थितिः षोडशसागरोपमकोटीकोटीप्रमाणत्वात् कीलिकासंहनननाम्नो नव पंचत्रिंशद्भागाः ९/३५ पल्योपमासंख्येयभागहीना उत्कृ
ष्टस्थितिरष्टादशसागरोपमकोटीकोटीप्रमाणत्वात् सेवार्त्तसंहनननाम्नः संस्थानषट्कं संस्थानषट्कस्य च यथा संहननषट्कस्य स्थितिपरिमाणमुक्तं तेनैव क्र
मेण संस्थानषट्कस्यापि वक्तव्यं तथा चाह एवं जहा संघयणनामा छप्पि भणिया एवं संठाणा छप्पि भाणियव्वा उत्कृष्टाश्च संस्थानकसंहननानां उ
दशमदशदशद्वादशादि इति शेषः शुक्लवर्णनाम्नः हरिद्रवर्णनाम्नः लोहितवर्णनाम्नः ... सागरोपमस्य पंचअष्टावीसइभागा पलिओवमस्स असंखेज्जइभागेण ऊणगा इति
हारिद्रवर्णनाम्नः सार्द्धद्वादशसागरोपमकोटीकोटयः तथाहि शुक्लसुरभिमधुररसानां दशसागरोपमकोटीकोटयः सप्तविंशतिः ... अर्द्धहारिद्रवर्ण
अवधिलाभ ... तासां मिथ्यात्वस्थित्या सप्ततिसागरोपमकोटीकोटीप्रमाणया भागे हृते यल्लब्धं तत्र शून्यं शून्येनापात्यते छेद्यच्छेदकराशिभ्यां

सा इति सामस्त्येन तत्र अर्द्धभागकरणार्थं च उपरितनराशिस्त्रिगुण्यते जातानि पंचाशीतिः अधस्तनोऽपि च अष्टाविंशतिरूपो राशिस्त्रिगुण्यते जाता अशीतिश्चतुरधिका ततो मिथ्यात्वपि
त्या स्थित्या सप्तत्या भागे हृते लब्धाः पंच अष्टाविंशतिभागाः ५/२८ ते पल्योपमासंख्येयभागहीनाः क्रियंते आगतं हारिद्रवर्णपरिमाणं अत्यावेदिता निश्चयेन
लोहितवर्णनाम्नो जघन्या स्थितिः षट् अष्टाविंशतिभागाः पल्योपमासंख्येयभागहीना उत्कर्षतस्तु अस्य स्थितिः पंचदशसागरोपमकोटीकोटीप्रमाण
त्वात् नीलवर्णनाम्नः सप्त अष्टाविंशतिभागाः पल्योपमासंख्येयभागहीना उत्कर्षतस्तु अस्य स्थितिः सार्द्धसप्तदशसागरोपमकोटीकोटीप्रमाणत्वात् पलि
वत्रोया कालवर्णनाम्नो जघन्या सेवार्त्तसंघयणस्सेति सेवार्त्तसंहननस्येव जघन्यतो दोसागरोपमस्य सप्त भागा पल्योपमासंख्येयभागहीना
उत्कर्षतो विंशतिसागरोपमकोटीकोटयः ऋषभवर्णनाम्नोऽपि वक्तव्या इति भावः सुरभिगंधनाम्नः शुक्लवर्णनाम्न इव वक्तव्या दुरभिगंधनाम्नः सेवार्त्तसंहननस्य तथा तत्रापि
रात्रेदस्थले इति च दुरभिगंधनाम्नो यथा सेवार्त्तसंहननस्य तथा तत्र अभ्यासि त्रिंशत्सागरोपमान्तर्गतोऽधिकोनकस्यादि
णियंतव्यं परि वाडीए नाणियव्वा तिक्तादीनां परिपाट्या क्रमेण वक्तव्या यथा वर्णनाम्नां उक्तं यथावर्णनाम्नां उक्तं तथैवं मधुररसनाम्नो
जघन्या स्थितिः सागरोपमस्य सप्तभागाः पल्योपमासंख्येयभागहीना उत्कर्षतो दशसागरोपमकोटीकोटयो दशवर्षशतान्यबाधा
अबाधाहीना कर्मस्थितिः कर्मदलिकनिषेकः अम्लरसनाम्नो जघन्यतः पंच सागरोपमस्याष्टाविंशतिभागाः पल्योपमासंख्येयभागहीनाः
उत्कर्षतः सार्द्धद्वादशसागरोपमकोटीकोटयः सार्द्धद्वादशवर्षशतान्यबाधा कषायरसनाम्नो जघन्यतः षट् अष्टाविंशतिभागाः सागरोपमस्य पल्यो
पमासंख्येयभागोना उत्कर्षतः पंचदशसागरोपमकोटीकोटयः पंचदशवर्षशतान्यबाधा कटुकरसनाम्नो जघन्यतः सप्त सागरोपमस्याष्टाविंश
तिभागाः पल्योपमस्याष्टाविंशतिभागाः पल्योपमासंख्येयभागहीना उत्कर्षतः सार्द्धसप्तदशसागरोपमकोटीकोटयः सार्द्धसप्तदशवर्षशता
न्यबाधा तिक्तरसनाम्नो जघन्यतः सागरोपमस्य द्वौ सप्तभागौ पल्योपमासंख्येयभागहीनौ उत्कर्षतो विंशतिसागरोपमकोटीकोटयो वि
ंशतिवर्षशतान्यबाधा अबाधाकालहीनश्च कर्मदलिकनिषेक इति स्पर्शा द्विविधाः प्रशस्ता अप्रशस्ताश्च तत्र प्रशस्ता मृदुलघुस्निग्धोष्णाः

पञ्चसं० वृत्तिः॥

अप्रशस्तास्तु कर्कशगुरुरूक्षशीतरूपाः प्रशस्तानां जघन्यतः स्थितिरेकस्य सागरोपमस्य सप्त भागाः पल्योपमासंख्येयभागहीना उत्कर्षतो दश सागरोपमको-
टीकोट्यो दश वर्षशतान्यबाधा अबाधाकालहीना कर्मस्थितिः कर्मदलिकनिषेकः अप्रशस्तानां जघन्यतो द्वौ सागरोपमस्य सप्तभागौ पल्यो-
पमासंख्येयभागहीनौ उत्कर्षतो विंशतिसागरोपमकोटीकोट्यो विंशतिवर्षशतान्यबाधा अबाधाकालोना कर्मस्थितिः कर्मदलिकनिषेक
ः तथा चाह फासा लहुअण संठाणतिसिंहदासि वहस्सा ऊपसंठाणतिसिंहदासुकिलवण्णनामस्स तिन्निकाउपुव्वीनाम्नो जघन्यतः सागरोपमस्य सप्त
भागौ द्वौ सागरोपमसप्तभागौ सहस्रगुणिताविति भावः नावनानरकगतिवन्नावर्णितव्या मनुष्यानुपूर्वीनाम्नस्तु जघन्येन सागरोपमस्य
द्वौ सप्तभागौ पल्योपमासंख्येयभागेनोनौ उत्कृष्टस्थितिः पंचदशसागरोपमकोटीकोटीप्रमाणत्वात् उक्तं च नरयाविती सं
कोडाकोडी असायआवरणअंतरायाणं मिच्छमयराइ बीसमणुदुगम। याण पन्नरस दुपुव्वीनाम्नो जघन्यत एकः सागरोपमस्य स
प्तभागः सहस्रगुणितः पल्योपमासंख्येयभागहीन उत्कर्षतो द्वि तत्स्थितिर्दशसागरोपमकोटीकोटीप्रमाणत्वात् तथा
चोक्तं उरलसरीरउवंगछेवट्टनामइति विरइअच्छेदवडगदसमसमाणवीसाए वइयाचाहवासमयाबंधस्य जघन्यतः संज्ञिपंचेंद्रियइ
तितथा सूक्ष्मनाम्नस्त्रिके जघन्यतो नव सागरोपमासंख्येयभागहीना द्वीन्द्रिय जातिनाम्नश्च भावनीयाः सूक्ष्मनाम्नोऽप्युत्कर्षतः स्थितिरष्टादश सागरो-
पमकोटीकोटीप्रमाणत्वात् अठारस सुहुमविगलतिगे इति वचनात् एवमपर्याप्तसाधारणनाम्नोरपि भावनीयं बादरप्रत्येकनाम्नोस्तु जघन्यतो द्वौ
सागरोपमस्य सप्तभागौ पल्योपमासंख्येयभागहीनौ उत्कर्षतो विंशतिः सागरोपमकोटीकोट्यः तथा चाह बायरनामए जहा अपसत्थविहाय
गईनामाए एवं पज्जत्तनामाए विउव्वादिथिरसुभनामासुभजसुदयरूपाणामपि नाम्नां जघन्यतः स्थितिरेकः सागरोपमस्य सप्तभागः पल्योपमा-
संख्येयभागोनः यशःकीर्तिनाम्नस्तु जघन्यतोऽष्टौ मुहूर्ताः अट्ठमुहुत्ता जसुच्चागोयाणमिति वचनात् उत्कर्षतस्तु दश सागरोपमकोटीको-
टयः थिरसुभछक्कदेवडगदसमिति वचनात् अस्थिराशुभदुर्भगदुःस्वरानादेयायशःकीर्तिनाम्नां तु जघन्यतो द्वौ सागरोपमस्य सप्तभागौ पल्यो- 202

पमासंख्येयभागहीनौ उत्कर्षतो विंशतिसागरोपमकोटीकोट्यः एवं निर्माणनाम्नोऽपि वक्तव्यं तीर्थकरनाम्नो जघन्यतोऽन्तः सागरोपमको-
टीकोटी उत्कर्षतोऽप्यन्तः सागरोपमकोटीकोटी ननु यदि जघन्यतोऽपि तीर्थकरनाम्नोऽन्तः सागरोपमकोटीकोटीप्रमाणा स्थितिस्तर्हि तावत्याः
स्थितेस्तिर्यग्भवभ्रमणमन्तरेण पूरयितुमशक्यत्वात् कियन्तं कालं तीर्थकरनामकर्मापि तिर्यग्भवेत् अथ च सा तिर्यग्गतौ निषिद्धा यथोक्तं निरएसु
न ष्ठितितियरनामसंतं तिदसियं समएकहयतिरिउगतिदोहा अयरावमकोडिकोडिए इति ततः कथमेतदिति उच्यते इह यज्जिनाविनातीर्थ
करनामकर्म तिर्यग्गतौ सत्तायामिति निषिद्धं यत्पुनरुद्वर्तनापवर्तनासाध्यं तदवदपि तिर्यग्गतौ न विरोधमाश्रुयंदति तथा चोक्तं जिननिकाइय
तिरियनवतं निसिद्धियं संतइयरम्मि नत्थि विरोहो उव्वट्टणा साइ इति गाथेत रायसूत्राणि सुप्रतीतानि नवरमंतराइयस्स णं पुच्छा इति एवं प्रकार
स्यापीति वाक्यशेषः निर्वचनमपि एवं प्रकारस्यापि इष्टव्यं तदेव मुक्तं जघन्यत उत्कर्षतश्च सामान्यतः सर्वासां प्रकृतीनां स्थितिपरि
माणं सांप्रतमेकेंद्रियानधिकृत्य तामेव दर्शयितुमाह ७ ए गिंदियाणं तेऊ वीवाणं नाणावरणिज्जस्स कम्मस्स किं
बंधति इत्यादि ज्ञानावरणीयस्य कर्मणो या उत्कृष्टा स्थितिः प्राग् निर्दिष्टा तस्या मस्या मिथ्यात्वस्थित्या सप्ततिसागरोपमकोटीको
टीप्रमाणया भागे हृते यल्लभ्यते तत्पल्योपमासंख्येयभागहीनं जघ न्या स्थितिः सैव पल्योपमासंख्येयभागरहिता उत्कृष्टेति एतदुप-
रितासमकलमप्येकेंद्रियपदं सूत्रकृत्परिभावनीयं तथापि विनेयजनानुग्रहाय किंचिल्लिख्यते ज्ञानावरणपंचकदर्शनावरणनवकासा-
तावेदनीयान्तरायपंचकानां नवकानां जघन्यत एकेन्द्रियाणां स्थितिबंध त्रयः सागरोपमस्य सप्तभागाः पल्योपमासंख्येयभागहीनाः उत्कृष्ट
तस्त एव परिपूर्णाः सातावेदनीयस्त्रीवेदमनुष्यगतिमनुष्यानुपूर्वीणां जघन्यतः सार्धः सागरोपमस्य सप्तभागः
पल्योपमासंख्येयभागहीन उत्कर्षतः स एव सार्धः सप्तभागः परिपूर्णः मिथ्यात्वस्य जघन्यत एकं सागरोपमं पल्योपमासंख्येयभागहीन
मुत्कर्षतः स एव परिपूर्णः सम्यक्त्ववेदनीयस्य सम्यग्मिथ्यात्ववेदनीयस्य च न किंचिदपि बन्ध इति न किंचिदपि वक्तव्यमनयोः प्रदेशोः सह

पञ्चा०वृत्ति॥

बध्यंतीतिभावः पंचेंद्रियाणां सम्यक्त्ववेदनीयस्य सम्यक्त्वमिथ्यात्ववेदनस्य वा संख्येयानुयुक्तसाकाउंबंधः सम्यक्त्वस्य मिथ्यात्ववेदनयोरनर्घं तत एव तिप्रा
गवाभिहितकषायाणां कस्याजघन्यतस्थावरः सागरोपमस्य सप्तभागाः पल्योपमासंख्येयभागहीना उत्कर्षतस्त एव परिपूर्णाः उत्कर्षवेदनास्य
तिप्रज्ञाप्तविहायोगतिस्थिरादिषट्कप्रथमसंस्थानप्रथमसंहननशुक्लवर्णसुरभिगंधमधुररसोच्चैर्गोत्राणां जघन्यतः एकसागरोपमस्य सप्तभागाः पल्यो
पमासंख्येयभागहीना उत्कर्षतः स एव परिपूर्णः द्वितीयसंस्थानसंहननयोर्जघन्यतः षट्पंचत्रिंशद्भागाः पल्योपमासंख्येयभागहीनाः उत्कर्षतस्त एव
परिपूर्णाः तृतीयसंस्थानसंहननयोर्जघन्यतः सप्तसागरोपमस्य पंचत्रिंशद्भागाः पल्योपमासंख्येयभागहीना उत्कर्षतस्त एव परिपूर्णाः लोहित
वर्णकषायरसयोः षट्सागरोपमस्याष्टाविंशतिभागाः पल्योपमासंख्ये यभागहीनाः उत्कर्षतस्त एव परिपूर्णाः नीलवर्णकटुरसयोः साग
रोपमस्याष्टाविंशतिभागाः पल्योपमासंख्येयभागोनाः उत्कर्षतस्त एव परिपूर्णाः नपुंसकवेदनपुंसकानुप्राश्याहारकतिर्यग्मोदार
कद्विकचरमसंस्थानचरमसंहननकृष्णवर्णतिक्तकटुरसागुरु लघुपराघातोच्छ्वासोपघातत्रसबादरपर्याप्तप्रत्येका
स्थिरास्थिरशुभाशुभदुर्भगदुःस्वरानादेयायशःकीर्तिस्थावरातपोद्योतानाम्। नविहायोगतिनिर्माणैकेंद्रियजातितैजसकार्मणानामजघ
न्यतो द्वौ सागरोपमस्य सप्तभागौ पल्योपमासंख्येयभागहीनावुत्कर्षत स्तावेव परिपूर्णाविति नरकद्विकदेवद्विकवैक्रियचतुष्टयाहारक
चतुष्टयतीर्थकरनाम्नां वैकेंद्रियाणां न बंधः आयुःस्थितावपि एकेंद्रिया देवायुर्नैरयिकायुर्वा न बध्नंति तथाभवस्वाभाव्यात् किंतु तिर्यगायुर्मनु
ष्यायुर्वा तदपि च बध्नंतो जघन्यतः क्षुल्लकभवं उत्कर्षतः पूर्वकोटिप्रमाणं नाधिकं केवलमुत्कृष्टं स्थित्यात इत्येकेंद्रिया द्वाविंशतिवर्षसहस्रप्र
माणायुषः स्वायुषस्त्रिभागावशेषे परभवायुर्बध्नंति परिभाव्यंते इति सप्तवर्षसहस्राणि वर्षसहस्रत्रिभागेनाभ्यधिकानि लभ्यंते ततो न्नवति।
तिर्यगायुर्मनुष्यायुःस्थितावंसकपरिमाणमिति उक्तमेकेंद्रियबंधकानधिकृत्य जघन्यत उत्कर्षतश्च स्थितिपरिमाणं संप्रति द्वींद्रियानधिकृत्य तदभि
धित्सुराह व द्वींद्रियाणां तेत्रींद्रियाणां द्वाविंशत्यादि [illegible] कर्मणामायाया स्थितिरुत्कृष्टा प्रागभिहितानितानस्यापि मिथ्यात्वस्थित्या सप्ततिसाग २०३

रोपमकोटीकोटीप्रमाणया भागे हृते यल्लभ्यते तत्पंचविंशत्या गुण्यते गुणितं च सत् यावद्भवति तावत्पल्योपमासंख्येयभागहीनं द्वींद्रियाणां बंध
कानां जघन्या स्थितिपरिमाणं तदेव परिपूर्णमुत्कृष्टा स्थितिपरिमाणं तद्यथा ज्ञानावरणपंचकदर्शनावरणनवकसातवेदनीयांतरायपंचकानां त्रयः सा
गरोपमस्य सप्तभागाः पंचविंशत्या गुणिताः व सप्तहृताः पंचविंशतिः सागरोपमाणां त्रयः सप्तभागाः पल्योपमासंख्येयभागहीना जघन्या स्थितिबंधप
रिपूर्णमुत्कृष्टमित्यादि त्रींद्रियबंधचिंतायां तदेव भागपंचाशता गुण्यते चतुरिंद्रियबंधचिंतायां शतेन असंज्ञिपंचेंद्रियचिंतायां सहस्रेण आह
च कर्मप्रकृतिसंग्रहणिकारः पणुवीसा पण्णासा सयं सहस्सं च गुणकारा कमसो विगलअसण्णीणमिति ततएतदनुसारेण सूत्रं स्वयं तिगमव्यत्र।
वरं सागरोवमपणवीसा पणति भिमतस्तागापलिअवमस्सअसंखभागा णंऊणमाइति अवयवार्थस्त्वयं पंचविंशतिः सागरोपमाणां
सप्त निर्भाग क्रियमाणे यल्लभ्यते नवगुणाः कृत्य पल्योपमासंख्य यभागहीनं क्रियते इत्येवं सर्वत्रापि यथायोगं भावनीया
कर्मणां संज्ञि संज्ञि बंधकस्य ज्ञानावरणीयादिकर्मणां जघ न्यतः स्थितिबंधः सप्तदशादिपरिमाणं रूपकस्य सूक्ष्म
संपरायस्य प्रतिपन्नत्वः निद्रापंचकासातवेदनीयमिथ्यात्वकषाय द्वादशकादीनां तु क्षपणादर्वाक् बंध इति तेषां जघन्यतोऽपि
तः सागरोपमकोटीकोटीप्रमाणत्वात् मिथ्यादृष्टेः सर्वसंक्लिष्टस्य। नवरं तिर्यग्मनुष्यदेवायुस्तेषां शुभबंध इति सुहृत्ये ति इह संज्ञि
पंचेंद्रियस्य ज्ञानावरणीयादिकर्मणां जघन्यः स्थितिबंधोऽंतर्मुहूर्तादिपरिमाणंउक्तः सकस्मिन् स्वामिनि लभ्यते इति जिज्ञासुः प्रश्नति नाणा
वरणित्यादि ज्ञानांतरायकर्मस्य जघन्यस्थितिबंधपक इत्यादि सूक्ष्मसंपरायस्य ततः सूक्ष्मसंपराय इति उत्कृष्टस्य सूक्ष्मसंपरायकस्य उपशामकस्य क्षपकस्य वा सू
क्ष्मसंपराय इति उक्तमस्य व्याख्यानं क्षपकउपशामकोवा सूक्ष्मसंपरायइह ज्ञानावरणस्य बंधक क्षपकस्य उपशामकस्य वा जघन्यतां त्र
मुहूर्तप्रमाणमतः उक्तं सूक्ष्मसंपरायविशेषात् उपशामको वा क्षपको वा इत्युक्तमनुयात् क्षपकापेक्षया उपशामकस्य बंधो द्विगुणो विदितव्यो
यत आह कर्मप्रकृतिसंग्रहणिकारः खवगुवसामगपडिवयमाणाडु गुणो तहिं तहिं बंधो इति ततो वेदनीयस्य सांपरायिकबंधचिंतायां

वक्रा० वृत्ति

जघन्यस्थितिबंधः क्षपकस्य द्वादश मुहूर्ताः उपशामकस्य चतुर्विंशतिः नामगोत्रयोर्जघन्यतः क्षपकस्याष्टौ मुहूर्ताः उपशामकस्य षोडश अपरं उपशा
मकस्यापि जघन्यो बंधः शेषबंधकापेक्षया सर्वजघन्य इति तस्य तद्विशेषं उपरितनेषु सूक्ष्मसांपरायं च समस्तं वा सव्वगोवाड इति वक्ष्यति तथा च वक्ष्यति
एवणं अनिलादीणं सादादीणं उच्चाणं सम्मत्ताणं णीलाणिय बंधित्तु पमत्तो सूत्र तत्र इति तिष्णं ऊणं पंचइति तद्वृत्ति क्षपकोपक्रमकस्य सूक्ष्म
परायस्य तिर्यक्तो जघन्यो जघन्यस्थितिबंधकः आयुर्बंधकस्तत्र जीवस्य संक्षिप्तोत्पत्तिं ठइत्यादि इह विभाजीवाः सोपक्रमायुष्का
निरुपक्रमायुष्कास्तत्र देवनारकाः असंख्यातवर्षायुष्का मनुष्याः संख्यातवर्षायुषो ... समुत्पद्यन्ते चरमशरीरिणश्च
निरुपक्रमायुष्काः शेषास्तु सोपक्रमायुषो निरुपक्रमायुष्कं वदे वानरा इत्यादिना नरदेवासंख्यातायुस्तिर्यङ्मनुष्याः तत्र मनुष्य
साधनाश्च नरकं नारीपरित्रिसमवक्रमा संसारसमारंभात् इत्यादिना वक्र माव इत्यादिरेव सा च क्रमतो निरुवक्रमा शेषा ततो उत्कृष्टसामान्यं
नारदेवा नैरयिका असंख्यातवर्षायुष्कास्तिर्यग्मनुष्याश्च ... भाव शेषाणां षष्मासावशेषायुः पारभविकायुर्बंधका येऽनपवर्त्य
मनुष्याः संख्यातवर्षायुषोऽपि निरुपक्रमायुष्का नियमात् त्रिभागाव शेषायुषः परभवायुर्बंधंति ये तु सोपक्रमायुषस्तस्यात् त्रिभा
गावशेषायुष्कत्रिभागत्रिभागावशेषायुषो यावदसंक्षेपाद्धाप्रविष्टाः तितत्रावशेषेणं जीवइत्यादि प्रमाणमितिवाक्यालंकारे जीवाः
संक्षेपाद्धाप्रविष्टः त्रिभागादिनाप्रकारेण यावत् संक्षेप्तुं न शक्यते सा संक्षेपाद्धा सा च सोऽसावसंख्यातप्रमाणप्रविष्टः असंक्षेपाद्धाप्रवि
ष्टः अतः आह सतस्य संक्षेपाद्धाप्रविष्टस्य जीवस्यायुः सर्वनिकृष्टोपक्रमादृते अनिरसि संक्षिप्तः क्रतं आयुर्बंधनिवर्तनमात्रएव कालः तस्याधिनपरतोऽजी
वनकाल इति भावः एतदेवस्पष्टतरं आह सोऽसमयमहता एवआयुर्बंधहान इह सर्वमहतः आयुर्बंधहासाच्च अष्टकषप्रमाणात्स्याः शेषएकाकर्षप्रमा
णतावमात्रं सर्वनिकृष्टं तस्यायुर्वर्तत इति भावस्ततः संख्यातप्रविष्टः सइहोत्तरस्य आयुर्बंधहासाच्च परमकाल समय परमकालावसानैकाक
र्षप्रमाणाद्यत्र चरमसमयकालश्ररणनपरमनिकृष्टः समयः परिशेष्यात किंतुयावात्क्षपः कालमातावेतेन कालेनायुर्बंधस्यासंभवात् यतः ऊक्षा २०४

कृत्कृत्ताणं तिण्णदरजीवाणं तत्तविद्धना मिति हि न्नातयकरइहिं आगरिसहिं एकादइसोयमाजहण्णं इत्कण्णं तत्कालसणं अट्ठहिं आगरिसहिं इति एकत
घोकाद्धेणायुर्निवर्त्तयति सर्वजघन्यायत आह सर्वजघन्यमिति सर्वजघन्यां सर्वलघ्वीं स्थितिमिति गम्यते निर्वर्त्तयति बध्नातीति भावः किंविशिष्टमि
त्याह पर्याप्तापर्याप्तिकाः शरीरेंद्रियपर्याप्तिनिर्वर्त्तनसमर्थस्याप्तनिर्वर्त्तनसमर्थिकमामतदसंख्येयसर्वजघन्यामपिस्थितिं निर्वर्त्तयति जीवः शरीरेंद्रि
यपर्याप्तिनिर्वर्त्तनसमर्थानंतता शतनराभिति व्रितनुत्यात इक्विवशा नधादिइह सर्वपवादहिन परमवायुर्बंधाः श्रियंते नान्यथा परभवायुर्बंध अदा
रिकेवैक्रियआहारकवाययोगवर्तमानस्य तकार्मण अदारिकादिमिश्रवा नथा वाह मूलटीकाकारः जेण वालियाइणं तियाईणं तिण्हं शरीराणं
कायायोगावट्टमाणो आउयबंधगोनकम्मएतुरालियाइमिस्सवा इति अदारि कादिकाययोगाश्च विशिष्टो नवमिश्रशरीरेंद्रियपर्याप्त्यापर्याप्त
स्यनाकेवलं शरीरपर्याप्त्यापर्याप्तस्य ततएतन्निद्दं शरीरपर्याप्त्या इंद्रियपर्या प्त्या इंद्रियपर्याप्त्यापर्याप्तस्य मरणं नान्यत्सर्वजघन्याम
पिस्थितिं निर्वर्त्तयपर्याप्तिनिर्वर्त्तनसमर्थानंततापिहीनतराभिति एसणं गायमत्याक्षप संहाररवाक्यं तदवमुक्तो जघन्यस्थि
तिबंधकः संप्रत्युत्कृष्टस्थितिबंधकं पृच्छति उक्कोसकालठिइयणं भंते णाण १वरणिज्जकम्मं किं नेरइउ बंधइत्यादि सुगमं नेरयिकस्स
इसाणगाइव विसा क्का लोएवुक्कः इणगाइति इयउत् नारकाणामपिकियानपिति इउनवोम्भितनुत्क्रं जाएदितिसुता वक्तव्वइति ज्ञातापत्नु
कः साभिलापज्ञातापत्नु इतिभावः तिर्यग्योनिकस्त्रवकर्मभूमगपलिभागीवाइति कर्मभूमगाः कर्मभूमिजातास्तेषां प्रतिभागः साहश्यं तद
स्यास्तीति कर्मभूमगप्रतिभागीकर्मभूमगसदृशइत्यर्थः कोसोइति चेत् उच्यते या कर्मभूमिजा तिर्यगस्त्री गर्भिणी सती केनाप्यपहृत्याकर्मभू
मोमुक्तात्स्याजातः कर्मभूमगसदृशाः अन्यतु आवद्धत कर्मभूमगएवयदाकेनाप्यकर्मभूमिजोनीतो भवति तदासकर्मभूमगप्रतिभागीत्यपदिश्य
तइतितत्रुत्कृष्टस्थितिकायुर्बंधं चिंतायां नैरयिकतिर्यग्योनिकस्त्रीदेवादवीनां प्रतिषेधस्तासामायुरुत्कृष्टस्थितिनरकादिष्वत्यन्तभावात् मनुष्यस्त्रवेस
म्यहिहीवामिथ्यादिहीवाइतिइह तत्रकृष्टे आयुषि तद्यथासप्तमनरकपृथिव्यायुर्बध्नाति तदामिथ्यादृष्टियदातु नरकसुरायुस्तदासम्यग्दृष्टिः कर्मलसं

प्रज्ञा०टी०त्रि०॥

वा नारकायुर्बंधकः कृष्णलेश्यावानिति अत्र नरकायुर्बंधकः सम्यग्दृष्टिरपि न भवति उत्कृष्टसंक्लिष्टपरिणामो नारकायुर्बंधकस्तथाप्ययं विशुध्यमानपरि
णामो नरकायुर्बंधकः मनुष्योऽपि सप्तमनरकपृथिवीयोग्यमायुः कर्म बध्नातीति अत्र नरकायुःशुभं बध्नातीति तत्र तु सर्वप्रशस्तवर्णादय इति विशुद्ध्यमान आयुर्बंधमे
वं करोतीति तस्यायोग्यग्रहणाद्दोषः कश्चित् ॥ इति श्रीमलयगिरिविरचितायां प्रज्ञापनाटीकायां त्रयोविंशतितमं कर्मप्रकृत्याख्यं पदं परिसमा
प्तं ॥ ॥ व्याख्यातं त्रयोविंशतितमं पदं संप्रति चतुर्विंशतितममारभ्यते तस्य चायमभिसंबंधः इहानंतरपदे कर्मबंधादिरूपः परिणामविशेषश्चिं
तितः एवमस्यापि प्रकृतित्वात् प्रकृतिबंधविचित्रता चतुर्विंशतितमस्य पदस्यादिमं सूत्रं ॥ कइ णं भंते कम्मपयडीओ पण्णत्ताओ इत्यादि
प्रागुपन्यस्तस्यापि व्याख्या प्राग्वत् विशेषाभिधानार्थः एवमुत्तरेष्वपि पदेषु भावनीया यं संप्रति किं कर्म बध्नन् कति कर्माणि बध्नातीति बंधसंबंधवि
चिंतितुः प्रथमतो ज्ञानावरणीयेन सह बंधं चिंतयति जीवे णं भंते णाणाव रणिज्जं कम्मं बंधमाणे कइ कम्मपयडीओ बंधइ इत्यादि सु
गमं नवरं सप्तविधबंधक आयुर्बंधकालादन्यत्र अष्टविधबंधक आयुरपि । बध्नन् षड्विधबंधको मोहायुर्बंधाभावात् सूक्ष्मसंप
रायगुणके सप्तविधबंधकालो न तिष्ठति णाणाआउवज्जाणं तु तहेव उक्कोसं । परायाद्विहबंधा विणिद्दिट्ठा मोहाउयवज्जाणं पयडीणं
तं बंधमाणीयाइ इति एकविधबंधकस्तु न लभ्यते एकविधबंधकादित्रयं न कषायादयसद्भावाच्च उपशांतक्षीणमोहा केवलिणोऽग
विहबंधा तद्गुणेषु समयविहिय सद्बंधका उपशांतकषायादयो ज्ञानावरणीयकर्म बध्नंतीति बंधस्य सूक्ष्मसंपरायचरमसमयप
र्यवसानत्वात् किंतु केवलं सातवेदनीयमिति एवं दर्शनावरणीयमपि नैरयिकादिदंडकक्रमेण चिंतयति नेरइए णं भंते इत्यादि इह मनुष्यवर्जेषु शेषेषु पदेषु
सर्वेष्वपि द्वौ विकल्पौ वक्तव्यौ सप्तविधबंधको वा अष्टविधबंधको वा इति न तु तृतीयः षड्विधबंधक इति सूक्ष्मसंपरायगुणस्थानासंभवात्
मनुष्यपदे त्रयोऽपि वक्तव्याः सूक्ष्मसंपरायत्वसंभवात् एवं ज्ञानावरणीयेन बध्यमानेन नव दंडका जीवादिकाः इति दंडकः एकवचनदंडकः संप्रति बहुवचनेन
इह जीवा णं भंते इत्यादि इह जीवाः सप्तविधबंधका अष्टविधबंधका अपि सदैव बहवो लभ्यंते षड्विधबंधकास्तु कदाचित् सर्वथा न भवंति षण्मासान् यावदुत्कर्ष

२०८

तस्तदंतरस्य प्रतिपादनात् यदापि लभ्यते तदापि जघन्यपदे एको द्वौ त्रयो वा उत्कर्षतः शतपृथक्त्वं तत्र यदा एकोऽपि न लभ्यते तदा प्रथमो भंगः यदा त्वेको
लभ्यते तदा द्वितीयो बहूनां लाभे तृतीय इति नैरयिकाः षड्विधबंधका न लभ्यंते सप्तविधबंधका अष्टविधबंधका अपि कादाचित्काः तत्र यदैकोऽप्यष्टविधबंधको न ल
भ्यते तदा सर्वेऽपि ते सप्तविधबंधका इति प्रथमो भंगः यदा त्वेकोऽष्टविधबंधकस्तदा द्वितीयो यदा तु बहवस्तदा तृतीय इति एतदेवं भंगत्रिकं दश
स्वपि भवनपतिषु तथा पृथिव्यादिषु पंचसु सप्तविधबंधका अपि अष्टविधबंधका अपीत्येक एव भंगः षड्विधबंधकानामपि सदैव तेषु बहुत्वेन ल
भ्यमानत्वात् द्वित्रिचतुरिंद्रियतिर्यक्पंचेंद्रियेषु तु भंगत्रिकं नैरयिकवत् मनुष्यसूत्रे भंगा नव कस्मात् अष्टविधबंधकस्य षड्विधबंधकस्य च कदाचि
त्सर्वथाप्यभावात् तत्र अष्टविधषड्विधबंधकाभावे सर्वेऽपि तावदिह ते सप्तविधबंधका इति सदैव बहुत्वेन प्राप्यमाणत्वात् एकोऽष्टविधबंधकस्ता
वद्द्वितीयः सप्तविधबंधकाश्चाष्टविधबंधकश्च बहवोऽष्टविधबंधका इति तृतीयः यः सप्तविधबंधकाश्चाष्टविधबंधकोऽश्च एवमेवाष्टवि
धबंधकानामेव षड्विधबंधकपदेनाप्येकवचनबहुवचनाभ्यां द्वौ भंगाविति द्विकसंयोगे चत्वारो भंगाः त्रिकसंयोगेऽष्टविध
बंधकषड्विधबंधकपदयोः प्रत्येकमेकवचनबहुवचनाभ्यां चत्वार इति सर्वसंख्यया नव व्यंतरज्योतिष्कवैमानिका नैरयिक
वत् यथा च ज्ञानावरणीयं चिंतितं तथा दर्शनावरणीयमपि चिंतयितव्यं वेदनीयचिंतायामेकविधबंधक इति उपशांतमोहादिः सयो
गिकेवली तु मनुष्यपदे विशेषचिंतायामपि एवमेव जीवपदे भंगाः सप्तविधबंधकानामेकविधबंधकानां च सदैव बहुत्वेन लभ्यमानत्वात् शेषस्य तथा भंगा इतरा सं
भवंति मोहचिंतायां जीवपदे पृथिव्यादिषु च प्रत्येकमेक एव भंगः सप्तविधबंधका अपि अष्टविधबंधका अपीति नैरयिकाणामपि सदैव ब
हुत्वेन लभ्यमानत्वात् षड्विधबंधकास्तु मोहनीयबंधका न भवंति मोहनीयबंधव्यवच्छेदे निबादरसंपरायगुणस्थानके यावत् षड्विधबंधक
स्तु सूक्ष्मसंपराय इति आयुर्बंधकस्तु नियमादष्टविधबंधक इति तच्चिंतायामेकवचनबहुवचनाभ्यां सर्वत्रापि भंगक नामगोत्रांतरायसूत्राणि ज्ञानाव
रणीयसूत्रवत् ॥ इति श्रीमलयगिरिविरचितायां प्रज्ञापनाटीकायां कर्मबंधाख्यं चतुर्विंशतितमं पदं समाप्तं ॥ ॥ संप्रति पंचविंशतितम

प्रज्ञापनावृत्ति॥

मारभ्यते तत्रेदमादिसूत्रं कइ णं भंते कम्मपयडीओ इत्यादि गतार्थं संप्रति किं कर्म बध्नन् कति कर्मप्रकृतीर्वेदयते इति चिंतयति जीवे णं भंते इत्या
दि सुगमं वेदनीयसूत्रे सप्तविधवेदको वा अष्टविधवेदको वा चतुर्विधवेदको वा इति सप्तविधवेदक उपशांतमोहः क्षीणमोहो वा तयोर्मो
हनीयोदयाभावात् अष्टविधवेदको मिथ्यादृष्ट्यादयः सूक्ष्मसंपरायांताः तेषामवश्यमष्टानामपि कर्मणामुदयभावात् चतुर्विधवेदकः सयो
गिकेवली तस्य घातिकर्मचतुष्टयोदयाभावात् बहुवचने सप्तविधवेदकाः कादाचित्का इति भंगत्रयं २ इति श्रीमलयगिरिविरचितायां प्रज्ञाप
नाटीकायां पंचविंशतितमं कर्मवेदाख्यं पदं समाप्तं २५ ॥ ॥अधुना षड्विंशतितममारभ्यते तत्रेदमादिसूत्रं कति णं भंते इत्यादि गतार्थं
संप्रति किं कर्म वेदयमानः काः कर्मप्रकृतीर्बध्नातीति वेदबंधस्य संबंधं विचिंतयिषुरिदमाह जीवे णं भंते नाणावरणिज्जं कम्मं वेएमाणे कइ
कम्मपयडीओ बंधइ इत्यादि सुगमं नवरं ज्ञानावरणीयं कर्म वेदयमान एकविधबंधकः उपशांतमोहः क्षीणमोहो वा सयोगिकेव
ली तस्य ज्ञानावरणीयोदयाभावात् बहुवचनचिंतायां षड्विधबंधका उपशांतमोहक्षीणमोहाः कादाचित्का एकत्वादिना
लाभ्यास्ततस्तेषामप्यभावे सप्तविधबंधका अपि अष्टविधबंधका अपीत्येको भंगः ततो गाढ्यानामपि सदैव बहुत्वेन लभ्यमानत्वात् तत
षड्विधबंधकपदप्रक्षेपे एकवचनबहुवचनाभ्यां द्वौ भंगाविति विधबंधकपदप्रक्षेपेऽपि तयोरपि सुगमत्वात् प्रक्षेपे सर्वसं
ख्यया नव नैरयिकादिषु पदेषु केवलमनुष्यवर्जेषु बहुवचनचिंतायां भंगत्रिकं अष्टविधबंधकानां कादाचित्कतया एकत्वादिना
लाभ्यतया वा लभ्यमानत्वात् एकेंद्रियेषु भंगकं सप्तविधबंधका अष्टविधबंधका अपीति तेषामपि सदा बहुत्वेन प्राप्यमाणत्वात् मनुष्यपदे तु सप्तविंश
तिर्भंगाः अष्टविधबंधकषड्विधबंधककानां कादाचित्कतया एकत्वादिना लाभ्यमानत्वात् तत्राभिलापाः सदैव सप्तविधबंधका इत्येको भंगः ततो
ऽष्टविधबंधकपदप्रक्षेपे एकवचनबहुवचनाभ्यां द्वौ द्वौ षड्विधबंधकपदप्रक्षेपे एकविधबंधकपदप्रक्षेपे इति मता तावत् अष्टविधबंधकषड्विधबंधकपदा
प्रक्षेपे चत्वारः अष्टविधबंधकैकविधबंधकपदप्रक्षेपे चत्वारः षड्विधबंधकैकविधबंधकपदप्रक्षेपे चत्वारः इति एकोनविंशतिः तत्राष्टविधबंधकषड्वि २०६

धबंधकैकविधबंधकपदानां युगपत्प्रक्षेपेऽष्टाविति सप्तविंशतिः वेदनीयसूत्रे एकविधबंधकः सयोगिकेवल्यपि तस्यापि वेदनीयोदयबंधसंभवात् अबं
धकोऽयोगिकेवली तस्य योगाभावात् वेदनीयं वेदयमानस्यापि तद्बंधासंभवात् वेदनीयसूत्रे एकवचनबहुवचनचिंतायां जीवपदे नवरं सप्त
सप्तविधबंधकाष्टविधबंधकैकविधबंधकानां सदैव बहुत्वेन लभ्यमानत्वात् बहुवचनात्मक इतरपदरहितो भाव एकः ततः षड्विधबंधकपदप्र
क्षेपे एकवचनबहुवचनाभ्यां द्वौ एवमबंधकैकविधबंधकपदप्रक्षेपे द्वौ एवमनयोः पदप्रक्षेपे इति मनुष्यपदे सप्तविंशतिः तत्र हि सप्तविधबंधका
एकविधबंधकाश्च केवलं सदा अवस्थिता इतरे तु त्रयोऽष्टविधबंधकाः षड्विधबंधकाः अबंधकाश्च कादाचित्का एकत्वादिना च लाभ्या अतस्तेषामभावे स
प्तविधबंधका अपि एकविधबंधका अपीत्येको भंगः ततोऽष्टविधबंधकपदप्रक्षेपे एकवचनबहुवचनाभ्यां द्वौ एवं षड्विधबंधकपदप्रक्षेपे
वा एकविधबंधकपदप्रक्षेपे इति षट् त्रयाणां पदानां योगे द्विकसंयोगे एकैकस्मिन् द्विकसंयोगे एकवचनबहुवचनाभ्यां
चत्वारः चत्वार इति द्विकसंयोगे द्वादश त्रिकसंयोगेऽष्टाविति सर्वसंख्यया सप्तविंशतिरेवमायुर्नामगोत्रसूत्राण्यपि भा
वनीयानि मोहवेदनीयं कर्म वेदयमानो जीवः सप्तविधबंधकोऽष्टविधबंधकः षड्विधबंधको वा सूक्ष्मसंपरायावस्थायामपि
मोहनीयवेदनसंभवात् एवं मनुष्यपदेऽपि बहुवचनेन नारकादिषु पदेषु सप्तविधबंधका अष्टविधबंधकाश्चेत्येवं वक्तव्याः सूक्ष्मसंपरायत्वाभावतः ष
ड्विधबंधकत्वासंभवात् बहुवचनचिंतायां जीवपदे भंगत्रिकं तत्र सूक्ष्मसंपरायाः कादाचित्का इतरे तु सदैव बहुत्वेन लभ्यंते इति षड्विधबंध
कपदाभावे सप्तविधबंधका अपि अष्टविधबंधका अपीत्येको भंगः ततः षड्विधबंधकपदप्रक्षेपे एकवचनबहुवचनाभ्यां द्वावित्येवं भंगाविति
नैरयिकादिषु स्तनितकुमारपर्यवसानेषु सप्तविधबंधकाः सदा बहुत्वेनावस्थिता अष्टविधबंधकास्तु कादाचित्का एकत्वादिना च लाभ्या इति
अष्टविधबंधकपदाभावे सप्तविधबंधका इत्येको भंगः ततोऽष्टविधबंधकपदप्रक्षेपे एकवचनबहुवचनाभ्यां द्वाविति त्रयः पृथिव्यादिषु पंचसु पुनरेकं सप्तवि
धबंधका अष्टविधबंधका अपीति तेषामपि सदा बहुत्वेन लभ्यमानत्वात् द्वित्रिचतुरिंद्रियतिर्यक्पंचेंद्रियव्यंतरज्योतिष्कवैमानिकेषु त्रि

नैरयिकवत् भंगत्रिकं मनुष्यपदेऽपि नव भंगाः तत्र सप्तविधबंधका इत्येको भंगः सप्ताष्टविधबंधकपदद्वयरूपे एकवचनबहुवचनाभ्यां द्वौ षड्विधबंधक
पदप्रक्षेपेण एकवचनबहुवचनाभ्यां वक्तव्याः चत्वार एव पदप्रक्षेपे इति तथा चाह जाव णामंसि हेवं पमाणं जहा बंधेणं णाणावरणिज्जं तहा णामगोयाणमिति ॥ ५
इति श्रीमलयगिरिविरचितायां प्रज्ञापनाटीकायां षड्विंशतितमं वेदबंधाख्यं पदं समाप्तं ॥ ॥ संप्रति सप्तविंशतितममारभ्यते तस्येदमादिसूत्रं क
इ णं भंते इत्यादि गतार्थं संप्रति किं कर्म वेदयमानः कति कर्मप्रकृतीर्वेदयत इत्येतदर्थस्यादावेव संबंधमभिधित्सुराह जीवे णं भंते णाणा
वरणिज्जं कम्मं वेदेमाणे कइ कम्मपयडीओ वेदेइ इत्यादि तत्र सप्तविधवेदकत्वे उपशांतमोहत्वे क्षीणमोहत्वे वा तयोर्मोहनीयोदयासंभवात् शेषस्तु सूक्ष्मसंपरा
यादिरष्टविधवेदकः एवं मनुष्यपदेऽपि वाच्यं नैरयिकादयस्तु नियमादष्टविधवेदकाः बहुवचनचिंतायां जीवपदे मनुष्यपदे च भंगत्रिकं वचनवि
तायां जीवपदे मनुष्यपदे च भंगत्रिकं तत्र सर्वेऽपि तावद्भवेयुरष्टविधवेदकाः इत्येको भंगः ततः सप्तविधवेदकस्य कस्यचिल्लाभे द्वितीयो
